नं. ३

काशिकावृत्तिः

जयन्तवामनौ

सं० १९०६ ६८३ पत्र

काशिका व्याकरण

अवेत प्रः हेपत्री:
पत्रांक हेरवखन भो।नि: पञ्च संख्या स्थिते
जगदीश्वर:

नं. ३

नं. ३
काशिकावृत्ति पत्र
[illegible]
सं. २००८
[illegible]

का॰
वृ॰ प्र॰
१

ॐ स्वस्त्यस्तु ॐ श्रीगणेशाय नमः ॐ नमो गुरवे ॐ नमः सरस्वत्यै ॐ येनाक्षरसमाम्ना-
यमधिगम्य महेश्वरात् कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः येन शब्दमहाम्भोधेः कृ-
तो व्याकरणप्लवः शाब्दरत्नार्थिनां लोके तस्मै पाणिनये नमः अज्ञानतिमिरान्धस्य ज्ञाना-
ञ्जनशलाकया चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः वृत्तौ भाष्ये तथा धातुनामपा-
रायणादिषु विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः अथ शब्दानुशासनं केषां शब्दानां
लौकिकानां च कथमनुशासनं प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता ल-
क्षणेन अथ किमर्थो वर्णानां उपदेशः प्रत्याहारार्थः प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः॥
अइउण् अ इ उ इत्यनेन क्रमेणैतान्वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थं तस्य
ग्रहणं भवत्येकेन उरण् पर इत्यकारेण ह्रस्वसवर्णप्रयोगे संवृतं दीर्घप्लुतयोस्तु विवृतत्वम्
तेषां सावर्ण्यप्रसिद्ध्यर्थं अकार इह शास्त्रे विवृतः प्रतिज्ञायते तस्य प्रयोगार्थं अ अ इति शा-
स्त्रान्ते प्रत्यापत्तिः क्रियते ऋऌक् ऋऌ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ककारमितं करो-
ति प्रत्याहारार्थं तस्य ग्रहणं भवति त्रिभिः अकः सवर्णे दीर्घ इत्यकारेण इको गुणवृद्धी इ-
तीकारेण उगितश्च इत्युकारेण अकारादयो वर्णाः प्रचुरप्रयोगविषयाः तेषां स्वरूपज्ञानमुप-
देशे प्रयोजनं ऌकारस्तु कॢपिस्थ एव प्रयुज्यते कॢपेश्च ऌत्वमसिद्धमिति ऌलमसिद्धम् त-
त्र ऌकारोपदेशात्कार्याणि भवन्तीति किमर्थं ऌकार उपदिश्यते ऌतविधानाद्यानिपरा

वैदिकानां

णप्चकार्याणितानि लृकारेयथास्युरिति कानिपुनस्तानिस्युतः स्वरितोद्विर्वचनं लृ३ प्रत्यभिवादे प्लुतःप्लुतः
प्लुतःभवान् इति यथाशक्तिजमसाधुशब्दरूपंतदनुकरणमस्साधुत्वमिष्यते तत्स्यस्यापि लृकारस्या
कार्यप्रतिपत्त्यर्थमुपदेशःक्रियते ऋलृक इति प्रयोजनं अशक्तिवैकल्यात्कुमार्या लृतक इति प्रयुक्ता
स्तमनुप्राणनकरोति कुमार्या लृतक इत्याह इति एओङ् एओ इत्येतौ वर्णावुपदिश्यान्ते ङकारमितं करोति
प्रत्याहारार्थं तस्य ग्रहणं भवत्येकेन एङि पररूपमित्येवमादिना ऐऔच् ऐऔ इत्येतौ वर्णावुपदिश्य पूर्वा
श्चान्ते चकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति चतुर्भिः अचः परस्मिन्पूर्वविधावित्यकारेण
इच एकाचोम्प्रत्ययवदिति ईकारेण तथा एचोयवायावा इत्येकारेण वृद्धिरादैजित्यैकारेण प्रत्याहारेण
वेयानांकथमत्र ग्रहणं पुनश्चावाराद्यध्यानमात्रोपस्थलवत्तरः वर्णेषु वर्णैकदेशा वर्णान्तरसमा ये॰
त्मकतयः तेषु तत्कार्यं न भवति तत्कार्याणि कारिणो हि तेन पुनस्त एव पृथक्प्रयत्ननिर्वर्त्यवर्णास्सिद्धान्ति र्श्चार्थीः
नुवृत्तिल्लादेशाविनामेषु तत्र ऋकारे प्रतिविधातव्य मन्त्यतः मन्दपुःल्कप्लवानकार्यमाम हयवर
ट् हयवर इत्येतान्वर्णानुपदिश्य पूर्वांश्चान्ते टकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवत्येकेन
शाश्छोटि इति अकारेण अयं रेफो यकारात्पर उपदिश्यते तस्य यथा ग्रहणं यणग्रहणे च ग्रहणमस्ति स
वर्णयतोश्चयोरनुनासिकेनुनासिको वा इति प्राप्नोति मद्रह्रदो भद्रह्रद इति अवग्रहोपादे इति ऊदेवेय
त वर्गे रेफेन्य चानुस्वारस्य यथि परसवर्णः इति नैष दोषः आकृतौ पदार्थे समुदाये स कृत्स्नदेव लव
ण प्रवर्तते इति दर्शने यवो नुनासिके [illegible] ननासिको वैन्तरतमो भवतीत्येवमेतत्प्रवर्तते त
देनेनग कारादीनां उकारादयो ये यथास्वस्थानं तत्तो गुणान [illegible] न्तरतमास्ते विहिताः येन नस्थानतोना

श्रा न्य॰

नुनासिका

का० वृ० प्र० १

पिग्रहणं तत्स्थानमो वेणा ग्रहणमो वेणवा सर्वेत्तत्निवृत्तिर्तद् इति स्थानमात्रान्तरतमो रेफस्य णकारो न भवतीति
द्विर्वचनेऽपि रेफस्य यर्ग्रहणेन ग्रहणमस्ति यत्कोयं प्राप्नो [illegible] तस्मादा
विष्क्रम्भेन निमित्तभावेनत्वाख्यते इति न द्विरुच्यते रेफः अनुस्वारस्य ययि परसवर्णो उक्तेन तदपि अनुस्वारान्त
रतमसक्तदेव परसवर्णो विदधाति न रेफस्या[illegible] न्तरतमः सवर्णोऽस्तीति न भविष्यति ऊंइरथेनव
नं रथेनेत्याद्यादीमप्यु विसर्जनीयजिह्वामूलीयोपध्मानीयानामप्युपदेशः कर्तव्यः किं प्रयोजनं उ
रःकेण उरःकेण उरःपेण उरःपेण अट्कुप्वाङ्व्यवायेऽपि इति णत्वं यथा स्यादिति लण् ल इत्येकं वर्णमुपदिश्य
पूर्वैश्चान्त्येण णकारमित्संकरोति प्रत्याहारार्थं तस्य ग्रहणं भवति त्रिभिः अणुदित्सवर्णस्य चाप्रत्यय इत्य
कारेण इण्कोः विती कारेण इकोयणचीति यकारेण इण्ग्रहणानि सर्वाण्येतेन णकारेण अण्ग्रह
णानि पूर्वेणाणुदित्सवर्णस्य चाप्रत्यय इत्येकमेवानेन अथ किमर्थमण्ग्रहणमेव तत्र क्रियते नैवं
शक्यं अन्तस्थानामपि सवर्णानां ग्रहणमिष्यते संयन्ता संवत्सरः तल्लोकं यल्लोकमिति अनु
स्वारस्य ययि परसवर्णो कृते तस्य यर्ग्रहणेन ग्रहणाद् द्विर्वचनं यथा स्यादिति हकारादिषु कार उच्चारणा
र्थः नानुबन्धः लकारे सानुनासिक इति संज्ञकः प्रतिज्ञायते तेन उरण्रपर इति प्रत्याहारे लपरत्वमपि भ
वति नमङणनम् नमङणन इत्येतान्वर्णानुपदिश्य पूर्वैश्चान्त्ये मकारमित्संकरोति प्रत्याहारार्थं।
तस्य ग्रहणं भवति त्रिभिः पुमः खय्यम्परे इत्यकारेण हलो यमां यमि लोप इति यकारेण ङमो ह्रस्वाद
चि ङमुण्नित्यमिति ङकारेण अमन्ताड इति अकारेण पि ग्रहणमस्पष्टस्यतं किंचित्तु सर्वाण्येतानि
प्रत्याहारग्रहणानि ञकारेण भवन्त्विति मकारमनुबन्धं प्रत्याचक्षते तथा च सति ङमो ह्रस्वादचि

तवल्कार इति

ग्रहणान्

वकुलग्रहणान्न क्रियते

१

ङमुणानत्वमित्यनुनासिकेनोः झभोरभावाद्दामाभावश्चेति पञ्चैषामाख्यायां प्रतिपत्तिर्गौरवं भवति झभञ् ॥
झभइत्येतौ वर्णावुपदिश्य पूर्व्वांश्चान्ते ञकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवत्येकेन अतो दी
र्घो यञीति यकारेण घढधष् घढधइत्येतान्वर्णानुपदिश्य पूर्व्वांश्चान्ते षकारमितं करोति प्रत्याहारा
र्थं तस्य ग्रहणं भवति द्वाभ्यां एकाचो बशो भष् झषन्तस्य स्ध्वोरिति झकारभकाराभ्यां जबगडदश्
जबगडदइत्येतान्वर्णानुपदिश्य पूर्व्वांश्चान्ते शकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति षड्भिः
भोभगोअघोअपूर्व्वस्य योशीत्यकारेण हशि चेति हकारेण नेड्वशिकृतीति वकारेण झलां जश् झशी
ति जकारेण झकारेण च एकाचो बशो भष् झषन्तस्य स्ध्वोरिति बकारेण खफछठथचटतव् खफ
छठथचटतइत्येतान्वर्णानुपदिश्यान्ते वकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवत्येकेन नश्छ
व्यप्रशानिति छकारेण खफग्रहणमनर्थं कपय् कपइत्येतौ वर्णावुपदिश्य पूर्व्वांश्चान्ते यकार
मितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति त्रिभिः अनुस्वारस्य ययि परसवर्ण इति यकारेण मय
उञो वा इति मकारेण झयो होन्यतरस्यामिति झकारेण पुमः खय्यम्परे इति खकारेण शषसर् ॥
शषसइत्येतान्वर्णानुपदिश्य पूर्व्वांश्चान्ते रेफमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति पञ्चभिः यरो
नुनासिकेनुनासिको वा इति यकारेण झरो झरि सवर्णे इति झकारेण खरि चेति खकारेण अभ्यासे
चर्चेति चकारेण शर्पूर्व्वाः खय इति शकारेण हल् हइत्येकं वर्णमुपदिश्य पूर्व्वांश्चान्ते लकारमितं क
रोति प्रत्याहारार्थं तस्य ग्रहणं भवति षड्भिः अलोन्त्यात्पूर्व्व उपधा इत्यकारेण हलोनन्तराः संयोग इति हका
रेण लोपो व्योर्वलीति वकारेण रलो व्युपधाद्धलादेः संश्चेति रेफेण झलो झलीति झकारेण शल इग

पथादनिटः कृत इति णाकारेण अथ किमर्थमपदिष्टोपि हकारः पुनरुपदिश्यते किं नकेति त्रिपयोयथा
स्यादिति किं नेस्विहि नास्विहि नत्पत्रलोपुपधाह्लादेः संज्ञेति किन्नेयथास्यात् कान्विथिः लिहेरलि
ह्लोदिति शालदग्पथादनिटः क्सइति क्सोयथास्यात् दुहिषिः हदि हिस्वपि हिंद तृप्लादिल त्वाणडम
थास्यात् फल्ग्रहणेषु चकृकारस्य ग्रहणं यथास्यात् अदश्यामिति ह्यवडित्यत्र तर्हि किमर्थमपदिश्यते
अड्यहणेषु अग्रहणेषु चहशिवेति ग्रहणं यथास्यात् मह्यं किमः ब्रह्मणोह्मति पकस्मात् ग्रहण
वदाद्याभ्यां षस्विभ्यश्चकणमाः स्युः तयोच ययोव तस्योरः पंचभ्यः शालोषड्याः इति सत्यापितयोः
मकारस्य चतस्य इति प्रत्याहाराः वृद्धिरादैच् वृद्धिशब्दः संज्ञा तेन विधीयते प्रत्येकमादैचां वर्णाना
सामान्येन तज्जातीयानामतज्जातीयानां च तपरकरणमैजर्थं तादपि परस्तपरः शैलविट्टेडकादिषु विमा
त्रचतस्त्री त्रप्रसंगनिवृत्त्यर्थं ग्रामस्नायनः औतिकायनः औपगवः औपमन्यवः शालीयः मालीयः वृद्धि
प्रदेशाः सिचि वृद्धिः परस्मैपदेष्वित्येवमादयः अदेङ्गुणः गुणशब्दः संज्ञा तेन विधीयते प्रत्येकमदे
ङां वर्णानां सामान्येन तज्जातीयानामतज्जातीयानां च तपरकरणं निरुद्धसवीर्यं तरिता चेतास्तोता पच
न्तियजन्ति गुणप्रदेशाः मिदेर्गुण इत्येवमादयः इकोगुणवृद्धी परिभाषेयं स्थानिनियमार्था वृद्धिगुणा
वस्मृत्या च शीघ्रमाणौ इक एव स्थाने वेदितव्याव इति सार्वधातुकार्धधातुकयोः अस्य गुण इति सङ्का
क एव स्थाने भवति तरति नयति वृद्धिः खल्वपि सिचि वृद्धिः परस्मैपदेषु अकार्षीत् अहार्षीत् लवइइइ
वृइतिकिं आत्मनश्च चरव्यंजनानामाभूत् यानं ग्लायति उम्मिता गुणवृद्धिग्रहणं सं यथा विधानेनियं
मार्थं इह मा भूत् द्योः पंथाः सह्ने इति न धातुलोप आर्धधातुके धातवके देशो धातुः तस्य लोपो यस्मि

न्नार्धधातुके तदार्धधातुकं धातुलोपं तन्निमित्ते गुणवृद्धी प्राप्नुतस्ते न भवतः लोलुवः पोपुवः मरीमृजः लो
लूयादिभ्यो यङन्तेभ्यः पचाद्यचि विहिते यङोऽचि चेति यङ्लुकि कृते तमेवाचमाश्रित्य ये गुणवृद्धी
प्राप्नुतस्तयोः प्रतिषेधः धातुग्रहणं किं लूञ् लविता रेडसि पर्णनेवेः अनुबन्धप्रत्ययलोपमाभूत् इ
षेर्हिंसार्थस्यापि प्रत्ययलोपे प्रत्यय दाहरणं रेडिति आर्धधातुक इति किं त्रिधा बद्धो वृषभो रोरवी
ति इक इत्येव अभाजि रागः क्ङिति च निमित्तसप्तम्येषा क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः
चितः चितवान् स्तुतः स्तुतवान् भिन्नः भिन्नवान् सृष्टः सृष्टवान् ङिति खल्वपि चिनुतः चिन्वन्ति मृष्टः
मृजन्ति गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते तेन ग्लाजिस्थश्च ग्स्नुः जिष्णुः भूष्णुः इक इत्येव कामयते लैगवा
यनः मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते संक्रमो गुणवृद्धि प्रतिषेधविषयः परिमृजन्ति परिमा
र्जन्ति परिमृजन्तु परिमार्जन्तु अचि न वमृजर्वमित्यादौ लकारस्य सत्यपि ङित्वे यासुडादि ह चंतजा

ध्रुवंतलवुपपस्यात्र प्रतिषेधः

पकं ङिति यत्कार्यं तल्लकारेण भवति दीधीवेवीटाम् दीधीवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतस्ते न भवतः
आदीध्यनं आदीध्यकः आवेव्यनं आवेव्यकः इटः खल्वपि कणिता श्वः रणिता वृद्धिस्तेन संभवन्ते

३॰

वलच्चणपगुणस्याप्रतिषेधः हलोऽनन्तराः संयोगः भिन्नजातीयैर्व्यञ्जनैरव्यवहिताः श्लिष्टोच्चारिता
हलः संयोगसंज्ञा भवन्ति समुदायः संज्ञी जातौ चेदं बहुवचनं तेन द्वयोर्बहूनां च संयोगसंज्ञा सिद्धा
भवति अग्निरिति गनो इति शब्दो वर्ण इति इन्द्र इति उष्ट्र इति राष्ट्रमिति

ग॰

इत्यः तिलान् स्थापयतीति तिलसतयाः हल इति किं तितउच्छत्रे यवयत्राकारेणाकारस्य स्यात् तदा सं
योगान्तस्येति संयोगान्तलोपः स्यात् अनन्तर इति किं पचति पनसः स्कोः संयोगाद्योरिति लोपः

पचत्रसकारमकारयोः सं सं॰
योगः स्यात् तदा॰

का· वृ· प्र·
५

स्यात् संयोगप्रदेशाः स्कोः संयोगाद्योरित्येवमादयः मुखनासिकावचनोनुनासिकः मुखसहिताना
सिका मुखनासिका मुखनासिकया य उच्चार्यते वर्णः सोनुनासिकसंज्ञो भवति वृद्धति आङोनुनासि
कश्छन्दसि अभ्र आँ अपः गभीर आँ उग्रपुत्रे अवन आँ इंद्रः मुखग्रहणं किं अनुस्वारस्यैव हि स्यात् नासिका
ग्रहणं किं कचटतपानां मा भूत् अनुनासिकप्रदेशाः आङोनुनासिकश्छन्दसीत्येवमादयः तुल्या
स्यप्रयत्नं सवर्णं तुल्यशब्दः सदृशपर्यायः आस्ये भवं आस्यं तात्वादिस्थानं प्रयतनं प्रयत्नः स्पृष्टता
दिर्वर्णगुणः तुल्य आस्ये प्रयत्नो यस्य वर्णस्य स समानजातीयं प्रति सवर्णसंज्ञो भवति चत्वार आभ्य
न्तराः प्रयत्नाः सवर्णसंज्ञायां निमित्तत्वेनाश्रीयन्ते तद्यथा स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता च
अ अ अ इति त्रयोकारा उदात्तोनुदात्तः स्वरितः इति प्रत्येकं सानुनासिको निरनुनासिकः ह्रस्वदीर्घप्लु
तभेदादष्टादशधा भिद्यते तथा इवर्णः तथा उवर्णः तथा ऋवर्णः लृवर्णस्य तु दीर्घा न सन्ति अतो द्वा
दशप्रभेदः सन्ध्यक्षराणां ह्रस्वा न सन्ति तान्यपि द्वादशप्रभेदानि अन्तस्था द्विप्रभेदा रेफवर्जिताः सानु
नासिका निरनुनासिकाश्च रेफोष्मणां सवर्णा न सन्ति वर्ग्यो वर्ग्येण सवर्णः दंडाग्रं दधिपाग्रं आस्यग्रहणं
किं कचटतपानां भिन्नस्थानानां तुल्यप्रयत्नानां मा भूत् किं च स्यात् तर्प्सीत् सुभित्ति झरो झ

श्री

रि सवर्णे इति पकारस्य तकारे लोपः स्यात् प्रयत्नग्रहणं किं इचुयशानां तुल्यस्थानानां भिन्नप्रय
त्नानां मा भूत् किं च स्यात् अकश्चोततीति झरो झरि सवर्णे इति शकारस्य चकारे लोपः स्यात् ।
ऋकारलृकारयोः सवर्णसंज्ञा वक्तव्या होतृ लृकारः होतॢकारः उभयोः ऋवर्णस्य चान्तरतमो दी
र्घो नास्तीति ऋकार एव भवति सवर्णप्रदेशाः अकः सवर्णे दीर्घ इत्येवमादयः नाज्झलौ अच

५

हल्च अज्झलौ तुल्यास्यप्रयत्नावपि सवर्णसंज्ञौ न भवतः। अवर्णहकारौ दण्डहस्तः। इवर्णशकारौ दधिशी
तं। सवर्णदीर्घो न भवति। वैपाशो मत्स्यः। आनडुहं चर्मेति यस्येति लोपो न भवति। ईदूदेद्द्विवचनं प्रगृह्यं चेनिशाकारहकारयो
ईत ऊत एत इत्येवमन्तं द्विवचनं प्रगृह्यसंज्ञं भवति। अग्नी इति। वायू इति। खट्वे इति। माले इति। पचेते इति। प
चेथे इति। ईदूदेदिति किं। वृक्षावत्र। प्लक्षावत्र। द्विवचनमिति किं। कुमार्यत्र। किशोर्यत्र। तपरकरणमसन्देहा
र्थं। प्रगृह्यप्रदेशाः प्लुतप्रगृह्या अचि नित्यमित्येवमादयः। ईदादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः।
मणीवोष्ट्रस्य लंबेते। प्रियौ वत्सतरौ मम। दम्पतीव। जम्पतीव। रोदसीव। अदसो मात्। अदसः संब
न्धी यो मकारस्तस्मात्परे ईदूतौ प्रगृह्यसंज्ञौ भवतः। अमी अत्र। अमी आसते। अमू अत्र। अमू आसाते। एकारस्य अप्रू
दाहरणम् नास्त्युदाहरणमिति। किं। शम्यत्र। दाडिम्यत्र। मादिति किं। अमुकेऽत्र। शे। शे इति चैतत् प्रगृह्यसंज्ञं भवति। कि
मिदं शे इति। सुपामादेशश्छन्दसि। न युष्मे वाजिबन्धवः। अस्मे इन्द्राबृहस्पती। युष्मे इति। अस्मे इति। त्वे इति। मे
इति। त्वे रायः। मे रायः। कान्तमेव तदकस्मादुदाहरणं। अस्मे इन्द्राबृहस्पती इति तत्र तथा पाठात्। इतरत्तु लौ
किकमेव। तपरकरणं। निपात एकाजनाङ्। एकश्चासावच्च एकाच्। निपात आङ्वर्जितः प्रगृह्यसंज्ञो भव
ति। अ अपेहि। इ इन्द्रं पश्य। उ उ पश्य। एवमाप्येवं नु मन्यसे। आ एवं किल तत्। निपात इति किं। चकारात्रएका
जिति किं। प्राग्रेयवाचमीरय। अनाङिति किं। आ उदकान्तात्। ओदकान्तात्। ईषदर्थे क्रियायोगे मर्या
दाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्। ओत्। निपात इति वर्तते। तस्यौका
रान्तो निपातः। ओदन्तो निपातः प्रगृह्यसंज्ञो भवति। आहो इति। उताहो इति। संबुद्धौ शाकल्य
स्येतावनार्षे। ओदिति वर्तते। संबुद्धिनिमित्तो य ओकारः स शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञो भ।

का॰
वृ॰
५ योग॰

वनि इति शाङ्के अनार्षे अवैदिके परतः वायो इति वाय विति भानो इति भान विति सम्बुद्धाविति किं गवित्य
यमाह अत्रानकुर्यान्तकरणयोर्भेदस्याविवक्षितत्वादसत्यर्थे वचने प्रातिपदिकत्वाभावाद्विभक्तिर्न भवति
शाकल्यग्रहणं विभाषार्थं इत्याविति किं पटोऽत्र अनार्षे इति किं एता गाव ब्रह्मबन्धव इत्यब्रवीत उञ ऊँ
शाकल्यस्येताविति वर्त्तते उञ इति विभागः उञः प्रगृह्यसंज्ञा भवति इतो शाकल्यस्य शाकल्यस्येति
विभाषार्थं उ इति विति उञ ऊँ इत्ययमादेशो भवति दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च शाक
ल्यग्रहणं विभाषार्थमिहाप्यनुवर्त्तते तेन ओणोरूपाणि भवन्ति उ इति विति ऊँ इति ईदूतौ च सप्तम्यर्थे
शाकल्यस्येताविति निवृत्तं ईदन्तमूदन्तं च शब्दरूपं सप्तम्यर्थे वर्त्तमानं प्रगृह्यसंज्ञं भवति अध्यस्यां मा

रति॰

मकीतनूतन्वां तनू इति मामकी मामकी इति सोमो गौरी अधिश्रितः ईदूतौ इति किं प्रियः सूर्ये प्रियो
अग्नावभाति अग्निशब्दात्परस्याः सप्तम्या डादेशः सप्तमीग्रहणं किं धीती मती सुष्टुती इति धीत्याम्
त्या सुष्टुत्या अर्थग्रहणं किं अर्थग्रहणे सति केवलायाः सप्तम्याः सप्तम्यर्थः सम्भवति सप्तमीलोपे सार्व
त्रिके वचनसोम र्धत्प्रगृह्यसंज्ञं भवति वाप्यश्वः नद्यातिः तपरकरणमसंदेहार्थं ईदूतौ सप्तमीत्ये
व लुप्तेऽर्थग्रहणाद्भवेत पूर्वस्यावेत्स्वरयोः सावादिभावः प्रसज्यते वचनाद्यत्र दीर्घत्वं
तत्रापि सरसी यदि लोपके स्यात्तदन्ते मा वा पूर्वपदस्य भूत दाधाघ्वदाप् दारूपाश्चत्वारो धातवः धाञ्
धेट् द्वौ घुसंज्ञका भवन्ति दाप् दैप् वर्जयित्वा उदाहरण दाने प्रणिददाति दाण् देङ प्रणिददा
ता दो प्रणियति देङ प्रणिदयते डुधाञ् प्रणिदधाति धेट् प्रणिधयति धीर्त्वत्सो मातरं अदाबिति किं
दाप् लवने दातं वर्हिः दैप् शोधने अवदातं मुखं घुप्रदेशाः घुमास्थागापाजहातिसां हलि ईत्त्वमादयः

आद्यन्तवदेकस्मिन् असहायस्याद्यन्तापदिष्टानि कार्याणि न सिध्यन्तीत्ययमतिदेश आरभ्यते सप्तम्यर्थे वतिः
आदाविवान्त इव एकस्मिन्नपि कार्यं भवति यथा कर्तव्यमित्यत्र प्रत्ययाद्युदात्तत्वमेवमौपगव इत्यत्रापि।
यथा स्यात् अनेन यथा वृत्ताभ्यामिसंज्ञायां ह्रस्वेनापि चेति दीर्घत्वमेवमाभ्यामित्यत्रापि यथा स्यात् एकस्मि-
न्निति किं सभासत्रयनेभवः साभासत्रयनः आकारमाश्रित्य वृद्धसंज्ञा न भवति तरप्तमपौ घः तरप्तम-
पावेतौ प्रत्ययौ घसंज्ञौ भवतः कुमारितरा कुमारितमा ब्राह्मणितरा ब्राह्मणितमा च घप्रदेशाः च
रूपकल्पत्येवमादयः बहुगणवतुडति संख्या बहुगणवतुडतीत्येते संख्यासंज्ञा भवन्ति बहुकृत्वः
बहुधा बहुकः बहुशः गणकृत्वः गणधा गणकः गणशः तावत्कृत्वः तावद्धा तावत्कः तावच्छः कतिधा क-
तिकः कतिशः संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् संख्याया विधार्थे धा संख्याया अतिदशन्ता-
याः कन् संख्यैकवचनाच्च वीप्सायां शस् बहुगणशब्दयोर्वैपुल्यसंघवर्तमानयोरिह ग्रहणं ना-
स्ति किं तर्हि संख्यावाचिनोरेव भूयादीनां निवृत्त्यर्थं संख्यासंज्ञा विधीयते अर्धपूर्वपदश्च पूरणप्रत्ययान्तः
संख्यासंज्ञो भवतीति वक्तव्यं समासे कन्विधर्थं अर्धपंचमशूर्पं अर्धपंचमकं संख्याप्रदेशाः संख्यावयवे
तेत्येवमादयः ष्णान्ता षट् स्त्रीलिंगनिर्देशात् संख्येति संबध्यते षकारान्ता नकारान्ता च या संख्या सा षट्सं-
ज्ञा भवति षकारान्ता तावत् षट् तिष्ठन्ति षट् पश्य नकारान्ता पंच तिष्ठन्ति पंच पश्य सप्त नव दश अष्टप्र-
देशाः षड्भ्यो लुगित्येवमादयः डति च डत्यन्ता या संख्या सा षट्संज्ञा भवति कति तिष्ठन्ति कति पश्य ॥
क्तक्तवतू निष्ठा क्त क्तवतु क्तक्तवतू प्रत्ययौ निष्ठासंज्ञौ भवतः कृतः कृतवान् भुक्तः भुक्तवान् क-
कारः किंकार्यार्थः उकार उगित्कार्यार्थः निष्ठाप्रदेशाः श्वीदितो निष्ठायामित्येवमादयः सर्वादीनि।

का

[illegible]

सर्वनामानि सर्वशब्द आदिर्येषां तानि सर्वादीनि सर्वनामसंज्ञानि भवन्ति सर्वः सर्वौ सर्वे सर्वस्मै स-
र्वस्मात् सर्वस्मिन् सर्वेषां सर्वकः विश्वः विश्वौ विश्वे विश्वकः उभशब्दस्य सर्वनामत्वे प्रयोजनं सर्वनाम्न-
स्तृतीया चेति उभौ उभयः उभये उभयस्मै उभयस्मात् उभयस्मिन् उभयेषां उभयकः इतरडतमकत-
रस्मै कतमस्मै इतरस्मै अन्यस्मै अन्यतरस्मै त्वत्त्व इति त्वशब्दो यमन्यवाची स्वरभेदाद्द्विः
पठितः एकोऽत्रोदात्तः द्वितीयोऽनुदात्तः केचित्तकारान्तमेकमिच्छन्ति त्वदिति द्वावपि चानुदात्ताविति
स्मरन्ति नेम नेमस्मै वक्ष्यमाणेन जसि विभाषा भवति नेमे नेमाः सम समस्मै समेषां समस्मिन्स-
मेव कथं यथासंख्यमनुदेशः समानां समे देशे यजेतेति समस्य सर्वशब्दपर्यायस्य सर्वनामत्वमिष्यते
तुल्यवत्तु सिम सिमस्मै पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां स्वमज्ञातिधनाख्या-
यां अन्तरं बहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् अदम् इदम् एक द्वि युष्मद् भवतु किम् सर्व-
नामप्रदेशाः सर्वनाम्नः स्मै इत्येवमादयः विभाषा दिक्समासे बहुव्रीहौ न बहुव्रीहाविति प्रतिषेधं वक्ष्य-
ति तस्मिन्नित्ये प्रतिषेधे प्राप्ते विभाषेयमारभ्यते दिशां समासो दिक्समासः दिगुपदिष्टसमासे बहुव्रीहौ
विभाषा सर्वादीनि सर्वनामसंज्ञानि भवन्ति उत्तरपूर्वस्यै उत्तरपूर्वायै दक्षिणपूर्वस्यै दक्षिणपूर्वायै
दिग्ग्रहणं किं न बहुव्रीहाविति प्रतिषेधं वक्ष्यति तत्र न ज्ञायते क्व विभाषा क्व प्रतिषेधः इति समासग्रहणं
किं समासप्रत्ययो बहुव्रीहिस्तत्र यथा स्यात् विभाषा बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र माभूत् दक्षिणा
दक्षिणस्यै देहि बहुव्रीहाविति किं द्वन्द्वे विभाषा माभूत् दक्षिणोत्तरपूर्वाणामिति न बहुव्रीहौ सर्वना-
मसंज्ञायां तदन्तविधेरभ्युपगमात् बहुव्रीहेरपि सर्वाद्यन्तस्य संज्ञा स्यादिति प्रतिषेध आरभ्यते बहुव्रीहौ

अस्मद्

[illegible]

न

समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति प्रियविश्वाय प्रियोभयाय यद्यन्याय यत्स्याय इह त्वत्कपितृ
कोमत्कपितृकः इत्यकच्च भवति [illegible] बहुव्रीहाविति वर्तमाने पुनर्बहुव्रीहिग्रहणं भूतपूर्वसमासे
ऽपि प्रतिषेधो यथा स्यात् वस्त्रान्तरवसनान्तराः तृतीयासमासे तृतीयासमासे सर्वादीनि सर्वनाम

अर्द्धपूर्वीयं

संज्ञानि न भवन्ति मासपूर्वाय संवत्सरपूर्वाय त्र्यहपूर्वाय समासइति वर्तमाने पुनः समासग्रहणं तृ
तीयासमासार्थवाक्येपि प्रतिषेधो यथा स्यात् मासेन पूर्वाय पूर्वसदृशसमोनार्थेति तृतीयासमासः

सा

प्रतिपदं विधीयते तस्येदं ग्रहणं न यस्य कस्यचित् तृतीयासमासस्य कर्तृकरणे कृता बहुलमिति व
यकाकृतं मयकाकृतमिति द्वन्द्वे च द्वन्द्वे च समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति पूर्वापराणां
कतरकतमानां विभाषा जसि पूर्वेणा नित्ये प्रतिषेधे प्राप्ते जसि विभाषा विधीयते द्वन्द्वे समासे जसि वि
भाषा सर्वादीनि सर्वनामसंज्ञानि भवन्ति कतरकतमे कतरकतमाः जसः कार्यं प्रति विभाषा [illegible] अ

दि

कजर्थं न भवति कतरकतम[illegible]ाः प्रथमचरमतयाल्पार्धकतिपयनेमाश्च विभाषा जसीत्यनुवर्तते द्वन्द्व
इति निवृत्तं प्रथमचरमतयअल्पअर्द्ध कतिपयनेम इत्येते जसि विभाषा सर्वनामसंज्ञा भवन्ति
प्रथमे प्रथमाः चरमे चरमाः द्वितये द्वितयाः अल्पे अल्पाः अर्द्धे अर्द्धाः कतिपये कतिपयाः नेमे नेमाः
तयप्प्रत्ययः अवशिष्टानि प्रातिपदिकानि तत्र नेम इति सर्वादिषु पठ्यते तस्य प्राप्ते विभाषा न्येषा
मप्राप्ते उभयथा तस्य तयप्प्रत्ययान्तस्य गणपाठात् नित्या सर्वनामसंज्ञा इहापि जसः कार्यं प्रति वि

का॰
वृ॰ प्र॰
८

भाषाकाकचौर्यन्यायोवृत्तिः पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायामसंज्ञायां पूर्वपरअव
रदक्षिणउत्तरअपरअधरइत्येतेषांगणपाठान्नित्यायांसर्वस्वर्वनामसंज्ञायांप्राप्तायांजसिविभाषारभ्यते
पूर्वादीनिविभाषाजसिसर्वनामसंज्ञानिभवन्तिव्यवस्थायांगम्यमानायामसंज्ञायांविषयेस्वाभिधे
यापेक्षोवधिनियमोव्यवस्थापूर्वेपूर्वाःपरेपराःअवरेअवराःदक्षिणेदक्षिणाः उत्तरेउत्तराःअपरेअ
पराःअधरेअधराःव्यवस्थायामितिकिं दक्षिणाइमेगाथकाःप्रवीणाइत्यर्थःअसंज्ञायामितिकिं
उत्तराःकुरवःसत्यामेवव्यवस्थायांइयंतेषांसंज्ञा स्वमज्ञातिधनाख्यायां आत्मात्मीयज्ञातिधना
वचनःस्वशब्दःअत्रापिनित्यासर्वनामसंज्ञाप्राप्ताजसिविभाषारभ्यतेस्वमित्येतच्छब्दरूपंजसिविभा
षासर्वनामसंज्ञंभवतिनचेज्ज्ञातिधनयोःसंज्ञारूपेणवर्त्ततेस्वेपुत्राःस्वाःपुत्राःस्वेगावःस्वागावःआत्मी

प्रति॰

याइत्यर्थःज्ञातिधनयोःकिं धूमायन्तेइवास्निग्धाःप्रज्वलन्तीवसंहताःउल्मुकानीवतेमेस्वाःदपन्तेभरत
र्षभस्वाज्ञातयइत्यर्थःअधनाख्यायामितिकिं प्रभूताःस्वानदीयन्तेप्रभूताःस्वानभुज्यन्तेप्रभूतानिध
नानीत्यर्थः अन्तरंबहिर्योगोपसंव्यानयोः अत्रापिनित्यायांसर्वनामसंज्ञायांजसिविभाषारभ्यतेअ
न्तरमित्येतच्छब्दरूपंजसिविभाषासर्वनामसंज्ञंभवतिबहिर्योगेउपसंव्यानेचगम्यमानेअन्तरेगृहाःअ
न्तरागृहाःनगरबाह्याश्चाण्डालादिगृहाउच्यन्ते अन्तरेशाटकाःअन्तराःशाटकाःपरिधानीयमुच्यते
नप्रावरणीयं बहिर्योगोपसंव्यानयोरितिकिं अनयोर्ग्रामयोरन्तरेतापसःप्रतिवसतिअस्मि

८

न्तरेच शीतानुदकानि मध्यप्रदेशवचनो ऽन्तरशब्दः । गणसूत्रस्यैतत्प्रत्युदाहरणं अपुरीतिवक्त
व्यं अन्तरायां पुरि वसति वा अकरणात्तीयस्य ङित्सूपसंख्यानं कर्त्तव्यं द्वितीयस्मै द्वितीयाय तृ
तीयस्मै तृतीयाय स्वरादिनिपातमव्ययं स्वरादीनि शब्दरूपाणि निपाताश्चाव्ययसंज्ञानि भ
वन्ति स्वर् अन्तर् प्रातर् एते ऽन्तोदात्ताः पठ्यन्ते पुनर् आद्युदात्तः सनुतर् उच्चैस् नीचैस् शनै
स् ऋधक् ऋते युगपत् आरात् पृथक् एते सनुतर् प्रत्नतरा ऽन्तोदात्ताः पठ्यन्ते ह्यस् श्वस् दि
वा रात्रौ सायं चिरं मनाक् ईषत् जोषम् तूष्णीम् बहिस् आद्युदात्ताः पठ्यन्ते अवस् निक
षा समया स्वयं मृषा नक्तं नञ् हेतौ इद्धा अद्धा [illegible] अवीक् सामि स्वैरं मित्यवमादयोन्तोदात्ताः पठ्यन्ते
वत् वदन्तमव्ययसंज्ञं भवति ब्राह्मणवत् क्षत्रियवत् वनसनन् सम सनात् मनाक् तिरस्
एते आद्युदात्ताः पठ्यन्ते अन्तरायमन्तोदात्तः ज्योक् याक् कम् शम् सना विना नाना स्वस्ति अ
सत् अस्ति उपांशु क्षमा विहायसा दोषा मृषा मिथ्या क्त्वातोसुन्कसुनः कृन्मकारः सन्ध्यक्षरा
न्तोऽव्ययीभावश्च पुरा मिथो मिथुस् मिथुने प्रवाहुक आर्यहलं अभीक्ष्णं साकं सार्धं नमस्
हिरुक् तादक् तसिलादि स्तद्धितः एधाच्पर्यन्तः कृत्वसुच् सच शस्तसी ग्रीस्याला च्व्यर्थाश्च
अम् आम् प्रताम् स्वरादिनिपातावयवस्तु तथा स्वरानिपाताइतिचवाहा अरूपवअव्ययप्रदेशा
अव्ययादाप्सुपः स्त्येवमादयः सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तत्

का· वृ· प्र· ८

इत्यर्थः तद्धितश्चासर्वविभक्तिः तद्धितान्तः शब्दः असर्वविभक्तिरव्ययसंज्ञो भवति यस्मात्सर्वा वि
भक्तिरुत्पद्यते यतः ततः यत्र तत्र यदा तदा सर्वदा तद्धित इति किं एकद्वौ बहवः असर्वविभक्तिरि
ति किं औपगवः औपगवौ औपगवाः कृन्मेजन्तः कृद्यो मकारान्तः एजन्तश्च तदन्तो शब्दरूपमव्य
यसंज्ञो भवति स्वादुंकारं भुंक्ते संपन्नंकारं लवणंकारं [illegible] एजन्तः वक्षे रायातावै मेधस्था
नाकृन्मेदाताय जीवसे ज्योक्कामसूर्यं दृशावहे इति वे सत्त मर्थे से सेनितिसप्रत्यये कृन्मे पचवक्रान्तरूपे
पचे इति दृशाः सेप्रत्यये [illegible] जीवे वक्रान्तरूपे जीवसे इति जीवे रसेप्रत्यय रूपं दृशो इति दृशः कृप्रत्य
यो निपातनात् दृशे विख्ये चेति असुन्नागमः ज्योगुपदेशिक प्रतिपन्नार्थेः इन्हमा भूत् आधयो विकीर्षवे
कृन्मकारस्य इति कानीमसुन्नकमन्तः कानीम नकमन एवमन्ते शब्दरूपमव्ययसंज्ञं भवति कृ·।
नाभ्यन्तात् मन् पुरास्तर्य स्मादे तारा येयः पुराव त्मानाम् उपाकर्तीः भावल [illegible] जित इत्यः
कृत्स्नश्च यातो त्वासन्नप्ययः सपित्तयोः कसन् पुरा कृत्स्नः विस्तरणो विरपेन पुराजन्तुमभ्याहदः
अव्ययीभावश्च अव्ययीभावश्च समासो अव्ययसंज्ञो भवति किं प्रयोजनं लुक्सुपव्यवस्था उपचारा लक्
उपाग्निप्रत्यग्निमवस्थ उपाग्निमुखः प्रत्यग्निमुखः मुखं स्वांगाग्निमन्तर्पदात् उपदान्तन्त्रो प्राप्तेनाव्य
यदिकृत्शब्द इति प्रतिषिध्यते तस्मिन् सति विद्धे पूर्वपदप्रकृतिस्वर एव भवति उपचार उपयः कारस्य
पयः कामः विसर्जनीयस्यानिकस्यासकारस्य उपचार इति यं संज्ञा तत्र अव्ययीभावस्याव्ययत्वे अ

उत्·

हु·

प·

द

तः कुकमिकं सङ्कं भगावङ्ग भाकोगोष्ठुनञ्चयस्येति पर्युदासः सिद्धो भवति सर्वमिदं कोइस्वरादाव
पिपद्मते पुनर्वचनमनित्यत्वज्ञापनार्थं तेनायं कार्यनियमः सिद्धो भवति तेनाकस्मादोकर्तव्य
संज्ञा न भवति इह च पुरास्मर्यमाणे तेनाः पुरावत्ता नामपाकेनाः पुराकृतस्याविरूप इति न लोका
व्ययनिष्ठेति षष्ठीप्रतिषेधो न भवति शि सर्वनामस्थाने शि इत्येतत्कृतरूपं सर्वनामस्थानसंज्ञं
भवति कुण्डानि तिष्ठन्ति कुण्डानि पश्य पदधीनि मधूनि त्रपूणि जतूनि सर्वनामस्थाने प्रदेशाः सर्व
नामस्थाने चासंबुद्धौ विति एवमादयः सुडनपुंसकस्य सुडिति पञ्चवचनानि नपुंसकादन्यत्र सर्व
नामस्थानसंज्ञानि भवन्ति नपुंसके न विधिः न प्रतिषेधः तेन जसः शसः सर्वेणा सर्वनामस्थानसं
ज्ञा सिद्धा भवति राजा राजानौ राजानः राजानं राजानौ सुडिति किं राज्ञः पश्य पश्य नपुंसकेति किं
सामनी वेमनी नवेति विभाषा नेति प्रतिषेधः वेति विकल्पः तयोः प्रतिषेधविकल्पयोर्विभा
षेति संज्ञा भवति इति करणोऽर्थनिर्देशार्थः विभाषाप्रदेशेषु प्रतिषेधविकल्पावुपतिष्ठेते तत्र प्र
तिषेधेन समीकृते विषये पश्चाद्विकल्पः प्रवर्त्तते उभयत्र विभाषाः प्रयोजयन्ति विभाषा श्वेः श्व
शावशिश्वायश्च श्वयतः शिश्वियतुः विभाषाप्रदेशा विभाषा श्वेरित्येवमादयः इग्यणः संप्रसा
रणं इग्यो यणः स्थाने भूतो भावी वा स संप्रसारणसंज्ञो भवति यज इष्टं वप उप्तम ग्रह गृही
तं केचिदुभयथा सूत्रमेतद्व्याचक्षते वाक्यार्थः संज्ञी वर्णश्चेति इग्यण इति यथार्थं वाक्यार्थः स्या

का॰
वृ॰
५

स्यादेशसंबंधः सम्प्रसारणसंज्ञो भवति यणः स्थाने वा य इ वर्णाः सम्प्रसारणसंज्ञो भवति तत्र
विधौ स्थान्यादेशसंबंधलक्षणो वाक्यार्थ उपतिष्ठते अइउः संप्रसारणं वसोः सम्प्रसारणमिति
अनुवादे वर्णाः संप्रसारणस्य संप्रसारणत्वे इति संख्यातानादेशादिरूतं भवति ग्रह ह्वितमिति।
संप्रसारणप्रदेशाः वसोः संप्रसारणमित्येवमादयः आद्यन्तौ टकितौ आदिष्टिद्भवति अन्तः
किद्भवति षष्ठीनिर्दिष्टस्य लवितामुं डाभोषयते टकित्प्रदेशाः आर्धधातुकस्येड्वलादेः भियो रु
त्रमयेषु वा इत्येवमादयः मिदचोन्त्यात्परः अचां सन्निविष्टानामन्त्यादचः परो मिद्भवति रुणद्धि भ
वति पयांसि मित्प्रदेशाः रुधादिभ्यः श्नम् इत्येवमादयः अन्त्यात्पूर्वो मस्जेर्मिदन्तषङ्गसंयोगादिलो
पार्थं मग्नः मग्नवान् मंक्ता मंक्तुं मंक्तव्यं षष्ठ्यन्त्यस्यादेशो परिभाषयमादेशनियमार्था एवाऽऽ
स्यादेशो कर्तव्य इत्येव भवति नान्यस्य इति विना अतिनगोउपगुपच इति किं अतिखट्वः अतिमा
लः इत्यादेश इति किं देवदत्तेदेवदत्त षष्ठीस्थाने योगा परिभाषेयं योगानियमार्था षष्ठ्या
षष्ठी नियतयोगा स्याद्यत्र सा स्थाने योगा एव भवति नान्ययोगा स्थाने योगा निमित्तं सप्तमी प्रति
पत्तव्या स्थानशास्त्रे प्रसंगवाची यथा दर्भाणां स्थाने शरैः स्तरितव्यमिति दर्भाणां प्रसंग इति ग
म्यते एवमिहापि अस्तेः स्थाने भूः प्रसंगात् भू भवति भविता भवितुं भवितव्यं इति ब्रुवः प्रसंगे वचि
र्भवति वक्ता वक्तुं वक्तव्यं प्रसंगे संबन्धे निमित्ते च वर्तते षष्ठी बहवो हि षष्ठ्यर्थाः स्वस्वामिसंब

५

त्य॥ समीपसमूहविकारावयवाद्याः तत्र यावन्तः शब्दाः संभवन्ति तेषु प्राप्तेषु नियमः क्रियते षष्ठी
स्थानेयोगेति अधिकरणे बहुव्रीहिः निपातनाद् असमस्यालुक् स्थानेन्तरतमः परिभाषेय
मादेशनियमार्था स्थाने प्राप्यमाणानां [illegible] वर्णानामन्तरतम एवादेशः सदृशतमो भव
ति कुतस्त्व शब्दस्यान्तरतम्यम् स्थानार्थगुणप्रमाणतः स्थानतः अकः सवर्णे दीर्घः दण्डाग्रं क्षुप
थे कंठ्ययोरकारयोः कंठ्य एवाकारो भवति अर्थतः वतण्डी चासौ युवतिश्च वातण्ड्ययुवतिः पुंवद्भावे
नान्तरतमो पत्य शब्दो निर्दिश्यते गुणतः पाकः त्यागः रागः वजः कुयोस्यातिति चकारस्या
ल्पप्राणस्याघोषस्य ताद्दृश एव ककारो भवति जकारस्य घोषवतोल्पप्राणस्य ताद्दृश एव गा
कारो भवति प्रमाणतः अमुष्मै अमुभ्यां अदसोसेर्दादुदो मः इति ह्रस्वस्य ह्रस्वः उकारः दीर्घस्य
दीर्घः ऊकारः स्थान इति वर्तमाने पुनः स्थानग्रहणं किं यत्रानेकमान्तर्यं संभवति तत्र स्थानत एव
वान्तर्यं बलीयो यथा स्यात् चेतास्तोता प्रमाणतोकारो गुणः प्राप्तः तत्र स्थानत एवान्तर्यादे
कारौकारौ भवतः तमग्रहणं किं वाग्घसति त्रिष्टुब्भसति झयो हो न्यतरस्यामिति हकारस्य पू
र्वसवर्णे क्रियमाणे सोष्मणः सोष्माण इति द्वितीयाः प्रसक्ताः नादवतो नादवन्त इति तृतीयाः
तमग्रहणाद् ये सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः उरण् रपरः उः स्थाने अण् प्रसज्यमान एव
रपरो वेदितव्यः हर्ता किरति गिरति द्वैमातुरः त्रैमातुरः ऊ इति किं खेयं गेयम् अण्ग्रहणं किं

कर्त्ता

स्थानान्तरतमोर्थान्तिकः अलोन्त्यस्य षष्ठीनिर्दिष्टस्य यदुच्यते आदेशः सोन्त्यस्य स्थानेलः प्रत्ये
तव्यः इस्कोण्णः पैचगोणिः दशगोणिः ङिच्च ङिच्च य आदेशः सोनेकालप्यलोन्त्यस्य स्थाने
भवति आनङ् ऋतो द्वन्द्वे होतापोतारौ मातापितरौ तातङ् ङिकरणं गुणवृद्धिप्रतिषेधार्थं ना
स्यवादेशो भविष्यति जीवतात्भवान् जीवतात्त्वं आदेः परस्य परस्य शिष्यमाणं कार्यमादेरलः
प्रत्येतव्यं कं च परस्य शिष्यते यत्र पंचमीनिर्देशः तद्यथा ईदासः आसीनो यजते द्व्यन्तरुपसर्गेभ्या
परितद्वीपं अन्तरीपं समीपं अनेकाल्शित्सर्वस्य अनेकाल य आदेशः शिच्च सर्वस्य षष्ठी
निर्दिष्टस्य स्थाने भवति अस्तेर्भूः भविता भवितुं भवितव्यं शिन्त्वल्यपि जसिशसोः शि कुंडा
नि तिष्ठन्ति कुंडानि पश्य स्थानिवदादेशोनल्विधौ स्थान्यादेशयोः पृथक्त्वात्स्थान्याश्रयं का
र्यमादेशेन्न प्राप्नोतीत्यतिदिश्यते आरभ्यते स्थानिनामान्ते वर्तते स्थानिवदादेशो भवति स्था
न्याश्रयेषु कार्येषु अनल्लाश्रयेषु स्थान्यलाश्रयाणि कार्याणि वर्जयित्वा किमुदाहरणं धात्वङ्ग
कृत्तद्धिताव्ययसुप्तिङ्पदादेशाः धात्वादेशो धातुवद्भवति अस्तेर्भूः ब्रुवो वचिः आर्धधातुके वि
षये प्राग्वादेशेषु कृतेषु धातोरिति तव्यादयो भवन्ति भविता भवितुं भवितव्यं वक्ता वक्तुं व
क्तव्यं अङ्गादेशोऽङ्गवद्भवति केन काभ्यां कैः किमः कादेशे कृते अङ्गाश्रया इनदीर्घैस्भा
वा भवन्ति कृदादेशः कृद्वत् प्रकृत्य प्रहृत्य ल्यबादेशे कृते ह्रस्वस्य पिति कृति तुगिति तुग्भ

वति तद्धितादेशस्तद्धितवत् तायिके अयतने कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञा भवति
अव्ययादेशोऽव्ययवत् प्रस्तृत्य उपस्तृत्य अव्ययादिति सुपो लुग्भवति सुबादेशः सुब्वत् वृक्षाय प्ल
क्षाय सुपि चेति दीर्घो भवति तिङादेशस्तिङ्वत् अकुरुताम् अकुरुतम् अकुरुत सुप्तिङन्तं पद
मिति पदसंज्ञा भवति पदादेशः पदवत् ग्रामो वः स्वम् ग्रामो नः स्वम् पदस्येति रुत्वं भवति वत्क
रणं किं स्थान्यादेशस्य संज्ञा मा विज्ञायि अस्मिन्नयमपि यथा स्यात् आङो यमहनः आहत आव
धिष्टेत्यात्मनेपदमस्य यत्रापि आदेशग्रहणं किं आनुमानिकस्याप्यादेशस्य स्थानिवद्भावो
यथा स्यात् परुः पचतु अनल्विधाविति किं सुपथ्यन्त्यादादेशा न स्थानिवद्भवन्ति द्योः पन्थाः स इति ति
हल्ङ्याबादिति लोपो न भवति अचः परस्मिन्पूर्वविधौ आदेशः स्थानिवदितिवर्तते अच इत्स्या
निर्देशः परस्मिन्निति निमित्तसप्तमी पूर्वविधाविति विषयः अजादेशः परनिमित्तकः पूर्वस्य
विधौ कर्तव्ये स्थानिवद्भवति पटयति लघयति अवधीत् बहुखट्वकः पटुमाचष्टे इति णिचि टि एवं लघयतीति
लोपे कृते तस्य स्थानिवद्भावाद् अत उपधाया इति वृद्धिर्न भवति अवधीत् अतो लोपस्य स्थानिव
द्भावात् अतो हलादेर्लघोरिति हलन्तलक्षणा विभाषा वृद्धिर्न भवति बहुखट्वकः आपोऽन्यतर
स्यामिति ह्रस्वस्य स्थानिवद्भावाद् ह्रस्वान्तेऽन्त्यात्पूर्वमिति स्वरो न भवति अच इति किं प्रश्नः आक्राष्टां
आगत्य प्रश्न इति नङ्प्रत्यये कृते च्छ्वोः शूडनुनासिके चेति छकारस्य शकारः परनिमित्तकस्त

का॰
वृ॰ प्र॰
११

किन स्यान्निवद्भवति अर्थेकाष्टो क्लोकलीति सिचो लोपः परनिमित्तकः कृषेश्छकारस्य षडोः कः
सीति ककारे कर्त्तव्ये न स्यान्निवद्भवति आगतस्य अल्पयोन्नन्नामिकलोपः परनिमित्तकस्तत्किक
र्त्तव्ये न स्यान्निवद्भवति पूर्वस्मिन्निति किं युवजानिः वधूजानिः वैयाघ्रपद्यः आदीध्ये जायायानिङ्
न परनिमित्तकः तेन यलोपेन स्यान्निवत् वैयाघ्रपद्यदृत्यपरनिमित्तकः पादस्यान्तलोपः पु झा
वेन प्रतिवध्यते आदीध्ये इति दीधीङ् उत्तमैकवचने टेरेत्वस्य परनिमित्तक नायीवर्णयोर्दीधी
वेव्योरिति लोपो न भवति पूर्वविधावितिकिं नैयोगः वाभ्रवीयाः नैययः नैयोगाविति वृद्धिरादैजादेशाः
सवृद्धिर्लोपकर्त्तव्ये न स्यान्निवद्भवति वाभ्रवीयाः वाभ्रव्यस्यामी छात्राः वृद्धाच्छ इति हलस्तद्धितस्य
ति यलोपे कर्त्तव्ये अवादेशो न स्यान्निवद्भवति नैययः आतो लोप इटि च इत्याकारस्य लोपः इतश्चानिञ
इति अज्झलोपः कार्य्यविधौ न स्यान्निवद्भवति न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्व
रदीर्घजश्चर्विधिषु पूर्वत्रासिद्धे स्थानिवद्भावप्रतिषेधो विधिषु प्रतिषिध्यते पदान्तविधिप्रति
अजादेशो न स्यान्निवद्भवति कौस्तः यौस्तः कानि सन्ति यानि सन्ति अस्तेः सारल्लोपः क्ङिति सार्वधातु
के इति परनिमित्तकः सवर्णविधावावादेशः यण्णादेशः च कर्त्तव्ये न स्यान्निवत् स्याद् अस्माद्वचनाद्भवति
द्विर्वचनद्विर्वचनविधिं प्रति न स्यान्निवद्भवति दध्यत्र यणादेशः परनिमित्तकः सस्यान्निवद्भावाद्न द्विर्वे
ति दकारस्य द्विर्वचनेन स्यात् अस्माद्वचनाद्भवति वरेयोगो याजादेशः सवर्णस्य विधिं प्रति न स्या

निवद्भवति अस्य यायावरः प्रवपेत पिंडान् यातेर्यङ्लन्ताद् यङ् इति वरचि कृते अतो लोपः परनि
मित्तकस्तस्य स्थानिवद्भावात् अतो लोप इति वेत्याकारलोपः स्यादिति वचनान्न भवति यलोपः यलोप
विधिं प्रति अजादेशो न स्थानिवद्भवति कंडूतिः कण्डूयतेः क्तिनि कृते अतो लोपः परनिमित्तकः
लोपो व्योर्वलीति यलोपे स्थानिवत्स्यात् अस्मादेव वचनान्न भवति कंडूतिः स्वरस्वरविधिं प्रति न स्थानि
वत् चिकीर्षकः जिहीर्षकः ण्वुलि कृते अतो लोपः परनिमित्तकः लिति प्रत्ययात्पूर्वमुदात्तमिति
स्वरे कर्तव्ये न स्थानिवद्भवति ईकारे स्वरः सवर्णासवर्णविधिं प्रति अजादेशो न स्थानिवद्भवति शि
ण्ढि पिण्ढि शिषः पिषश्च लोण्मध्यमैकवचने रुधादिभ्यः श्नम् हि त धि ढुत्व जश्त्वे ष्टुत्वे श्नसोरल्लोपः
क्ङिति सार्वधातुके परनिमित्तकः सः अनुस्वारस्य ययि परसवर्ण इति परसवर्णे कर्तव्ये न स्थानिव
द्भवति अनुस्वारः अनुस्वारविधिं प्रति अजादेशो न स्थानिवद्भवति शिंषन्ति पिंषन्ति नश्चापदान्त
स्य झलीत्यनुस्वारे कर्तव्ये श्नसोरल्लोपो न स्थानिवद्भवति दीर्घ दीर्घविधिं प्रत्यजादेशो न स्थानि
वद्भवति प्रतिदीव्नः प्रतिदीव्ने प्रतिदिवन् भसंज्ञायां कृतायां तृतीयैकवचने चतुर्थ्येकवचने अल्लो
पोऽन इत्यकारलोपस्तस्य स्थानिवद्भावाद् हलि चेत्युपधायां वर्णे दीर्घो न स्यात् नह्ययं वकारो हल्पर
स्तस्मादेव वचनाद्भवति जश् जश्विधिं प्रति न स्थानिवत् सग्धिश्च मे सपीतिश्च मे बब्धां ते हरी धानाः
अदेः क्तिनि बहुलं छन्दसीति घस्लृ आदेशः घसिभसोर्हलि च इत्युपधालोपः झलो झलीति स

लोपः कङत्तशोर्योपद इति यवं उपधालोपस्य स्थानिवत्त्वात् कलोंजक्षशीति चकारस्य जशत्वं त
स्मात् अस्माद्वचनाद्भवति समानाधिपिरिति समानस्य सभावः सपिपः अमेलोद्धि द्विर्वचनं त समस्मा
म प्सापः स्नु द्विर्वचनमभ्यासकार्यं चसिभसोर्हलि चेत्युपधालोपः कलोकलीतिम लोपः क
वस्तशोर्योपद इति यवं उपधालोपस्य स्थानिवत्त्वात् कलोंजक्षशीति भकारस्य जश्त्वं तस्मात् अ
स्माद्वचनाद्भवति बभ्राम चर चविर्विप्रति नस्थानिवद्भवति जक्षतुः जक्षुः अक्षन्नमीमदन्त
पितरः लिटि द्विर्वचनं बहुवचनयोरादेशे स्तादेशाः गमहनजनखनघसां लोपः क्ङित्यनङीत्युप
धालोपः द्विर्वचनमभ्यासकार्यं तत्रोपधालोपस्य स्थानिवत्त्वात्नचरि चेति चकारस्य चत्वं तस्मा
दस्माद्वचनाद्भवति शासिवसिघसीनां चेति षत्वं जक्षतुः जक्षुः अक्षन्निति अदेस्लंदि बहुवच
ने च स्लादेशाः स्नागातस्यमेवेघसह्वरनेहृदह्वाद्दितिलक् गमहनजनखनघसामित्युपधालोपः
तस्य स्थानिवत्त्वात् नचरि चेति चर्त्वं तस्मात् अस्माद्वचनाद्भवति अत्र स्वरदीर्घयलोपेषु लोपाजा
देशो न स्थानिवद्भवत्यन्यः स्थानिवदेवेति तेन बहुखट्वकः किर्योः किर्यः वाय्वोः इति स्वरदीर्घय
लोपा न भवन्ति द्विर्वचनेपि द्विर्वचननिमित्तेचि अजादेशस्य स्थानिवद्भवति द्विर्वचन एव कर्त्त
व्ये रूपातिदेशश्चायम् चिनियतनकालः कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते आल्लोपोपधा
लोपणिलोपयणायवायावादेशाः प्रयोजनं आल्लोपः पपतुः पपुः आतो लोप इति वाकारलोपे

६

कृते स्थानिवद्भावादेकाच इति द्विर्वचनं भवति उपधालोपः जघ्नतुः जघ्नुः गमहनजनखनघसामि
त्युपधालोपे न्व्कृताद्विर्वचनं न स्यात् अस्मादचनाङ्गवन्ति णिलोपः आटिटत् अटतेर्णिवि
ल्वचिस्त्रेः चङि णिलोपे च कृते तस्य स्थानिवद्भावाट् जाटेर्द्वितीयस्येति टिशब्दस्य द्विर्वचनं भवति
यणः वक्रतुः वक्रुः करोतेरतुसि उसि च यणादेशे कृते न्व्कृताद्विर्वचनेन स्यात् स्थानिवद्भाव
ति अयवायावादेशाः निनयुः निनायः लुलवुः लुलाव नयतेः लुनातेश्चोत्तमपुरुषे णलि गुणे कृ
ते वृद्धौ च अयवायावादेशास्तेषां स्थानिवद्भावान्नेलो नैलो इति द्विर्वचनं भवति द्विर्वचने इति किं
जग्मे अस्त्रवणमाकारस्य न भवति परेणाच समहवृद्धिरैचीति वृद्धिर्न भवति द्विर्वचनतिमित्तर
तिकिं इयूषति उ टियणादेशो न स्थानिवद्भवति अचीति किं जेघ्रीयते देध्मीयते ई घ्राध्मोर्य
ङि चेति ईकारादेशः तस्य स्थानिवद्भावादाकारस्य द्विर्वचनं स्यात् अज्ग्रहणात्र भवति अदर्श
नं लोपः अदर्शनमश्रवणमनुच्चारणमनुपलब्धिरित्यनर्थान्तरमेतैः शब्दैर्योऽर्थोऽभिधीयते तस्य
लोप इतीयं संज्ञा भवति अर्थस्येयं संज्ञा प्रसक्तस्या दर्शने लोपसंज्ञं भवं गोधाया ढ्रक् गौधेरः
पचेरन् जीवेरदानुक् जीरदानुः स्त्रिवेरास्त्रेमाणं यकारवकारयोरदर्शनमिहोदाहरणं अ
परस्मान्वैयाटेः प्रसक्तस्य लोपप्रदेशा लोपो व्योर्वलीत्येवमादयः प्रत्ययस्य लुक् श्लु लपः अ
दर्शनमितिवर्तते प्रत्ययादर्शनस्य लुक् श्लु लुप् इति तिस्रः संज्ञा भवन्ति अनेकसंज्ञाविधाना

ति४

का॰
वृ॰ प्र॰
१२

वत संज्ञाविनग्रहणमिह विज्ञायते लुक्संज्ञाभावितं प्रत्ययादर्शनं लुक्संज्ञं श्लुसंज्ञाभावितं श्लुसंज्ञम
लुप्संज्ञाभावितं लुप्संज्ञमिति तेन संज्ञानां संकरो न भविष्यति विधिप्रदेशेषु संज्ञाभाविनी विज्ञाय
ते अग्निचिज्जुहोति वर्णाः प्रत्ययग्रहणं किं अगस्त्यः कुण्डिनाः संज्ञाप्रदेशा लुक् हित्वलुकि जुहो।
त्यादिभ्यः श्लुः जनपदे लुप् इत्येवमादयः॥ प्रत्ययलोपे प्रत्ययलक्षणम्॥ प्रत्ययनिमित्तं कार्यमसत्य
पि प्रत्यये कथं नाम स्यादित्यारंभः प्रत्ययलोपे कृते प्रत्ययहेतुकं कार्यं भवति अग्निचित् सोमसु
त् अधोगित्यत्र सुप्तिङोर्लुप्तयोः सुप्तिङन्तं पदमिति पदसंज्ञा भवति अधोक् दुहेर्लङि तिप् शप्
लुक् तिलोपः ... जरत ... पुनः प्रत्ययग्रहणं वर्त्तमाने पुनः प्रत्ययग्रहणं किं कृत्स्नप्रत्य
यलोपे यथा स्यात् इह मा भूत आघ्नीत सप्तमी यहनिगमालिङि ... लिङः सलोपोन्त्य
स्येति सीयुटः सकारलोपः प्रत्ययैकदेशलोपः तत्र प्रत्ययलक्षणात् कृल्ली स्यन्तनासिकलोपेन
भवति प्रत्ययलक्षणमिति किं रायः कुलं रैकुलं गवे हितं गोहितं आयवादेशौ न भवतः॥ न
लुमताङ्गस्य॥ सर्वेणानि प्रसक्तमिति विशेषप्रतिषेध उच्यते लुमता शब्देन लुप्ते प्रत्यये यदङ्गं
तस्य प्रत्ययलक्षणं कार्यं न भवति गर्गाः मृष्टः जुहुतः ... लुमता लुप्ते योरङ्गस्य गुणवृद्धी
न भवतः अङ्गस्येति किं पंचकसप्तपयः सामलुमतेति किं कार्यं हार्यते॥ अचोन्त्यादिटि॥ अच इति
निर्धारणे षष्ठी जातावेकवचनं अचां सन्निविष्टानां यान्त्यस्तदादि शब्दरूपं टिसंज्ञं भवति अग्नि

ते

२

२

वितः इक्कव्रूः सोमसुत इक्कन्दः आताम् आथाम् आशीर्भूः पचेते पचेथे इति प्रदेशादिति आत्म
नेपदानां देरिति एवमादयः अलोन्त्यात्पूर्व उपधा धातोरन्त्याद्वर्णात्समुदाये अन्त्यात् हलः पूर्वो लेवोप
धासंज्ञो भवति पच पठ अकारः किद भिद इकारः वृत वृध ऋकारः अल इति किं शिष्टः शि
ष्टवान् समुदायस्यैव माभूत उपधाप्रदेशाः अत उपधाया इत्येवमादयः तस्मिन्निति निर्दि
ष्टे पूर्वस्य तस्मिन्निति सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं भवति नोत्तरस्य इको यणचीति दध्युदकम
मधिदं पचत्योदनेति दिष्टग्रहणमान्तर्यार्थं अग्निचित् अत्र इति व्यवहितस्य माभूत तस्मा
दित्युत्तरस्य तिदिष्टग्रहणमनुवर्तते तस्मादिति पंचम्यर्थनिर्देशे उत्तरस्यैव कार्यं भवति न पूर्व
स्य तिङ्ङतिङः ओदनं पचति इह न भवति पचत्योदनं इति स्वं रूपं शब्दस्याशब्दसंज्ञा शास्त्रे स्वमेव
रूपं शब्दस्य ग्राह्यं बोध्यं प्रत्याय्यं भवति न वाच्यार्थः शब्दसंज्ञा वर्जयित्वा शब्देनार्थवाचिना अर्थे कार्यस्या
संभवात् तद्वाचिनां संप्रत्ययो माभूदिति सूत्रमिदमारभ्यते अग्नेर्ढक् आग्नेयमष्टाकपालं नि
र्वपेत् अग्निशब्दादग्निशब्दस्य ग्राहको भवति ज्वलनः पावकः धूमकेतुरिति नातः प्रत्ययो भवति
उदश्वितोन्यतरस्यां औदश्वितः औदश्वित्कं उदकमिश्रकालशेयं तक्रं उदकेन तं मथितमिति नातः
प्रत्ययो भवति अशब्दसंज्ञेति किं दाधाघ्वदाप् तरप्तमपौ घः जुग्रहणेषु च ग्रहणेषु च संज्ञिनो
भवति ग्रहणं न संज्ञायाः स्वितद्विशेषाणां वृक्षाद्यर्थमिति निर्देशः कार्यस्तत्तावत्क्व तद्विशे

का· वृ· प्र·
१४

षाणां ग्रहणं भवतीति किं प्रयोजनं वृक्षाद्यर्थं विभाषा वृक्षमृगतृणेति प्लक्षन्यग्रोधं प्लक्षन्यग्रो
धाः पित्पर्यायवचनस्य च स्वाद्यर्थं पिन्निर्देशः कर्तव्यस्ततो वक्तव्यं पर्यायवचनस्य ग्रहणं भवति स्वस्य च
रूपस्य तद्विशेषाणां चेति किं प्रयोजनं स्वाद्यर्थं स्वेपोषः स्वपोषं पुष्टः रैपोषं धनपोषं गोपोषं अश्व
पोषं जित्पर्यायवचनस्यैव राजाद्यर्थं जिन्निर्देशः कर्तव्यः ततो वक्तव्यं पर्यायवचनस्यैव भवति किं
प्रयोजनं राजाद्यर्थं सभा राजामनुष्यपूर्वा इनसभं ईश्वरसभं तस्यैव न भवति राजसभा तद्विशेषा
णां च न भवति पुष्यमित्रसभा चन्द्रगुप्तसभा झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थं झिन्निर्देशः कर्तव्य
स्ततो वक्तव्यं तस्य च ग्रहणं भवति तद्विशेषाणां चेति किं प्रयोजनं मत्स्याद्यर्थं पक्षमत्स्येति मत्स्यान्ह
न्ति मात्स्यिकः तद्विशेषाणां च शाकुलिकः पर्यायाणां न भवति अजिह्मान्हन्ति अनिमिषान्हन्तीति
स्य अस्यैकं पर्यायवचनस्यैवेष्यते मीनान्हन्तीति मैनिकः अणुदित्सवर्णस्य चाप्रत्ययः परेणाणका
रेण प्रत्याहारग्रहणं अणगृह्यमाणा उदिच्च सवर्णस्य ग्राहको भवति स्वस्य रूपस्य च प्रत्ययं वर्ज
यित्वा आद्गुणः अस्य च्वौ यस्येति च स्वरानुनासिक्यकालभिन्नस्य ग्रहणं भवति उदित्खल्वपि चुटू
लशक्वतद्धिते वर्णस्य ग्रहणं भवति अप्रत्यय इति किं सनाशंसभिक्ष उः अणां प्रतिक इति दीर्घो
न भवति तपरस्तत्कालस्य तः परो यस्मात्सोयं तपरः तादपि परः तपरः तपरो वर्णस्तत्कालस्या
त्मना तुल्यकालस्य गुणान्तरयुक्तस्य सवर्णस्य ग्राहको भवति स्वस्य च रूपस्य विध्यर्थमिदं अणि

ल

तिनानुवर्त्तते अणामन्येषां न परग्रहणमिदमेव ग्रहणकशास्त्रे अतोभिसऐसित्येवमादिषु सर्वेषु ग्रह
णकशास्त्रेन प्रवृत्तमेव अनपराणन्तस्यावकाशः किमर्थं तपरग्रहणं अतोभिसऐस् वृक्षैः विर
तोरनुनासिकस्मात् अश्वाः गोजाः तकारस्येति किं खट्वाभिः आदिरन्त्येन सहेता आदिरन्त्ये
नेत्संज्ञकेन सह गृह्यमाणः तन्मध्यगानां ग्राहको भवति स्वस्य च रूपस्य यथा अक् अ
ल् हल् सुप् तिङ् अन्त्येनेति किं सुडिति टा इत्येकवचनेन टा इत्यनेन ग्रहणं माभूत् ये
न विधिस्तदन्तस्य येन चाप्येन विधिर्विधीयते स तदन्तस्यात्मान्तस्य समुदायस्य संज्ञा भ
वति स्वस्य च रूपस्य परश्च इवर्णान्तात् अच्प्रत्ययो भवति चयः जयः अयः उपावपके वर्णा
न्तात्प्रत्ययो भवति आवपके अवपलाव्यं अवपणाव्यं समासप्रत्ययविधौ प्रतिषेधः
समासविधौ प्रत्ययविधौ च तदन्तविधेः प्रतिषेधो वक्तव्यः द्वितीया श्रितादिभिः सह स
मस्यते कष्टश्रितः इह माभूत् कष्टं परमश्रितः प्रत्ययविधौ नडादिभ्यः फक् इह
माभूत् सूत्रनडस्यापत्यं सौत्रनाडिः किमविशेषेण नेत्याह उगिद्वर्णग्रहणवर्जं उगितश्चे
ति ङीप्प्रत्ययः तदन्तादपि भवति भवती अतिभवती वर्णग्रहणमत इञ् दाक्षिः प्लाक्षिः
यस्मिन्विधिस्तदादावल्ग्रहणे इति वक्तव्यं अचि श्नुधातुभ्रुवां य्वोरियङुवङौ श्रियः भ्रुवः

श

वृद्धिर्यस्याचामादिस्तद्वृद्धं यस्येति समुदाय उच्यते अचां मध्ये यस्य वृद्धिसंज्ञक आदिभूतस्त
च्छब्दरूपं वृद्धसंज्ञकं भवति अचामिति जातौ बहुवचनं शालीयः मालीयः औपगवीयः का
पटवीयः आदिरिति किं सभासन्नयने भवः साभासन्नयनः आकारमात्रस्य वृद्धिसंज्ञा न।
भवति वा नामधेयस्य वृद्धसंज्ञा वक्तव्या देवदत्तीयाः दैवदत्ताः गोत्रान्तात् समस्तव
त्प्रत्ययो भवतीति वक्तव्यं घृतप्रधानो रौढिः घृतरौढिः तस्य छात्राः घृतरौढीयाः ओदनप्र
धानः पाणिनिः ओदनपाणिनिः तस्य छात्राः ओदनपाणिनीयाः वृद्धाम्भीयाः वृद्धकाश्यपी
याः जिह्वाकात्यहरितकात्यवर्जं जैह्वाकाताः हारितकाताः त्यदादीनि च यस्याचामादि
ग्रहणमनुवर्तते केवलमेव यानि त्यदादीनि शब्दरूपाणि वृद्धसंज्ञानि भवन्ति त्य
दीयं तदीयं यदीयं इदमीयं एतदीयं अदसीयं एकीयं द्वीयं त्वदीयं मदीयं त्यादायनिः मा
दायनिः भवदीयं किमीयं एङ् प्राचां देशे यस्याचामादिरिति वर्तते एङ् यस्याचामादिस्तत्प्रा
चां देशाभिधाने वृद्धसंज्ञं भवति एणीपचनीयः गोनर्दीयः भोजकटीयः एङिति किं
आहिच्छत्रः कान्यकुब्जः प्राचामिति किं देवदत्तो नाम वाहीकेषु ग्रामः तत्र भवो दैवदत्तः देश इ
ति किं गोमत्यां भवा गौमता मत्स्याः प्रागुदीचौ विभजते हंसः क्षीरोदके यथा विदुषां शब्द।

दा॰२

सिद्ध्यर्थेस्मानःपातशरावती ॥ इतिकाशिकायांवृत्तौप्रथमस्याध्यायस्यप्रथमःपादः ॥
ॐनमःसरस्वत्यैः गाङ्कुटादिभ्योञ्णिन्ङित अतिदेशोयं गाङितिङकारस्सामान्यात्पूर्वत्रादि
ष्टादेशोगृह्यतेनगाङ्गताविति धातुः कुटादयोपि कुटकौटिल्येइत्यतश्चारभ्ययावत् कु
ङ् शब्देइत्येतेभ्योगाङ्कुटादिभ्यः परेञ्णितःप्रत्ययाङितोभवन्ति अध्यगीष्ट अध्यगीषाताम
अध्यगीषत कुटादिभ्यः कुटिताकुटितुं कुटितव्यं उत्पुटिता उत्पुटितुं उत्पुटितव्यं अञ्णि
तिकिं उत्कोटयतिउत्कोटकः उत्कोटोवर्त्ततेव्यचेःकुटादित्वमनसीतिवक्तव्यं विचिताविचि
तुं विचितव्यं अनसीतिकिं उरुव्यचाः विजइट ओविजीभयचलनयोस्तस्मात् पर
इडादिःप्रत्ययोङिद्भवति उद्विजिताउद्विजितुं उद्विजितव्यं इडितिकिं उद्वेजनं उद्वेजनी
यं विभाषोर्णोः इडितिवर्त्ततेऊर्णोतेर्न्नकारादनेरुस्तस्मात्परः इडादिःप्रत्ययोविभाषाङिद्भवा
तिप्रोर्णुविताप्रोर्णविताइडित्येवप्रोर्णवनं प्रोर्णवनं प्रोर्णवनीयं सार्वधातुकमपित् सा
र्वधातुकंयदपित्तन्ङिद्भवति कुरुतःकुर्वन्तिचिनुतःचिन्वन्तिचिनुतःचिन्वन्तिसार्वधातु
कमितिकिं कर्त्ताकर्त्तुंकर्त्तव्यं अपिदितिकिंकरोतिकरोषिकरोमि असंयोगाल्लिट्कित्
अपिदितिवर्त्ततेअसंयोगान्ताद्धातोःपरोलिट्प्रत्ययःकिद्भवतिबिभिदतुःबिभिदुःयि

का॰ अपि वि २
वृ॰ प्र॰
१६
अन्वि

विक्रदतुः विविक्रडः असंयोगादितिकिं ससंसे ददंसे [illegible] अनिदितां हलउतिनलोपि पो
नभवतिलेवविभेदविभेदिथ इन्धि भवति श्रन्थ च इन्धि भवति इत्येताभ्यां च परो लिट्प्रत्ययः
किद्भवति समीधे समीधिरे हन्तसम पुपुरे येऽयवर्णाः भवतेः बभूवापि बभूव बभूविथ इत्येः स
योगार्थग्रहणं भवतेः पिदर्थं ग्रहेरपि ग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यं श्रथतुः श्रेथुः ग्रे
थतुः ग्रेथुः देभतुः देभुः परिषस्वजे परिषस्वजाते स्तदम्भउगुफग्रन्थस्वञ्जशबदवसः त्वम्भ
दम्भउगुफग्रन्थस्वञ्जशबदवस इत्येतेभ्यः परः क्त्वाप्रत्ययः किन्नभवति न क्त्वा सेडिति प्रतिषेधं वक्ष्य
तितस्यायं [illegible] पुरस्तादपकर्षः गुफग्रन्थस्वञ्जश्रीनां तु रलोव्युपधादितिविकल्पेप्राप्ते
नित्यार्थं वचने स्तदित्वा स्तम्भित्वा गुफित्वा ग्रन्थित्वा स्वञ्जित्वा शबित्वा वदित्वा उषित्वा रुदविदमुष
ग्रहिस्वपिप्रच्छः संश्च रुदविदमुषग्रहस्वपप्रच्छ इत्येतेभ्यः परः संश्च क्त्वा च किद्भवतः रु
दविदमुषीणां रलोव्युपधादितिविकल्पेप्राप्ते नित्यार्थं ग्रहणं ग्रहेर्विध्यर्थमेव स्वपिप्र
च्छ्योः सन्नर्थं ग्रहणं किदेव हि क्त्वा रुदित्वा रुरुदिषति विदित्वा विविदिषति मुषित्वा मुमुषि
षति गृहीत्वा जिघृक्षति सुप्त्वा सुषुप्सति पृष्ट्वा पिपृच्छिषति ग्रहादीनां किद्वात्संप्रसारणम् किरश्च पा
च भ्य इति प्रच्छेर्विरामः इकोकल सत्रिंशन्नवर्तते केतिनिवृत्तं ईकारान्ताद्धातोः परस्मैप

झलादिः किम्भवति विवीषति तुष्टूषति विकीर्षति जिहीर्षति इकः इति किं पिपासति तिष्ठा
सति झलिति किं शिशयिषते किमर्थं पुनरिदमुच्यते गुणो माभूदिति अज्झनगमां सा
नीति दीर्घे गुणस्य बाधकं भविष्यति यथैव तर्हि गुणो बाध्यते तथैव णिलोपमपि बाधेत तस्मा
द्दीर्घे न सावकाशत्वादनयं किन्नमिदमारभ्यते चिवीषतीत्यादिषु सावकाशो दीर्घे न परत्वाण्णि
लोपेन बाध्यते तीप्सतीति इकः किं गुणो माभूद्दीर्घो भान्कुतो भवेत् अनर्थकं तु हस्वार्थो।
दीर्घाणां तु प्रसज्येत सामर्थ्याद्धि पुनर्भाव्यम् ऋदित्त्वं दीर्घसंश्रयं दीर्घाणां नाकृते दीर्घे णि
लोपस्तु प्रयोजनं हलन्ताच्च इकः सन् झल्किदिति वर्त्तते समीपवचनोयमन्तशब्दः हल्वा
सावन्तश्च हलन्तः इगन्तादिक समीपाद्धलः परः सन् झलादिः किद्भवति विभित्सति बु
भुत्सते इकः इत्येव यियक्षति झलित्येव विवर्तिषते दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सि
द्धं धिप्सति लिङ्सिचावात्मनेपदेषु हलन्तादिको झल्किदिति वर्त्तते सन्नेति निवृत्तम्
इकः समीपाद्धलः परौ झलादी लिङ्सिचावात्मनेपदेषु परेषु कितौ भवतः भित्सीष्ट भुत्सीष्ट
सिचि अभित्त अबुद्ध इकः इत्येव यक्षीष्ट अयष्ट संप्रसारणं हि स्यात् हलन्तादित्येव चेषी
ष्ट अचेष्ट गुणो न स्यात् झलित्येव वर्त्तिषीष्ट अवर्त्तिष्ट गुणो न स्यात् उश्च ऋवर्णान्ताद्धा।

तोः परौ लिङ्सिचावात्मनेपदेषु झलादी किती भवतः । कृषीष्ट हृषीष्ट सिचः अवल्पिष्ट अकृत अघृ
त । ह्रस्वादङ्गादिति सिचो लोपः । फलिम्बवरिषीष्ट अवरिष्ट । वा गमः । लिङ्सिचावात्मनेपदेष्वि
ति निवर्तते गमेर्धातोः परौ लिङ्सिचावात्मनेपदेषु झलादी किती वा भवतः । संगसीष्ट संगंसीष्ट
समगत समगंस्त किन्नु पक्षेऽनुनासिकलोपो भवति अनुदात्तोपदेशवनतितनोत्यादीनामि
ति । हनः सिच् । हन्तेर्धातोः परः सिच् किद्भवति आहत आहसातां आहसत सिचः किद्वादनु
नासिकलोपः । सिजग्रहणं लिङ्निवृत्त्यर्थं उत्तरसूत्रानुवृत्तिर्मा भूत् आत्मनेपदग्रहणमनु
वर्तमनुवर्तते इह तु परस्मैपदेषु हन्तेर्वधभावस्य नित्यत्वात् किन्तस्य प्रयोजनं नास्ति । यमो ग
न्धने । सिजात्मनेपदेष्विति निवर्तते यमेर्धातोर्गन्धने वर्तमानात्परः सिच् प्रत्ययः किद्भवति आ
त्मनेपदेषु परतः । गन्धनं सूचनं परेणाप्रकाश्यमानस्यावद्यस्याविष्करणं अनेकार्थत्वाद्धा
तूनां यमिरत्र वर्तते उदायत उदायसातां उदायसत सूचितवानित्यर्थः । सिचः कित्वादनुना
सिकलोपः । आङो यमहनः इत्यात्मनेपदं गन्धन इति किं । आयंस्त पादं आयंस्त कूपाद्रज्जुं उद्धृत
वानित्यर्थः सकर्मकत्वेऽपि समुदाङ्भ्यो यमोऽग्रन्थे इत्यात्मनेपदं । विभाषोपयमने । यमः सिच् आ
त्मनेपदेष्विति निवर्तते यमेर्धातोरुपयमने वर्तमानात्परः सिच् प्रत्ययो विभाषा किद्भवति आत्म

नेपदं भवति । उपायत कन्यां उपायंस्त कन्यां उपायत भार्यां उपायंस्त भार्यां उपयमनं स्वीकरा
णं विवाहनं दारकर्म पाणिग्रहणमित्यर्थः । उपायमः स्वकरणे इत्यात्मनेपदं स्थाघ्वोरिच्च ।
सिच् आत्मनेपदेष्विति वर्त्तते तिष्ठतेर्घोः घुसंज्ञकानां च इकारान्तादेशः अस्मिंश्च किद्भवति
आत्मनेपदेषु परतः । उपास्थित उपास्थिषातां उपास्थिषत घुसंज्ञकानां अदित अधित इच्च क
स्मात्कारेणं दीर्घो माभूत् हतेपिसः अनन्तरेस्तु तो माभून्स्तु तस्य विषये स्थितः न क्त्वा सेट् क्त्वाप्रत्य
यः सेट् न किद्भवति देवित्वा सेवित्वा वर्तित्वा वर्धित्वा सेडिति किं कृत्वा हृत्वा ग्रहणं किं निष्ठ
हीतिः उपस्थितिः निकुचितः न सेडिति कृते किं तन्निष्ठायामवधारणात् ज्ञापकात्र परो
न्यायोस्मिन्निकल्प्यग्रहणं विड्ःइत्येकिन्तु नियोगान्तरेणान्तलक्षणैर्वान्निवस्यर्थे किद तदिष्या
मिटि
न्निरदहीतिः प्रयोजनं निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः न सेडित्यनुवर्त्तते शीङादिभ्यः परो नि
ष्ठाप्रत्ययः सेट् न किद्भवति शयितः शयितवान् प्रस्वेदितः प्रमेदितवान् प्रक्ष्वेदितः प्रक्ष्वेदि
तवान् प्रधर्षितः प्रधर्षितवान् सेडित्येव स्विन्नः स्विन्नवान् स्विदादीनामादितश्चेति निष्ठाया
मिट्प्रतिषिध्यते विभाषाभावादिकर्मणोरिति पक्षे प्राप्नोति स विषयः किन्तु प्रतिषेध
स्य स्थस्मिन्नितिन्यायाम् स्येषयान्तो स्मिन्निति न्यायां अर्थे निष्ठा सेट् न किद्भवति तिति न्याय मा

प्रस्वेदितवान् प्रमेदितः

६

का·
वृ·प्र·
१८

मर्षितः मर्षितवान् । तितिक्षायामिति किं । अपमर्षितं वाक्यमाह । उडुपधाद्भावादिकर्मणोर्वा
न्यतरस्यां निष्ठा सेट् न किदिति वर्तते । उकारोपधाद्धातोः परः भावे आदिकर्मणि च वर्तमानो निष्ठा
प्रत्ययः सेडन्यतरस्यां न किद्भवति । द्युतितमनेन द्योतितमनेन । प्रद्युतितः प्रद्योतितः । मुदितम
नेन मोदितमनेन । प्रमुदितः प्रमोदितः । उडुपधादिति किं । स्विदितमनेन । भावादिकर्मणोरि
ति किं । रुचितं कार्षापणं । सेडित्येव । प्रभुक्त ओदनः । व्यवस्थितविभाषेयं । तेन शाब्दिकगणाना
मेव भवति । गुपधविषये तेन गुधितमित्यत्र न भवति । मृडः क्त्वा च । अन्यतरस्यामिति न स्वर्यते । उ
त्तरसूत्रे पुनर्वावचनात् । नेसेडिति वर्तते । मृडश्चेहितः । क्लिशः क्त्वानिष्ठयोः । मृडश्चेति मृडः
परः क्त्वाप्रत्ययः निष्ठा च सेड् न किद्भवति । पवितः पवितवान् । क्त्वाग्रहणमनक्त्वासेडिति सिद्धे
एव प्रतिषेधः । तथा चोक्तं । नित्यमकित्त्वमिडाद्योः क्त्वानिष्ठयोः मृडादिपरयोः क्त्वाग्रहणमनन्तरार्थं
नोपधात् थफान्ताद्वा । निष्ठेति निवृत्तं । नकारोपधाद्धातोः थकारान्तात् फकारान्ताच्च परः
क्त्वाप्रत्ययः सेड्वा न किद्भवति । ग्रथित्वा ग्रन्थित्वा । ग्रथित्वा ग्रन्थित्वा । गुफित्वा गुम्फित्वा । नोपधादि
ति किं । रेफित्वा । थफान्तादिति किं । स्रंसित्वा ध्वंसित्वा । वञ्चिलुञ्च्यृतश्च । वञ्चिलुञ्चि ऋत इत्ये
तेभ्यः परः क्त्वाप्रत्ययः सेड्वा न किद्भवति । वचित्वा वञ्चित्वा । लुचित्वा लुञ्चित्वा । ऋतित्वा अर्तित्वा

य॰ त्वा॰

तेरीयङाधधातुके विकल्पितः स यत्र पक्षे नास्ति तत्रेदमुदाहरणं सेडित्येव क्त्वा ॥ तृषिमृषि
कृषेः काश्यपस्य ॥ न क्त्वा सेडिति प्रतिषेधे प्राप्ते किद्वा विकल्प्यते तृषिमृषिकृषिभ्य उत्तरो यः परः क्त्वा
प्रत्ययः काश्यपस्याचार्यस्य मतेन वा किद्भवति तृषित्वा तर्षित्वा मृषित्वा मर्षित्वा कृषित्वा कर्षि
त्वा काश्यपग्रहणं पूजार्थं वेत्येव हि वर्तते ॥ रलो व्युपधाद्धलादेः संश्च ॥ वेति वर्तते सेडिति च
उश्च इश्च वी वी उपधे यस्य स व्युपधः उकारोपधादिकारोपधाच्च धातोः रलन्ताद्धलादेः परः से
ट् क्त्वा च सेटौ वा कितौ भवतः द्युतित्वा द्योतित्वा दिद्युतिषते दिद्योतिषते लिखित्वा लेखित्वा लि
लिखिषति लिलेखिषति रल इति किं देवित्वा दिदेविषति व्युपधादिति किं वर्तित्वा विवर्तिष
ते हलादेरिति किं एषित्वा एषिषिषति सेडित्येव भक्त्वा बुभुक्षते ॥ ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥
ऊ इति मात्रिकद्विमात्रिकत्रिमात्रिकाणां त्रयाणामेवैष प्रश्लेषनिर्देशः ह्रस्वदीर्घप्लुत इति द्वन्द्वैक
वद्भावे पुंलिङ्गनिर्देशः उ ऊ ऊ३ इत्येवं कालोऽच् यथाक्रमं ह्रस्वदीर्घप्लुत इत्येवं संज्ञो भ
वति उकालो ह्रस्वः दधि मधु ऊकालो दीर्घः कुमारी गौरी ऊ३ कालः प्लुतः देवदत्त३ अत्र व
सिकालग्रहणं परिमाणार्थं अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थं प्रतक्ष्य प्ररक्ष्य
स्वाश्रयमत्वं माभूत् तितउच्छत्रं दीर्घात्पदान्ताद्वेति विभाषा तं माभूत् ह्रस्वदीर्घप्लुतप्रदेशा

ह्रस्वोनपुंसकेप्रातिपदिकस्यअकृत्सार्वधातुकयोर्दीर्घःवाक्यटेःप्लुतउदात्त इत्येवमादयः
अचश्च परिभाषेयं स्थानिनियमार्थाह्रस्वदीर्घप्लुताःशिष्यमाणाअचएवस्थानेवेदितव्याः
वक्ष्यतिह्रस्वोनपुंसकेप्रातिपदिकस्यरैअतिरि नौअतिनुउपगुअचइतिकिम्
सुवाग्ब्राह्मणकुले अकृत्सार्वधातुकयोर्दीर्घःचीयतेस्तूयते अचइतिकिंक्रियतेह्रियतेवा
क्यटेःप्लुतउदात्तःदेवदत्ता३ यज्ञदत्ता३ अचइतिकिं अग्निचि३त् सोमसु३त् तकारस्यमाभू
त् संज्ञयाविधानेनियमःअजितिवर्त्ततेइहमाभूत योःपन्थाःसःयुष्माभिः उच्चैरुदात्ता
त्तः अजितिवर्त्ततेउदात्तादिशब्दाः स्वरविशेषेःलोकवेदयोःप्रसिद्धएवमर्थइहतद्गुणाविपरि
भाष्यन्तेउपलभ्यमानोच् उदात्तसंज्ञोभवतिउच्चैरितिश्रुतिप्रकर्षोनगृह्यतेउच्चैर्भाषतेउच्चैः
पठतीतिकिन्तर्हिस्थानमुच्चैःत्वंसंज्ञिनोविशेषणं ताल्वादिषुहिसभागवत्सुस्थानेषुवर्णा
नांनिष्पद्यन्तेतत्रयःसमानेस्थानेऊर्ध्वभागेनिष्पन्नःअच् उदात्तसंज्ञोभवतियस्मिन्नुच्चार्य
माणेअन्वायामोगात्राणांनिग्रहोभवतिरूक्षतास्वरस्य संवृततांकण्ठविवरस्ययेतेक
उदात्तप्रदेशाआयुष्मानुदात्तेत्येवमादयः नीचैरनुदात्तः अजितिवर्त्ततेनीचैरुपलभ्यमानो
जनुदात्तसंज्ञोभवतिसमानेस्थानेनीचभागेनिष्पन्नोजनुदात्तसंज्ञोभवतीत्यर्थःयस्मिन्नु

त्रायमाणेगात्राणामन्ववसर्गोमार्दवंभवतिस्वरस्यचमन्दतास्निग्धताकंठविवरस्यउरुता
महत्तावसममिमनेमइत्यनुदात्तानिनमत्तेरुद्रकिएवमह्रस्वात्तु अनुदात्तप्रदेशाअनुदा
त्तौस्वप्यिताविस्येवमादयः समाहारःस्वरितः अजितिवर्ततेउदात्तानुदात्तस्वरसमा
हारोयःस्वरितसंज्ञोभवतिसामर्थ्याच्चात्रलोकप्रसिद्धौगुणावेवर्णधर्मौउदात्तानुदात्तौ
गृह्येतेनावौतौसंह्रियेतेयस्मिन्नचिसस्वरितइतीयंसंज्ञाविधीयतेशिक्षाकल्पासाम
न्यःकस्वरितप्रदेशाःस्वरितेत्स्वरितमित्येवमादयः तस्यादितउदात्तमर्धह्रस्वम् उदात्तानुदा
त्तस्वरसमाहारःस्वरितइत्युक्तं तत्रनज्ञायतेकस्मिन्नवकाशेउदात्तःकस्मिन्ननुदात्तःकिया
न्वोदात्तःकियाननुदात्तइतितदुभयमाख्यायते आदावर्धह्रस्वमुदात्तं परिशिष्टमनुदात्त
मितिअर्धह्रस्वमितिचार्धमात्रालक्ष्यतेह्रस्वग्रहणमतन्त्रं सर्वेषामेवह्रस्वदीर्घप्लुतानांस्व
रितानामेषस्वरविभागःशिक्षामितार्धमात्राआदितउदात्ताअर्धमात्रानुदात्ताएकश्रुतिर्वी
कल्पाइत्यत्रार्धमात्रादितउदात्ताअध्यर्धमात्रानुदात्तामाणवका३ माणवकइत्यत्रार्धमात्रा
दितउदात्ताअर्धतृतीयामात्रानुदात्ताएकश्रुतिर्वीकल्पा३ इत्यर्धमात्रादितउदात्ताअर्धतृतीयमा

२

का· श्रु प्र· १·

ज्ञानदाना एकश्रुतिर्दूरात्संबुद्धौ ३ ऐश्वर्यं पदानां प्राप्ते दूरात्संबुद्धौ एकश्रुत्यं विधीयते प
काश्रुतिरस्यानदिदमेकश्रुतीतिवर्तते एकश्रुतिर्वा कं भवति दूरात्संबोधयतीत्ययेनवा।
क्येन संबोधनं संबुद्धिः नेकववनेस्वराणामुदात्तादीनामविभागो भेद इति यावदेकश्रु
तिः आभाक्ष्व सोमा गावेदेवदत्ता ३ इत्यादिति किं आगाक्ष्व माणवदेवदत्त ३ यज्ञकर्मण्य
जपन्यूङ्खसामसु ३ ऐश्वर्यं वेदे मन्त्राः पठ्यन्ते तेषां यज्ञे याया मपि तत्रैव प्रयोगे प्राप्ते
एकश्रुतिर्विधीयते जपन्यूङ्खसामानि वर्जयित्वा यज्ञकर्मणि मन्त्राणामेकश्रुत्यं भवति
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं अपां रेतांसि जिन्वतो ३ यज्ञकर्मणीति किं स
पाठे मा भूत अजपेष्विति किं ममाग्ने वर्चो विहवेष्वस्तु जपो नुकरणमन्त्र उपांशु प्रयोगाः
अन्यूङ्खेष्विति किं न्यूङ्खा ओकाराः षोडश प्रातरनुवाके विहिताः केचिदनुदात्ताः असामस्वि
ति किं पदि विश्वे समस्त्यां दहे सामानि वाक्यविशेषस्यापीनयस्तेनैकश्रुतिर्न भवति
उच्चैस्तरां वा वषट्कारः ३ यज्ञकर्मणीति वर्तते यज्ञकर्मणि वषट्कार उच्चैस्तरां वा भव
ति एकश्रुतिर्वा वषट्शब्देन वौषट्शब्दो लक्ष्यते वौषडित्यस्यैवेदं स्वरविधानं यद्येवं

कि

१

वौषट्ग्रहणमेवकस्मान्नकृतं विचित्राहिसूत्रस्यकृतिःपाणिनेः सोमस्याग्नेवीही ३ वौ ३ षट् सो
मस्याग्नेवीही विभाषाछन्दसि छन्दसिविषयेविभाषैकश्रुतिर्भवति पक्षान्तरेत्रैस्वर्य
मेवेतिप्रकृतेविभाषाग्रहणंयज्ञकर्मणीत्यस्यनिवृत्त्यर्थं तेनायंस्वाध्यायकालेपाठेप्य
पैकश्रुत्याविधिर्भवतिइषेत्वाऊर्जेत्वाअग्नआयाहिवीतये २ अग्निमीडेपुरोहितं २ शन्नो
देवीरभिष्टय २ नसुब्रह्मण्यायांस्वरितस्यतूदात्तः सुब्रह्मण्यानामनिगदःतत्रयज्ञ
कर्मणीतिविभाषाछन्दसीतिचएकश्रुतिःप्राप्तासाप्रतिषिध्यतेसुब्रह्मण्यायामेक
श्रुतिर्नभवतियस्तुलक्षणप्राप्तःस्वरितस्तस्योदात्तआदेशोभवतिसुब्रह्मण्यो ३ इन्द्रआ
गच्छहरिवआगच्छमेधातिथेर्मेषवृषणश्वस्यमेनेगौरावस्कन्दिन्नहल्यायैजा
रकौशिकब्राह्मणगौतमब्रुवाणश्वःसुत्यामागच्छमघवन् अत्रसुब्रह्मण्योमित्या
कारस्तिन्स्वरेणस्वरितःतस्योदात्तोविधीयते इन्द्रागच्छेत्यामन्त्रितमाद्युदात्तंद्वितीयोनु
दात्तःतस्योदात्तात्परस्यानुदात्तस्यस्वरितःप्रसक्तःतस्योदात्तत्वमनेनक्रियते तेनद्वावाद्युदात्तौ
संपन्नौ आगच्छेत्याकारउदात्तस्ततःपरोनुदात्तःस्वरितस्तस्यानेनोदात्तःक्रियते तदे

ण

ऋपाद्दृब्ढेनिगदे
वर्त्तते ८

वसिंद्रागच्छेतिचमार उदात्ताः पश्चिमण्कोनुदात्तः हविर्व आगच्छेत्यनेनैव प्रक्रियया व
मार उदात्ताः ह्रावनुदात्तौ मेघातिथेर्मे[illegible]तिपश्चान्नेपरमामंत्रितमनुप्रविशति सुब्रामं
त्रितेपरांगवत्स्वरे इति तस्मात्सकलस्यामंत्रितायुदात्तं नेकृते द्वितीयमक्षरमनुदात्तं तस्य
उदात्तादनुदात्तस्य स्वरितः इति स्वरितत्वे प्राप्ते उदात्तो विधीयते तेन ह्रावप्युदात्तौ भवतः शे
षमनुदात्तं ह्वषणाघस्मेवेहृति समानेपूर्वेणागोर वस्कंदित्रिति तथैव दे अग्ने सुत्तर
उदात्तं शेषमनुदात्तं अग्न्यायेजा इति स्वंन्तु स्यामंत्रितानुप्रवेशानहदेव स्वरः ह्रावुदात्तौ शे
षमनुदात्तं कौशिकब्राह्मणेति समस्तमामंत्रितायुदात्तं तत्र पूर्ववदेव स्वरः एवं गौतमब्रुवा
णेति ह्रावुदात्तौ शेषमनुदात्तं घः सुत्यामागच्छमयववित्रिति घः शब्द उदात्तः स्वत्यामित्य
न्तोदात्तः समजर्ज्मनिषटेति कृपोविधाने उदात्त इति वर्तते न तत्र आगच्छेति ह्रावुदात्तौ अन्त्योऽनु
दात्तः मजवत्रिति पदात्परमामंत्रितं निहन्यते देवब्रह्मणारनुदात्तः सब्रह्मण्यामेवदे
वाब्रह्मण इति पठ्यते तत्र पूर्वेण स्वरितस्योदात्तः प्राप्तः अनेन अनुदात्तो विधीयते देवब्र
ह्मणाः स्वरितस्यानुदात्तः आदेशो भवति देवाब्रह्मण आगच्छत इहयोरपिपदयोरामं

त्रितायुदात्तेनेकत्वे शेषनिघाते वोदात्तानुदात्तस्य स्वरितस्ततः तस्मादनुदात्तो भवति स्वरिता
त्संहितायामनुदात्तानां एकश्रुतिरितिवर्त्तते संहितायां विषये स्वरितात्परेषामनुदात्ता
नामेकश्रुतिर्भवति इमं मे गंगे यमुने सरस्वति माणवक जटिलाध्यापक इममितिअ
न्तोदात्ते मे इत्यनुदात्ते विधिकाल्लणवनिघातविधानात् तत्पुनरुदात्तादनुदात्तस्य स्वरितः
इति स्वरिते संपद्यते तस्मात्स्वरितात्परेषामनुदात्तानां गंगे प्रभृतीनामेकश्रुतिर्भवति स
र्वे ते आमंत्रितनिघातेनानुदात्ताः माणवक जटिलाध्यापकेति प्रथममामंत्रितमा
द्युदात्तं तस्य द्वितीयमन्त्यं स्वरितं ततः परेषामनुदात्तानामामंत्रितानामेकश्रुतिर्भवति
संहिताग्रहणं किं अवग्रहे माभूत् इमं मे गंगे यमुने सरस्वति उदात्तस्वरितपरस्य सन्नत
रः अनुदात्तग्रहणमनुवर्त्तते उदात्तः परो यस्मात्स उदात्तपरः स्वरितः परो यस्मात्स्वरितप
रः उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य सन्नततरः आदेशो भवति अनुदात्ततरइत्यर्थः देवा
मरुतः पृश्निमातरोपः मातरइत्यनुदात्तः अपइत्यन्तोदात्तः बुद्धिदं पदायणु युभ्यइति तत्रा
नुदात्तयोरेकादेशोकारोनुदात्तः तस्योदात्तपरभूते सन्नतर आदेशो भवति इमं मे गंगे य

दा॰२

मनेसरस्वतिशुतद्विस्कारोनदानःशुतुद्विस्त्येनदामेवितेपदौदोतस्मात्रविरुत्याने अनद्यतं
सर्वमपटादाविति तस्मप्रथमममन्तरमेन्नेतस्मिन्परभूतेसर्वस्पसरस्वतीकारस्पसवर्णतरआ
देशोभवति माणवककन्याटिर्ल..आपयकत्कुमारिभ्यां.सिद्धइतिस्वरितस्तस्मिन्परभूते
कट्टपनदानः तस्पसवर्णतरआदेशोभवति अष्टक्रुणकाल्प्रत्ययः अष्टऊइतीयसंज्ञाभवति
एकाल्यःप्रत्ययः तस्मात्सहयवाचीपकषाढ्ढःस्पृशानुटकेकित नृतस्पृकटलपस्पृकभजो
गिवः अर्धभाक पदभाक एकालितिकिमर्थं दर्विःजागदविःप्रत्ययइतिकिं सराःसृगांसुरोति
ससमत तमाचष्टेसमासयतीतिक्विपि सराःअसतिप्रत्ययग्रहणेन हल्ङ्याभ्यःइत्यपःपदस्पस
रोषकेन्हलितिलोपःस्यात् अपृक्तप्रदेशाःवेरपृक्तस्पेत्येवमादयः तत्पुरुषःसमानाधिक
रणःकर्मधारयः तत्पुरुषइतिसमासविशेषस्यसंज्ञावद्यतेसमतत्पुरुषःसमानाधिकर
णपदःकर्मधारयसंज्ञोभवति अधिकारणशब्दोभिधेयवाचीसमानाभिधेयःसमानाधि
करणःपरमराज्यंउत्तमराज्यंपाचकवृन्दारिका तत्पुरुषइतिकिं पाचिकाभार्यःसमाना
धिकरणइतिकिं ब्राह्मणराज्यंकर्मधारयप्रदेशाःकर्मधारयेनिष्ठेत्यवमादयःप्रथमाति

दिष्टं समासउपसर्जनं प्रथमयाविभक्त्यायन्निर्दिश्यते समासशास्त्रे तदुपसर्जनसंज्ञं भवति
समासइति समासविधिशास्त्रमुच्यते वक्ष्यति द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्ता
पन्नैरिति द्वितीयासमासे द्वितीयेत्येतत्प्रथमानिर्दिष्टं तृतीयासमासे तृतीयेति चतुर्थीस
मासे चतुर्थीति पंचमीसमासे पंचमीति षष्ठीसमासे षष्ठीति सप्तमीसमासे सप्तमीति क
ष्टश्रितः शंकुलाखंडः यूपदारु वृकभयं राजपुरुषः अक्षशौण्डः उपसर्जनप्रदेशाः उप
सर्जनं पूर्वमित्येवमादयः एकविभक्ति चापूर्वनिपाते एकाविभक्तिरस्य तदिदमेकवि
भक्ति समासे विधीयमाने यन्नियतविभक्तिकं द्वितीयसंबंधिनि बहुभिर्विभक्तिभिर्युज्यमा
नेप्येकयैव विभक्त्या युज्यते तदुपसर्जनसंज्ञं भवति अपूर्वनिपाते पूर्वनिपातनमुपसर्जन।
कार्यं वर्जयित्वा निरादयः क्रान्ताद्यर्थे पंचम्या समस्यन्ते पदे [illegible] नानाविभक्तिके पूर्वपदं पंच
म्यन्तमेव भवति निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः निष्क्रान्तं कौशाम्ब्याः निष्कौशाम्बि
निष्क्रान्तेन कौशाम्ब्या निष्कौशाम्बिना निष्क्रान्ताय कौशाम्ब्याः निष्कौशाम्बये निष्क्रान्ता
त्कौशाम्ब्याः निष्कौशाम्बेः निष्क्रान्तस्य कौशाम्ब्या निष्कौशाम्बेः निष्क्रान्ते कौशाम्ब्याः।

से

का०
ह्रस०
३३
रिति०

निष्कौशांबी अस्त्वे निपाते इति किं न हि भवति कौशांबी निरिति अर्थवधातुरप्रत्ययःप्रा
तिपदिकं अभिधेयवचनोर्थशब्दः अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं भवति धातुं प्रत्ययं च
वर्जयित्वा डित्थः डवित्थः कुण्डं पीठं अर्थवदिति किं धनं वनमिति नान्तस्यावयवस्या
र्थवत्त्वे नलोपो हि स्यात् अधातुरिति किं हन्तेः लुङि अहन् नलोपः स्यात् अप्रत्यय इति किं काण्डे
कुड्ये ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः स्यात् प्रातिपदिकप्रदेशाः ह्रस्वो नपुंसके प्रा
तिपदिकस्येत्येवमादयः कृत्तद्धितसमासाश्च कृत्तद्धिताः समासाश्च प्रातिपदिकसंज्ञा
भवन्ति अप्रत्यय इति पूर्वसूत्रे पर्युदासात् कृदन्तस्य तद्धितान्तस्य चानेन प्रातिपदि
कसंज्ञा विधीयते अर्थवत्समुदायानां समासग्रहणं नियमार्थं कृतः कारकः हारकः क
र्ता हर्ता तद्धिताः औपगवः कापटवः समासः राजपुरुषः ब्राह्मणकम्बलः समासग्रहणस्य
नियमार्थत्वाद्वाक्यस्यार्थवतः संज्ञा न भवति ह्रस्वो नपुंसके प्रातिपदिकस्य नपुंसकलि
ङ्गेर्थे यत्प्रातिपदिकं वर्तते तस्य ह्रस्वो भवति आदेशाः लैलां सा वः अतिरि कुलं अतिनु ज
लेन पुंसके इति किं ग्रामणीः सेनानीः प्रातिपदिकस्येति किं काण्डे तिष्ठतः कुड्ये तिष्ठतः ।

अ०

३३

प्रातिपदिकग्रहणसामर्थ्यादेकादेशः पूर्वस्यान्तवन्न भवति गोस्त्रियोरुपसर्जनस्य प्रातिप
दिकस्येति वर्त्तते गो इति स्वरूपग्रहणं स्त्री इति प्रत्ययग्रहणं स्वरितत्वादुपसर्जनग्रहणं तयो
र्विशेषणं गोरुपसर्जनस्य स्त्रीप्रत्ययान्तस्योपसर्जनस्येति सामर्थ्यात्प्रातिपदिकस्य तदन्तविधि
रुपसर्जनगोशब्दान्तस्य उपसर्जनस्त्रीप्रत्ययान्तस्य च प्रातिपदिकस्य ह्रस्वो भवति चित्रगुः
शबलगुः स्त्रियः निष्कौशाम्बिः निर्वाराणसिः अतिखट्वः अतिमालः उपसर्जनस्येति किमर्थं
राजकुमारी स्वरितत्वं किं अतितन्त्रीः अतिलक्ष्मीः अतिश्रीः ईयसो बहुव्रीहौ प्रतिषेधो वक्तव्यः
बहुश्रेयसी विद्यमानश्रेयसी लुक् तद्धितलुकि स्त्रीग्रहणमनुवर्त्तते उपसर्जनस्येति च ष
ष्ठ्यन्तं ह्रस्वापवादे लुग्विधीयते तद्धितलुकि सति स्त्रीप्रत्ययान्तस्योपसर्जनस्य लुग्भवति पंचे
न्द्राण्यो देवता अस्य पंचेन्द्रः पंचभिः शष्कुलीभिः क्रीतः पंचशष्कुलः दशशष्कुलः आमल
क्याः फलमामलकं कुवलं बदरं तद्धितग्रहणं किं गार्गीकुले लुकीति किं गार्गी
त्वे उपसर्जनस्येत्येव अवन्ती कुन्ती कुरूः इद्गोण्याः गोण्या लुकि प्राप्ते इकारो विधीयते
गोण्यास्तद्धितलुकि सति इकारादेशो भवति पंचभिर्गोणीभिः क्रीतः पंचगोणिः दश

गोणिाः॥ इतियेमाविभागः पंचसूचिः दशसूचिः सैवेवंविषय एव लुपि युक्तवद्व्यक्तिवचने
लुपीति लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते तत्र लुपि युक्तवद्व्यक्तिवचने भवतः युक्तव
दिति निष्ठाप्रत्ययेन ऋवन्तुना प्रकृत्यर्थ उच्यते स हि प्रत्ययार्थमात्मना युनक्ति तस्य युक्तव
तो व्यक्तिवचने युक्तवद्व्यवचने थे लुबर्थे विपर्ययेन प्रथवायुक्तः प्रकृत्यर्थः प्रत्ययार्थेन से
वेद्धः तस्मिन्त्रियुक्तवद्व्यक्तिवचने लुबर्थे भवतः समस्यार्थे वृत्तिः व्यक्तिवचने इति लिंगसंख्ये
योः पूर्वाचार्यनिर्देशः तदीयमेवेदं सूत्रं तथा चास्य प्रत्याख्यानं भविष्यति तदशिष्यं सं
ज्ञाप्रमाणत्वादिति व्यक्तिः स्त्रीपुंनपुंसकानि वचनमेकत्वद्वित्वबहुत्वानि पंचालाः क्षत्रियाः
पुंलिंगाः बहुवचनविषयाः तेषां निवासो जनपदः यथा तेषु क्षत्रियेषु व्यक्तिवचने तद्वज्जन
पदे भवतः पंचालाः कुरवः मत्स्याः अंगाः वंगाः सुह्माः पुण्ड्राः लुपीति किमर्थं लकिमाभृत ।
लवणः सूपः लवणा शाकं लवणा यवागूः व्यक्तिवचने इति किमर्थं शिरीषाणामदूरभवो ।
ग्रामः शिरीषाः तस्य वनं शिरीषवनं विभाषौषधिवनस्पतिभ्यः इति णत्वं न भवति हरीतक्या
दिषु व्यक्तिः हरीतक्याः फलानि हरीतक्यः फलानि खलतिकादिषु वचनं खलतिकस्य पर्व

स्याद्दूरेभवानिवनानि खलतिकंवनानि विशेषणानांचाजातेः लुपीतिवर्त्तते लुवर्थ
स्ययानिविशेषणानितेषामपियुक्तवद्व्यक्तिवचनेभवतः जातिंवर्जयित्वा पंचालारम
णीयाःवह्वन्नाःवहुक्षीरघृताःवहुमाल्यफलाः गोदौरमणीयौ वह्वन्नौवहुक्षीरघृतौ वहु
माल्यफलौ अजातेरितिकिं पंचालाजनपदः गोदौग्रामः जात्यर्थस्यचायंयुक्तवद्भावप्र
तिषेधः तेनजातिद्वारेणयानिविशेषणानितेषांयुक्तवद्भावेन भवति पंचालाजनपदो
रमणीयो वह्वन्नोवहुक्षीरघृतोवहुमाल्यफलः गोदौग्रामोरमणीयोवह्वन्नोवहुक्षीरघृ
मनुष्य॰ तोवहुमाल्यफल इतिलुपिप्रतिषेधोवक्तव्यः चंचाभिरूपः वध्रिकादर्शनीयः तद
शिष्यंसंज्ञाप्रमाणत्वात् तदितिप्रकृतंयुक्तवद्भावलक्षणंनिर्दिश्यतेतदशिष्यमवक्तव्यं क
स्मात्संज्ञाप्रमाणत्वात् संज्ञाशब्दाहिनानालिंगसंख्याःप्रमाणं पंचालावरणाइतिच
नैतेयोगशब्दाःकिन्तर्हिजनपदादीनांसंज्ञाएताः तत्रलिंगंवचनंचस्वभावसिद्धमेवनय
त्नप्रतिपाद्यं यथाआपोदाराःगृहाःसिकताःवर्षाइति लुब्योगाप्रख्यानात् लुबप्यशिष्यः
योयंजनपदेलुप्वरणादिभ्यश्चेतिलुबुच्यते, यंनवक्तव्यः किंकारणंयोगाप्रख्यानात्

पंचालाः

नहिपंचालावरणाइतियोगसंबंधःप्रतीयतेनैतदुपलभामहेवृत्तयोगात्रयोरेववरणाइति।
किन्तर्हिसंज्ञाएताःतस्मादत्रतस्यनिवासःप्रवृत्तभवस्थैतितत्रहितोनैवोत्पद्यतेकिंलुपोविधा
नेनयोगप्रमाणेचतदभावेदर्शनंस्यात पंचालादयःसंज्ञायाह्यानयोगनिमित्तादस्युक्ते न
ह्यावयवमेवाभ्युपगन्तव्यं योगप्रमाणेहितदभावेदर्शनंस्यात यदिपंचालादिशब्दैर्योग
प्रमाणयोगस्यवाचकःस्यात ततस्तदभावेतस्मादर्शनमप्रयोगःस्यात इयतेवसंप्रतिवि
नैवहाचित्संबंधेनजनपदेपंचालशब्दस्तेनावसीयतेनायंयोगनिमित्तकः किंतर्हिरूढिरूप
णेवतत्रप्रवृत्तइति प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात प्रविधानमितिवर्ततेप्रधा।
नेसमासेकिंचित्पदेप्रत्ययस्तस्यादिःताभ्यामर्थवचनमर्थाभिधानमनेनप्रकारेणभवती
तिपूर्वाचार्यैःपरिभाषितंप्रधानोपसर्जनेप्रधानार्थंसहब्रूतःप्रकृतिप्रत्ययौसहब्रूतइतितस्या

प्रत्ययार्थः

णिनिराचार्यःप्रत्याचष्टे प्रविधानमेतदर्थस्यान्यप्रमाणत्वादितिप्रत्यइतियाख्यायेत्याः
लोकोव्यपदिश्यते यावैदर्थाभिधानेस्वाभाविकंनपरिभाषितव्यमशक्य[illegible]नात लोक
तएवार्थगतेः येऽपिव्याकरणंनजानन्तेराजपुरुषमानयेत्युक्तेराजविशिष्टंपुरुषमानयन्ति

पि॰

नराज्ञानेनापुरुषमात्रे ऽपगावमानयेत्संक्षे ऽपगविशिष्टमपत्यमानयन्ति नोपगुनापत्यमात्रे
यश्च लोकतोर्थसिद्धः किं तत्र प्रयत्नेन कालोपसर्जनेच तुल्यं अशिष्टमिति चेत् ते कालोपसर्ज
नेवाशिष्य कस्मादर्थस्यान्यप्रमाणत्वात् तस्य शाब्दोहेन नुकर्षणार्थः इहात्यैवैयाकरणाः
कालोपसर्जनयोः परिभाषां कुर्वन्ति आन्यायादुत्थानादान्यायात्संवेशनादेतावानहः का
लः अपरे [illegible] पुनराहुः [illegible] रहमयन्तो ऽप्यत्रमेवायतनः कालः तथोपसर्जनपरिभाषां कुर्वन्ति
अप्रधानमुपसर्जनमिति तत्पाणिनिराचार्यः प्रत्याचष्टे लोकतएवार्थगतेः पूर्वैरपि व्याकरणे
न स्फूर्त्तं नेत्यमाहुविदमस्माभिरपकर्त्तव्यमिदंस्मः कर्त्तव्यमिति इदंहेतुः कृतं [illegible] मिति नैतदुत्पाद्यते
तथोपसर्जनमन्यत्रगत्वेहेग्रामेवाउपसर्जनंभूताउपसर्जने अप्रधानमितिगम्यते यश्च लोकतोर्थः
सिद्धः किं तत्र प्रयत्नेन यद्येवं सर्वत्रैवकालोपसर्जनग्रहणं कस्मात्क्रियते किमर्थीया
परिभाषाः प्रदर्शनार्थः अन्यदपि एवंजातीयकमशिष्यमिति तथा च पूर्वाचार्याः परिभाष
न्ते मत्वर्थे बहुव्रीहिः अन्यपदार्थप्रधानो बहुव्रीहिः पूर्वपदार्थप्रधानो ऽव्ययीभावः उत्त
रपदार्थप्रधानस्तत्पुरुषः उभयपदार्थप्रधानो द्वन्द्व इत्येवमादि तदशिष्यमिति जात्या

पं॰

वयम्॰

का॰
वृ॰ प्र॰
२९

ख्यायामेकस्मिन्बहुवचनमन्यतरस्यां जातिर्नामायमेकोर्थस्तदभिधानेएकवचनमेवप्राप्तम
तदिदमुच्यते एतेराख्याजात्याख्यायामेकस्मिन्नर्थेबहुवचनमन्यतरस्यांभवति जातोर्थेबहु
बहुवतीतियावत् तेनतद्विशेषणानामजातिशब्दानामपिसम्पन्नादीनांबहुवचनमुपपद्यते
संपन्नोयवःसम्पन्नायवाःसंपन्नाव्रीहयःसंपन्नोव्रीहिःपूर्वब्राह्मणाःप्रत्युत्थेयःपूर्ववयसोब्राह्म
णाःप्रत्युत्थेयाःजातिग्रहणंकिं देवदत्तःयज्ञदत्तः आख्यायामितिकिं काश्यपप्रकृतिःकाश्यपः
भवत्ययंजातिशब्दोनत्वनेनजातिराख्यायतेकिन्तर्हिप्रकृतिएकस्मिन्नितिकिंव्रीहियवौ संख्या
प्रयोगेप्रतिषेधोवक्तव्यःएकोव्रीहिःसंपन्नःसुभिक्षंकरोति अस्मदोद्वयोश्च अस्मदःएक
त्वेद्वित्वेचबहुवचनमन्यतरस्यांभवति अहंब्रवीमि आवांब्रूवःवयंब्रूमःसविशेषणस्यप्रति
षेधः अहंदेवदत्तोब्रवीमिअहंगार्ग्योब्रवीमिअहंमाठरःब्रवीमिअहंपण्डितोब्रवीमिअहंपटुब्र
वीमियुष्मादिष्वन्येषाम् तेनेमेशुरःसूर्यमेगुरवः फल्गुनीप्रोष्ठपदानांचनक्षत्रे चकारोद्व
योरित्यनुकर्षणार्थःफल्गुन्योःद्वयोःप्रोष्ठपदयोश्चनक्षत्रयोःबहुवचनमन्यतरस्यांभवति
कदापूर्वेफल्गुन्योकदापूर्वाफल्गुन्यौकदापूर्वाःफल्गुन्यःकदापूर्वेप्रोष्ठपदेकदापूर्वाः

प्रोष्ठपदाः नक्षत्रे इति किं फल्गुणीमाणवकाः। छन्दसि पुनर्वस्वोरेकवचनं अन्यतरस्यामिति
वर्तते द्वयोर्द्विवचने प्राप्ते पुनर्वस्वोश्छन्दसि विषये एकवचनमन्यतरस्यां भवति पुनर्वसुर्न-
क्षत्रमदितिर्देवता पुनर्वसू नक्षत्रमदितिर्देवता। विशाखयोश्च। द्विवचने छन्दसि विषये
रेफः विशाखयोः एकवचनमन्यतरस्यां भवति विशाखा नक्षत्रमिन्द्राग्नी देवता विशाखे नक्षत्रमिन्द्राग्नी
देवता। तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यं। छन्दसीति निवृत्तं तिष्य ए-
कः पुनर्वसू द्वौ तेषां द्वन्द्वो बह्वर्थः तत्र बहुत्वात् बहुवचने प्राप्ते द्विवचनं विधीयते तिष्यपुनर्व-
स्वोर्नक्षत्रविषये द्वन्द्वे बहुवचनप्रसंगे नित्यं द्विवचनं भवति। उदितौ तिष्यपुनर्वसू दृश्येते ति-
ष्यपुनर्वसू। तिष्यपुनर्वस्वोरिति किं राधानुराधाः। नक्षत्रद्वन्द्व इति किं तिष्यश्च माणवकः पु- माः
नर्वसू च माणवकौ तिष्यपुनर्वसवो माणवकाः। ननु च प्रकृतमेव नक्षत्रग्रहणं किमर्थं पुन-
रुच्यते पर्यायाणामपि यथा स्यात्। पुष्यपुनर्वसू सिध्यपुनर्वसू। द्वन्द्व इति किं यस्तिष्यस्तौ पु-
नर्वसू यस्यान्तरेमे तिष्यपुनर्वसवः उस्रयाः तिष्यादय एव विपर्यये याणाद्दृश्यमाना बहवो द्विणा
उच्यन्ते नक्षत्रसमासे अपवादः। बहुवचनस्येति किं एकवचनस्य मा भूत् तिष्यपुनर्वसु इदं

इतिसर्वेद्वन्द्वेविभाषैकवद्भवतीत्यस्मिन्नेवज्ञापकेनिमग्रहणंविकल्पनिवृत्त्यर्थं सरूपाणामे
कशेषएकविभक्तौ समानंरूपमेषांतेसरूपाःसरूपाणांशब्दानामेकविभक्तौपरतएकःशिष्यते
इतरेनिवर्त्तन्तेवृक्षश्चवृक्षश्चवृक्षश्चवृक्षाःप्रत्यर्थंशब्दनिवेशान्नैकेनानेकस्याभिधानंतत्रा-
नेकार्थाभिधानेनेकशब्दत्वंतस्मादेकशेषःरूपग्रहणंकिंभिन्नेप्यर्थेयथास्यात् अक्षाःपादाः
माषाःएकग्रहणंकिं द्वयोःशेषोमाभूत् शेषग्रहणंकिं आदेशोमाभूत् विभक्तावित्यत्रआ-
देशसकालस्यषत्वंमाभूत् एकविभक्ताविति किं पयःपयोजरयति कृतंब्राह्मणाभ्यांदेहीति
वृद्धोयूनातल्लक्षणश्चेदेवविशेषः शेषइतिवर्त्तते सूत्रेसि सहयोगेतृतीया वृद्धश्चयूनासहवच-
नेशिष्यतेयुवानिवर्त्ततेवृद्धशब्दःपूर्वाचार्यसंज्ञागोत्रस्यापत्यमन्तर्हितंवृद्धमितिवृद्धयूनोः
सहवचनेवृद्धःशिष्यतेतल्लक्षणश्चेदेवविशेषःइतितदितिवृद्धयूनोर्निर्देशःलक्षणंशब्दप्रवृ-
त्तिनिमित्तपर्यायःचेच्छब्दोयद्यर्थे एवकारोवधारणेविशेषोवैरूप्यंवृद्धयुवनिमित्तमेवयदिवैरूप्यं
भवति ततोवृद्धःशिष्यतेसमानायामाकृतौवृद्धयुवप्रत्ययौभिद्येते गार्ग्यश्चगार्ग्यायणश्च
गार्ग्यौवात्स्यश्चवात्स्यायनश्चवात्स्यौवृद्धइतिकिंगर्गश्चगार्ग्यायणश्चगर्गगार्ग्यायणौ यू-

नेति किं गार्ग्यगार्ग्यौ तल्लक्षणः इति किं गार्ग्यवात्स्यायनौ एवकारः किमर्थः भागवित्तश्च भाग
वित्तिकश्च भागवित्तिकौ कुत्सासौवीरत्वं च भागवित्तिकस्याधिकेः विशेषो विद्यते स्त्रीपुंवच्च
शेष इति वर्त्तते वृद्धो यूनेति च सर्वं स्त्री वृद्धा यूना सहवचने शिष्यते तल्लक्षणश्चेदेव विशे
षो भवति पुंवत्स्याः कार्यं भवति स्त्र्यर्थः पुमर्थवद्भवति गार्गी च गार्ग्यायणश्च गार्ग्यौ
वात्सी च वात्स्यायनश्च वात्स्यौ दाक्षी च दाक्षायणश्च दाक्षी पुमान्स्त्रिया तल्लक्षणश्चेदेव
विशेष इति वर्त्तते वृद्धो यूनेति निवृत्तं स्त्रिया सहवचने पुमान् शिष्यते स्त्रीपुंसलक्षणश्चेदेव
विशेषो भवति ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ कुक्कुटश्च कुक्कुटी च कुक्कुटौ मयूरश्च मयू
री च मयूरौ तल्लक्षणश्चेदेव विशेष इत्येव कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ एवकारः किम
र्थः इन्द्रश्च इन्द्राणी च इन्द्राणौ पुंयोगादाख्यायामित्यपरो विशेषः पुमानिति किं प्राक् च प्राची च
प्राक्प्राच्यौ प्रागित्ययमलिंगः भ्रातृपुत्रौ स्वसृदुहितृभ्यां यथासंख्यं भ्रातृपुत्रशब्दौ शि
ष्यते भ्राता च स्वसा च भ्रातरौ स्वसृदुहितृभ्यां सहवचने भ्रातृशब्दः शिष्यते भ्राता च
स्वसा च भ्रातरौ दुहित्रा च सहवचने पुत्रशब्दः शिष्यते पुत्रश्च दुहिता च पुत्रौ नपुंसकमन

पुंसकेनैकवच्चास्यान्यतरस्यां तल्लक्षणश्चेदेवविशेषइतिनिवर्त्तते नपुंसकानपुंसकमात्र
कृतेविशेषेचतत्रनपुंसकेनसहवचनेनपुंसकंशिष्यते एकवच्चास्यकार्यंभवत्यन्यतरस्यां
शुक्लश्चकंबलः शुक्लाचबृहतिकाशुक्लंतेसौधेतानीमानितदिदंशुक्लं नपुंसकेनेतिकिं
शुक्लंचशुक्लेचशुक्लंचशुक्लानिएकवन्नभवति पितामात्रा अन्यतरस्यामितिनिवर्त्तते ने
तवदितिचमात्रासहवचनेपिताएकःशिष्यतेपिताचमाताचपितरौमातापितराविति
तिवा श्वशुरःश्वश्र्वा अन्यतरस्यामितिनिवर्त्तते श्वश्र्वासहवचनेश्वशुरःशिष्यते श्वश्रूश्चश्वशुरश्चश्वशुरौ
श्वश्रूश्वशुरौइतिवा त्यदादीनिसर्वैर्नित्यं त्यदादीनिशब्दरूपाणिसर्वैःसहवचनेशिष्यन्तेत्य
दादिभिरन्यैश्चसर्वग्रहणंसाकल्यार्थं नित्यग्रहणंविकल्पनिवृत्त्यर्थं सचदेवदत्तश्चतौय
श्चदेवदत्तश्चयौत्यदादीनांमिथोयद्यत्परंतत्तच्छिष्यतेसचयश्चयौ यश्चकश्चकौ ग्रा
म्यपशुसंघेष्वतरुणेषुस्त्री ग्राम्याणांपशूनांसंघाताग्राम्यपशुसंघास्तेषुसहविवक्षायांस्त्री
शिष्यते पुमान्निवर्त्ततेपुंसःस्त्रीषुप्राप्तेःशेषोयंविधीयते अतरुणग्रहणंग्राम्यग्रहणंसामर्थ्यात्पशुवि
शेषणं गावःइमाःअजाइमाःग्राम्यग्रहणंकिंरुरवइमेपृषताइमेपशुग्रहणंकिं।

ब्राह्मणाः क्षत्रियाः संघेष्विति किं एतौ गावौ चरतः अतरुणेष्विति किं वत्सा इमे वर्करा इमे।
अनेकशफेष्विति वक्तव्यं इह मा भूत् अश्वा इमे गर्दभा इमे इति श्रीकाशिकायां वृत्तौ प्रथ
मस्याध्यायस्य द्वितीयः पादः ॐ नमो गणेशाय भूवादयो धातवः भवति एधते स्पर्धते धातुशब्दः
पूर्वाचार्यसंज्ञा ते च क्रियावचना एवं भूवादीनां धातूनां संज्ञां कृतवन्तः तदिहापि पूर्वा
चार्यसंज्ञाश्रयणात् क्रियावचनानामेव भूवादीनां धातुसंज्ञा विधीयते भूवादीनां वका
रोऽयं मंगलार्थः प्रयुज्यते भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः धातुप्रदेशाः धातो
रित्येवमादयः उपदेशेऽजनुनासिक इत् उपदिश्यतेऽनेनेत्युपदेशः शास्त्रवाक्यानि सूत्र
८ पाठः खिलपाठश्च तत्र यः अच् अनुनासिकः स इत्संज्ञो भवति एध स्पर्ध प्रतिज्ञानुनासिक्याः
पाणिनीयाः उपदेश इति किं अब्भ्रा अपः अजिति किं आतो मनिन्क्वनिब्वनिपश्च अनु
नासिक इति किं सर्वस्य चो मा भूत् इत्प्रदेशाः आदितश्चेत्येवमादयः हलन्त्यं उपदे
श इति वर्तते आदिति च अन्ते भवमन्त्यं धात्वादेः समुदायस्य यदन्त्यं हल् तदित्संज्ञं
भवति अइउण् णकारः ऋलृक् ककारः एओङ् ङकारः उपदेश इत्येव अग्निचित् सो

का॰
वृ॰ प्र॰
२५

मस्थत हसाल फल हलच हलव हल इतिद्वितीयसवर्हलग्रहणं तेनैर्णातेनष्टभ्ये
तेनप्रत्याहारयाद्वेहलित्यत्रलकारस्यैतस्त्वाक्रियतेनयावसतिहलन्त्यमिति प्रत्यस्या
यपाद्वेनेतरेतरायश्रयदोषोभवति नविभक्तौतुस्माः पूर्वेणप्राप्ताया मित्संज्ञायाः विभक्तौ
वर्त्तमानानांतवर्गमकारमकाराणांप्रतिषेधउच्यते नवर्गः टाङ्‌ ङिङ्‌ ङामिनात्स्याः
तात मकारः जस आमाणानसवतःवसवयःमकारःश्रवत्तांश्रवतं विभक्ताविति
तिकिं अचेयत तृणायायुस करादिभ्यःश्रम किमात इटोत इत्यत्रनभवत्संनितत्वालस्य
आदिर्ञिटुडवः इदितिवर्त्तते आदिशब्दः प्रत्येकमभिसंबध्यते ञिटुडव इत्येतेसमुदा
या धातोरादितिवर्त्तमानाइत्संज्ञाभवन्ति ञिमिदामिञः ञिक्ष्विदाः क्ष्विदः ञिन्धिदा ञिधृषः
ञिइन्धी इद्धः टुवेपृटुवेपथुः टुओश्वि श्वयवः नयचेष्टा पक्तिमं नववपनं त्रिमम नवप्स्त त्रिति
सम आदाविति किं पठायति कंडूयति उपदेशइत्येववञ्जिकारीयति षः प्रत्ययस्य आदिरि
तिवर्त्ततेषकारःप्रत्ययस्यादितोवर्त्तमानइत्संज्ञोभवति शिल्पिनिष्वुन नर्त्तकीरजकीर
जकीप्रत्ययस्येतिकिं षोडःषंडःषडिकः आदिरित्येवप्रविमस्तोमिषव अविषःमहिषः

वुड्ड चवर्गटवर्गौ प्रत्ययस्यादितो वर्तमानाविन्संज्ञौ भवतः योत्रे ञेजादिभ्यः मूव्वक्त कौं
जायन्तः क्रस्य ईयादेशो वक्ष्यति जसवालगणः कस्य फोन्तः इति वक्ष्यति जष्टाडिकादि
भ्योऽस्यः शांडिक्यः टवर्गः ठवर्गः कुवरेष्टः कुरुचरी मट्टवरीव मस्य इकारादेशो वक्ष्यति उस मस्मा
जनेड्ढेः उपसन्तुजः सन्तुजः फ्रस्य णवदेशो वक्ष्यति णग्रन्नाम्यः अन्नेः पृथग्योगाकरण
मस्य विधेयनित्यत ज्ञापनार्थं तेन वितपृवं वृपवणपो केशावं वुः केशावणः आदेरिति
किं अवाक्कुटारश्च अवऊटारः अवनाटः अवकटीटीट आटजित्यादयः लशक्वतद्धिते
तद्धितवर्जितस्य प्रत्ययस्यादितो वर्तमाना लकारः कावर्गी इत्संज्ञा भवति लकारः लग्न
ह्रवनयनेशाकारः कशिशप भवति कवर्गः ऊऊ वजनिष्ठा भक्तं भक्तवान प्रियव
शावटः खच प्रियंवदः वशंवदः तजित्याश्च गस्तु जिस्तुः भूस्तुः भंजभासमिदो घुरच भे
भंगे भासे टाउसिडसामिनात्स्याः वृद्धात् वृवस्य अतद्धित इति किं वृडालः रोमशाः
कर्णिका नस्य लोपः नस्य इत्संज्ञकस्य लोपो भवति तथा चैवो दाहृतम् नस्य ग्रह
णं सर्वपार्थ अलोन्त्यस्य माभूत आदिजिटुडवः इति यथासंख्यमनदेशः समानां

का
वृप्र
३

संख्याशब्देन क्रमो लक्ष्यते यथासंख्येयं यथाक्रममनुदेशो भवति अनुदिश्यते पश्चादुच्चार्य
ते इत्यनुदेशः समानां समसंख्यानां समपठितानामुद्देशिनामनुद्देशिनां च यथाक्रम
मनुदेशिनः संवध्यंते तदेशिभिः सह तूदीशालातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः
प्रथमात्प्रथमः द्वितीयाद्द्वितीयः इत्यादि तौदेयः शालातुरीयः वार्मतेयः कौचवार्यः समानाम् इ
ति किं लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः लक्षणादयश्चत्वारोर्थाः प्रत्या
दयस्त्रयः सर्वेषां सर्वे च कर्मप्रवचनीयसंज्ञा भवन्ति इदं कस्मान्न भवति वेशोयमङ्गादे
भगायं लक्ष्वैति स्वरितेन लिंगेन यथासंख्यं यत्र नेष्यते अत्र स्वरितत्वं न प्रतिज्ञायते
स्वरितेनाधिकारः इति स्वरितग्रहणं पूर्वेणापि संवध्यते स्वरितेनाधिकारः स्वरि
तेनेतीत्थंभूतलक्षणे तृतीया स्वरितो नाम स्वरविशेषो वर्णधर्मः तेन चिह्नेनाधिका
रो वेदितव्यः अधिकारो विनियोगः स्वरितगुणयुक्तं शब्दरूपमेतदधिकृतं तद्वेदितव्यमि
तिष्ठते प्रतिज्ञास्वरिताः पाणिनीयाः प्रत्ययः धातोः ङ्याप्प्रातिपदिकात् अंगस्य
पदस्य अनुदात्तङित आत्मनेपदम् अविशेषेणात्मनेपदं परस्मैपदं च वि

३

यास्यते तत्रायंनियमः क्रियते अनुदात्तेतयेधातवः ङितश्चतेभ्यएव आत्मनेपदंभवतिनान्ये
भ्यः अनुदात्तेभ्यः आसमास्तेवसवस्ते ङिद्भ्यः खल्वपि षूङ्सूते शीङ्शेते भावकर्मणो
श्च लः कर्मणिचभावेचाकर्मकेभ्यः इतिभावकर्मणोर्विहितस्यलस्यतिवादयः सामा
न्येनवह्यन्ते तत्रटेरुच्यते भावकर्मणोरात्मनेपदं भावेआस्यते भवतासुप्यतेभवताक
र्मणिक्रियतेकटः ह्रियतेभारः कर्मकर्तरि लूयतेकेदारः स्वयमेवेतिपरस्मैपदंभव
परस्मैकर्तरिज्ञेयंनभावेनचकर्मणि आत्मनेत्रिषुविज्ञेयंभावेकर्मणिकर्तरि कर्तरि
कर्मव्यतिहारे कर्मशब्दः क्रियावाची व्यतिहारोविनिमयः अन्यसम्बन्धिनींक्रिया
मन्यः करोतीतरसम्बन्धिनींक्रियामन्यः करोतीतरसम्बन्धिनींचेतरः सकर्मव्यतिहारः
तद्विशिष्टक्रियावचनाद्धातोरात्मनेपदंभवति व्यतिलुनते व्यतिपुनते कर्मव्यतिहार
इतिकिं लुनन्तिपुनन्ति कर्तृग्रहणमन्यार्थंशेषात्कर्तरिपरस्मैपदमिति नगति
हिंसार्थेभ्यः पूर्वेणात्मनेपदेप्राप्ते प्रतिषिध्यतेगत्यर्थेभ्योहिंसार्थेभ्यश्चधातुभ्यः कर्म
व्यतिहारेनात्मनेपदंभवति व्यतिगच्छन्तिव्यतिसर्पन्तिहिंसार्थेभ्यः व्यतिहिंसन्ति

का॰
वृ प्र
३१

गमप्रभृतिप्रतिषेधे हसादीनामुपसंख्यानं व्यतिहसन्ति व्यतिजल्पन्ति व्यतिपठन्ति हरतेर
प्रतिषेधः संप्रहरन्ते राजानः इतरेतरान्योन्योपपदाच्च इतरेतरश्चान्योन्य इत्येवमुपपा
दाद्धातोः कर्मव्यतिहारेनात्मनेपदं भवति इतरेतरस्य व्यतिलुनन्ति अन्योन्यस्य व्यतिलुन
न्ति परस्परोपपदाच्चेति वक्तव्यं परस्परस्य व्यतिलुनन्ति नेर्विशः शेषात्कर्त्तरि परस्मैप
देप्राप्ते निपूर्वाद्विशतेरात्मनेपदं विधीयते नेः परस्माद्विश आत्मनेपदं भवति निविशते निविश
ते यदागमास्तद्गुणेनैव गृह्यन्ते तेन नास्ति व्यवधानं न्यविशत नेरुपसर्गस्य ग्रहणम
र्थवद्ग्रहणेनानर्थकस्येति तस्मादिह न भवति मधुनि विशन्ति भ्रमराः परिव्यवेभ्यः क्रियः
डुक्रीञ् द्रव्यविनिमये ञित्त्वात्कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदमकर्त्रभिप्रायार्थो
यमारम्भः परिव्यवेभ्य उत्तरस्मात् क्रीणातेरात्मनेपदं भवति परिक्रीणीते विक्रीणीते अव
क्रीणीते पर्यादय उपसर्गा गृह्यन्ते तेनेह न भवति बहु विक्रीणाति वनं विपराभ्यां जेः
शेषात्परस्मैपदमित्यस्यापवादः विपरापूर्वाज्जयतेरात्मनेपदं भवति विजयते पराजयते
विपराशब्दावुपसर्गौ गृह्येते तेनेह न भवति बहु विजयति वनं पराजयति से

नेति आङो दोऽनास्यविहरणे अकर्मकाभिप्रायार्थः आङ्पूर्वाद्ददातेरनास्यविहरणे
वर्त्तमानादात्मनेपदं भवति विद्यामाददते धनमाददते अनास्यविहरणे इति किं आस्यं व्याद
दाति आस्यविहरणे समानक्रियादपि प्रतिषेधो भवति विपादिकां व्याददाति कूलं व्याद
दाति स्वाङ्गकर्मकाच्चेति वक्तव्यं स्वाङ्गं वेह न पारिभाषिकं गृह्यते अध्रुवं मूर्तिमत्स्वाङ्ग
किन्तर्हि स्वमङ्गं स्वाङ्गं इति इह न भवति व्याददाति पिपीलिकाः पतङ्गस्य मुखमिति क्रीड
ऽनुसम्परिभ्यश्च क्रीडविहारे अनुसम्परि इत्येवं पूर्वात् क्रीडः पूर्वाच्चात्मनेपदं भवति अनुक्रीड
ते संक्रीडते परिक्रीडते आङः खल्वपि आक्रीडते समोऽकूजने इति वक्तव्यं तेनेह न भव
ति संक्रीडन्ति शकटानि समासमाह च योऽयं त्वादिरूपमस्मिन् गृह्यते तेनेह न कर्मप्रव
चनीयप्रयोगेन भवति माणवकमनुक्रीडतीति आगमेः क्षमायामात्मनेपदं वक्तव्यं
ह मानयेत्कालहरणं आगमयस्व तावन्माणवकं शिक्षेर्जिज्ञासायां विद्यासु
शिक्षते धनुषि शिक्षते आशिषि नाथः सर्पिषो नाथते मधुनो नाथते हरतेर्गतिता
च्छील्ये पैतृकमश्वा अनुहरन्ते मातृकं गावोऽनुहरन्ते गतिताच्छील्ये इति किं मा।

त्यवन्नहरतीति पितुरनुहरतीति किरतेर्हर्षजीविकाकुलायकरणेषु अपस्किरते वृषभो हृष्टः
जीविकायां अपस्किरते कुक्कुटो भक्ष्यार्थी कुलायकरणे अपस्किरते श्वाश्रयार्थी आङि नु
प्रच्छोरुपसंख्यानं आनुते सृगालाः आपृच्छन्ते गुरुं शपथ उपालम्भने वाचा शरीरस्पर्शन
मुपालम्भनं देवदत्ताय शपते यज्ञदत्ताय शपते उपालम्भन इति किं शपति समवप्रविभ्यः
स्थः सम अव प्र वि इत्येवं पूर्वात्तिष्ठतेरात्मनेपदं भवति सन्तिष्ठते अवतिष्ठते प्रतिष्ठते विति
ष्ठते स्थः प्रतिज्ञान इति वक्तव्यं अस्ति सकारमातिष्ठते आगमौ गुणवृद्धी आतिष्ठते प्रका
शनस्थेयाख्ययोश्च स्वाभिप्रायकथनं प्रकाशनं स्थेयस्याख्या स्थेयाख्या तिष्ठन्त्यस्मिन्निति स्थे
यः विवादपदनिर्णेता स्थेय इति रूढः तस्य प्रतिपत्त्यर्थमाख्याग्रहणं प्रकाशने स्थेयाख्यायां
च तिष्ठतेरात्मनेपदं भवति प्रकाशने तावत् तिष्ठते कन्या छात्रेभ्यः तिष्ठते वृषली कामुके।
भ्यः प्रकाशयत्यात्मानं स्थेयाख्यामिति त्वयि तिष्ठते मयि तिष्ठते जहात्वेनेकस्य समर्थसिद्धः
संशय्य कर्णादिषु तिष्ठते यः असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि
उदोऽनूर्ध्वकर्मणि उत्पूर्वात्तिष्ठतेः अनूर्ध्वकर्मणि वर्त्तमानादात्मनेपदं भवति कर्मसंस्थावः

क्रियावाची अनर्थान्तरविशिष्टक्रियावचनात्तिष्ठतेरात्मनेपदं भवति गेहे उत्तिष्ठते कुटुंबेउ
त्तिष्ठते तदर्थं चेष्टते इत्यर्थः उदईहायामिति वक्तव्यं इह माभूदस्माद्ग्रामाच्छतमुत्तिष्ठति शया
तमुत्पद्यते इत्यर्थः ईहाग्रहणमनूर्ध्वकर्मणो विशेषणं नापवादः अनूर्ध्वकर्मणीति किं आ
सनादुत्तिष्ठति शयनादुत्तिष्ठति उपान्मंत्रकरणे उपपूर्वात्तिष्ठतेः मंत्रकरणेर्थे वर्त्तमा
नादात्मनेपदं भवति ऐन्द्र्या गार्हपत्यमुपतिष्ठते आग्नेय्या आग्नेयमुपतिष्ठते मंत्रकरण
इति किं भर्त्तारमुपतिष्ठति यौवनेन उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति व
क्तव्यं देवपूजायां आदित्यमुपतिष्ठते संगतकरणे रथिकानुपतिष्ठते मित्रकरणे महा
मात्रानुपतिष्ठते संगतकरणमित्रकरणयोः को विशेषः संगतकरणमुपश्लेषः तद्यथा
गंगा यमुनामुपतिष्ठते इति मित्रकरणं तु विनाप्युपश्लेषेण मैत्रीकरणं सम्बन्धः पथि
अयं पंथाः स्रुघ्नमुपतिष्ठते वा लिप्सायामिति वक्तव्यं भिक्षुको ब्राह्मणकुलमुपतिष्ठ
ते उपतिष्ठतीति वा अकर्मकाच्च उपादिति वर्त्तते उपपूर्वात्तिष्ठतेकर्मकादकर्मकक्रिया
वचनादात्मनेपदं भवति यावद्भुक्तमुपतिष्ठते यावदोदनमुपतिष्ठते भुक्तमितिभावे

का॰
वृ॰प॰
३४

त्वमप्रत्ययः भोजने भोजने समित्रिपीयते इत्यर्थः अकर्मकादिति किं राजानमुपतिष्ठति उ
द्विभ्यां तपः अकर्मकादिति वर्तते उद्विइत्येवं पूर्वात्तपतेरकर्मकादकर्मकक्रियावचनादा
त्मनेपदं भवति उत्तपते वितपते वितपते दीप्यत इत्यर्थः अकर्मकादित्येव उत्तपति सुव
र्णं सुवर्णकारः वितपति पृथिवीं सविता स्वाङ्गकर्मकाच्चेति वक्तव्यं उत्तपते पाणिं उत्त
पते पृष्ठं वितपते पाणिं वितपते पृष्ठं स्वाङ्गं वेह न पारिभाषिकं स्वरूपते अद्रवं मूर्तिस्वाङ्गं
वित्तस्थित्वे स्वंगं स्वाङ्गमिति तेनेह न भवति देवदत्तो यज्ञदत्तस्य पृष्ठमुत्तपतीति तद्विभ्यामि
ति किं निष्टपति आङो यमहनः अकर्मकादिति वर्तते यम उपरमे हन हिंसागत्योरिति
परस्मैपदिनौ ताभ्यामाङ्पूर्वाभ्यामकर्मकक्रियावचनाभ्यामात्मनेपदं भवति आयच्छ
ते आयच्छेते आयच्छन्ते हनः खल्वपि आहते आघ्नाते आघ्नते अकर्मकादित्येव आय
च्छति कूपाद्रज्जुं आहन्ति वृषलं पादेन स्वाङ्गकर्मकादिति वक्तव्यं आयच्छते पाणिं आ
हते शिरः स्वमङ्गं स्वाङ्गं तेनेह न भवति आहन्ति शिरः परकीयमिति समो गम्यृच्छि प्रच्छि
स्वरत्यर्त्तिश्रुविदिभ्यः अकर्मकादिति वर्तते एषां कर्तरि परस्मैपदे प्राप्ते सम्पूर्वेभ्यः गमिद

स्म
३४

च्छिप्रच्छिंस्व्रुतिंस्वृविदिइत्येतेभ्यः अकर्मकेभ्यः आत्मनेपदं भवति संगच्छते समृच्छते
संपृच्छते संस्वरते संकल्पाश्च समस्मरन्त ~~अ~~ अत्रच्लादिस्त्रेः सर्त्तिशास्त्यर्त्तिभ्यश्चेत्यङादेशः
तत्र हि परस्मैपदेष्वित्येतन्नाश्रीयते बहुलंछन्दसीत्यस्माद्योगविभागात् प्रतिविध्यते अङादेशो
ऽपि गुणादिति गुणः समरन्त संस्पृणुते संविन्ते अर्च्छेरनादेशस्य ग्रहणं समर्च्छि ख्याति अ
चादेशस्य तत्र अन्तेरित्येवं तत्सिद्धमात्मनेपदं श्रुतिरूप महाज्ञपदश्रुते अर्च्छति प्रापणार्थो विति
भुवादौ अर्च्छगतौ इति जुहुत्यादौ विशेषाभावाद् उभयस्यापि ग्रहणं भवति विदेर्ज्ञानार्थ
स्य ग्रहणं परस्मैपदिभिः रामादिभिः साहचर्यात् तल्लाभार्थस्य वित्ते ज्ञाउभयतो भाष
स्य दर्शनाच्चेति वक्तव्यं संपश्यते अकर्मकादित्येव ग्रामं संगच्छति निसमुपविभ्यो ह्वः ।
अकर्मकादिति निवृत्तं इतः परं सामान्येनात्मनेपदविधानं प्रतिपत्तव्यं निसं उपविइत्येते
भ्यः परात् ह्वयतेरात्मनेरात्मनेपदं भवति निह्वयते संह्वयते उपह्वयते विह्वयते अकर्त्रभिप्रा
यार्थ आरंभः तत्र हि ञित्वात्सिद्धमेवात्मनेपदं उपसर्गादस्यत्यूह्योर्वावचनं निरस्यतीति
रस्यते समूहति समूहते स्पर्धायामाङः अकर्त्रभिप्रायार्थ अ आरंभः स्पर्धायो विषये आ

यं

हू पूर्वात् ह्वयते रात्मनेपदं भवति । स्पर्धा संघर्षः पराभिभवेच्छा स विषयो यावदर्थस्य स्यात्तस्य
स्पर्धक्रियायां मल्लो मल्लमाह्वयते छात्रश्छात्रमाह्वयते स्पर्धमानस्तस्माह्वानं करोतीत्यर्थः
स्पर्धायामिति किं गामाह्वयति गोपालकः । गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्न
प्रकथनोपयोगेषु कृञः । कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदमकर्त्रभिप्रायार्थो
यमारम्भः गन्धनादिष्वर्थेषु वर्तमानात् करोतेरात्मनेपदं भवति गन्धनमपकारप्रयुक्तं हिंसा
त्मकं सूचनं तथा हि वक्त गन्धयुक्तेने पदेहि सिद्धिं हिंसायामिति वचनात् दोषबाने अवक्षेप
णं भर्त्सनं सेवनमनुवृत्तिः साहसिक्यं साहसिककर्म प्रतियत्नस्सतः गुणाधानं प्रकथ।
नं प्रकर्षेण कथनं उपयोगो धर्मादिप्रयोजनो विनियोगः गन्धने तावत् उत्कुरुते उदाकु
रुते सूचयतीत्यर्थः अवक्षेपणे श्येनो वर्तिकामपकुरुते भर्त्सयतीत्यर्थः सेवने गणा
कानुपकुरुते महामात्रानुपकुरुते सेवत इत्यर्थः साहसिक्ये परदारान् प्रकुरुते तेषु सहसा
वर्तत इत्यर्थः प्रतियत्ने एधोदकस्योपस्कुरुते काण्डं गुणस्योपस्कुरुते तस्य गुणाधानं
करोतीत्यर्थः षष्ठी सूत्रे टीका तेः प्रतियत्न एव विधीयते प्रकथने कथाः प्रकुरुते जनवा

दान्प्रकुरुतेप्रकर्षेणकथयतीत्यर्थः उपयोगेशतंप्रकुरुतेसहस्रंप्रकुरुतेधर्मार्थंशतं
विनियुंक्त इत्यर्थः एतेष्विति किं कटंकरोति अधेःप्रसहने अकर्त्रभिप्रायार्थआरंभः
अधिपूर्वात्करोतेः प्रसहने वर्त्तमानादात्मनेपदंभवति प्रसहनमभिभवः अपराजयो
वातमधिचक्रेतमभिबभूववातेनपराजितइत्यर्थः अधेर्ग्रहणमुपसर्गविशेष
णार्थं वेःशब्दकर्मणः कृञइत्यनुवर्तते विपूर्वात्करोतेः अकर्त्रभिप्रायेक्रियाफलेशब्द
कर्मणआत्मनेपदंभवतिकर्मशब्दइहकारकाभिधायीनक्रियावचनः क्रोष्टाविकुरुते
स्वरान् ध्वांक्षःविकुरुतेस्वरान् शब्दकर्मणइतिकिं विकरोतिपयः अकर्मकाच्च वेःकृञइत्य
नुवर्ततेविपूर्वात्करोतेः अकर्मकात्क्रियावचनादात्मनेपदंभवतिविकुर्वतेसै
न्धवाःसाधुदान्ताःशोभनंवल्गन्तीत्यर्थः ओदनस्यपूर्णाश्छात्राविकुर्वतेनिष्फलंचेष्टन्त
इत्यर्थः सम्माननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषुनियः णीञ्प्रा
प कर्त्रभिप्रायेक्रियाफलेसिद्धमेवात्मनेपदमकर्त्रभिप्रायार्थोयमारंभः सम्मानना
दिषुविशेषणेषुसत्सुनयतेर्धातोरात्मनेपदंभवति सम्माननंपूजनं नयतेचार्वी

का॰
वृ॰
३९

लोकायते चार्वी बुद्धिस्तत्संबन्धादाचार्योपि चार्वी स लोकायते शास्त्रे पदार्थान्नयते गमय
तीत्यर्थः उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति युक्तिभिः स्थाप्यमानास्ते संमानिताः
पूजिता भवन्ति उत्संजनमुत्क्षेपणं माणवकमुदानयते उत्क्षिपतीत्यर्थः आचार्यक
रणमाचार्यक्रिया माणवकमीदृशेन विधिना आत्मसमीपं प्रापयति यथा स उप
नेता स्वयमाचार्यः संपद्यते माणवकमुपनयते आत्मानमाचार्यी कुर्वन्माणवकमात्म
समीपं प्रापयतीत्यर्थः ज्ञाने प्रमेयनिश्चयः नयते चार्वी लोकायते तत्र प्रमेयं निश्चिनोतीत्य
र्थः भृतिर्वेतनं कर्मकारानुपनयते भृतिदानेन समीपीकरोतीत्यर्थः विगणनमृणादे
र्निर्यातनं मद्राः कारं विनयन्ते निर्यातयन्तीत्यर्थः व्ययः धर्मादिषु विनियोगः शतं विन
यते सहस्रं विनयते धर्मार्थं विनियुंक्त इत्यर्थः एतेष्विति किं अजां नयति ग्रामं कर्तृ
स्थे चाशरीरे कर्मणि नयतेः कर्ता देवदत्तादिः लकारवाच्यस्तत्रस्थे कर्मणि शरीरे सति न
यते आत्मनेपदं भवति शारीरं कायः तदेकदेशोपि शारीरं क्रोधं विनयते राजा मन्युं विनय
ते कर्तृस्थ इति किं देवदत्तो यज्ञदत्तस्य क्रोधं विनयते अशरीर इति किं गडुं विनयति।

करं विनयति कर्म्मणीति किं बुद्ध्या विनयति प्रज्ञया वृत्तिसर्गतायनेषु क्रमः शेषात्कर्त्तरि पर
स्मैपदे प्राप्ते वृत्त्यादिष्वर्थेषु क्रमेर्वा ततोत्मनेपदं भवति वृत्तिरप्रतिबन्धः सर्ग उत्साहः तायनं स्फी
तता ऋक्ष्वस्य क्रमते बुद्धिः यजुःषु क्रमते बुद्धि बुद्धिर्न प्रतिहन्यत इत्यर्थः सर्गे व्याकरणाध्य
नाय क्रमते लोकायताध्यायनाय क्रमते तत्सहत इत्यर्थः तायनस्मिं शास्त्राणि क्रमन्तेन।
स्फीतीभवन्तीत्यर्थः एतेष्विति किं क्रामति उपपराभ्यां वृत्तिसर्गतायनेष्विति वर्त्तते उप
पराभ्यां क्रमतेः वृत्त्यादिष्वर्थेषु वर्त्तमानादात्मनेपदं भवति कितर्हीदस्मव्यते उपसर्गेति
यमार्थं सोपसर्गादुपपराभ्यामेव नान्यपूर्वादिति उपक्रमते पराक्रमते उपपराभ्यामि
ति किं संक्रामति वृत्त्यादिष्विवेव उपक्रमति पराक्रमति आङुद्गमने आङ्पूर्वात्क्रमते
रुद्गमने वर्त्तमानादात्मनेपदं भवति आक्रमते आदित्य आक्रमते चन्द्रमाः आक्रमन्ते ज्यो
तींषि उद्गमन इति किं आक्रमति माणवकः कुतपं ज्योतिरुद्गमन इति वक्तव्यं इह मा भू
त् आक्रमति धूमो हर्म्यतलं वेः पादविहरणे विपूर्वात्क्रमतेः पादविहरणे वर्त्तमाना
दात्मनेपदं भवति विहरणं विक्षेपः सुष्ठु विक्रमते साधु विक्रमते अश्वादीनां गतिविशेषा

विक्रमणमभ्युच्यते यद्यपि वक्रमिः पादविहरणएव वर्त्तते क्रमपदविक्षेपइतितथापिअन्ते
कार्थलाद्वाहत्तां एवमक्रे पादविहरणइतिकिं विक्रामुपसर्गाभ्यांपरस्मात्क्रमतेरात्मने
पदंभवतितौवेक्रोपोलमर्यौतल्पौभवतःक्रवानयोस्तुल्यार्थता आदिकर्मणिप्रक्रमते
भोक्तुं उपक्रमतेभोक्तुं समर्थावाभिमितिकिं पूर्वेद्युःप्रक्रामतिगच्छतीत्यर्थः अपरेद्युरुप
क्रामतिआगच्छतीत्यर्थः अर्थौपयराभ्यामित्यनेनआत्मनेपदंकस्मान्नभवतिवृत्त्यादि
ग्रहणेतत्रानुवर्ततेतत्रेदंप्रत्युदाहरणं अनुपसर्गाद्वा क्रमइतिवर्त्ततेअप्राप्तविभाषे
यं उपसर्गविमुक्तात्क्रमतेरात्मनेपदंवाभवति क्रमते क्रामति अनुपसर्गादितिकिं संक्रा
मति अपह्नवेज्ञः प्रोषात्कर्त्तरि परस्मैपदे प्राप्ते ज्ञानातेरपह्नवे वर्त्तमानादात्मनेपदंभ
वति अपह्नवोनिह्नुतिरपलापःसोपसर्गाश्रयमपह्नवे वर्त्तते न केवलः शतमपजानी
ते सहस्रमपजानीते अपलपतीत्यर्थः अपह्नवेइतिकिं नत्वमपि किंविजानासि अक
र्मकाच्च अकर्त्रभिप्रायार्थमिदं कर्त्रभिप्राये अनुपसर्गाज्ज्ञाइतिवक्ष्यति अकर्मकाद
कर्मकक्रियावचनाज्ञातेरात्मनेपदंभवति सर्पिषोजानीते मधुनोजानीते कथंवायमक

ङ्कः नात्र सर्पिषा पिजितेयत्नेन विवादितं किन्तर्हि ज्ञातत्वविकायाभ्यन्तरीकरणेषु तथा
चक्तो विरुद्धं स्पष्टं रगोऽत इति षष्ठी विधीयते सर्पिषो जानीते मधुनो जानीते सर्पिषा उपाये
न प्रवर्तत इत्यर्थः अकर्मकादिति किं स्वरेण पुत्रं जानाति संप्रतिभ्यामनाध्याने सं
प्रतिपर्वतते सकर्मकार्थमिदं सं प्रति इत्येवं पूर्वो जानातेरात्मनेपदं भवति आध्यानमु
त्कंटास्मरणं शतं संजानीते सहस्रं संजानीते शतं प्रतिजानीते सहस्रं प्रतिजानी
ते अनाध्याने इति किं पितुः संजानाति मातुः संजानाति उत्कंटते इत्यर्थः भासनोपसं
भाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः शेषात्कर्तरि परस्मैपदे प्राप्ते भासनादिषु विशे
षणादिषु सत्सु वदतेरात्मनेपदं भवति भासनदीप्तिः वदते चार्वी लोकायते भासमा
नो दीप्यमानस्तत्र पदार्थान्वक्तीत्यर्थः उपसंभाषा उपसान्त्वनं कर्मकारानुपवदते
सान्त्वयतीत्यर्थः ज्ञानं सम्यगवबोधः वदते चार्वी लोकायते जानाति वदितुमित्यर्थः
यत्न उत्साहः क्षेत्रे विवदते गेहे वदते तद्विषयमुत्साहमाविष्करोतीत्यर्थः विमतिर्ना
नामतिः क्षेत्रे विवदते गेहे विवदन्ते विमतिपत्तिना विविधं भाषन्त इत्यर्थः उपमं

का॰
वृ॰
३८

णोवहस्युपच्छंदने कुलभार्यामुपवदते उपच्छंदयतीत्यर्थः एतेष्विति किं यत्किंचिद्वद-
ति व्यक्तवाचां समुच्चारणे वद इति वर्त्तते व्यक्तवाचां समुच्चारणं सहोच्चारणं तत्र वर्त्त-
मानाद्वदतेरात्मनेपदं भवति नन्ववदव्यक्तायां वाचीत्येवं पठ्यतां तत्र किं व्यक्तवाचामि-
ति विशेषणेन प्रसिद्ध्युपसंग्रहार्थमेतत् व्यक्तवाच इति हि मनुष्याः प्रसिद्धाः तेषां स-
मुच्चारणे यथा स्यात् संप्रवदन्ते ब्राह्मणाः संप्रवदन्ते क्षत्रियाः व्यक्तवाचामिति किम्
अपि विजहीहि दृढोपगूहनं त्यज नवसंगमभीरु वल्लभं अरुणकरोद्गम एष वर्त्तते
वरतनु संप्रवदन्ति कुक्कुटाः समुच्चारणे इति किं ब्राह्मणो वदति क्षत्रियो वदति अ-
नोरकर्मकात् व्यक्तवाचामिति वर्त्तते अनुपूर्वाद्वदतेरकर्मकादात्मनेपदं भवति अ-
नुवदते कठः कलापस्य अनुवदते मौदः पैप्पलादस्य अनुः सादृश्ये यथा कालापोऽधी-
यानो वदति तथा कठ इत्यर्थः अकर्मकादिति किं पूर्वमेव यजुरुदितमनुवदति व्य-
क्तवाचामित्येव अनुवदति वीणा वाचो विभाषा विप्रलापे वद इति वर्त्तते व्यक्तवा-
चां समुच्चारणे इति च विप्रलापात्मके व्यक्तवाक्समुच्चारणे वर्त्तमानाद्वदतेरात्मनेप

दं भवति विभाषा प्राग्मे विभाषेयं विप्रवदन्ते सांवत्सराः विप्रवदन्ति सांवत्सराः विप्रवदन्ते
मौहूर्त्ताः विप्रवदन्ति मौहूर्त्ताः युगपत्परस्परप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः विप्रलाप
इति किं संप्रवदन्ति शाकुनयः सम्यग्वादिनो इत्येव क्रमेण मौहूर्त्ता मौहूर्त्तेन सह विप्रव
दन्ति अवाद्गृः गृ निगरणे इति तुदादौ पठ्यते तेनेदं ग्रहणं न तु गॄ शब्दे इति क्र्यादि
पठितस्य तस्य ह्यवपूर्वस्य प्रयोगाभावान्नास्ति मेघादिति परस्मैपदे प्राप्ते अवपूर्वा।
द्गिरतेरात्मनेपदं भवति अवगिरते अवगिरेते अवगिरन्ते अवादिति किं गिरति स
मः प्रतिज्ञाने गृ इति वर्त्तते संपूर्वाद्गिरतेः प्रतिज्ञानवर्त्तमानादात्मनेपदं भवति प्र
तिज्ञानमभ्युपगमः प्रतिश्रवोऽङ्गीकरणं शब्दं संगिरते सहस्रं संगिरते नित्यं शब्दं सं
गिरते मन्त्रे सर्वं त्वं संगिरते प्रतिज्ञाने इति किं संगिरति ग्रासं उदश्चरः सकर्मकात्
दोषात्कर्तरि परस्मैपदे प्राप्ते तस्मादुच्चरतेः सकर्मकात् सकर्मकक्रियावचनादात्म
नेपदं भवति गेहमुच्चरते जटं मग्रमुच्चरते गुरुवचनमुच्चरते उत्क्रम्य गच्छतीत्यर्थः
सकर्मकादिति किं बाष्पमुच्चरति समस्तृतीयायुक्तात् संप्रवां चरते तृतीयायु

त्मात्मनेपदं भवति तृतीयाविभक्तिसंयुक्तेन चरतेरर्थद्वारकः योसौ अश्वेन संचर
ते रथेन संचरते तत्तृतीयायुक्तादिति किं उभौ लोकौ संचरसि इमं चामुं च देवलयययप्त्र
तदर्थयोगः संभवति तृतीयान्तेन श्रूयते इति प्रत्युदाहरणं भवति दाणश्च सा चेच्चत
र्थ्यर्थे दाणादा परस्मैपदी ततः संपूर्वात् तृतीयायुक्तादात्मनेपदं भवति सा चेत्तृतीया
चतुर्थ्यर्थे भवति कथं पुनस्तृतीया चतुर्थ्यर्थे स्यात् [illegible]मेतत् अशिष्टव्यवहारात् तृतीया
चतुर्थ्यर्थे भवति दास्या संप्रयच्छते दास्याः संप्रयच्छते कामुकः सन्दास्यै ददातीत्य
र्थः चतुर्थ्यर्थ इति किं पाणिना संप्रयच्छति समः प्रणाशेनेत्यवधानेकयमात्मने
पदं समन्नृतिविशेषणाषष्ठीनपंचमी उपाद्यमः स्वकरणे शेषाः कर्तरि परस्मैपदे
उपपूर्वाद्यमः स्वकरणे वर्तमानादात्मनेपदं भवति पाणिग्रहणविशिष्टमिह स्वकर
णं गृह्यते न स्वकरणमात्रं भार्यामुपयच्छते कन्यामुपयच्छते स्वकरण इति किम्
देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति ज्ञाश्रुस्मृदृशां सनः ज्ञाश्रुस्मृदृशां इत्येतेषां
सन्नन्तानामात्मनेपदं भवति तत्र जानातेरपह्नवेत इति त्रिभिः सूत्रैरात्मनेपदं विहि

ते स्कन्दशोऽपि समो गम्यृच्छिप्रच्छीस्वरविहिंते तस्मिन्विषये पूर्ववत्सन्नन्तेऽपि वा सिद्धा

मात्मनेपदं ततोऽन्यत्रानेन विधीयते स्मरतेः पुनरप्राप्तप्रणवविधाने धर्मं जिज्ञासते गुरुं

शुश्रूषते नहि स्मरस्मृषतेन्नपं दिददते नानोर्ज्ञः पूर्वेण योगेन प्राप्तमात्मनेपदं प्रतिषि

ध्यते अनुपूर्वाज्जानातेः सन्नन्तादात्मनेपदं न भवति तथा च सति सकर्मकस्यायं प्रतिषे

धः संपद्यते पुत्रमनुजिज्ञासति अनोरिति किं धर्मं जिज्ञासते प्रत्याङ्भ्यां श्रुवः प्रत्याङ्-

इत्येवं पूर्वोक्तश्रुणातेः सन्नन्तादात्मनेपदं भवति प्रतिशुश्रूषति आशुश्रूषति उपसर्गग्रह

णं वेदेन स्मादिह प्रतिषेधो न भवति देवदत्तं प्रतिशुश्रूषते शदेः शितः शद्लृ शातने न

परस्मैपदी यतस्मादात्मनेपदं विधीयते शादिर्यः शित शिद्भावी शितो वा संबंधी तदात्म

नेपदं भवति शीयते शीयेते शीयन्ते शित इति किं शात्स्यति अशात्स्यत् शिशात्सति

मृङ् प्राणत्यागे ङित्वादात्मनेपदमत्र सिद्धं भवति गमार्थमिदं वचनं म्रियतेः लुङ्लि

ङोः शितश्चात्मनेपदं भवत्यन्यत्र न भवति अमृत मृषीष्ट शितः खल्व म्रियते म्रियेते म्रि

यन्ते नियमः किमर्थं मरिष्यति अमरिष्यत् मृषीति पूर्ववत्सनः सनः पूर्वो यः धातुस्त

हसन्नन्तातन आत्मनेपदंभवतितेननिमित्तेनपूर्वस्मादात्मनेपदंविधीयतेतेनैवसन्नन्ता
दपिभवति अनुदात्तङित आत्मनेपदं आस्तेशेतेसन्नन्तादपितदेवनिमित्तं आसिसि
षतेविवसिषतेशिशयिषते नेर्विशनिविशतेनिविविक्षते आङ उद्गमने आक्रमते
आचिक्रंसतेइहनभवति शिशासति मुमूर्षतिनहिशदिम्रियतिमात्रमात्मनेप
दनिमित्तंकिन्तर्हिशिल्लिङ्लुङोपितेष्वितियत्रचपूर्वत्रैवनिमित्तभावःप्रतिपि
द्यतेतत्सन्नन्तेप्यनिमित्तं अनोर्विकीर्षतिपराविकीर्षतिइहजुगुप्सतेमीमांसतेइति
अनुदात्तङित्त्वादेवसिद्धमात्मनेपदं अवयवेकृतंलिंगंसमुदायस्यविशेषकंभवती
ति आंप्रत्ययःकृञोनुप्रयोगस्य अकर्त्रभिप्रायार्थआरंभः आंप्रत्ययोयस्मात्सआं
प्रत्ययः आंप्रयोगस्मात्आत्मनेपदंभवतिईहांचक्रेईक्षांचक्रे यदिविपर्ययमेतेर्थ उक्ते
वकार उद्वांचकारेतिकर्त्रभिप्रायेक्रियाफलेआत्मनेपदंप्राप्नोति उभयमनेन
क्रियतेविधिर्नियमश्चकथंपूर्ववदितिवर्त्तते सद्वितीयःयत्राभविष्यतिकृञइति
किं ईहामासईक्षांबभूवकथंपुनरस्मानप्रयोगोयावताकृञ्चानुप्रयुज्यतेलि

दीनुद्यतेकृतिनितिप्रत्याहारग्रहणंनत्रविज्ञायतेक्रमनिविष्टानांप्रत्याहारः अभूतनद्गा
वेक्तनतितिप्रयोगेसंपद्यकर्तरिचिद्वरितिकृपाद्वाटारभ्ययावत्कृञः द्वितीयस्तृतीयइति
नकारः प्रोपाभ्यांयुजेरयज्ञपात्रेषु युजिरयोगेस्वरितेत नस्मकर्त्तभिप्रायेक्रियाफ
लेसिद्धमेवात्मनेपदं अकर्त्रभिप्रायार्थमारंभः प्रउपइत्येवं पूर्वाद्युजेरयज्ञपात्रविष
यादात्मनेपदंभवतिप्रयुंक्तेउपयुंक्तेअयज्ञपात्रेष्वितिकिं द्वन्द्वंयज्ञपात्राणिप्रयुनक्ति
धीरःस्वरायन्तोपसृष्टादितिवक्तव्यंउद्युंक्तेवियुंक्ते समः क्ष्णुव क्ष्णुतेजनेपरस्मैपदीन
तःसंपूर्वादात्मनेपदंभवतिसमोगम्यृच्छिप्रच्छीत्येवंवक्ष्मादयेनपदितः अकर्मका
दितिनत्रवर्ततेसकर्मकार्थमिदं संक्ष्णुतेशस्त्रंसंक्ष्णुवातेसंक्ष्णुवन्ते भुजोनवने
भुजपालनाभ्यवहारयोःइतिरुधादौपठ्यतेतस्मादनवनेअपालनेवर्तमानादात्मने
पदंभवतिभुंक्तेभुंजातेभुंजते अनवनइतिकिंभुनक्त्येनमग्निरहितःअवनप्रतिषेधेन
पालनादिकस्येवग्रहणंविज्ञायते तेनेहनभवतिविभजतिपाणिं णिचश्चेत्यत्र
मिणौसचेत्कर्त्ता नाध्यानेस्मृणिचश्चेतिकर्त्रभिप्रायेक्रियाफलेसिद्धमेवात्मनेपदम

कर्त्रभिप्रायार्थीयमात्मनेपदं भवतीति कथमणौ चेन्न देवयकर्मणश्चक
र्मणश्चकर्त्ता भवति अनाध्याने आध्यानं वर्ज्जयित्वा आरोहन्ति हस्तिनं हस्तिपकाः।
आरोहयते हस्ती स्वयमेव सिञ्चन्ति हस्तिनं सेचकाः सेचयते हस्ती स्वयमेव पश्यन्ति।
भृत्या राजानं दर्शयते राजा स्वयमेव णौ इति किं आरोहन्ति हस्तिनं हस्तिपकाः आरो
ह्यमाणो हस्ती साध्वारोहयति अणाविति किं गणयति गां गोपालकः गणयति गा
गाः स्वयमेव कर्मग्रहणं किं लुनाति दात्रेण लावयति दात्रं णौ च कृतं समानक्रिया
र्थं आरोहन्ति हस्तिनं हस्तिपकाः आरोह्यमाणो हस्ती भीतान् सेचयति मात्रेयत्सस्य क
र्मणामनन्यकर्मकार्थमारोहन्ति हस्तिनं हस्तिपकाः आरोह्यमाणो हस्ती स्थलमारोहयति
मनुष्यान् कर्त्तरीति किं आरोहन्ति हस्तिनं हस्तिपकाः तानारोहयति महामात्रः अना
ध्याने इति किं स्मरति वनगुल्मं स्वकोकिलः स्मर्यते वनगुल्मः स्वयमेव ननु चात्र क
र्त्रेति मूलोदाहरणानि तत्र कर्मवद्भावेनैव सिद्धमात्मनेपदे किमर्थमिदमुच्यते कर्म
स्थभावकानां कर्मस्थक्रियाणां च कर्मवदतिदेशो विधीयते कर्त्रस्थार्थीयमात्मनेपदं तथा

वहतिः कर्त्तृस्थक्रियः दृशिः कर्त्तृस्थभावक उदाहृतः भीस्म्योर्हेतुभये णेरिति वर्त्तते अ
कर्त्रभिप्रायार्थश्चारंभः विभीतः स्मयतेश्च ण्यन्तादात्मनेपदं भवति हेतुभये हेतुः प्रयोज
कः कर्त्ता लकारवाच्यः ततश्चेद्भयं भवति भयग्रहणमुपलक्षणार्थं विस्मयोपि तत एव मु
ण्डो भीषयते जटिलो भीषयते मुण्डो विस्मापयते जटिलो विस्मापयते हेतुभय इति किं कुंचि
कयैनं भाययति रूपेण विस्मापयति गृधिवंच्योः प्रलंभने णेरिति वर्त्तते अकर्त्रभिप्राया
र्थश्चारंभः गृधु अभिकांक्षायां वंचु गतावित्येताभ्यां ण्यन्ताभ्यां प्रलंभने वर्त्तमानाभ्यामात्म
नेपदं भवति प्रलंभनं विसंवादनं मिथ्याफलाख्यानं माणवकं गाणवकं गर्द्धयते मा
णवकं वंचयते प्रलंभन इति किं श्वानं गर्द्धयति गर्द्धमस्योत्पादयतीत्यर्थः अहिं वंचयति
परिहरतीत्यर्थः लियः संमाननशालीनीकरणयोश्च णेरिति वर्त्तते अकर्त्रभिप्रायार्थ
श्चारंभः लीङ् श्लेषणे इति दिवादौ पठ्यते ली श्लेषणे इति क्र्यादौ विशेषाभावादुभयो
र्ग्रहणं लियः ण्यन्तात् संमानने शालीनीकरणे च वर्त्तमानादात्मनेपदं भवति चशब्दा
त्प्रलंभने च संमाननं पूजनं शालीनीकरणं न्यग्भावनं जटाभिरालापयते पूजामा

का·
वृ प
५३

पिपाक्षतीत्यर्थः येपनोवर्त्तिकामपलापयुतेनाकुरोतीत्यर्थः प्रलंवनेक ह्वामन्त्रापय
तेविसंवादयतीत्यर्थः विभाषालीयतेश्च निवाहे विधीयतेतेनदस्मिन्विषयेनित्यमन्यत्रवि।
कल्पः व्यवस्थितविभाषाहि सा संमाननादिष्विति किं वालकमुल्लापयति मिथ्योपप
दात्कृञोभ्यासे णेरितिवर्त्तते अकर्त्रभिप्रायार्थआरंभः एपन्तात्करोतेः मिथ्योपपदादात्म
नेपदंभवति अभ्यासे अभ्यासः पुनःपुनःकरणमावृत्तिः पदंमिथ्याकारयते सोपचारं।
स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः मिथ्योपपदादितिकिं पदंसुष्टुकारयति कृञइतिकिं
पदंमिथ्यावाचयतिअभ्यासेइतिकिं पदंमिथ्याकारयति सकृदुच्चारयतीत्यर्थः स्वरित
ञितःकर्त्रभिप्रायेक्रियाफले णेरितिनिवृत्तं शेषात्कर्त्तरिपरस्मैपदेप्राप्तेस्वरितेतोयेचानुबः
ञितस्तेभ्यआत्मनेपदंभवतिकर्त्तारंचेत्क्रियाफलमभिप्रैति क्रियायाःफलंप्रधानभूतेय
दर्थमसौक्रियारभ्यतेतत्खलुकर्त्तुःलकारवाच्यस्यभवति यजतेपचतेञितः खल्वपिसुन
नेकुरुतेस्वर्गादिप्रधानफलमिहकर्त्तारमभिप्रैतिकर्त्रभिप्रायेइतिकिं यजन्तियाजकाः
पचन्तिभक्तकाराः कुर्वन्तिकर्मकाराःयद्यपिदक्षिणादितेषांकर्त्तुःफलमिहास्तितथा

पिन्नतदर्थः क्रियारंभः अपाद्वदः कर्त्रभिप्राये इति वर्त्तते अपपूर्वाद्वदतेर्कर्त्रभिप्राये क्रियाफले
आत्मनेपदं भवति धनकामो न्यायमपवदते न्यायापवादेन धनमर्जयिष्यामीति मन्यते कर्त्रभि
प्राये क्रियाफले इत्येव अपवदति णिचश्च कर्त्रभिप्राये क्रियाफले इत्येव णिजन्तादात्म
नेपदं भवति कर्त्रभिप्राये क्रियाफले कटं कारयते ओदनं पाचयते कर्त्रभिप्राये इत्येव का
रयति समुदाङ्भ्यो यमोऽग्रन्थे कर्त्रभिप्राये इति वर्त्तते सम उत आङ् इत्येवं पूर्वाद्यमेः कर्त्रभि
प्राये क्रियाफले आत्मनेपदं भवति अग्रन्थविषयश्चेत्प्रयोगो न भवति व्रीहीन्संयच्छते भारमु
द्यच्छते वस्त्रमायच्छते आङ्पूर्वादकर्मकादाङो यमहनः इति सिद्धमेवात्मनेपदं सकर्मका
र्थं पुनरिदं ग्रहणं अग्रन्थ इति किं उद्यच्छति चिकित्सां वैद्यः कर्त्रभिप्राये इति किं देवद
त्तस्य गां संयच्छति उद्यच्छति आयच्छति अनुपसर्गाज्ज्ञः कर्त्रभिप्राये इत्येव अनुपसर्गा
ज्जानातेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति गां जानीते अश्वं जानीते अनुपस
र्गादिति किं स्वर्गं लोकं न प्रजानाति मूढः कर्त्रभिप्राये इत्येव देवदत्तस्य गां जानाति ।
विभाषोपपदेन प्रतीयमाने स्वरितञितः इति पंचभिः सूत्रैः आत्मनेपदं कर्त्रभिप्राये

का॰
वृ॰प्र
५५

क्रियाफलेयोन्तेविहितंतदुपपदेनैवयातितेनप्राप्नोतिइतिवचनमारभ्यतेसमीपेश्रूय
माणंशब्दान्तरमुपपदंतेनप्रतीयमानेकर्त्रभिप्रायेक्रियाफलेविभाषात्मनेपदंभवति
स्वंयज्ञंयजतिस्वंयज्ञंयजते स्वंकटंकरोतिस्वंकटंकुरुते स्वंपुत्रमपवदतिस्वंपुत्रमपवदते
एवंपंचसूत्राण्युदाहृतानि शेषात्कर्तरिपरस्मैपदं पूर्वेणप्रकरणेनात्मनेपदनियमःकृ
तःपरस्मैपदमनियतंतत्सर्वतःप्राप्नोतितदर्थमिदमुच्यते येभ्योधातुभ्योयेनविशेषणेना
त्मनेपदमुक्तंततोन्यस्माच्छेषःशेषात्कर्तरिपरस्मैपदंभवति शेषादेवनान्यस्मात् अनुदा
त्तङितआत्मनेपदमुक्तंआस्तेवस्तेशेतेततोन्यत्रपरस्मैपदंभवति यातिवाति नेर्विशआत्म
नेपदमुक्तंनिविशतेततोन्यत्रपरस्मैपदमुक्तं विधीयते आविशतिप्रविशतिकर्तरिइति
किं गम्यतेपच्यते कर्मकर्तरिकस्मान्नपरस्मैपदंनभवतिपच्यतेओदनःस्वयमेवकर्तरिकर्म
व्यतिहारेइतिद्वितीयंकर्तृग्रहणमनुवर्ततेतेनकर्तैवयःकर्तातत्रपरस्मैपदंकर्मकर्तरि
नभवति अनुपराभ्यांकृञः कर्त्रभिप्रायेक्रियाफलेगन्धनादिषुचार्थेषुकरोतेरात्मनेपदं
विहितंतदपवादःपरस्मैपदंविधीयते अनुपराभ्यांकृञःपूर्वोक्तकरोतेःपरस्मैपदंभवतिअनु

करोति पराकरोति ॥ अभिप्रभृतिभ्यः क्षिपः ॥ क्षिप प्रेरणे स्वरितेत् ततः कर्त्रभिप्राये क्रियाफल
विवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते अभिप्रति अति इत्येवं पूर्वात् क्षिपः परस्मैपदं भ
वति अभिक्षिपति प्रतिक्षिपति अतिक्षिपति अभिप्रभृतिभ्य इति किं आक्षिपते हितोयम
पि कर्त्रभिप्रायग्रहणमनुवर्तते तेनेह न भवति अभिक्षिप्यते स्वयमेव ॥ प्राद्वहः ॥ वह प्रापणे स्व
रितेत् ततः कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते प्रपू
र्वाद्वहतेः परस्मैपदं भवति प्रवहति प्रवहतः प्रवहन्ति प्रादिति किं आवहते ॥ परेर्मृषः ॥
मृष तितिक्षायां स्वरितेत् ततस्तथैवात्मनेपदे प्राप्ते परस्मैपदं विधीयते परिपूर्वान्मृष्यतेः पर
स्मैपदं भवति परिमृष्यति परिमृष्यतः परिमृष्यन्ति परेरिति किं आमृष्यते व
हतिमपि केचिदनुवर्तयन्ति परिवहति ॥ व्याङ्परिभ्यो रमः ॥ रमु क्रीडायां अनुदात्तेदात्मने
पदे प्राप्ते ततः परस्मैपदं विधीयते वि आङ् परि इत्येवं पूर्वाद्रमतेः परस्मैपदं भवति विरमति
आरमति परिरमति परेभ्य इति किं अभिरमते ॥ उपाच्च ॥ रम इत्येव उपपूर्वाद्रमतेः परस्मैपदं
भवति देवदत्तमुपरमति उपरमयतीति यावत् अन्तर्भावितण्यर्थोत्र रमिः सकर्मकः ॥

यथेयाकरणमनवार्थं अकर्मकाच्चिभाषावल्पतिमउपादिति वर्त्तते सर्व्वेणानित्यपरस्मैप
स्मैपदे प्राप्ते विकल्प आरभ्यते उपपूर्व्वाद्रमतेरकर्मकाद्विभाषया परस्मैपदं भवति यावद्भु
क्तमुपरमति यावद्भुक्तमुपरमते निवर्त्तत इत्यर्थः बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः णिचा
श्चेति कर्त्रभिप्राये क्रियाफलविवक्षायामात्मनेपदे प्राप्ते अपवादः परस्मैपदं विधीयते बुधयु
धनशजनेङ्प्रुद्रुस्रु इत्येतेभ्यो णिजन्तेभ्यः परस्मैपदं भवति बोधयति योधयति नाशयति
जनयति अध्यापयति प्रावयति द्रावयति स्रावयति येत्राकर्मकास्तेषामणावकर्मकाच्चि
त्तवत्कर्त्तृकादिति सिद्धवचनमिदमविवक्षितकर्त्तृकार्थं बोधयति पद्मं योधयति काष्ठा
नि नाशयति दुःखं जनयति सुखं अध्यापयति वेदं प्रुद्रुस्रुवस्तु चलनार्थास्तदपि तेषां नि
गरणचलनार्थेभ्यश्चेति सिद्धे यदा न चलनार्थास्तदर्थं वचनं प्रावयते प्राप्नोतीति गम्यते
अयोद्रवति विलीयत इत्यर्थः कुण्डिका स्रवति स्यन्दत इत्यर्थः तद्विषयान्युदाहरणानि भ
वन्ति निगरणचलनार्थेभ्यश्च णेरिति वर्त्तते कर्त्रभिप्राये क्रियाफलविवक्षायामात्मने
पदापवादः परस्मैपदं विधीयते निगरणमभ्यवहारः चलनं कम्पनं निगरणार्थेभ्यः चल

नार्थेभ्यः धातुभ्यः ण्यन्तेभ्यः परस्मैपदं भवति निगारयति आशयति भोजयति चलना
र्थेभ्यः चलयति चोपयति कंपयति अयमपि योगः सकर्मकार्थः अचित्तवत्कर्तृकार्थश्च
अदेः प्रतिषेधो वक्तव्यः अत्ति देवदत्तः आदयते देवदत्तेन अणावकर्मकाच्चित्तवत्कर्तृ
कात् णेरिति निवर्त्तते कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं
विधीयते अण्यन्तो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च तस्माण्ण्यन्तात्परस्मैपदं भवति
आस्ते देवदत्तः आसयति देवदत्तं शेते देवदत्तः शाययति देवदत्तं अणाविति किं चेतय
मानं प्रयोजयति चेतयते इति केचित्तु उदाहरन्ति तदयुक्तं हेतुमण्णिचो विधिः प्रति
षेधोपि अण्यन्तस्यैव न्यायः तस्मादिह चेतयतीति परस्मैपदेनैव भवितव्यं इदं तु
उदाहरणं आरोहयमाणं प्रयोजयति आरोहयते अकर्मकादिति किं कटं कुर्वाणं प्रयो
जयति कारयते चित्तवत्कर्तृकादिति किं शुष्यन्ति व्रीहयः शोषयते व्रीहीन् देवदत्तः
नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः पूर्वेण योगद्वयेन कर्त्रभिप्रायक्रियाफ
लविवक्षायामात्मनेपदापवादः परस्मैपदं विहितं तस्य प्रतिषेधोयमुच्यते यत्र कर्त्रभि

का० वृ० प्र० ५९

प्राप्यविषये परस्मैपदं तत्स्वस्थितमेव न प्रतिषिध्यते पादमि आङ्यम आङ्यस परिमुह रु-
चि नृति वदवसइत्येतेभ्यो णिजन्तेभ्यः परस्मैपदं न विहितं भवति तत्रापि वतित्रिगरणार्थः दमिप्रभ-
तयश्चवित्तवान् कर्त्ता कर्मान्तिस्खलनार्थाः पिते षां परस्मैपदं न भवति पा पाययते दमिः दमयते
आङ्यम आयामयते यमोपरिविशेषणं इति मित्त्वात् प्रतिषिध्यते आङ्यम आयामयते प-
रिमुह परिमोहयते रुचि रोचयते नृति नर्त्तयते वद वादयते वस वासयते पादिषु पे
ट प संख्याने पाययते शिशुमेकं समीची वा क्यषः लोहितादिडाज्भ्यः क्यषीति वचनात् त-
दन्ताड्डाजन्तात् परस्मैपदं भवति लोहितायते लोहितायति पटपटायति पटपटायते अ-
थात्र परस्मैतस्यानन्तरं पदेन सम्बन्धः कथमात्मनेपदं लभ्यते अन्वादानइत्येवमादिना
प्रकरणेन न नियमितं एवं तर्हि ङितः आत्मनेपदमेवात्र विकल्पितं विधीयते तस्यानन्तरं पर-
स्मैपदप्रतिषेधेन सन्निधापितमिह सम्बध्यते तेन क्यषः परस्मैपदं करिष्यति युड्भ्यो ल-
ङि वेत्यत्र युतदीशीतन्त्सा हवर्धीय जादयोपि कृपपर्यन्ताः लुट्येव वा पदि वैरूप्यवचननिर्देशा-
दाद्यर्थो ज्ञानत्वं भवति अन्वादानेनात्र नित्यमेवात्मनेपदं प्राप्ते द्युतादिभ्यो लुङि वा परस्मैपदं

भवति अद्युतत अद्योतिष्ट अलुठत अलोठिष्ट लुठीति किं वर्तते वृद्भ्यः स्यसनोः द्युतादिभ्यो

वृतादयः पञ्च वृतवर्तने वृधुवृद्धौ शृधु शब्दकुत्सायां स्यन्दू प्रस्रवणे कृपू सामर्थ्ये इत्ये

तेभ्यः स्यसनोश्च वा परस्मैपदं भवति वृत वर्त्स्यति अवर्त्स्यत विवृत्सति विवर्त्सति वा

र्तिष्यते अवर्तिष्यत विवर्तिष्यते वृधु वर्त्स्यति अवर्त्स्यत विवृत्सति वर्धिष्यते अव

र्धिष्यत विवर्धिष्यते शृधु शर्त्स्यति अशर्त्स्यत शिशृत्सति शर्धिष्यते अशर्धिष्य

त शिशर्धिष्यते स्यन्दू स्यन्त्स्यति अस्यन्त्स्यत सिस्यन्त्सति स्यन्दिष्यते अस्यन्दिष्यत ।

सिस्यन्दिष्यते कृपि कल्प्स्यति अकल्प्स्यत विकॢप्सति कल्पिष्यते अकल्पिष्यते विकल्पि

ष्यते स्यसनोरिति किं वर्तते लुटि च कॢपः कृपेर्वृतादित्वात्स्यसनोः सिद्धो विकल्पः लु

टि विधीयते चकारस्तर्हि स्यसनोरनुकर्षणार्थो न वक्तव्यः एवं तर्हीयं प्राप्तिः कॢपः सू

वं प्राप्तिं बाधेत तस्माच्चकारः स्यसनोरनुकर्षणार्थः क्रियते लुटि स्यसनोश्च कॢपः परस्मै

पदं भवति कल्प्ता कल्प्तारौ कल्प्तारः अकल्प्स्यत अकल्प्स्यत विकॢप्सति कल्पिताक

ल्पि कल्पिष्यते अकल्पिष्यत चिकल्पिष्यते ॥ इति काशिकायां वृत्तौ प्रथमस्याध्यायस्य

तृतीयःपादः आकडारादेकासंज्ञा कडाराःकर्मधारयइति वक्ष्यति आएतस्मात्सूत्राव
धेर्यदितऊर्ध्वमनुक्रमिष्यामस्तत्रैकासंज्ञाभवतीतिवेदितव्यंकापुनरसौयापरानवकाशा
च अनवकाशसंज्ञासमावेशान्नियमार्थंवचनं एकैवसंज्ञाभवतीतिवक्ष्यति ह्रस्वंलघुभिद्
छिद् संयोगेगुरुशिक्ष् संयोगपरस्यह्रस्वस्यलघुसंज्ञाप्राप्नोतिगुरुसंज्ञाचएकासंज्ञेति
वचनाद्गुरुसंज्ञैवभवति अततक्षत् अररक्षत् सन्वल्लघुनिचंपरेइत्येषविधिर्नभवति
विप्रतिषेधेपरंकार्यं परिभाषेयम् विरोधोविप्रतिषेधः यत्रद्वौप्रसङ्गावन्यार्थावेकस्मिन्यु
गपत्प्राप्नुतस्तत्तुल्यबलविरोधःविप्रतिषेधःतस्मिन्विप्रतिषेधेपरंकार्यंभवतिउत्सर्गा
पवादनित्यानित्यान्तरङ्गबहिरङ्गेषुतुल्यबलतानास्तीतिनायमस्ययोगस्यविषयःए
लवनैवतत्रभवितव्यं अप्रतिपत्तौपर्यायेणप्रसङ्गवचनमिदमारभ्यते अतोदीर्घोयञिसु
पिचेत्यस्यावकाशः वृक्षाभ्यांप्लक्षाभ्यांबहुवचनेझल्येदित्यस्यावकाशःवृक्षेषुप्लक्षेषु
इहोभयंप्राप्नोतिवृक्षेभ्यःप्लक्षेभ्यःइतिपरंभवतिविप्रतिषेधेन यूस्त्र्याख्यौनदी ईचऊ
चयूमविभक्तिकोनिर्देशःस्त्रियमाचक्षातेस्त्र्याख्यौ मलविभ्रजादिदर्शनात्क्वप्रत्ययः

ईकारान्तमूकारान्तं स्त्र्याख्यं शब्दरूपं नदीसंज्ञं भवति ईकारान्तं कुमारी गौरी लक्ष्मीः ऊकारा
न्तं देवं वधूः यवागूः भूरिति किं मातृ दुहितृ स्त्र्याख्याविति किं ग्रामणीः सेनानीः खलपूः आख्या
ग्रहणं किं यावृत्यर्थे स्त्रीत्वे यथा स्यात् पदान्तरप्रसंगेनैवमाभूत् ग्रामण्ये स्त्रियै खलप्वे स्त्रियै नदी
प्रदेशाः आण्नद्या इत्येवमादयः नेयुवङ्स्थानावस्त्री पूर्वेणानित्यप्रसक्तां नदीसंज्ञां प्रतिषिध्य
ते इयुवङौ स्थानं इयुवाङौ स्थानमनयोरिति तौ इयुवङ्स्थानौ तौ यू नदीसंज्ञौ न भवतः स्त्रीश
ब्दं वर्जयित्वा हे श्रीः हे भ्रूः अस्त्री इति किं हे स्त्रि वामि पूर्वेणानित्ये प्रतिषेधे प्राप्ते आमि विक
ल्पः क्रियते इयुवङ्स्थानौ यू आमि परतः वा नदीसंज्ञौ न भवतः श्रियां श्रीणां भ्रुवां भ्रूणाम्
अस्त्री इत्येव स्त्रीणां ङिति ह्रस्वश्च दीर्घस्य नदीसंज्ञा विहिता ह्रस्वस्य न भवति इयुवङ्स्था
नयोश्च प्रतिषिद्धा तस्मात् ङिति वा विधीयते ङिति परतः ह्रस्वश्च य्वोः संबंधी स्त्र्याख्यौ इयुवङ्
स्थानौ यू वा नदीसंज्ञा भवति कृत्यै कृतये धेन्वै धेनवे श्रियै श्रिये भ्रुवै भ्रुवे अस्त्री इत्येव स्त्रियै।
स्त्र्याख्याविति एव अग्नये वायवे भानवे शेषो घ्यसखि ह्रस्व इति वर्तते शेषो ह्रस्वो घिसंज्ञो भव
ति सखिशब्दं वर्जयित्वा कश्च शेषः ह्रस्वमिवर्णोवर्णान्तं यत्र स्त्र्याख्यं स्त्र्याख्यमपि यत्र न नदी

संज्ञं मा शेषघः अग्नये वायवे कृतये धेनवे असखेति किं सख्या सख्ये सख्युः सख्यौ पतिः समा
स एव पतिशब्दस्य सिद्धायां घिसंज्ञायां मयं नियमः क्रियते पतिशब्दः समास एव घिसंज्ञो भ
वति प्रजापतिना प्रजापतये समास इति किं पत्या पत्ये पत्युः एवकारः इष्टतोवधारणार्थः
तृष्ट्व सष्टिनात छन्दस्युभये षष्ठीयुक्तश्छन्दसि वा पतिरितिवर्तते पूर्वेण नियमादसमासे
न प्राप्नोतीति वचनमिदमारभ्यते षष्ठ्यन्तेन शब्देन युक्तः पतिशब्दः छन्दसि विषये वा घिसंज्ञो
भवति कुलुञ्चानां पतये नमः कुलुञ्चानां पतये नमः षष्ठीग्रहणं किं मया पत्या जरदष्टिर्यथासान्
ह्रस्वं लघु मात्रिकस्याचो ह्रस्वसंज्ञा कृता तेन तस्य लघुसंज्ञा विधीयते ह्रस्वमक्षरं लघुसं
ज्ञं भवति भेत्ता भेत्ता अचीकरत अजीहरत लघुप्रदेशाः पुगन्तलघूपधस्येत्येवमादयः
संयोगे गुरु ह्रस्वमिति वर्तते पूर्वेण लघुसंज्ञायां प्राप्तायां गुरुसंज्ञा विधीयते संयोगपरतः
ह्रस्वमक्षरं गुरुसंज्ञं भवति कुण्डा हुण्डा शिक्षा दीक्षा गुरुप्रदेशाः गुरोश्च हलः इत्येवमादयः दी
र्घं च संयोगादिति नानुवर्तते सामान्येन संज्ञा विधीयते दीर्घमक्षरं गुरुसंज्ञं भवति ईहाञ्चक्रे
ईहाञ्चक्रे यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् यस्मात्प्रत्ययो विधीयते धातोर्वा प्रातिपा

ढिकाद्यान्तदादिशब्दरूपं प्रत्यये परतः अङ्गसंज्ञं भवति कर्ता करिष्यति अकरिष्यत् यस्मादिति
मेतन्निर्देशार्थं तदादीति संबध्यते प्रत्ययग्रहणं किमन्यविधानत्व स्त्रीणीते नर्वि शब्दरूपा
सर्गादिष्विस्त्रितदादिरङ्गसंज्ञा न स्यात् विधिग्रहणं किं परतमात्रे मा भूत् स्त्री इयती ता
दादिवचनं स्यादिनमर्थं करिष्यामः कुण्डानि पुनः प्रत्ययग्रहणं किं स्वार्थं अर्थमेव प्रदेशा
अङ्गस्येत्येवमाद्यः सुप्तिङन्तं पदं सुप्तिङिति प्रत्याहारग्रहणं सुबन्तं तिङन्तं च शब्दरू
पं पदसंज्ञं भवति ब्राह्मणाः पचन्ति पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रह
णे तदन्तविधिप्रतिषेधार्थं गौरी ब्राह्मणितरा पदप्रदेशाः पदस्य पदात् इत्येवमादयः नः
क्ये क्य इति क्यच्क्यङ्क्यषां सामान्यग्रहणं नान्तं शब्दरूपं क्ये परतः पदसंज्ञं भवति क्यच्
राजीयति क्यङ् राजायते क्यष् चर्मायति चर्मायते सिद्धे सत्यारम्भो नियमार्थः नान्तमेव
क्ये पदसंज्ञं भवति नान्यत् वाच्यति स्रुच्यति सिति च यचि भमिति वक्ष्यति तस्यायं पुरस्ता
दपकर्षः सिति प्रत्यये परतः पूर्वं पदसंज्ञं भवति भवतष्ठक्छसौ भवदीयाः ऊर्णाया युस् ऊ
र्णायुः ऋतोरण् छन्दसि घस् ऋत्वियः स्वादिष्वसर्वनामस्थाने स्वशाद्यादेकवचनादा

ऽस्य ग्राकपः प्रत्ययमहत्यन्ते स्वादिषु प्रत्ययेषु परतः सर्वनामस्थानवर्जितेषु पूर्वं पदसंज्ञं भवति
राजभ्यां राजभिः राजत्वं राजता राजम्य राजतमः असर्वनामस्थाने इति किं राजानौ राजानः
यचि भं स्वादिष्वसर्वनामस्थाने इति वर्त्तते पूर्वेण पदसंज्ञायां प्राप्तायां तदपवादोऽयं भसंज्ञा वि
धीयते यकारादावजादौ च स्वादौ सर्वनामस्थानवर्जिते प्रत्ययपरतः पूर्वं भसंज्ञं भवति यका
रादौ गार्ग्यः वात्स्यः अजादौ दाक्षिः प्लाक्षिः नभोऽङ्गिरोमनुषां वत्युपसंख्यानं तल्पीकिया
वेदतिः नभस्वत् नभस्वं अङ्गिरस्वदङ्गिरस्वत् मनुष्वत् मनुष्वत् वृषण्वस्वश्वयोः वृषन्नि
त्येतद्वस्वश्वयोः परतः भसंज्ञं भवति वृषण्वसुः वृषणश्वः भे प्रयोगः भस्यैव मादयः नभो
मनुष्ये भमिति वर्त्तते तकारान्तं सकारान्तं च शब्दरूपं मत्वर्थे प्रत्यये परतः भसंज्ञं भवति तका
रान्तं उदश्विन्मान् वै षः विद्युत्वान् बलाहकः सकारान्तं तपस्वी यशस्वी तस्मा विति किं तत्त्ववान्
ग्रामः अयस्मयादीनि छन्दसि अयस्मयादीनि शब्दरूपाणि छन्दसि साधूनि भवन्ति भ
संज्ञाधिकारे वचनात् भत्वेन साधुत्वमयस्मयादीनां विधीयते अयस्मयं वर्म अयस्मयानि
पात्राणि अयस्मयीभिः स्रुग्भिः क्वचिड भयमपि भवन्ति सस्रुग्भा संस्कृताग्राणेन पदत्वानुवंभा

न्नाजस्त्वेनभवति छंदसीतिकिं प्रयोमयं बहुषु बहुवचनम् ङ्याप्प्रातिपदिकान्त्स्वादयो
लस्यतिबादयश्चेतिसामान्येनबहुवचनंविहितंतस्यानेनबहुत्वसंख्यावाच्यत्वेनविधीयते ब
हुषुबहुवचनेभवतिबहुत्वमस्यवाच्यं भवतीतिकर्मादयोपरेविभक्तीनांवाच्याः तदीयेब
हुत्वेबहुवचनंकर्मादिषुबहुषुबहुवचनमित्यर्थः ब्राह्मणाःपचन्तियत्रचसंख्यावर्तितत्राय
मपदेशः अव्ययेभ्यस्तुतिसृभ्योभ्यः सामान्यविहिताः स्वादयः विधीयन्तएव द्व्येकयोर्द्विव
चनैकवचने द्वित्वैकत्वयोः द्विवचनैकवचनेभवतः एतदपि सामान्यविहितयोः द्विवचनयोः
अर्थाभिधानंद्वित्वेद्विवचनंएकवचनंभवतिब्राह्मणौपचतः ब्राह्मणःपचति कारके वि
शेषणमपादानादिसंज्ञाविषयमधिक्रियतेकारकइत्यधिकारोवेदितव्यः यदितऊर्ध्वमनुक्र
मिष्यामः कारकेइत्येवंतद्वेदितव्यं कारकशब्दश्चेतिनिमित्तपर्यायः कारकंनिमित्तंहेतुरित्यन
र्थान्तरं कस्यहेतुः क्रियायाःवक्ष्यतिध्रुवमपायेऽपादानं ग्रामादागच्छतिपर्वतादवरोहतीतिका
रकइतिकिं वृक्षस्यपर्णंपततिकुड्यस्यपिण्डः पतन्तिअकथितंचकारकंकर्मसंज्ञंभवतिमा
णवकंपन्थानंपृच्छतिकारकइतिकिं कस्यपितरंपन्थानंपृच्छति कारकसंज्ञेनएवा

का
व्य प
५०

नैनैवविशेषणेनव्यवहारोविज्ञायते ध्रुवमपायेपादानम् ध्रुवंयदपाययुक्तमपायेसाध्ये
यदवधिभूतंतत्कारकमपादानसंज्ञंभवति ग्रामादागच्छति पर्वतादवरोहतिसार्थाद्धीनः
रथात्पतितः जुगुप्साविरामप्रमादार्थानामुपसंख्यानं अधर्माज्जुगुप्सते अधर्माद्विरमति
अधर्मात्प्रमाद्यति अपादानप्रदेशाअपादानेपंचमीत्येवमादयः भीत्रार्थानांभयहेतुः वि
बिभीत्यर्थानांत्रायत्यर्थानांचधातूनांचप्रयोगेभयहेतुर्यत्कारकमपादानसंज्ञंभवति चौ
रेभ्योबिभीतिचौरेभ्यउद्विजतेत्रायत्यार्थानांचौरेभ्यस्त्रायते चौरेभ्योरक्षतिभयहेतुरि
तिकिं अरण्येबिभेतिअरण्येत्रायते पराजेरसोढः पराह्पूर्वस्यजयतेःप्रयोगेअसोढोयो
र्थःसोढुंनशक्यतेतत्कारकमपादानसंज्ञंभवति अध्ययनात्पराजयते अध्येतुंनशक्नोती
तियावत् भोजनात्पराजयतेअसोढइतिकिं शत्रून्पराजयते वारणार्थानामीप्सितः वा
रणार्थानांधातूनांप्रयोगेयदीप्सितोर्थःतत्कारकमपादानसंज्ञंभवति प्रवृत्तिविघातःवा
रणं यवेभ्योगांवारयतियवेभ्योगांनिवर्त्तयतीत्यर्थः ईप्सितइतिकिं यवेभ्योगांवारयतिक्षेत्रे अ
न्तर्धौ येनादर्शनमिच्छतिअवधानमन्तर्धिः अन्तर्धिनिमित्तंयेनादर्शनमात्मनइच्छतितत्

कारकमपादानसंज्ञं भवति उपाध्यायादन्तर्धत्ते उपाध्यायान्निलीयते मा मामुपाध्यायो द्राक्षीदि
ति निलीयते अन्तर्धाविति किं उपाध्यायस्मात्प्रमिच्छति येनेति किं चौरान्न दिदृक्षते इच्छ
तिग्रहणं किं अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात् आख्यातोपयोगे आख्याता
प्रतिपादयिता उपयोगो नियमपूर्वकं विद्याग्रहणं उपयोगे साध्ये यः आख्यातस्तत्कारक
मपादानसंज्ञं भवति उपाध्यायादधीयते उपाध्यायादागमयति उपयोग इति किं नटस्य
शृणोति गानस्य शृणोति जनिकर्त्तुः प्रकृतिः जनेः कर्त्ता जनिकर्त्ता जन्यर्थस्य जन्मनः
कर्त्ता जायमानस्तस्य या प्रकृतिः कारणं हेतुस्तत्कारकमपादानसंज्ञं भवति शृंगाच्छरो जा
यते गोमयाद्वृश्चिको जायते भुवः प्रभवः कर्त्तरीति वर्त्तते भवनं भूः प्रभवत्यस्मादिति प्र
भवः भुवः कर्त्तुः प्रभवो योऽर्थस्तत्कारकमपादानसंज्ञं भवति हिमवतो गंगा प्रभवति कश्मी
रेभ्यो वितस्ता प्रभवति प्रथमत उपलभ्यत इत्यर्थः कर्मणा यमभिप्रैति स संप्रदानं कर्मणा क
रणभूतेन यमर्थमभिप्रैति तत्कारकं संप्रदानसंज्ञं भवति अन्वर्थसंज्ञाविज्ञानाद्ददातिः
कर्मणोति विज्ञायते उपाध्यायाय गां ददाति माणवकाय भिक्षां ददाति क्रियाग्रहणमपि

कर्तव्यं क्रियया यमभिप्रैति स संप्रदानं श्राद्धाय निगर्हते युद्धाय सन्नह्यति पत्ये शेते संप्रदा
नप्रदेशाश्चान्वर्थीसंप्रदानेइत्येवमादयः दातीत्यर्थः रुच्यर्थानां प्रीयमाणः रुचिनामस
मानार्थाः रुच्यर्थाः अन्यकर्तृकोभिलाषो रुचिः रुच्यर्थानां प्रयोगे प्रीयमाणो योर्थस्तत्का
रकं संप्रदानसंज्ञं भवति देवदत्ताय रोचते मोदकः देवदत्ताय स्वदते मोदकः देवदत्ता।
स्य साभिलाषस्य मोदकः कर्ता प्रीयमाण इति किं देवदत्ताय रोचते मोदकः पथि
श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः श्लाघह्नुङ्स्थाशप इत्येतेषां प्रयोगे ज्ञीप्स्यमानो योर्थस्तत्का
रकं संप्रदानसंज्ञं भवति ज्ञीप्स्यमानो ज्ञापयितुमिष्यमाणः बोधयितुमभिप्रेतः देवदत्ताय
श्लाघते देवदत्तं श्लाघमानस्तां श्लाघां तमेव ज्ञापयितुमिच्छतीत्यर्थः एवं देवदत्ताय ह्नुते।
यज्ञदत्ताय ह्नुते देवदत्ताय तिष्ठते यज्ञदत्ताय तिष्ठते देवदत्ताय शपते यज्ञदत्ताय शपते
ज्ञीप्स्यमान इति किं देवदत्तं श्लाघते धारेरुत्तमर्णः धारेरुतः प्रयोगे उत्तमर्णो योर्थस्तत्कार
कं संप्रदानसंज्ञं भवति उत्तमं ऋणं यस्य स उत्तमर्णः कस्य च उत्तमं ऋणं तद्दीयते यत।
स्वामी प्रयोगे तेन उत्तमर्णः स संप्रदानसंज्ञो भवति देवदत्ताय शतं धारयति उत्तमर्णः

इतिकिं देवदत्ताय शतं धारयति ग्रामे ॥ स्पृहेरीप्सितः ॥ स्पृहईप्सायां चुरादावदन्तः पठ्यते तस्य
यदीप्सितोर्थस्तत्कारकं संप्रदानसंज्ञं भवति ॥ ईप्सितइति अभिप्रेतउच्यते पुष्पेभ्यः स्पृहयति फ
लेभ्यः स्पृहयति ॥ ईप्सितइतिकिं पुष्पेभ्यो वने स्पृहयति ॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः
अमर्षः क्रोधः अपकारो द्रोहः अक्षमा ईर्ष्या गुणेषु दोषाविष्करणमसूया क्रोधाद्यर्थानां प्रयो
गे यं प्रति कोपस्तत्कारकं संप्रदानसंज्ञं भवति क्रोधस्तावत्कोपएव द्रोहादयोपि कोपप्रभ
वा एव गत्यन्तेन तस्मात्सामान्येन विशेषणं यं प्रति कोप इति देवदत्ताय क्रुध्यति देवदत्ताय द्रु
ह्यति देवदत्ताय ईर्ष्यति देवदत्तायासूयति यं प्रति कोप इति किं भार्यामीर्ष्यति मैनामन्यो द्रा
क्षीत ॥ क्रुधद्रुहोरुपसृष्टयोः कर्म ॥ पूर्वेण संप्रदानसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते क्रुध
द्रुहोरुपसृष्टयोरुपसर्गसंबद्धयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं भवति देवदत्तमभिक्रुध्य
ति यज्ञदत्तमभिक्रुध्यति एवं द्रुह्यति ॥ उपसृष्टयोरिति देवदत्ताय क्रुध्यति यज्ञदत्ताय द्रुह्य
ति ॥ राधीक्ष्योर्यस्य विप्रश्नः ॥ राधरीक्षश्च कारकं संप्रदानसंज्ञं भवति कीदृशं यस्य विप्रश्नः वि
विधः प्रश्नो विप्रश्नः स कस्य भवति यस्य शुभाशुभं पृच्छ्यते देवदत्ताय राध्यते देवदत्ताय

ईक्षते नैमित्तिकः शुभाशुभं देवदत्तस्यैव पर्यालोचयतीत्यर्थः प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता प्र
तिशृणोतीत्येवं पूर्वस्य शृणोतेः कारकं संप्रदानसंज्ञं भवति कीदृशं पूर्वस्य कर्तृ प्रतिपूर्वः आ
ङ्पूर्वश्च शृणोतिरभ्युपगमे प्रतिज्ञाने वर्तते स चाभ्युपगमः परेणाप्रयुक्तस्य सतो भवति तत्र
यः प्रयोक्ता पूर्वस्याः क्रियायाः कर्ता स संज्ञो भवति देवदत्ताय गां प्रतिशृणोति देवदत्ताय गा
माशृणोति प्रतिजानीत इत्यर्थः अनुप्रतिगृणश्च पूर्वस्य कर्तेति वर्तते अनुपूर्वस्य प्रति
पूर्वस्य च गृणातेः पूर्वस्याः क्रियायाः कर्तृभूतं संप्रदानसंज्ञं भवति होत्रे अनुगृणाति पोत्रे।
अनुगृणाति होत्रे प्रतिगृणाति पोत्रे प्रतिगृणाति होता प्रथमं शंसति तमन्यः प्रोत्साहयति
अनुगरः प्रतिगर इति हि शंसितुः प्रोत्साहनमुच्यते होत्रे अनुगृणाति पोत्रे अनुगृणाति हो
तारं शंसन्तमन्यः प्रोत्साहयतीत्यर्थः साधकतमं करणं क्रियासिद्धौ यत्प्रकृष्टोपकारकं विव
क्षितं तत्साधकतमं कारकं करणसंज्ञं भवति दात्रेण लुनाति परशुना छिनत्ति तमग्रह
णे किं गङ्गायां घोषः कूपे गर्गकुलं दिवः कर्म च पूर्वेण करणसंज्ञायां प्राप्तायां कर्मसं
ज्ञा विधीयते दिवः साधकतमं यत्कारकं तत्कर्मसंज्ञं भवति चकारात्करणसंज्ञं च अक्षान्दी

ष्यति श्राद्धे दीक्ष्यति परिक्रयणे संप्रदानमन्यतरस्यां साधकतममिति वर्त्तते पूर्वेण।
कर्मसंज्ञायां प्राप्तायां संप्रदानसंज्ञा विधीयते परिक्रयणे यत्साधकं तदन्यतरस्यां संप्र
दानसंज्ञं भवति परिक्रयणं नियतकालं वेतनादिना स्वीकरणं नात्यन्तिकः क्रयए
व शताय परिक्रीतोनुब्रूहि शतेन परिक्रीतोनुब्रूहि सहस्राय परिक्रीतोनुब्रूहि स
हस्रेण परिक्रीतोनुब्रूहि आधारोधिकरणं आध्रियन्तेस्मिन्क्रियाइत्याधारः का।
रकंकर्मणोः क्रियाश्रययोर्धारणात्क्रियाप्रतिय आधारस्तत्कारकमधिकरणसंज्ञं
भवति कटे आस्ते शकटे आस्ते स्थाल्यां पचति अधिकरणप्रदेशाः सप्तम्यधिकरणे
चेत्येवमादयः अधिशीङ्स्थासां कर्म पूर्वेणाधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा वि
धीयते अधिपूर्वाणां शीङ् स्था आस इत्येतेषामाधारः यत्तत्कारकं कर्मसंज्ञं भवति ग्रा
ममधिशेते ग्राममधितिष्ठति ग्राममध्यास्ते अभिनिविशश्च अभि।
निपूर्वस्य विशतेर्य आधारस्तत्कारकं कर्मसंज्ञं भवति ग्राममभिनिविशते पर्वत
मभिनिविशते कथं कल्याणेभिनिवेशः पापेभिनिवेशः यथासंज्ञायस्मिन्यस्मिन्

का॰
वृ॰
५३

त्तितिग्रमभिनिविशतेइतिअन्यतरस्यामितिवर्त्ततेपरिक्रयणेसंप्रदानमन्यतरस्याम
माच्चव्यवस्थितविभाषाविज्ञायते उपान्वध्याङ्वसः उपअनुअधिआङ् इत्येवंपू
र्वस्यवसतेराधारोयस्तत्कारकंकर्म्मसंज्ञंभवतिग्राममुपवसतिसेनापर्वतमुपवस
तिसेनाग्राममनुवसतिपर्वतमनुवसतिग्राममधिवसतिपर्वतमधिवसतिग्राममा
वसतिपर्वतमावसतिवसेरश्यर्थस्यप्रतिषेधोवक्तव्यः ग्रामेउपवसतिभोजननिवृ
त्तिंकरोतीत्यर्थः कर्त्तुरीप्सिततमंकर्म्म कर्त्तुःक्रियययाप्तुमिष्टतमंतत्कारकंक
र्म्मसंज्ञंभवति ओदनंपचतिकटंकरोतिग्रामंगच्छतिकर्त्तुरितिकिं माषेष्वश्वंबध्ना
तिकर्म्मणईप्सितामाषानकर्त्तुः तमब्ग्रहणंकिं पयसाओदनंभुङ्क्तेकर्म्मेत्यनुवर्त्तमा
नेपुनःकर्म्मग्रहणमाधारनिवृत्त्यर्थं अन्यथाधारस्यैवहिस्यात गेहंप्रविशतीतिओद
नंपचतिसक्तून्पिबतीत्येवमादिनस्यात पुनःकर्म्मग्रहणात्सर्वंप्रसिद्धंभवति
कर्म्मणिप्रदेशाःकर्म्मणिद्वितीयेत्येवमादयः तथायुक्तंचानीप्सितम् येनप्रका
रेणकर्त्तुरीप्सिततमंक्रियायायुज्यतेतेनैवचेत्प्रकारेणयदनीप्सितंयुक्तंभवतित

स्पकर्मसंज्ञाविधीयते ईप्सितादन्यत्सर्वमनीप्सितं द्वेष्यमितरञ्च विषंभक्षयति।
चौरान्पश्यति ग्रामं गच्छन्वृक्षमूलान्युपसर्पति अकथितं च अकथितं यत्कार
कं तत्कर्मसंज्ञं भवति केनाकथितं अपादानादिभिर्विशेषकथाभिः परिगणनम
इहियाविवक्षि प्रविक्षिभिर्विविज्ञामप्रयोगानिमित्तमपूर्वविधौ अविशेषाभिधा
णेन वचनस्यवतेतदपकीर्तितमावरितकविनाउपयुज्यतदुपयोगः पयः
प्रभृतितस्यतिमित्तेगावादितस्यायमपयुज्यमानपयः प्रभृतितिमित्तस्यगावादेः
कर्मसंज्ञाविधीयतेपाणिनाकर्मपाद्यागांदोग्धिपयइतिपाणपादिकमप्रयो
गनिमित्तेतस्यकस्मात्रभवतितेनतदोक्तविहिताअकरणादिसंज्ञासत्तिप्रवाय
याचकरणादिसंज्ञाः तदर्थमाह अपूर्वविधाविति: अविशामिभूतेनवचनस्य
वेतयत्संज्ञायते अविशामोःयगाःमापत्तेप्रकारकर्मधर्मादिकं तेनवचनस्यवते
वस्यवचनेनतदकीर्तितमावरितकविनातदकथितमर्कर्मसं अकारणाडहिया
दोग्धिपयः याचितपौरवंगायाचतेरुधिगामवरुणद्धिव्रजं प्रच्छि माणवकं पन्था

नेष्वकृति भिक्षिपोरवं शांभिन्नतेचित्म वृक्षमवचिनोति फलानि ॥ करिष्माणवकं
धर्मं ब्रूते शास्ति माणवकं धर्ममनुशास्ति गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मका
णामणिकर्त्ता स णौ अर्थशब्दः प्रत्येकमभिसंबध्यते गत्यर्थानां बुद्ध्यर्थानां प्रत्य
वसानार्थानां च धातूनां तथा शब्दकर्मकाणामकर्मकाणां च अण्यन्तानां यः कर्त्ता
स ण्यन्तानां कर्मसंज्ञो भवति गच्छति माणवको ग्रामं गमयति माणवकं ग्रामम्
याति माणवको ग्रामं यापयति माणवकं ग्रामं गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः
नयति भारं देवदत्तः नाययति भारं देवदत्तेन वहति भारं देवदत्तः वाहयति भारं देवदत्ते
न वहेरनियन्तृकर्तृकस्येति वक्तव्यं इह प्रतिषेधो मा भूत् वहन्ति यवान् बलीवर्दाः वाह
यति यवान् बलीवर्दान् इति गतिः बुद्धि बुध्यते माणवको धर्मं बोधयति माणवकं ध
र्मं वेत्ति माणवको धर्मं वेदयति माणवकं धर्मं प्रत्यवसानं नाम आहारः भुङ्क्ते माणव
क ओदनं भोजयति माणवकमोदनं अश्नाति माणवकः आशयति माणवकं
अत्तिखाद्योः प्रतिषेधो वक्तव्यः अत्ति माणवक ओदनं आदयति माणवकमोद

व

नं स्वादति माणवकः स्वादयति माणवकेन भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः भक्षयति पिंडीं दे
वदत्तः भक्षयति पिंडीं देवदत्तेन अहिंसार्थस्येति किं भक्षयन्ति वलीवर्दास्सस्यं भक्षयन्ति वलीव
र्दान्सस्यं शब्दकर्मकाणामधीते माणवको वेदं अध्यापयति माणवकं वेदं पठति माणवको
वेदं पाठयति माणवकं वेदम् अकर्मकाणामास्ते देवदत्तः आसयति देवदत्तं शेते देवदत्तः
शाययति देवदत्तं पचेर्न्नेषामिति किं पचत्योदनं देवदत्तः पाचयत्योदनं देवदत्तेन अणापन्नाना
मिति किं गमयति देवदत्तो यज्ञदत्तं तमपरः प्रयुंक्ते गमयति देवदत्तेन यज्ञदत्तम् हृक्रोरन्य
तरस्याम् अणिकर्त्ता स णौ विनिवर्त्तते हरतेः करोतेश्च अणपन्नयोर्यः कर्त्ता स णपन्नयोरन्यतर
स्यां कर्मसंज्ञो भवति हरति भारं माणवकः हारयति भारं माणवकेनेति वा करोति कटं दे
वदत्तः कारयति कटं देवदत्तं देवदत्तेनेति वा अभिवादिदृशोरात्मनेपदे उपसंख्यानं अभि
वदति गुरुं देवदत्तः अभिवादयते गुरुं देवदत्तं देवदत्तेनेति वा पश्यन्ति भृत्या राजानं दर्शयते
भृत्यान्राजा दर्शयते भृत्यैरिति स्वतन्त्रः कर्त्ता स्वतन्त्र इति प्रधानभूत उच्यते अगुणभूतो यः
क्रियासिद्धौ स्वातन्त्र्येण विवक्षितोऽर्थः स कारके कर्तृसंज्ञो भवति देवदत्तः पचति स्थालीप

का·
वृ·
५५

वति कर्म्मप्रदेशाः कर्तृकरणयोः तृतीयेत्येवमादयः अन्यप्रयोजको हेतुश्च तदिह येन नाते
तरः कर्त्ता सम्बध्यते तस्य प्रयोजकस्तत्प्रयोजकः निपातनात्समासः स्वतन्त्रस्य प्रयोजकः
यार्थस्तत्कारकं हेतुसंज्ञं भवति चकारात्कर्तृसंज्ञं च संज्ञासमावेशार्थश्चकारः कुर्वाणं प्र
युङ्क्ते कारयति एवं हारयति हेतुनाऽस्मिंश्चोतिभिन्नकर्तृकात्स्वकर्तृप्रत्ययेनोच्यते हेतुप्र
देशा हेतुमति चेत्येवमादयः प्रागीश्वरान्निपाताः सूधिरीश्वरश्चेति वक्ष्यति प्रागेतस्मा
त्सूत्रावधेः यानितऊर्ध्वमनुक्रमिष्यामो निपातसंज्ञास्ते वेदितव्याः वक्ष्यति चादयोसत्त्वे च
वाहाहएवशब्दवत्ते संज्ञासमावेशार्थं गत्युपसर्गकर्मप्रवचनीयसंज्ञाभिः सहनि।
पातसंज्ञा समाविशति रेफोऽन्तारणामीश्वरे तेऽध्वर्कं माविनयमव्ययमोचि ज्ञायेति ईश्व
राद्दीश्वरान्माभूत् कृन्मेजन्तः पुरोऽव्ययम् समासेष्वव्ययीभावो लौकिके वा तिवर्त्तते चाद
यो सत्त्वे चादयो निपातसंज्ञा भवन्ति न चेत्सत्त्वे वर्त्तते प्रसज्यप्रतिषेधोऽयं सत्त्वमितिव
द्रव्यमुच्यते च वा ह अह एव एवं नूनं शश्वत् सूपत् कूपत् सूपत् कुवित् नेत् चेत्
चण् कच्चिद्यत्र नह हन्त माकिं नकिम् माङ् उकारो विशेषणार्थः माङि लुङिति ङकार

नभवति मामवन्तपाकरिष्यति माभविष्यति यावत् तावत् चावत् हैहैहैऔषट् वौ
षट् वषट् स्वाहास्वधाओम् तथाहिम् खल्विकिल अथ अथम् सामिअहं उकल्ह एए
उउँउन आवह आतगवेलायां याञायाम् होञायां यावत् यथाकिं यत् तत् पुरा
पिक हहा हेहै प्राडु प्याडु आहो उताहो हो अहो अथो मा नो न न मन्ये न हि असिव
हिनन इति इवचन चवउमत अम् आम् शम् सिकम् सम् हिकम् शुकम् सकम्
सनकम् नकम् हिनकम् सनम् ऋते यद्दा सामि स्थु इड सम वत पता इद्धा मृषा
नोभाजक चेत् नचेत् नहि जातु कथम् कुतः कुत्र अव आत हाहो हे हाइ हो आहो
स्वित् संवत् यादिष्ठा पश्च फट् सह अनषट् ताजक अंगात्क भाजत अयेअ अवेव
ट् वट् वाट् हुं कम् यम् खुम् ग्रुम् वैकित् मार्याश्रुम् कीम् पीम् सीम् वैकथ्यवित्
उपसर्गविभक्तिः स्वरप्रतिरूपकाश्च निपाताः उपसर्गप्रतिरूपकाः अवदत्तं विदत्तं वप्र
दत्तं वादिकर्मणि निदत्तम् अनुदत्तं वसुदत्तं मिति वेष्यते अव उपसर्गात्तदिति उत्तं न भवति
इनीति इत्येयः उपसर्गादितिग्रात् तं न भवति असत्त्वे इति किं पश्चैव प्रकर्षः पक्षः प्रोद्गाथाः ति

पातप्रदेशाश्च गतिनिपातमित्येवमादयः प्रादयः प्रादयो ऽसत्त्वे निपातसंज्ञा भवन्ति प्र
परा अप सम् अनु अव निस् दुस् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप इ
त्ययोगे करणाद्युत्तरत्र संज्ञाविशेषणार्थं उपसर्गाः क्रियायोगे इति चादीनामुपसर्गसं
ज्ञा माभूत् अस्मिन्नित्येवपरा सेना उपसर्गाः क्रियायोगे प्रादयः क्रियायोगे उपसर्ग
संज्ञा भवन्ति प्रणयति परिणयति प्रणायकः परिणायकः क्रियायोगे इति किं प्रगता
नायका अस्मात् देशात् प्रनायको देशः मरुच्छब्दस्योपसंख्याने मरुद्भिर्दत्तः मरुत्तः
संज्ञावचनसामर्थ्यादनजन्तेभ्यश्च उपसर्गात् त इति तत्त्वं भवति प्रवृक्तस्योपसंख्याने
श्रान्तश्चोपसर्गे इत्यत्र भवति स्वह्वा उपसर्गप्रदेशा उपसर्गाद्योः किरित्येवमादयः ग
तिश्च गतिसंज्ञकाश्च प्रादयो भवन्ति क्रियायोगे प्रकृत्य प्रहृत्य प्रकृतं प्रहृतम्
यत् प्रकरोति यो वा विभाग उत्तरार्थः उत्तरत्र गति संज्ञैव यथा स्यात् उपसर्गसंज्ञा माभूत्
कुगीत्यादिष्वत्रोपसर्गो प्रादुर्भावमस्तिर्यथापर इति षत्वं प्रसज्यते चकारः संज्ञासमावेशा
र्थः प्रणीतं अभिषिक्तं गतिरनन्तर इति स्वर उपसर्गादिति णत्वषत्वे भवतः का

विकाशब्दस्योपसंख्यानेकारिकाकृत्यकारिकाकृतम् यत्कारिकांकरोतिपुनश्चनसोक्क
न्दसिगतिसंज्ञोभवतइतिवक्तव्यं पुनःकृत्यपुनःकृतंवामोदयं गतिर्गतावितिनिघातोभव
तिवतोक्तिनेगतिसन्मारइति स्वरःगतिप्रदेशाः ऊर्गतिप्रादयश्चस्वमादयः ऊर्या
दिच्विडाचश्च ऊर्यादयःशब्दाःच्व्यन्ताःडाजन्ताश्चक्रियायोगेगतिसंज्ञाभवन्तिच्विडा
चःकृभ्वस्तिप्रयोगेविधानेनतस्मात्कृभ्वस्त्यादीनामप्तितैरेवप्रयोगेगतिसंज्ञाविधीय
तेविस्तारयुक्तेऊरीउररीचशब्दावंगीकरणेविस्तारेच ऊरीकृत्यऊरीकृतम् यदूरीक
रोतिउररीकृत्यउररीकृतम् यदुररीकरोति उकरीकृत्यउकरीकृतं यदुरुरीकरोति
च्वेःखल्वपिशुक्लीकृत्यशुक्लीकृतं शुक्लीकरोतिडाचि पटपटाकृत्यपटपटाकृतं
यत्पटपटाकरोति पापीतालीश्चताली प्रशीकाकाकालासेशाकलाथंशाकलाभ्रशाक
लाकृत्यगलगलथापीडार्थेगलगलथाकृत्यमज्जःमहार्थेमज्जकृत्यमज्जकृतं फल
फलीविक्लीआल्कीइतिविकारेफलीकृत्यविक्लीकृत्यआल्कीकृत्यआलाथीकेवा
पीकेवालीशवालीवर्षालीमर्षालीमस्मसापमसमसापतेहिंसायांश्रौषट् वौषट्

वषट् स्वाहा स्वधा प्राडे श्रत् आविस् नमस् अनुकरणं चानितिपरम् इतिपरो यस्मादि
तिबहुव्रीहिः अनुकरणं चानितिपरं क्रियायोगे गतिसंज्ञं भवति खाट्कृत्य खाट्कृतं या
त्खाट्करोति अनितिपरमिति किं खाडिति कृत्वा निरष्ठीवत् आदरानादरयोः सदसती
प्रीतिसंभ्रम आदरः परिभवौदासीन्यमनादरः आदरानादरयोर्यथाक्रमं सदसच्छब्दौ क्रिया
योगे गतिसंज्ञौ भवतः सत्कृत्य सत्कृतं असत्कृत्य असत्कृतं यत् सत्करोति आदरानाद
रयोरिति किं सत्कृत्वा काण्डं गतः असत्कृत्वा काण्डं गतः भूषणेऽलम् अलमिति प्रतिषेधे
सामर्थ्यपर्याप्तौ भूषणे चेति विशेषणमुपादीयते भूषणे योऽलंशब्दो वर्त्तते स गतिसंज्ञः
अलंकृत्य अलंकृतं यदलंकरोति भूषणे इति किं अलं भुक्त्वा ओदनं गतः अन्तरपरि
ग्रहे अन्तःशब्दोऽपरिग्रहेऽर्थे गतिसंज्ञो भवति परिग्रहः स्वीकरणं तदभावे गतिसं
ज्ञा विधीयते अन्तर्हत्य अन्तर्हतं यदन्तर्हन्ति अपरिग्रह इति किं अन्तर्हत्वा मूषिकां श्ये
नो गतः परिगृह्य गत इत्यर्थः अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञा वक्तव्या अन्त
र्धा अन्तर्धिः अन्तर्धापयति कणेमनसी श्रद्धाप्रतीघाते कणेशब्दो मनःशब्दश्च श्रद्धाप्र

तीयान्तेपरेतिसंज्ञोभवतः कण्ठेहत्यपयः पिबतिमनोहत्यपयः पिबतितावत्पिबतियाव
दस्याभिलाषोनिवृत्तः श्रद्धाप्रतिहतेत्यर्थः श्रद्धाप्रतीयान्तेपरेतिकिं कण्ठेहत्वागतः म
नोहत्वागतः पुरोव्ययम् अस्तिप्रत्ययान्तःपुरशब्दोव्ययंसंज्ञकगतिसंज्ञोभवतिसमास
स्वरापवादः प्रयोजनम् पुरस्कृत्यपुरस्कृतं यत्पुरस्करोतिअव्ययमितिकिं पूःपुरौ
पुरःकृत्वागतः अस्तंच अस्तंशब्दोमकारान्तोव्ययमनुपलब्धौवर्त्ततेसगतिसंज्ञोभव
तिअस्तंगत्यसवितापुनरुदेति अस्तंगतानिधनानियदस्तंगच्छति अव्ययमित्येवअस्तं
कांडंक्षिप्तमित्यर्थः अच्छगत्यर्थवदेषु अच्छशब्दोव्ययमभिशब्दस्यार्थेवर्त्ततेसगत्यर्थे
षुधातुवदतोवगतिसंज्ञोभवति अच्छगत्यअच्छगतं यदच्छगच्छतिवदतोअच्छोद्य
अच्छोदितं यदच्छवदति अव्ययमित्येव उदकमच्छंगच्छति अदोनुपदेशे अदःशब्दः
त्यदादिषुपठ्यतेसोनुपदेशेगतिसंज्ञोभवति उपदेशःपरार्थः स्वयमेवयदाबुद्ध्यापरामृ
शतितदानानुपदेशइतिसोस्यविषयः अदःकृत्यअदःकृतं यददःकरोतिअनुपदेशइ
तिकिं अदःकृत्वाकांडंगतइतिपरस्यकथयति तिरोन्तर्द्धौ अन्तर्द्धेर्वर्त्तमाने तदितिरःश

ह्नो गतिसंज्ञो भवति तिरोभूय तिरोभूतम् यत्तिरो भवति अन्तर्धाविति किं तिरो भूत्वा स्थितः
विभाषा कृञि अन्तर्धाविति वर्त्तते प्राप्तविभाषेयं तिरसः कः करोतौ विभाषा गतिसंज्ञो
तिरस्कृत्य तिरःकृत्य तिरःकृत्वा तिरस्करोति अन्तर्धाविति किं तिरः कृत्वा काण्डं तिष्ठति
उपाजे ऽन्वाजे विभाषा कृञीति वर्त्तते उपाजे अन्वाजे शब्दौ प्रतिरूपकौ निपातौ दुर्ब
लस्य सामर्थ्याधाने वर्त्तेते तौ कृञि विभाषा गतिसंज्ञौ भवतः उपाजेकृत्य उपाजे कृत्वा अ
न्वाजेकृत्य अन्वाजे कृत्वा साक्षात्प्रभृतीनि च विभाषा कृञीति वर्त्तते साक्षात्प्रभृती।
नि शब्दरूपाणि कृञि विभाषा गतिसंज्ञानि भवन्ति साक्षात्प्रभृतिषु च्व्यर्थवचनम्
साक्षात्कृत्य साक्षात्कृत्वा मिथ्याकृत्य मिथ्याकृत्वा साक्षात् मिथ्या चिन्ता भद्रा लो।
चना अस्था अमा श्रद्धा प्रजाया प्राजरुहा बीजरुहा संसर्या अर्थे लवणम्
उष्णम् शीतम् उदकम् आर्द्रम् गतिसंज्ञासन्नियोगेन लवणादीनाम् मकारान्तत्वं निपा
त्यते अग्नौ विशो विकसने प्रतपने विकल्पने विहसने प्रहसने प्रादुस् नमस् आविस्
अनत्याधान उरसि मनसी विभाषा कृञीति वर्त्तते अनत्याधानम् उपश्लेषणम् तद्भाव

अनत्याधाने उरसिमनसी शब्दौ विभाषा कृञि गतिसंज्ञौ भवतः उरसिकृत्य उरसि कृत्वा।
मनसिकृत्य मनसि कृत्वा अनत्याधाने इति किं उरसि कृत्वा पाणिं शेते मध्ये पदे निव-
चने च विभाषा कृञीति वर्त्तते चकारादनत्याधाने इति च। मध्ये पदे निवचने इत्येते श-
ब्दा अनत्याधाने विभाषा कृञि गतिसंज्ञा भवन्ति मध्येकृत्य मध्ये कृत्वा पदेकृत्य पदे कृ-
त्वा निवचने वचनाभावः निवचनेकृत्य निवचने कृत्वा वाचं नियम्येत्यर्थः अनत्याधाने
इत्येव हस्तिनः पदे शिरः कृत्वा शेते नित्यं हस्ते पाणावुपयमने कृञीति वर्त्तते हस्ते
पाणौ इत्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ भवतः उपयमने उपयमनं च दारकर्म पा-
णिग्रहणमित्यर्थः हस्तेकृत्य पाणौकृत्य दारकर्म कृत्वा इत्यर्थः उपयमने इति किं
हस्ते कृत्वा कार्षापणं गतः प्राध्वं बन्धने कृञीति वर्त्तते प्राध्वमिति मकारान्तमव्यय-
मानुकूल्ये वर्त्तते तदानुकूल्यं बन्धनहेतुकं यदा भवति तदा प्राध्वं शब्दः कृञि नित्यं गति
संज्ञो भवति प्राध्वंकृत्य प्राध्वंकृतं यत्प्राध्वं करोति बन्धने इति किं प्राध्वं कृत्वा चटं यातः
जीविकोपनिषदावौपम्ये कृञीति वर्त्तते जीविका उपनिषत् इत्येतौ शब्दावौपम्ये

विषये कृञि नित्यं गतिसंज्ञो भवतः जीविकाकृत्य उपनिषत्कृत्य औपम्ये इति किम् जीवि
काङ्कृत्वा गतः ते प्राग्धातोः ते गत्युपसर्गसंज्ञका धातोः पूर्वे प्रयोक्तव्याः तथा चैवोदा
हृतम् तेग्रहणमुपसर्गार्थं गतयोप्यनन्तराः छन्दसि परेऽपि प्राक्प्रयोगे प्राप्ते छन्द
सि परेऽप्यनुज्ञायन्ते छन्दसि विषये गत्युपसर्गसंज्ञकाः परेऽपि पूर्वेऽपि प्रयोक्तव्याः न च प
रेषां प्रयुज्यमानानां संज्ञाकार्यं किंचिदस्ति केवलं तत्परप्रयोगोपि क्रियायोगोऽप्य
स्तीति ज्ञाप्यते याति निहस्तिना हन्ति निमुष्टिना नियाति हस्तिना निहन्ति मुष्टिना ।
व्यवहिताश्च व्यवहिताश्च गत्युपसर्गसंज्ञकाश्छन्दसि दृश्यन्ते आ मन्द्रैरिन्द्र हरिभिर्या
हि मयूररोमभिः आयाहि कर्मप्रवचनीयाः कर्मप्रवचनीया इत्यधिकारो वेदितव्याः
यानित ऊर्ध्वमनुक्रमिष्यामः कर्मप्रवचनीयसंज्ञास्ते वेदितव्याः अधिरीश्वरे इति या
वत् वक्ष्यति अनुर्लक्षणे शाकल्यस्य संहितामनु प्रावर्षत् कर्मप्रवचनीयप्रदेशाः क
र्मप्रवचनीयप्रदेशाः कर्मप्रवचनीययुक्ते द्वितीयेत्येवमादयः अनुर्लक्षणे अनुशब्दो
लक्षणे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति शाकल्यस्य संहितामनु प्रावर्षत् अनुनय

त्तमन्वासिंचत प्रजाः अगस्त्यम अन्वसंचन्प्रजाः किमर्थमिदमुच्यते यावता ल
क्षणेत्थंभूताख्यानेति सिद्धैवानोः कर्मप्रवचनीयसंज्ञा यहेत्तवेत्तु हेत्ववचनम
हेत्तवेन्न तृतीयावाधिताहितोपैवयथास्यात तृतीयार्थे अनुशब्दस्तृतीयार्थे
भोत्येकर्मप्रवचनीयसंज्ञो भवति नदीमन्ववसितासेना पर्वतमन्ववसितासे
ना पर्वतमन्ववसितासेनापर्वतेनसह संवद्धेत्यर्थः हीने हीनइति न्यूनउच्यते
सचोत्कृष्टापेक्षः तेनेयंहीनोत्कृष्टसंबंधे संज्ञाविधीयते हीनार्थोन्पायामनुः कर्म
प्रवचनीयसंज्ञो भवति अनुशाकटायनं वैयाकरणाः उपोधिके च उपशब्दोधि
के हीनेचयोन्यायोकर्मप्रवचनीयसंज्ञो भवति उपखार्यां द्रोणः उपनिष्के कार्षा
पणं हीने उपशाकटायनं वैयाकरणाः अपपरीवर्जने अपपरीशब्दौ वर्जनेयो
त्येकर्मप्रवचनीयसंज्ञो भवतः सकृतेन संवेधिनाकस्यचित संवेधोवर्जनम अप
त्रिगर्त्तेभ्योवृष्टोदेवः परित्रिगर्त्तेभ्योवृष्टोदेवः वर्जनइति किम ओदनंपरिषिंचति
देवदत्तः आङ्मर्यादावचने आङ्इत्येषशब्दोमर्यादावचनेकर्मप्रवचनीयसं

ज्ञोभवति अवधिर्मर्यादा वचनग्रहणादभिविधिरपिवर्त्तते आपाटलिपुत्राद्वृष्टोदेवः
आसांकाश्याद्वृष्टोदेवः अभिविधौ आकुमारंयशः पाणिनेः आकुमारेभ्यः मर्यादावच
नेइतिकिं ईषदर्थेक्रियायोगयोर्माभूत् लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्य
नवः लक्षणेइत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः लक्षणेत्थंभूताख्यानेभागे
वीप्सायांचविषयभूतायां प्रतिपर्यनइत्येतेकर्मप्रवचनीयसंज्ञाभवन्ति लक्षणेतावत्
वृक्षंप्रतिविद्योततेविद्युत् वृक्षंपरिवृक्षमनु इत्थंभूताख्याने साधुर्देवदत्तःमातरंप्र
तिपितरंप्रतिमातरमनु भागेयदत्रमांप्रतिस्यात् मांपरिस्यात् मामनुस्यात् वीप्सा
यांवृक्षंप्रतिसिंचति परिसिंचति अनुसिंचति लक्षणादिष्विति किं उदकंपरिषिंच
ति अत्रपरिशब्दयोगेपंचमी कस्मान्नभवति पंचम्यपाङ्परिभिरितिवर्ज्जनविषयेसा
विधीयते अपशब्दसाहचर्यात् अभिरभागे लक्षणादिष्वभागवर्जितेषु अभिः
कर्मप्रवचनीयसंज्ञोभवति वृक्षमभिविद्योततेविद्युत् साधुर्देवदत्तःमातरमभि
वृक्षंवृक्षमभिसिंचति अभागइतिकिम् भागःस्वीक्रियमाणस्याः यदत्रमामभि

स्यान्नदीयताम् यत्समभवत्तन्नदीयतामित्यर्थः प्रतिः प्रतिनिधिप्रतिदानयोः स्वयं
सदृशः प्रतिनिधिः दत्तस्य प्रतिनिर्यातनं प्रतिदानं प्रतिनिधिविषये प्रतिदानविषये
च प्रतिः कर्मप्रवचनीयसंज्ञो भवति अभिमन्युरर्ज्जुनतः प्रति माषानस्मै तिलेभ्यः प्रति
यच्छति अधिपरी अनर्थकौ अधिपरिशब्दावनर्थकौ अनर्थान्तरवाचिनौ कर्मप्र
वचनीयसंज्ञौ भवतः कुतोऽध्यागच्छति कुतः पर्यागच्छति अनुपसर्गसंज्ञाबाधना
र्थं कर्मप्रवचनीयसंज्ञा विधीयते सुः पूजायाम् सुशब्दः पूजार्थे कर्मप्रवचनीयसं
ज्ञो भवति सुसिक्तं भवता सुस्तुतं भवतेत्यर्थः सुः यत उपसर्गसंज्ञाभावेन षत्वं न भवति
पूजायामिति किम् सुषिक्तं किं तवात्र अतिरतिक्रमणे च अतिशब्दोऽतिक्रमणेऽर्थे च
कारात्पूजायां च कर्मप्रवचनीयसंज्ञो भवति निष्पन्नेऽपि फले क्रियाप्रवृत्तिरतिक्रमणं
अतिसिक्तमेव भवता अतिस्तुतमेव भवता पूजायां अतिसिक्तं भवता अतिस्तुतं भवता
शोभनं कृतमित्यर्थः अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु पदार्थसंभा
वनान्ववसर्गगर्हासमुच्चये वर्तमानोऽपिशब्दः कर्मप्रवचनीयसंज्ञो भवति पदान्त

का॰
वृ॰ प्र॰
६१

स्याप्रयुज्यमानस्यार्थः पदार्थः सर्पिषो ऽपि स्यात् मधुनो ऽपि स्यात् मात्राबिन्दुस्तोकमल्पमि
त्यस्यार्थे ऽपिशब्दो वर्त्तते संभावनमपि कार्थं वचनेन शक्तेन न शक्तेव प्रतिपाता विक्षरणे
अपि सिञ्चेन्मूलसहस्रं अपि स्तुयाद्राजानं पुत्रत्वं समर्गः कामचारानुज्ञानम् अपि सिञ्च
अपि स्तुहि गर्हायां इति त्वापि जाल्मं देवदत्तम् अपि सिञ्चेत्पलाण्डुम् अपि स्तुयाद्वृषलं
समुच्चये अपि सिञ्च अपि स्तुहि सिञ्च च स्तुहि च उपसर्गसंज्ञाबाधनार्थं वचनं भवति अ
धिरीश्वरे ईश्वरः स्वामी स च स्वमपेक्षते तत्र ये स्वामिसंबन्धे अधिशब्दः कर्मप्रवचनीय
संज्ञो भवति तत्र कदाचित् स्वामिनः कर्मप्रवचनीयाद्विभक्तिः सप्तमी भवति कदाचित्स्वा
त् अधि ब्रह्मदत्ते पञ्चालाः अधि पञ्चालेषु ब्रह्मदत्तः विभाषा कृञि अधिः करोतौ क
र्मप्रवचनीयसंज्ञो भवति यदत्र मामधि करिष्यति वा कर्मप्रवचनीयसंज्ञापक्षे गतिसंज्ञा
बाधनार्थं विनियोक्तिमिति निघातो न भवति लः परस्मैपदं ल इति षष्ठी आदेशा
पेक्षा लादेशाः परस्मैपदसंज्ञो भवति तिप् तस् झि सिप् थस् थ मिप् वस् मस् शान्तस्य पर
स्मैपदप्रदेशाः सिचि वृद्धिः परस्मैपदेष्विन्वमादयः तङानावात्मनेपदम् तङ् इति

६१

प्रत्याहारोनवानांवचनानामानइतिप्रत्यनेकानवोष्टानाम् पूर्वेणापरस्मैपदसंज्ञा
विधीयतेतङ्आताम् झ्याम् थास्आथाम् ध्वम् इड्वहिङ्महिङ् आनःखल्वपि
शानश्कानचालरतीवकनीहूतिआनःआत्मनेपदप्रदेशाश्चनदानिडितआ
त्मनेपदमित्येवमादयः तिङ्स्त्रीणित्रीणिप्रथममध्यमोत्तमाः तिङोष्टादशप्र
त्ययानवपरस्मैपदसंज्ञकाःनवात्मनेपदसंज्ञकाःतत्रपरस्मैपदसंज्ञकेषुत्रयस्त्रि
कायथाक्रमंप्रथममध्यमोत्तमसंज्ञाभवन्तिआत्मनेपदेष्वपित्रयस्त्रिकाःप्रथम
मध्यमोत्तमसंज्ञकाभवन्तीतिप्रक्रिरतिप्रथमःसिप्थस्थेतिमध्यमःमिब्वस्म
म इत्युत्तमःआत्मनेपदेषुतआताम् झइतिप्रथमःथासाथाम् ध्वइतिमध्यमः
इड्वहिंमहिङ् इत्युत्तमःप्रथममध्यमोत्तमप्रदेशाःशेषप्रथमस्त्वेवमादयः
तान्येकवचनद्विवचनबहुवचनान्येकशः तानितिङस्त्रीणित्रीणिपदानीति
एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति एकशःएकैकंपदंतिविमेक
वचने तामिति द्विवचने झिइतिबहुवचनम् एवंसर्वत्रएकवचनद्विवचनब

का० वृ० ९२

हुवचनसंज्ञाविहितासंप्रतिसप्तपंचिकेशुविधीयतेमपश्चत्रीणित्रीणिपदानिएकव
चनद्विवचनबहुवचनसंज्ञानिभवन्तिएकशः सुरेकवचनेऽद्वितिद्विवचने
जसइतिबहुवचने एवंसर्वत्र विभक्तिश्च विभक्तिसंज्ञकाभवन्तिस्यादित्यादिश्च
विभक्तिप्रदेशाः अष्टनस्याविभक्तावित्येवमादयः युष्मद्युपपदेसमानाधिकर
णेस्थानिन्यपिमध्यमः लस्यनाधिकृतस्यसामान्येनतिवादयोविहितास्तेषा
मयंपुरुषनियमः क्रियते युष्मद्युपपदेसतितयवहितेवाव्यवहितेचसमानाधिका
रणेसमानाभिधेयेनलकारकस्यातितिप्रयुज्यमानेऽप्रयुज्यमानेपिमध्यमः
पुरुषोभवति त्वंपचसित्वंवापचथः यूयंपचथ अप्रयुज्यमानेपि पचसिपचथः
पचथः समानाधिकरणइतिकिं त्वयापच्यतेऽोदनः प्रहासेमन्योपपदेमन्य
तेरुत्तमएकवच्च प्रहासः परिहासः क्रीडापरिहासगम्यमानेमन्योपपदेधा
तोः मध्यमः पुरुषोभवतिमन्यतेश्च उत्तमस्यैकवद्भवति एहिमन्येओदनंभोक्ष्य
सेनहिभोक्ष्यसेभुक्तःसोतिथिभिः एहिमन्येरथेनयास्यसिनहियास्यसियातस्ते

पितामध्यमोत्तमयोः प्राप्नयोरुत्तममध्यमौ विधीयेते प्रहासइतिकिं एहिमन्य
सेओदनंभोक्ष्येसाधुचमन्यसेसुष्ठुचमन्यसे अस्मद्युत्तमः उत्तमः पुरुषोति
यम्यते अस्मद्युपपदेसमानाधिकरणेप्रयुज्यमानेप्यप्रयुज्यमानेपिउत्तमः
पुरुषोभवति अहंपचामिआवांपचावः वयंपचामः अप्रयुज्यमानेपिपचामि
पचावःपचामः शेषेप्रथमः शेषइतिमध्यमोत्तमविषयादन्यउच्यते यत्रयु
ष्मदस्मदीसमानाधिकरणेनस्तस्तत्रशेषेप्रथमःपुरुषोभवति पचतिपचतः
पचन्ति परःसन्निकर्षःसंहिता परशब्दोतिशयेवर्त्ततेसन्निकर्षःप्रत्यास
त्तिःपरोयस्सन्निकर्षोवर्णानामर्द्धमात्राकालव्यवधानःससंहितासंज्ञो
भवति दध्यत्रमध्वत्रसंहिताप्रदेशाःसंहितायामित्येवमादयः विरामोवसानं
विरतिर्विरामःविरम्यतेनेनेतिविरामःसोवसानसंज्ञोभवति दधिमधुप्ल
क्षःवृक्षःअवसानप्रदेशाःखरवसानयोःविसर्जनीयइत्येवमादयः इत्युप
सर्व्योनवती स्फुद्दगणाविद्वतगृह्यसूत्रार्थाद्युतन्त्ररूपसिद्धिरियंकाशिका

नाम इतिश्रीकाशिकायांवृत्तौप्रथमस्याध्यायस्य चतुर्थः पादः ॥ समाप्तोयं
प्रथमोध्यायः ॥ ॐनमोगुरुचरणपरागपुंजेभ्यः ॥ ॐ समर्थः पदविधिः ॥
परिभाषेयम् यः कश्चिदिह शास्त्रे पदविधिस्स सर्वस्समर्थो वेदितव्यः विधीयत इ
ति विधिः पदानां विधिः पदविधिः समासादिस्स समर्थः शक्तोर्थविग्रहवाक्यार्थाभिधा
ने समर्थो वेदितव्यः अथवा समर्थपदाश्रयत्वात् समर्थः समर्थानां पदानां सं
बद्धार्थानां संसृष्टार्थानां विधिर्वेदितव्यः वक्ष्यति द्वितीयाश्रितातीतपतितगता
त्यस्तप्राप्तापन्नैः कष्टं श्रितः कष्टश्रितः समर्थग्रहणं किम् पश्य देवदत्त कष्टं श्रि
तो विष्णुमित्रो गुरुकुलं तृतीया तत्कृतार्थेन गुणवचनेन शंकुलया खण्डः शंकु
लाखण्डः समर्थग्रहणं किं किं त्वं करिष्यसि शंकुलया खण्डो देवदत्त उपलेन चतु
र्थी तदर्थार्थबलिहितसुखरक्षितैः यूपाय दारु देवदत्तस्य गृहे पंचमी भयेन वृ
केभ्यो भयं वृकभयं समर्थग्रहणं किं गच्छ त्वं मा वृकेभ्यो भयं देवदत्तस्य यज्ञदत्तात्
षष्ठी राज्ञः पुरुषो राजपुरुषः समर्थग्रहणं किं भार्या राज्ञः पुरुषो देवदत्तस्य सम

। चतुर्थी यूपायदारु यूपदारु समर्थग्रहणंकिं । इत्यत्रादर्शे पाठः गलितं ।

मीग्रदेवदत्तौं३ः अत्रदत्तौं३ः समर्थग्रहणं किं शाकलं अग्रदेवदत्तौं३ः पिबति पानीयमारे
परग्रहणं किम् वृत्तिविषये समर्थपरिभाषामाभ्रतन तिष्ठन्तदप्रयोगान्तत्वं शृणु केनचित्
श्वत कुमारी चक्र३ देवदत्ता नयुणादेशोनिश्च वा भवति सर्वामन्त्रितपरागवत्त्वे ॥
सुवन्तमामन्त्रितपरतः परस्यांगवद्भवति स्वरे स्वरलक्षणं कर्त्तव्यं तदा तस्मात् इति देवा
यं सुवन्तमामन्त्रितमनुप्रवेशयतेवद्भवति आमन्त्रितस्यादिरुदात्तो भवति सस्वक
स्यापि यथा स्यात् कुंडेनाटन् परशुना वृश्चन् मद्रणां राजन् कश्मीराणां राजन्
सुवितिकिं पीत्वे पीत्वा मात आमन्त्रितइतिकिं गोहेयार्त्तः परग्रहणं किं पूर्वस्य
मा भूत् देवदत्त कुंडेनाटन् अग्रेग्रहणं किं यथास्त्रिंदीभूतः स्वरं लभेत उभयो
रायुदात्तत्वं मा भूत् वक्करणं किम् स्वाश्रयमपि यथा स्यात् आ कुंडेनाटन् आ
मपकान्तरमामन्त्रितमान्तिकटं सेकान्तरता सिद्धा भवति स्वर इति किं कूपे सिंचन्
वर्मनमन् पद्मेणनेपरांगवन्न भवति सुवन्तस्य परांगवद्भावे समानाधिकरण
स्योपसंख्यानं अनन्तरत्नाज्ञोनायामव्यामोख्यन् तीक्ष्णेन परशुना वृश्चन्

अव्ययानां प्रतिषेधो वक्तव्यः उच्चैरधीयानः नीचैरधीयानः प्राक्कडारात्समासः अधि
कारोयं कडारसंशब्दनात् आगणानि तत ऊर्ध्वमनुक्रमिष्यामः समाससंज्ञास्ते वेदितव्याः वक्ष्य
ति यथासादृश्ये यथावृद्धं ब्राह्मणानामन्त्रयस्व प्राग्वचनं संज्ञासमावेशार्थं समास
प्रदेशास्तृतीयासमासे इत्येवमादयः सहसुपा सुविति वर्तते सहेति सुपेति चैतदधि
कृतं वेदितव्यं यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रैतदुपस्थितं वेदितव्यं वक्ष्यति हि तृती
या श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः सह सुपा सर्वमेतत्तत्पुरुषसंज्ञं समासो भवतीति क
ष्टश्रितः सहग्रहणं योगविभागार्थं अनेकमचलत् अनेकमाविशत् अव्ययीभाव
श्च अव्ययीभाव इत्यधिकारो वेदितव्यः यानित ऊर्ध्वमनुक्रमिष्यामो व्ययीभावसं
ज्ञास्ते वेदितव्याः वक्ष्यति यथासादृश्ये यथावृद्धं ब्राह्मणानामन्त्रयस्व अन्वर्थसंज्ञा
वेयं महती पूर्वपदार्थप्राधान्यमव्ययीभावस्य दर्शयति अव्ययीभावप्रदेशा अव्ययी
भावश्चेत्येवमादयः अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रति
शब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु ॥

स्वरूपेण निवर्त्तते विभक्त्यादिष्वर्थेषु यदव्ययं वर्त्तते तत्सुबन्तेन समर्थेन सह समा-
स्यते अव्ययीभावसंज्ञकश्च समासो भवति वचनग्रहणं प्रत्येकमभिसंबध्यते
विभक्त्यर्थे तावत् स्त्रीषु कथा वर्त्तते अधिस्त्रि अधिकुमारि समसमीपार्थे यथायम् विभ-
क्ति समीप समीपं कुम्भस्य उपकुम्भं समृद्धिः ऋद्धेराधिक्यं समृद्धिः मद्राणां सुमद्रं
वर्त्तते समृद्धार्थे व्यृद्धिर्वृद्धेरभावः दुर्गतिकम् दुर्यवनम् अर्थाभावः अभावो
मक्षिकाणां निर्मक्षिकम् वर्त्तते निर्मशकं वर्त्तते अत्ययः भूतत्वम् अतिक्रमः अती-
तानि शीतानि अतिशीतम् निशीतं निर्हिमं वर्त्तते असंप्रति उपभोगस्य वर्त्तमान-
कालप्रतिषेधः अतितैसृकं मासाच्छादनम् तस्योपभोगकालो न भवतीत्य-
र्थः शब्दप्रादुर्भावः प्रकाशता शब्दस्येति पाणिनि तत्पाणिनि पाणिनिशब्दो
लोके प्रकाशते इत्यर्थः पश्चादनुरथं पादातम् रथानां पश्चात् यथार्थे यथार्थे य-
दव्ययं तत्संबध्यते योग्यतावीप्सापदार्थानतिवृत्तिः सादृश्यं च यथार्थः अनुरूप
स्वरूपो वर्त्तते प्रत्यर्थं यथाशक्ति आनुपूर्व्यं क्रमः अनुज्येष्ठं विशन्तु भवन्तः ज्ये-

का॰
वृ॰
८५

ऽपेक्षावस्पेर्णायौगपद्यमेककालतासंवन्धे किं युगपच्चक्रं देहीत्यर्थः साद
श्योक्तस्यता किमर्थमिदमुच्यते नयथार्थ इत्येवसिद्धं गुणभूतेपि सादृश्ये यथा
यास्यात सादृश्यं किं समं किं विसदृशमित्र रत्नरूप आत्मभावः सम्बन्धे रत्नाः सब्रह्म
वा भवतानाम सतत्त्वं शालेकायनानाम साकल्यमधीयतामस्तत्साग्रभव
हति न किंचिदभ्यवहार्यं परित्यजतीत्यर्थः अपिकार्यश्चवचनेन प्रतिपाद्यते अन्तवच
नम अन्तरिति परिग्रहाये तासमासे रसमग्नो लभ्यधन्येभवतीत्यमाकल्पात्स
यथामते यथासादृश्ये यथायेतदव्ययमसादृश्ये वर्तमानमनुपात्स्रहामस
ते अव्ययीभावश्च समासोभवति यथावृद्धं ब्राह्मणानामन्त्रयस्व ये ये वृद्धा य
थावृद्धं यथाभिरूपम यथाध्यायकम असादृश्ये इति किम यथादेवद
त्तः तथायज्ञदत्तः यथार्थ्ये यदव्ययमिति सवचनेमसमासः सिद्धे वचनमिदंसा
दृश्यप्रतिषेधार्थम यावदवधारणे यावदित्येतदवधारणे वर्तमानमनुपात्समस
मस्यते अव्ययीभावश्च समासोभवति अवधारणमियत्तापरिच्छेदः यावद।

मन्त्रेब्राह्मणानामेत्रयमवयावन्त्यमेत्रीणिसंभवन्तिपंचषट्ठानावन्तमश्वामेत्रयस
अवधारणेइतिकिम् यावद्दत्तंतावद्भुक्तंनावधारयामिकियन्मयाभुक्तं सुप्
तिनामात्रार्थे मात्रास्तोकमल्पमितिपर्यायः मात्रार्थेवर्तमानेनसुप्तिनासहसु
बन्तंसमस्यतेअव्ययीभावश्चसमासोभवति अस्त्यत्रकिंचित्सूपप्रतिशाकप्रति
मात्रार्थइतिकिम् वृक्षंप्रतिविद्योततेसविद्युत्वर्तमानेपुनःसुब्ग्रहणमव्यय
निवृत्यर्थं अक्षशलाकासंख्याःपरिणा अक्षशब्दःशलाकाशब्दश्चसंख्याच
परिणासहसमस्यतेअव्ययीभावश्चसमासोभवतिकितवव्यवहारेचायमिष्यते
समासःपंचिकानामद्यूतम् पंचभिरक्षैःशलाकाभिर्वाभवतितत्रयदासर्वेउत्ता
नाःपतन्त्यवाङ्मुखावातदापातयिताजयतितस्यैवतत्रस्यविजयातः अन्यथापातेसति
जीयते अक्षेणेदंनतथावृत्तंयथापूर्वंजये अक्षपरिशलाकापरिसंख्यापएकपरि
द्विपरित्रिपरिचतुष्परिपंचसुत्वेवंरूपासुजयएवभवति अक्षादयस्तृती
यान्तपूर्वोक्तस्ययथानतत कितवव्यवहारेचएकत्वेअक्षशलाकयोः विभाषा

का॰
वृ॰
९९

विभाषेत्यधिकारो वेदितव्यः यदित ऊर्ध्वमनुक्रमिष्यामस्तद्विभाषा स्म भवतिवत्पति
अपपरिबहिरञ्चवः पंचम्या अपपरिबहिस् अञ्चु इत्येते सुबन्ताः पंचम्यन्तेन सह विभा
षा समस्यन्ते अव्ययीभावश्च समासो भवति अपत्रिगर्त्तं वृष्टो देवः अपत्रिगर्त्तेभ्यो वृष्टो दे
वः अपत्रिगर्त्तं अपत्रिगर्त्तेभ्यः परित्रिगर्त्तं परित्रिगर्त्तेभ्यः बहिर्ग्रामं बहिर्ग्रामा
त् प्राग्ग्रामं प्राग्ग्रामात् बहिःशब्दयोगेन पंचमीभावस्येतदेव ज्ञापकं आङ्मर्या
दाभिविध्योः आङित्येतन्मर्यादायामभिविधौ वर्त्तमानं पंचम्यन्तेन सह विभाषा
समस्यते अव्ययीभावश्च समासो भवति आपाटलिपुत्रं वृष्टो देवः आपाटलिपुत्रा
द्वृष्टो देवः अभिविधौ आकुमारं यशः पाणिनेः आकुमारेभ्यः लक्षणेनाभिप्रती।
आभिमुख्ये लक्षणं चिह्नं तद्वाचिना सुबन्तेन सहाभिप्रतिशब्दावाभिमुख्ये वर्त्तमानौ
समस्येते अव्ययीभावश्च समासो भवति अभ्यग्नि शलभाः पतन्ति प्रत्यग्नि लक्षणेने
ति किम् स्रुघ्नं प्रतिगतः अभिप्रतीइति किम् येनाग्निस्तेन गतः आभिमुख्य इति किं
अभ्यङ्का गावः प्रत्यङ्का गावः अनुर्यत्समया समया सामीप्यमनुर्यत्समया वाची

तेनसहसमस्यतेअव्ययीभावश्चसमासोभवति अनुवनमशनिर्गतावनेसमयायत्सम
यइतिकिं वृक्षमनुविद्योतते अव्ययंविभक्तिसमीपइत्येवमिद्धे पुनर्वचनंविभाषार्थं
यस्यचायामः लक्षणेनेतिवर्त्तते आयामोदैर्घ्यं अनुर्यस्यायामवाचीतेनेसवन्येन
लक्ष्योभूतेनसहसमस्यतेअव्ययीभावश्चसमासोभवति अनुगंगंवाराणसीअनुय
मनेमथुरायमुनायामेवमथुरायामोलक्ष्यते आयामइतिकिम् वृक्षमनुविद्योततेः
तिष्ठद्गुप्रभृतीनिच समस्यापवनिपात्यन्तेतिष्ठद्गुप्रभृतीनिशब्दरूपाण्यव्ययीभाव
संज्ञानिभवन्तितिष्ठद्गुकालविशेषेतिष्ठन्तिगावोयस्मिन्कालेदोहायतिष्ठद्गु वहद्गु
खलेयवादीनिच प्रथमान्तानिविभक्त्यन्तरेणनैवसंबध्यन्ते अन्यपदार्थेचवर्त्तन्ते
चकारोवधारणार्थः अपरःसमासोनभवति परमेतिष्ठद्गुरिति तिष्ठद्गु आयतीगवम्
खलेयवं खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृत
यवम् संह्रियमाणयवम् संहृतबुसम् संह्रियमाणबुसम् एतेकालशब्दाःसमभू
समंभूमिसमंपदातिसुषमम् विषमम् निष्षमम् दुष्षमम् अपरसमम् आयतीसम

सम ब्राह्मणम् अनुयम् अनुगाम् प्रदक्षिणम् अप्रदक्षिणम् संप्रतिग्रामे प्राप्यसम
म् पुण्यसमम् इव इवकर्मभवति द्वारेदंडादंडि मुसलामुसलि पारेमध्येषष्ठ्यावा
षष्ठीसमासप्राप्ते तदपवादोऽयमव्ययीभावआरभ्यते यावचनात् षष्ठीसमासोऽपि प
पद्यते अभ्यन्तता यत्ते पारेमध्येषष्ठ्या ह्री षष्ठ्यन्तेन सह विभाषासमस्यते अव्ययीभावश्च
समासोभवति तत्सन्नियोगे चानयोरेकारान्तत्वं निपात्यते पारेगंगं गंगायाः पारंगाम
मध्येगंगं गंगायामध्यंगाम् षष्ठीसमासपक्षे गंगापारम् गंगामध्यं महाविभाषया
वाक्यविकल्पः क्रियते संख्यावंश्येन विद्यया जन्मना वा प्राणिनामेकलक्षणः
सन्तानोवंशइत्यभिधीयते तत्रभवोवंश्यः तद्वाचिना सह संख्यासमस्यते अव्ययीभा
वश्च समासोभवति द्वौमुनी व्याकरणस्यवंश्यौ द्विमुनि व्याकरणस्य त्रिमुनि व्याकर
णस्य यदातु विद्ययासह तद्वतामभेदविवक्षा तदा सामानाधिकरण्यं भवति द्विमु
नि व्याकरणं त्रिमुनि व्याकरणमिति नदीभिश्च नदीवचनैः शब्दैः सह संख्यासम
स्यते अव्ययीभावश्च समासोभवति समाहारे चायमिष्यते सप्तगंगं द्वियमुनम् पंच

नदं समासो दावरम् अन्यपदार्थे च संज्ञायाम् संख्येति निवृत्तं नदीग्रहणमनु
वर्त्तते नदीभिः सह सुबन्तमन्यपदार्थे संज्ञायां विषये समस्यते अव्ययीभावश्च
समासो भवति विभाषाधिकारेऽपि नित्यसमास एवायम् नहि वाक्येन संज्ञावग
म्यते उन्मत्तगंगा नाम देशः लोहितगंगम् कृष्णगंगम् अन्यपदार्थ इति किम्।
कृष्णवेण्णा संज्ञायामिति किम् शीघ्रगंगो देशः तत्पुरुषः तत्पुरुषसंज्ञाधिक्रि
यते प्राग्बहुव्रीहेः यदित ऊर्ध्वमनुक्रमिष्यामः तत्पुरुषसंज्ञः समासो वेदितव्यः ब
हुव्रीहि द्वितीया श्रिया श्रितातीतनिक कष्टश्रितः नरकश्रितः पूर्वाचार्यसंज्ञा चेयम्
महती तत्संज्ञाकरणमन्यापेक्षयापि तदीयस्य परिग्रहार्थं उत्तरपदार्थप्रधानस्तत्पुरुष
इति तत्पुरुषप्रदेशाः तत्पुरुषे कृति द्विगुस्तत्पुरुषे च समासान्ताः प्रयोजनम् पं
चराजी दशराजी अह्नः टच् अह्नः पंचगवम् दशगवम् द्वितीयाश्रितातीतपतितगतात्यस्तप्रा
प्तापन्नैः समर्थेति वर्त्तते तस्य विशेषणं द्वितीयाश्रितादयश्च द्वितीयान्तं श्रि
तादिभिः सह समस्यते तत्पुरुषश्च समासो भवति कष्टश्रितः कष्टश्रितः अतीत

कष्टमतीतः कान्तारातीतः पतितो नरकं पतितः नरकपतितः गतो ग्रामं गतः ग्रामग
तः ग्राममत्यस्तः तरङ्गमत्यस्तः तुहिनात्यस्तः प्राप्तः सुखं प्राप्तः सुखप्राप्तः दुःखप्राप्तः आपन्नः सुखाप
न्नः दुःखापन्नः श्रितादिषु गमिगाम्यादीनामुपसंख्यानं ग्रामं गामी ग्रामगामी ग्रामगमम् ओद
नं बुभुक्षुः स्वयंकृतेन स्वयमित्येतदव्ययमात्मनेपदस्यार्थे वर्तते तेन सह द्वितीयया
मेवं धौतपन्नः इति द्वितीयाग्रहणमनर्थमनुवर्तते स्वयमित्येतन्तृतीयान्तं क्तान्ते
न सह समस्यते तत्पुरुषश्च समासो भवति स्वयंधौतौ पादौ स्वयंविलीनमाज्यम
एकपद्यमेकस्वर्यमेकविभक्तित्वं च समासाद्भवति खट्वाक्षेपे खट्वाशब्दो द्वि
तीयान्तः क्तान्तेन सह क्षेपे समस्यते तत्पुरुषश्च समासो भवति क्षेपो निन्दा स च स
मासार्थ एव तेन विभाषाधिकारेपि नित्यसमास एवायं नहि वाक्येनार्थेन क्षेपो गम्य
ते खट्वारोहणं चेह विमार्गप्रस्थानस्योपलक्षणम् सर्व एवाविनीतः खट्वारूढ उ
च्यते खट्वारूढो जाल्मः खट्वाप्लुतः उत्पथप्रस्थित इत्येवमर्थः क्षेप इति किम् खट्वा
रूढः सामि सामीत्येतदव्ययमर्धशब्दपर्यायः तस्यासन्नवाचिना द्वितीयान्ता

ष्टिसंबंधः उत्सन्नं क्रान्तेन सह समस्यते तत्पुरुषश्च समासो भवति सामिकृतं सामि
पीतम् कियच्चैकस्वर्यमेकविभक्तित्वं च समासत्वाद्भवति कालाः द्वितीयाक्तेन
निवर्त्तते कालवाचिनः शब्दाद्द्वितीयान्ताः क्तान्तेन सह समस्यन्ते तत्पुरुषश्च स।
मासो भवति अत्यन्तसंयोगार्थं वचनम् षण्मुहूर्त्ताश्चराचराः ते कदाचिद्दहर्ग
च्छन्ति कदाचिद्रात्रिम् अहरतिसृताः मुहूर्त्ताः अहःसंक्रान्ताः रात्र्यारूढाः रात्रि
संक्रान्ताः मासप्रमितश्चंद्रमाः मासे प्रमातुमारब्धः मासप्रमितः प्रतिपच्चन्द्रमाः ॥
अत्यन्तसंयोगे च कालः इति वर्त्तते क्तेनेति वृत्ते अत्यन्तसंयोगः कृत्स्नसंयोगः का।
लस्य येन संबंधिना व्याप्तिः कालवाचिनः शब्दाद्द्वितीयान्ता अत्यन्तसंयोगे गम्य
माने सुपा सह समस्यन्ते तत्पुरुषश्च समासो भवति मुहूर्त्तसुखम् सर्वरात्रकल्या
णी सर्वरात्रशोभना तृतीया तत्कृतार्थेन गुणवचनेन सुपेति वर्त्तते तस्य वि
शेषणमेतत् तृतीयान्तं सुबन्तं गुणवचनेन तत्कृतेन अर्थशब्देन च सह समस्य
ते तत्पुरुषश्च समासो भवति कीदृशेन गुणवचनेन तत्कृतेन तृतीयान्तकृतेन।

ति यावत् शंकुलया खण्डः शंकुलाखण्डः किरिणा काणः किरिकाणः अर्थशब्देन तथा
न्येनार्थः धान्यार्थः हिरण्यार्थः तत्कृतेनेति किम् अक्ष्णा काणः गुणवचनेनेति किम्
गोभिर्वपावान् ॥ पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥ पूर्वसदृश
सम ऊनार्थ कलह निपुण मिश्र श्लक्ष्ण इत्येतैः सह तृतीयान्तं समस्यते तत्पु
रुषश्च समासो भवति अस्मादेव वचनात् पूर्वादिभिर्योगे तृतीया भवति इहतो वा
पूर्वा मासेन पूर्वः मासपूर्वः संवत्सरपूर्वः द्व्यहपूर्वः त्र्यहपूर्वः सदृश मात्रा सदृशः
मातृसदृशः पित्रा सदृशः पितृसदृशः सम मात्रा समः मातृसमः पित्रा समः पितृ
समः ऊनार्थ माषोनम् कार्षापणोनम् माषविकलम् कार्षापणविकलम्
कलह असिकलहः वाक्कलहः निपुण वाग्निपुणः आचारनिपुणः मिश्र गु
डमिश्रः तिलमिश्रः श्लक्ष्ण वाक्श्लक्ष्णः आचारश्लक्ष्णः पूर्वादिष्ववरस्योपसंख्या
नम् मासेनावरः मासावरः संवत्सरावरः ॥ कर्तृकरणे कृता बहुलम् ॥ तृतीयेति
वर्त्तते कर्तरि करणे च या तृतीया तदन्तं कृदन्तेन सह समस्यते तत्पुरुषश्च समा

सोभवतिसर्वेषांपाणिन्यभिवाणार्थं बहुलग्रहणं कर्तरिकृद्भिर्नाहृतः रुद्रहृतः करणे
नखैर्भिन्नः नखभिन्नः परशुनाछिन्नः परशुछिन्नः कर्तृकरणयोरितिकिं भिक्षाभिरु
षितः बहुलग्रहणंकिम् दात्रेणलूनवान् परशुनाछिन्नवानिति समासोनभवति
पादहारकः गलमोचकइतिचभवति कृत्यैरधिकार्थवचने स्तुतिनिन्दाप्रयुक्तम
ध्यारोपितार्थवचनमधिकार्थवचनम् कर्तृकरणे कृत्यैः सह अधिकार्थवचनेसम
स्यतेतत्पुरुषश्चसमासोभवति कर्ता काकपेयाः नदी श्वलेह्यः कूपः वातच्छेद्यानि
तृणानिकंटकसंचयउद्धतः सर्ववदसेवार्थप्रपंचः अन्नेनव्यंजनं तृतीयेतिवर्त्ततेव्यं
जनवाचियत्तृतीयान्तंतदन्नवाचिनासुबन्तेनसहसमस्यतेतत्पुरुषश्चसमासोभ
वतिसंस्कार्यमन्नं संस्कार्यंव्यंजनं दध्नाउपसिक्तः ओदनः दध्योदनः क्षीरोदनः बुद्धौक्रि
यायाअन्नाभावात्व्यंजनयोःसामर्थ्यं भक्ष्येणमिश्रीकरणं मिश्रीकरणवा
चितृतीयान्तंभक्ष्यवाचिनासुबन्तेनसहसमस्यतेतत्पुरुषश्चसमासोभवतिखरवि
शदमभ्यवहार्यंभक्ष्यः तस्यसंस्कारकंमिश्रीकरणम् गुडेनमिश्राधानाः गुडधानाः

गुरुश्शुक्राः द्वैमौ क्रियायाग्रन्तर्भावात् द्वेपदोन रपदयोस्सामर्थ्यम् चतुर्थी तदर्थो
तदर्थार्थं बलिहितसुखरक्षितैः सप्तम्येति वर्त्तते तेन स्याविशेषणामेतत् तदिति सर्व
नाम्ना चतुर्थ्यन्तस्यार्थः परामृश्यते तस्मै इदं तदर्थं तदर्थार्थं बलिहित सुख र
क्षित इत्येतैस्सह चतुर्थ्यन्तं समस्यते तत्पुरुषश्च समासो भवति तदर्थेन प्रकृतिविका
रभावे समासइष्यते यूपाय दारु यूपदारु कुण्डलाय हिरण्यं कुण्डलहिरण्यं इह न
भवति रन्धनाय स्थाली अवहननायोलूखलमिति तादर्थ्ये वास्मादेव ज्ञापकच
तुर्थी भवति तदर्थं अर्थं अर्थेन नित्यसमासवचनम् सर्वलिङ्गता च ब्राह्मणार्थं प
यः ब्राह्मणार्थः सूपः ब्राह्मणार्था यवागूः बलि कुबेरबलिः महाराजबलिः हिते
गोहितं अश्वहितं सुखे गोसुखं अश्वसुखं रक्षित गोरक्षितम् अश्वरक्षितम् पञ्चमी
भयेन सप्तम्येति वर्त्तते तेन स्याविशेषणामेतत् पञ्चम्यन्तं भयशब्देन सह वा न तेन सह सम
स्यते तत्पुरुषश्च समासो भवति वृकेभ्यो भयम् वृकभयम् दस्युभयम् भयभीति
भीतभीतिभिरिति वक्तव्यम् वृकभीतः वृकभीतिः वृकभी सर्वस्य बहुलग्रहणात्से

वायमुदाहरणप्रपंचः तथाच ग्रामनिर्गतः अधर्मजुगुप्सुरित्यादि सिद्धं भवति अपे
तापोढमुक्तपतितापत्रस्तैरल्पशः अपेत अपोढ मुक्त पतित अपत्रस्त इत्येतैः स
ह पंचम्यन्तमल्पशः सह समस्यते तत्पुरुषश्च समासो भवति सुखादपेतः सुखापे
तः कल्पनापोढः चक्रमुक्तः स्वर्गात्पतितः स्वर्गपतितः तरंगापत्रस्तः अल्पश इति समा
सस्याल्पविषयतामाचष्टे अल्पा पंचमी समस्यते तेन प्रासादात्पतितः भोजनादपत्र
स्त इत्यादौ न भवति कर्तृकरणे कृता बहुलम् इत्यस्यैवायं प्रपंचः स्तोकान्तिकदूरा
र्थकृच्छ्राणि तेन स्तोक अन्तिक दूर इत्येवमर्थाः शब्दाः कृच्छ्रशब्दश्च पंचम्यन्ताः क्ता
न्तेन सह समस्यते तत्पुरुषश्च समासो भवति स्तोकान्मुक्तः अल्पान्मुक्तः अन्तिकादा
गतः अभ्याशादागतः कृच्छ्रान्मुक्तः कृच्छ्राल्लब्धः पंचम्याः स्तोकादिभ्य इत्यलुक
सप्तमी शौण्डैः सप्तम्यन्तं शौण्डादिभिः सह समस्यते तत्पुरुषश्च समासो भवति अक्षेषु शौ
ण्डः अक्षशौण्डः अक्षधूर्तः शौण्ड धूर्त कितव व्याड संव्याड प्रवीण अन्तर अधिप
टु पंडित कुशल चपल निपुण प्रवृत्तौ प्रसक्ति क्रियाया अन्तर्भावाद्वाधिक्षेपिकाणां

सप्तम्यपेतिवर्त्तते नस्यविशेषणमेतत् ३०

सप्तमी सिद्धशुष्कपक्वबन्धैश्च ॥ सप्तमीति वर्त्तते सिद्धशुष्कपक्वबन्ध इत्येतैः सह सप्तम्य
न्तं समस्यते तत्पुरुषश्च समासो भवति कांबोजसिद्धः कांपीलसिद्धः आतपशुष्कः का
याशुष्कः स्थालीपक्वः कुंभीपक्वः चक्रबंधः चारकबंधः बहुलग्रहणात्सैवायमुदा
हरणप्रपंचः ॥ ध्वांक्षेण क्षेपे ॥ ध्वांक्षेणेत्यर्थग्रहणं ध्वांक्षवाचिना सुबन्तेन सह स
प्तम्यन्तं समस्यते सप्तम्यन्तः तत्पुरुषश्च समासो भवति क्षेपे गम्यमाने तीर्थध्वांक्ष इव
तीर्थध्वांक्षः अनवस्थित इत्यर्थः तीर्थकाकः तीर्थवायसः क्षेप इति किम् तीर्थध्वांक्षस्ति
ष्ठति ॥ कृत्यैरृणे ॥ कृत्यप्रत्ययान्तैः सह सप्तम्यन्तं समस्यते ऋणे गम्यमाने तत्पुरुषश्च स
मासो भवति यत्प्रत्ययेनैवेष्यते मासेदेयमृणम् मासदेयमृणं संवत्सरदेयम् ऋणग्र
हणं नियोगोपलक्षणार्थम् इहापि समासो भवति पूर्वाह्णगेयं साम प्रातरध्येयो
नुवाकः ऋण इति किम् मासे देया भिक्षा ॥ संज्ञायाम् ॥ संज्ञायां विषये सप्तम्यन्तं सुपा
सह समस्यते तत्पुरुषश्च समासो भवति संज्ञासमुदायोपाधिस्तेन नित्यः समास एवा
यं नहि वाक्येन संज्ञा गम्यते अरण्येतिलकाः अरण्येमाषकाः वनेकशेरुकाः वने

वलजकः कूपपिशाचकाः हलदन्ताः सप्तम्याः संज्ञायामित्यलुक् केनाहोरात्रावयवाः
अह्नरवयवा रात्र्यवयवाश्च सप्तम्यन्ताः क्तान्तेन सह समस्यन्ते तत्पुरुषश्च समासो भवति
पूर्वाह्णकृतम् अपराह्णकृतम् पूर्वरात्रकृतम् अपररात्रकृतम् अवयवग्रहणं किं
उलूखलोनाभरौः पिशाचोयदभात्तेषपनत्तृतेदिवान्तेरात्रौन्तेनतद्दृष्टमिति तत्र त
त्रेणेतत्सप्तम्यन्तं क्तान्तेन सह समस्यते तत्पुरुषश्च समासो भवति तत्रकृतं तत्रभुक्तम् त
त्रपीतम् येकेपग्रमेकस्वर्यमेकविभक्तिकत्वेवसमासत्वाद्भवति क्षेपे क्षेपोनिन्दा क्षेपेण
सप्तम्यन्तं समस्यन्ते क्तान्तेन सह समस्यते तत्पुरुषश्च समासो भवति अवतप्तेनकुलस्थि
तं त्वजातम् चापलमनवस्थितत्वं तत्त्वैतदित्यर्थः उदकेविशीर्णम् प्रवाहेमूत्रितम् भ
स्मनिहुतम् निष्फलं यत्क्रियते तदेवमुच्यते पात्रेसमितादयश्च समुदाय एव निपात्यन्ते
पात्रेसमितादयः शब्दाः तत्पुरुषसंज्ञा भवन्ति क्षेपे गम्यमाने येचात्र क्तान्तेन समासास्ते
षामुत्तरेणैव सिद्धे पुनः पाठे यत्कारोत्पादिपरिग्रहार्थः पूर्वपदाद्युदात्तत्वं यथा स्यात् पु
कारोत्पादिषु हि पात्रेसमितादयश्चेति निपातनात्पात्रेसमिताः पात्रेबहुलाः प्रव्ययारेण

नह्येषांगम्यतेपात्रेसमिताः तत्रपुनः क्वचिकार्यइति उडुंबरमशकादिक्षेपणमपात्रेपः
मातरिपुरुषइति प्रतिविद्धामेवतेनपिंडीशूरादिपुनिसीकृतयाग्रहणेकृतताज्ञाकृतिगा
णोयम पात्रेसमिताः पात्रेबहुलाः उडुंबरमशकः उडुंबरकृमिः कूपकच्छपः कूपचटक
कूपः कूपमंडूकः कुंभमंडूकः उदपानमंडूकः नगरकाकः नगरवायसः मातरिपुरुषः
पिंडीशूरः गेहेशूरः गेहेक्ष्वेडी गेहेनर्दी गेहेनदी गेहेविजिती गेहेव्याडः गेहेदृप्तः गर्भेतृ
प्तः आखनिकवकः गोष्ठेशूरः गोष्ठेवीरः गर्भेशूरः गोष्ठेविजिती गोष्ठेक्ष्वेडी गोष्ठेमेही गोष्ठे
दाही गोष्ठेपटुः गोष्ठेपंडितः गोष्ठेप्रगल्भः कर्णेटिटिभः कर्णेचुरचुरा चकारोऽवधा
रणार्थः समासान्तरं न भवति परमंपात्रेसमिताः इति सर्वकालेकसर्वजरत्पुराणन
वकेवलाः समानाधिकरणेन नसप्रत्ययेति निवर्त्तते तस्यविशेषणमेतत् सर्वकालः
एक सर्व जरत् पुराण नव केवल इत्येते सवन्ताः समानाधिकरणेन सपास्हसम
स्यन्ते तत्पुरुषश्चसमासोभवति भिन्नप्रवृत्तिनिमित्तस्यशब्दस्यैकस्मिन्नर्थे वृत्तिः सामा
नाधिकरण्यं सर्वकालइत्यर्थनिर्देशः परिभाषाणां स्वरूपग्रहणम् सर्वकालःश्र

रकालेन सह समस्यते स्नातानुलिप्तः कृष्टसमीकृते दृष्टप्रवृष्टे एकशाटीयकाभिन्ना
सर्वभिन्नाः सर्वदेवाः सर्वमनुष्याः जरद्धस्ती जरद्गतिः पुराणान्नम् पुराणावसथः नवान्न
नवावसथः केवलान्नम् केवलावसथः समानाधिकरणेनेति किम् एकस्य शाटी ॥ दि
क्संख्ये संज्ञायाम् समानाधिकरणेनेति आपादपरिसमाप्तेरनुवर्तते दिग्वाचिनः शब्दाः
इति संख्यावाः समानाधिकरणेन सुबन्तेन सह समस्यंते संज्ञायां विषये तत्पुरुषश्च समा
सो भवति पूर्वेषुकामशमी अपरेषुकामशमी संख्या पंचाम्राः सप्तर्षयः संज्ञायामिति
किं उत्तराः वृक्षाः पंच ब्राह्मणाः ॥ तद्धितार्थोत्तरपदसमाहारे च ॥ दिक्संख्ये इत्यनुवर्तते
तद्धितार्थे विषये उत्तरपदे परतः समाहारे चाभिधेये दिक्संख्ये समानाधिकरणेन सुपा
सह समस्यते तेन तत्पुरुषश्च समासो भवति दिक्तावत् तद्धितार्थे पूर्वस्यां शालायां भवः दिक्पू
र्वपदात्संज्ञायां ञः पौर्वशालः आपरशालः उत्तरपदे पूर्वशालाप्रियः अपरशालाप्रियः
समाहारे दिक्शब्दो न संभवति संख्या तद्धितार्थे पांचनापितिः पंचकपालः उत्तरपदे दश
गवधनः समाहारे पंचपूली पंचकुमारि ॥ संख्यापूर्वो द्विगुः ॥ तद्धितार्थोत्तरपदसमाहारे

वेत्यव्ययः संख्यापूर्वः समासः स द्विगुसंज्ञो भवति तद्धितार्थे तावत् पंचकपालः द्विगुना
तद्धितस्य लुग्भवति उत्तरपदे पंचनावप्रियः नावो द्विगुरिति समासान्तो भवति समाहा
रे पंचमूली द्विगोरितीति ङी भवति द्विगुप्रदेशाः द्विगोरित्येवमादयः कुत्सितानि कुत्सनैः
कुत्सितवाचीति सर्वनामानि कुत्सनवचनैः सह समवन्ते: समस्यन्ते तत्पुरुषश्च समासो
भवति शब्दप्रवृत्तिनिमित्तं कुत्सायामयं समासः इष्यते विशेषणविशेष्यमिति प्राप्ते वि
शेष्यस्य पूर्वनिपातार्थं आरंभः वैयाकरणः खसूचीति प्रतिभः याज्ञिककितवः प्रया
ज्ययाजकत्वाल्लुप्तापरः मीमांसकदुर्दुरूढः नास्तिकः कुत्सितानीति किम् वैयाकरण
श्चौरः तत्र च वैयाकरणो न कुत्स्यते कुत्सनैरिति किम् कुत्सितो ब्राह्मणः पापाणके
कुत्सितेः पापश्रमणकशब्दौ कुत्सनाभिधायिनौ तयोः पूर्वेण समासे परनिपातः प्राप्नः
ततः पूर्वनिपातार्थमिदमारभ्यते पापश्रमणकइत्येतौ सततौ कुत्सितवचनैः सह सम
स्येते तत्पुरुषश्च समासो भवति पापनापितः पापकुलालः श्रमणकनापितः श्रमणककु
लालः उपमानानि सामान्यवचनैः उपमीयतेऽनेनेत्युपमानम् उपमानवाचीनि स

वन्तानि सामान्यवचनैः सवचनैः सह समस्यन्ते तत्पुरुषश्च समासो भवति उपमानोप
मेययोः साधारणो धर्मः सामान्यम् नहि विशिष्टोपमेयवचनैरयं समासः शस्त्रीइवश्या
मा देवदत्ता कुमुदश्येनी हंसगद्गदा न्यग्रोधपरिमण्डला उपमानानीति किम् दे
वदत्ता श्यामा सामान्यवचनैरिति किं फलानाइवचैमेरुलापर्वताइव बलाहकाः ॥
उपमितं व्याघ्रादिभिः सामान्याप्रयोगे उपमेयमुपमितम् तद्वाचि सुबन्तम् व्या
घ्रादिभिः सामर्थ्यादुपमानैः सह समस्यते तत्पुरुषश्च समासो भवति न चेत्सामान्य
वाची शब्दः प्रयुज्यते विशेषणं विशेष्येणेति प्राप्ते विशेषणस्य पूर्वनिपातनार्थारंभः पुरु
षो व्याघ्र इव पुरुषव्याघ्रः पुरुषसिंह इव पुरुषसिंहः सामान्याप्रयोग इति किं पुरु
षोयं व्याघ्रः इव शूरः व्याघ्रसिंहर्षभचन्दनवृकवृषवराहहस्तिन ॥ कुंजररु
रुवृषभपुण्डरीकबलाधिकश्चाकृतिगणोयम् तेनेदमपि सिद्धं भवति मुखपद्मम्
मुखकमलम् करकिसलयम् पार्थिवचन्द्र इत्येवमादि विशेषणं विशेष्येण बहु
लम् भेदकं विशेषणम् भेद्यं विशेष्यम् विशेषणवाचि सुबन्तं विशेष्यवचनेन

का॰
वृ॰
३४

सुपा समानाधिकरणेन सह वक्तव्यं समस्यते तत्पुरुषश्च समासो भवति नीलोत्पलं
रक्तोत्पलम् वकुलवचनमव्यवस्यार्थम् क्वचिन्नित्यसमासः कृष्णसर्पः लोहिताहिः
क्वचिन्न भवत्येव रामो जामदग्न्यः अर्जुनः कार्त्तवीर्यः क्वचिद्विकल्पः नीलमुत्पलं
नीलोत्पलमिति विशेषणमिति किं तक्षकः सर्पः विशेषेणेति किं मल्लोहितस्त
क्षकः पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च पूर्व अपर प्रथम च
रम जघन्य समान मध्य मध्यम वीर इत्येते शब्दाः समानाधिकरणेन सुपा सह
समस्यन्ते तत्पुरुषश्च समासो भवति पूर्वपुरुषः अपरपुरुषः प्रथमपुरुषः चरम
पुरुषः जघन्यपुरुषः समानपुरुषः मध्यपुरुषः मध्यमपुरुषः वीरपुरुषः सर्वए
वायं प्रपंचः श्रेण्यादयः कृतादिभिः श्रेण्यादयः शब्दाः कृतादिभिः समाना
धिकरणैः सह समस्यन्ते तत्पुरुषश्च समासो भवति श्रेण्यादिषु च्व्यर्थवचनम् अश्रेण
यः श्रेणयः कृताः श्रेणिकृताः एककृताः श्रेण्यादयः पूगलोके कृतादिराकृतिगणः
च्व्यर्थानां भवति प्रादय इत्यनेन नित्यसमासः श्रेणीकृताः श्रेणीएककृताः कृत्वा

मराशिनिचयविषयनिधनइंद्रदेवमुंडभूतश्रवणवदान्य अध्यापक ब्राह्मण
क्षत्रिय पटु पंडित कुशल चपल निपुण श्रेण्यादिः कृत मत मित भूत उक्त
समाज्ञात समाम्नात समाख्यात संभावित अवधारित अवकल्पित निराकृत
उपकृत उपाकृत कृतादिः क्तेन नञ्विशिष्टेनानञ् नञैव विशेषो यस्य पदस्य
मात्रकृतादिकं तत्त्वं नञ्विशिष्टं तेनानञ्विशिष्टेन समानाधिकरणेनानञ्
नञ् क्तान्तः समस्यते तत्पुरुषश्च समासो भवति कृतंकृतं कृताकृतम् भुक्ताभुक्तं
पीतापीतम् नुडिटौ तद्भक्तौ न भेदकौ अशितानशितेन जीवति क्लिष्टाक्लि-
शितेन वर्त्तते कृतापकृतादीनामुपसंख्यानम् कृतापकृतम् भुक्तविभुक्तम्
पीतविपीतम् गतप्रत्यागतम् यातानुयातम् क्रयाक्रयिका फलाफलिका
पुटापुटिका मानोन्मानिका समानाधिकरणाधिकारे शाकपार्थिवादीनामु-
पसंख्यानम् उत्तरपदलोपश्च शाकप्रधानः पार्थिवः शाकपार्थिवः कुतपसौश्रु-
तः अजातौल्वलिः सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः सत् महत् परम

का॰
वृ॰प्र
७५

ह

उत्तमउत्कृष्ट इत्येते पूज्यमानैः सह समस्यन्ते तत्पुरुषश्च समासो भवति पूज्यमानैरि
ति वचनात्सज्जा शास्त्राः सद्वैद्यो विज्ञायते सत्पुरुषः महापुरुषः परमपुरुषः उ
त्तमपुरुषः उत्कृष्टपुरुषः पूज्यमानैरिति किम् उत्कृष्टो गौः कर्दमात् वृन्दार
कनागकुञ्जरैः पूज्यमानम् वृन्दारकनागकुञ्जर इत्येतैः सह पूज्यमानं वा
चि समस्यन्ते तत्पुरुषश्च समासो भवति पूज्यमानमिति वचनाद्वृन्दारका
दयः पूज्याः शास्त्रमारभन्ते गोवृन्दारकः अश्ववृन्दारकः गोनागः अश्वनागः गोकु
ञ्जरः पूज्यमानमिति किम् सुषीमो नागः कतरकतमौ जातिपरिप्रश्ने कतर
कतमौ जातिपरिप्रश्ने वर्तमानौ समर्थेन नाम्ना सह समस्येते तत्पुरुषश्च समासो
भवति कतरकठः कतरकापः कतमकठः कतमकलापः ननु च कतमशब्दः जा
ति जातिपरिप्रश्ने एव व्युत्पाद्यते कतरशब्दोपि सामर्थ्याद् द्वयं प्रवर्तते किं जा
तिपरिप्रश्नग्रहणेन विज्ञापयति कतमशब्दोऽन्यत्रापि वर्तते इति तस्यावश्यम्
उदाहरणम् कतरो देवदत्तः भवतां कतमो भवतां देवदत्तः किं क्षेपे किमित्येत

७५

क्षेपेगम्यमानेसुपासहसमस्यतेतत्पुरुषश्चसमासोभवतिकिंराजायोरक्षतिकिंसखा
योभिद्रुह्यतिकिंगौर्योनवहतिकिमः क्षेपइतिसमासान्तोनभवतिक्षेपइतिकिम्।
कोराजापाटलिपुत्रे पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्र
वक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः उभयत्रजातिः पोटेत्याभिधीयतेगृष्टिरेकवारप्रसू
ताधेनुःप्रत्यग्रप्रसवावशावन्ध्यावेहद्गर्भघातिनीबष्कयिणीतरुणवत्सापोटादि
भिःसहजातिवाचिसुबन्तंसमस्यतेतत्पुरुषश्चसमासोभवतिइभपोटाइभयुवतिः
अग्निस्तोकः उदश्वित्कतिपयम् गोगृष्टिःगोधेनुःगोवशागोवेहत् गोबष्कयिणी
कठप्रवक्ताकठश्रोत्रियःकठाध्यापकःकठधूर्तःजातिरितिकिम् देवदत्तःप्रवक्ता
धूर्तग्रहणमकुत्सार्थम् प्रशंसावचनैश्च जातिरितिनिवर्तते जातिवाचिसुबन्तंप्रशं
सावचनैःसहसमस्यतेतत्पुरुषश्चसमासोभवति रूढिशब्दाःप्रशंसावचनाः+एवस
मानाधिकरणाभवन्तिगोप्रकाण्डं अश्वप्रकाण्डं गोमतल्लिकाअश्वमतल्लिकागो
मचर्चिकाअश्वमचर्चिकाकुमारीतल्लजकः युवाखलतिपलितवलिनजरतीभिः

+ यद्यप्यन्ते मतल्लिकादयः स्त्रीत्वविशिष्टलिंगिनादन्यलिंगेपि जातिशब्दे स्वलिंगोपादा + २

खलत्यादिभिः समानाधिकरणैः सह युवशब्दः समस्यते तत्पुरुषश्च समासो भवति जरती
तिरिति स्त्रीलिङ्गनिर्देशः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति ज्ञापना
र्थः युवा खलतिः युवखलतिः युवा पलिता युवपलिता युवा जरन् युवजरन् युव
तिर्जरती युवजरती कृत्यतुल्याख्या अजात्या कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्च शब्
दाः अजातिवचनेन सुपा सह समस्यन्ते तत्पुरुषश्च समासो भवति भोज्योष्णम् भोज्य
लवणम् पानीयशीतम् तुल्याख्याः तुल्यश्वेतः तुल्यमहान् सदृशश्वेतः सदृशमहा
न् अजात्येति किम् भोज्य ओदनः वर्णो वर्णेन वर्णविशेषवाचिशब्दस्तु वर्णविशेषवा
चिना शब्दवन्तेन समानाधिकरणेन सह समस्यते तत्पुरुषश्च समासो भवति कृष्णसार
ङ्गः लोहितसारङ्गः कृष्णशबलः लोहितशबलः अवयवद्वारेण कृष्णशब्दः समुदा
ये वर्तमानः समानाधिकरणो भवति कुमारः श्रमणादिभिः कुमारशब्दः श्रमणा
दिभिः सह समस्यते तत्पुरुषश्च समासो भवति यदा स्त्रीलिङ्ग एव कुमारशब्दः समस्यते
येत्र पुंलिङ्गाः अध्यापकः अभिरूपकः पटुः पण्डितः इति तेषु भयथा भवति प्रातिपदि।

कश्च होगोलिंगविशिष्टस्यापिग्रहणं भवतीति कुमारी श्रमणा कुमारश्रमणा कुमा
रप्रव्रजिता श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी बन्धकी दासी अध्यापक अ
भिरूपक पटु मृदु पंडित कुशल चपल निपुण ॥ चतुष्पादो गर्भिण्या ॥ चतुष्पाद्वा
चिनः सुबन्ताः गर्भिणीशब्देन सह समस्यन्ते तत्पुरुषश्च समासो भवति गोगर्भिणी
अजागर्भिणी चतुष्पादिति वक्तव्यम् इह मा भूत् कालाक्षीगर्भिणी स्वस्ति
मतीगर्भिणी चतुष्पादिति किम् ब्राह्मणीगर्भिणी ॥ मयूरव्यंसकादयश्च ॥ सम
हायापवनिपात्यन्ते मयूरव्यंसकादयः शब्दाः तत्पुरुषसंज्ञा भवन्ति चकारोवधा
रणार्थः परमो मयूरव्यंसक इति समासान्तरं न भवति मयूरव्यंसकः छात्रव्यंस
कः कांबोजमुण्डः यवनमुण्डः छन्दसि हस्तेगृह्य पादेगृह्य लांगलेगृह्य पुनर्दाय
एहीडादयोन्यपदार्थे एहीडम् एहियवम् वर्त्ततेस्मिन् एहिवाणिजा क्रिया अपे
हिवाणिजा प्रेहिवाणिजा एहिस्वागता अपेहिस्वागता द्वितीया प्रोह्यकटा प्रोह्यक
र्दमा उद्धमचूडा आहरचेला आहरवासना आहरवनिता कृन्धिविचक्षणा ३।

का॰
वृ॰
७०

द्धरोत्सृजा उद्धरविसृजा उद्धमविधमा उत्पतनिपता उत्पचविपचा उच्चावचम् उच्च
नीचम् आचोपचम् आचपराचम् निश्चप्रचम् अकिंचनः स्नात्वाकालकः पीत्वा-
स्थिरकः भुक्त्वासुहितः प्रोष्यपापीयान् उत्पत्यपाकला निपत्यरोहिणी निषण्णश्या
मा अपेहिप्रघसा एहिविघसा इहपंचमी इहद्वितीया जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चा
भिदधाति जहिजोडः उज्जहिजोडः जहिस्तंभः उज्जहिस्तंभः आख्यातमाख्या
तेन क्रियासातत्ये अश्नीतपिबता पचतभृज्जता खादतमोदता खादताचमता आ
हरनिष्किरा आवपनिष्किरा भिन्धिलवणा पचप्रकूटा अविहितलक्षणस्तत्पुरु
षो मयूरव्यंसकादिषु द्रष्टव्यः ॥ इति श्रीकाशिकायां वृत्तौ द्वितीयस्याध्यायस्य प्र
थमः पादः ॥ ॥ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ॥ एकदेशोऽस्यास्तीत्ये
कदेशी अवयवी तद्वाचिना सुबन्तेन सह पूर्वापराधरोत्तरशब्दाः सामर्थ्यादेकदेशवा
चिनः समस्यन्ते तत्पुरुषश्च समासो भवति एकाधिकरणग्रहणमेकदेशिनो वि
शेषणम् एकचेदधिकरणमेकद्रव्यमेकदेशी भवति षष्ठीसमासापवादो योगः

७७

पूर्वंकायस्य पूर्वकायः अपरकायः अधरकायः उत्तरकायः एकदेशिनेति किम् पूर्वं
नाभेः कायस्य एकाधिकरण इति किं पूर्वंछात्राणामामंत्रयस्व कये मध्याह्नः साया
ह्न इति संख्याह्नियापूर्वस्याह्नस्येति ज्ञापकात सर्वेणएकदेशशब्देनाह्नः समासो भव
ति अर्धंनपुंसकम् एकदेशिनैकाधिकरणन्तिति वर्त्तते समप्रविभागे अर्धशब्दोन
पुंसकमाविषलिंगस्येदं ग्रहणं अर्धमित्येतन्नपुंसकमेकदेशिनाएकाधिकरणेन स
ह समस्यते तत्पुरुषश्च समासो भवति षष्ठीसमासापवादो योगः अर्धंपिप्पल्या अर्ध
पिप्पली अर्धंकोशातकी नपुंसकमिति किम् ग्रामार्धः नगरार्धः एकदेशिनेत्येव अर्ध
पं पशोर्देवदत्तस्य देवदत्तशब्देन समासो न भवति एकाधिकरण इत्येव अर्धंपिप्पली
नाम् द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् एकदेशिनैकाधिकरण इति वर्त्त
ते षष्ठीसमासस्यापवादः अन्यतरस्यांग्रहणात्सोपि भवति पूर्वेणाप्ति प्रतिषेधप्राप्त
एवान्यतरस्यांग्रहणसामर्थ्यात्प्रवर्त्तते द्वितीयादीनि शब्दरूपाणि एकदेशिनैका
धिकरणेन सहान्यतरस्यां समस्यन्ते तत्पुरुषश्च समासो भवति द्वितीयंभिक्षायाः

का॰
वृ॰
१८

द्वितीयभिक्षा भिक्षाद्वितीयम् तृतीयं भिक्षायाः तृतीयभिक्षा भिक्षातृतीयम् च
तुर्थं भिक्षायाः चतुर्थं भिक्षायाः चतुर्थभिक्षा भिक्षाचतुर्थम् तुर्यं भिक्षायाः
तुर्यभिक्षा भिक्षातुर्यं एकदेशिनैव द्वितीयं भिक्षायाः भिक्षुकस्य एकाधिकरणा
इत्येव द्वितीयम् भिक्षाणां प्राप्तापन्ने च द्वितीयया एकदेशिनैकाधिकरणाद् इ
ति निवृत्तम् द्वितीया समासे प्राप्तवचनमिदम् विधानसामर्थ्यात्सोऽपि भवति प्रा
प्त आपन्न इत्येतौ द्वितीयान्तेन सह समस्येते तत्पुरुषश्च समासो भवति प्राप्तो जीवि
कां प्राप्तजीविकः जीविकां प्राप्त इति वा आपन्नो जीविकाम् आपन्नजीविकः जीवि
कापन्न इति वा कालाः परिमाणिना परिमाणमस्यास्तीति परिमाणी तद्वाचिना
सहवर्त्तेन सह सामर्थ्यात् परिमाणवचनाः कालशब्दाः समस्यन्ते तत्पुरुषश्च समासो
भवति षष्ठीसमासविषये योगारम्भः मासो जातस्य मासजातः संवत्सरजातः द्व्यहजा
तः त्र्यहजातः नञ् वर्जितेन समर्थेन सहवर्त्तेन सह समस्यते तत्पुरुषश्च समासो भ
वति खट्वारूढः खट्वालः ईषत्कृता ईषत्पिङ्गलः यं ... दन्तेन सहवर्त्तेन सह स

१८

मस्यते तत्पुरुषश्च समासो भवति ईषत्कृतावचनेति वक्तव्यम् ईषत्पिंगलः ईषद्वि-
कटः ईषत्कडारः ईषदुन्नतः ईषद्रक्तः ईषत्पीतः इह न भवति ईषद्गार्ग्य इति षष्ठी सु-
बन्तं समर्थेन सुबन्तेन सह समस्यते तत्पुरुषश्च समासो भवति राजपुरुषः ब्राह्म-
णकम्बलः कृद्योगा च षष्ठी समस्यते इति वक्तव्यं इध्मव्रश्चनः पलाशशातनः किम-
र्थमिदमुच्यते प्रतिपदविधाना च षष्ठी न समस्यते इति वक्ष्यति तस्यायं पुरस्तादप-
कर्षः याजकादिभिश्च पूर्वेण समासः सिद्ध एव तस्य तृजकाभ्यां कर्तरि कर्त-
रि चेति प्रतिषेधे प्राप्ते पुनर्विधानम् प्रतिप्रसवार्थं याजकादिभिः सह षष्ठी स-
मस्यते तत्पुरुषश्च समासो भवति ब्राह्मणयाजकः क्षत्रिययाजकः याजक
पूजक परिचारक परिवेषक स्नापक अध्यापक उत्सादक उद्वर्तक होतृ भ-
र्तृ रथगणक पत्तिगणक तत्स्थैश्च गुणैरिति वक्तव्यम् चन्दनगन्धः कपित्थरसः
न निर्धारणे पूर्वेण समासे प्राप्ते प्रतिषेध आरभ्यते निर्धारणे या षष्ठी सा न सम-
स्यते जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम् क्षत्रिया

का· वृ· प्र·
७५

णां मनुष्याणां शूरतमः गवां कृष्णा संपन्नक्षीरतमा धावन्नध्वगानां शीघ्रतमः प्रति
पदविधानाच्च षष्ठीसमासेनेति वक्ष्यते सर्पिषो ज्ञानम् मधुनो ज्ञानम् पूरण
गुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन पूरण गुण सुहितार्थ सत् अ
व्यय तव्य समानाधिकरणैरित्येतैः सह षष्ठी न समस्यते अर्थग्राह्यः प्रत्येकमभि
संबध्यते नैतेनाव्ययीविधिर्न भवति पूरण छात्राणां पंचमः छात्राणां दशमः गु
ण बलाकायाः शौक्ल्यम् काकस्य कार्ष्ण्यं सुहितार्थः फलानां सुहि
तः फलानां तृप्तः सत् ब्राह्मणस्य कुर्वन् ब्राह्मणस्य कुर्वाणः अव्यय ब्राह्मण
स्य कृत्वा वृषलस्य कृत्वा न ब्राह्मणस्य कर्तव्यम् वृषलस्य कर्तव्यम् तव्यता सा
हचर्येण तृजकेन सह समासो भवत्येव ब्राह्मणकर्तव्यम् समानाधिकरण शुकस्य मा
राविदस्य राज्ञः पाटलिपुत्रस्य किं कस्मात् पूर्वनिपातस्यानियमः स्यात् केनचम
जायाम् मतिबुद्धिपूजार्थेभ्यश्चेति निपातितस्येदं ग्रहणं पूजाग्रहणं तु फलग्रहणा
र्थं क्तो यः पूजार्थो विहितस्तेन सह षष्ठी न समस्यते राज्ञां मतः राज्ञां बुद्धः राज्ञां पू

जितः अधिकरणवाचिनाश्च क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य इति वक्ष्या
ति तस्येदं ग्रहणम् अधिकरणवाचिना च क्तान्तेन सह षष्ठी न समस्यते इदमेषामा
सितम् इदमेषां यातम् इदमेषामशितम् इदमेषां भुक्तम् इदमेषां स्नातम् इदमे
षां परिक्रान्तं सिंहानामिव पल्वले कर्मणि च क्तेनेति निवृत्तम् कर्मग्रहणं षष्ठी
विशेषणं कर्मणि च या षष्ठी सा न समस्यते उभयप्राप्तौ कर्मणि इत्यस्याः षष्ठ्या इ
दं ग्रहणात् आश्चर्यो गवां दोहः अगोपालकेन रोचते मे ओदनस्य भोजनं देवदत्ते
न साधु खलु पयसः पानं यज्ञदत्तेन विचित्रा सूत्रस्य कृतिः पाणिनिनेति तृजका
भ्यां कर्तरि कर्तृग्रहणं षष्ठीविशेषणम् कर्तरि या षष्ठी सा तृचा अकेन च सह
न समस्यते भवत आसिका भवतः शायिका भवतोऽग्रगामिका तृजकौ कर्तरि वा विधी
यते तत्प्रयोगे कर्तरि षष्ठी नास्ति तस्मात् तृचो ग्रहणमनर्थकं कर्तरीति किम् इक्षु
भक्षिकां मे धारयसि कर्तरि च कर्तरि च यौ तृजकौ ताभ्यां सह षष्ठी न समस्यते
सामर्थ्यात् कस्य विशेषणम् इतरत्र व्यभिचाराभावात् अपां स्रष्टा पुरां भेत्ता वज्र

का॰
वृ॰
८

स्य भर्ता ननु च कर्तृशब्दोयं याजकादिषु पठ्यते सम्बन्धिशब्दस्य परि पर्यायस्तत्र ग्र
हणात् अकेनाकर्त्तर्यपि ओदनस्य भोजकः सक्तूनां पायकः ॥ नित्यं क्रीडाजीविका
योः ॥ नेति निवृत्तं नित्यः समासो विधीयते क्रीडायां जीविकायां च वर्त्तते यः षष्ठीसमास
तेन सः क्रीडाजीविकयोर्नास्ति प्रकृते वाक्येन (?) क्रियते उद्दालकपुष्पभंजिका वारण
पुष्पप्रचायिका जीविकायां दन्तलेखकः नखलेखकः क्रीडाजीविकयोरिति
किं ओदनस्य भोजकः ॥ कुगतिप्रादयः ॥ नित्यमिति वर्त्तते कु शब्दोव्ययं गृह्यते गत्या
दिसाहचर्यात् न द्रव्यवचनः कुगतिप्रादयः समर्थेन शब्दान्तरेण सह समस्य
न्ते तत्पुरुषश्च समासो भवति कुः पापार्थे कुपुरुषः गति ऊरीकृत्य ऊरीकृतम् प्राद
यः दुर्निन्दायाम् दुष्पुरुषः स्वती पूजायां सुपुरुषः अतिपुरुषः आङीषदर्थे आ
पिंगलः प्रायिकं चैतदुपाधिवचनम् अन्यत्रापि समासो दृश्यते कोष्णम् दु
ष्कृतम् सुषी अभिस्तुतम् आनद्धमिति प्रादयो गताद्यर्थे प्रथमया प्रगतः आचार्यः
प्राचार्यः प्रान्तेवासी अत्यादयः क्रान्ताद्यर्थे द्वितीयया अतिक्रान्तः खट्वाम् अति

त्वेद्दः अतिमालाः अवादयः क्रुष्टाद्यर्थे तृतीयया अवक्रुष्टः कोकिलया अवको
किलः पर्यादयो ग्लानाद्यर्थे चतुर्थ्या परिग्लानो ऽध्ययनाय पर्यध्ययनः अलं कुमा-
र्यै अलंकुमारि निरादयः क्रान्ताद्यर्थे पंचम्या निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्
बिः निवारणाभिः इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम वाससी
इव कन्ये इव प्रादि प्रसंगे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः वृक्षं वृक्षं प्रति विद्यो
तते विद्युत् साधुर्देवदत्तो मातरं प्रति उपपदमतिङ् नित्यमिति वर्त्तते उपपदम
तिङन्तं समर्थेन शब्दान्तरेण सह नित्यं समस्यते तत्पुरुषश्च समासो भवति कुं
भकारः नगरकारः अतिङिति किं एधानाहारो व्रजति ननु च सुप्सुपेति वर्त्त
ते कुतस्तिङः प्रसंगः एवं तर्हि एतज्ज्ञापयति पूर्वयोर्योगयोः सुप्सुपेति न सं-
बध्यते इति तेन गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरि
त्येतदुपपन्नं भवति अश्वक्रीती धनक्रीती प्रसेवाद्ययेन पूर्वेण समासः सिद्धे
नियमार्थं वचनम अव्ययेनोपपदस्य यस्समासः सो ऽमैव नान्येन स्वादुंकारं भुं-

का॰
वृ॰प्र॰
८२

तेलवणंकारं भुंक्ते अमैवेति किमर्थम् कालसमयवेलासु तुमुन् कालो भोक्तुम्
समयो भोक्तुम् वेला भोक्तुम् एवकार उपपदविशेषणार्थः अमैव तुल्यविधानम्
उपपदं तस्य समासो यथा स्यात् अमा चान्येन च यत्तुल्यविधानं तस्य मा भूत् अग्रेभुक्त्वा
अग्रेभोजनम् तृतीयाप्रभृतीन्यन्यतरस्याम् अमेत्यनुवर्तते उपदंशस्तृतीयाया-
मित्यतः प्रभृति यान्युपपदानि तान्यमा अव्ययेन सह अन्यतरस्यां समस्यन्ते तस्यरू-
पस्य समासो भवति उभयत्र विभाषा चेयम् यदमैव तुल्यविधानमुपपदं तस्या-
प्राप्ते यथोपदंशस्तृतीयायामिति यदन्यतरस्यां चान्येन च तस्य प्राप्ते यथा अव्ययेय-
थाभिप्रेताख्याने कृञः क्त्वाणमुलाविति मूलकोपदंशं भुंक्ते मूलकेनोपदंशं
उच्चैःकारमाचष्टे उच्चैःकारम् अमेत्येव पर्याप्तिवचनेष्वलमर्थेषु पर्याप्तो भोक्तुं
पटुर्भोक्तुम् क्वाच अमेति पूर्वयोगे तत्तुल्ययोगे नान्येनेति प्राप्नोतीति वचनमारम्भ-
णेन अमान्येन सह तृतीयाप्रभृतीन्युपपदानि अन्यतरस्यां समस्यन्ते तस्य रूपस्य
समासो भवति उच्चैःकृत्य उच्चैःकृत्वा तृतीयाप्रभृतीनीत्येव अलंकृत्वा खलुकृत्वा

शेषो बहुव्रीहिः उपयुक्तादन्यः शेषः शेषो बहुव्रीहिसंज्ञो भवति कस्य शेषः यत्रा
न्यः समासो नोक्तः वक्ष्यति अनेकमन्यपदार्थे विग्रहः श्वा बलगः काशेन्द्रासेनः
शेष इति किम् उन्मत्तगंगम् लोहितगंगम् बहुव्रीहिप्रदेशाः न बहुव्रीहौ।
वित्येवमादयः अनेकमन्यपदार्थे अनेकम् सुबन्तमन्यपदस्यार्थे वर्त्तमानं
समस्यते बहुव्रीहिश्च समासो भवति प्रथमार्थे वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहु
व्रीहिश्च समासो भवति प्राप्तमुदकं यं ग्रामं स प्राप्तोदकः ग्रामः ऊढरथो ऽनड्वा
न् उपहृतपशू रुद्रः उद्धृतौदना स्थाली चित्रगुर्देवदत्तः वीरपुरुषको ग्रामः प्र
थमार्थे तु न भवति वृष्टे देवे गतः अनेकग्रहणं किं बहूनामपि यथा स्यात् सु
सूक्ष्मजटाकेशेन सुनताजिनवाससा बहुव्रीहिः समानाधिकरणानामिति
वक्तव्यम् व्यधिकरणानां माभूत् पंचभिर्भुक्तमस्य अव्ययानां च उच्चैर्मुखः
नीचैर्मुखः सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च कंठेस्थितः कालः उरसिलो
मा उष्ट्रमुखाः उष्ट्रस्य मुखमिव मुखमस्य उष्ट्रमुखः खरमुखः समुदायविकार

षष्ठ्या अस्य बहुब्रीहिरुत्तरपदलोपश्च वक्तव्यः केशानां संघातः चूडा अस्य केशचूडः सुव
र्णविकारोऽलंकारो यस्य सुवर्णालंकारः प्रादिभ्यो धातुजस्य वा प्रादिभ्यो धा
तुजस्य बहुब्रीहिर्वक्तव्यः वा चोत्तरपदलोपः प्रपतितपर्णः प्रपर्णः प्रपतितपला
शः प्रपलाशः नञोऽस्त्यर्थानां बहुब्रीहिर्वा चोत्तरपदलोपः अविद्यमानपुत्रः
अपुत्रः अविद्यमानभार्यः अभार्यः स्वबपिकोपेक्षितोऽयं विवचनम् अस्तिक्षी
राब्राह्मणी संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये संख्येययासंख्याव
र्तिनेतयासन्न अव्ययासन्नादूराधिकसंख्याः समस्यन्ते बहुब्रीहिश्च समासो भव
ति अव्यय उपदशाः उपविंशाः उपत्रिंशाः आसन्नदशाः आसन्नविंशाः अदूरद
शाः अदूरविंशाः अधिकदशाः अधिकविंशाः अधिकत्रिंशाः संख्या द्वित्राः
त्रिचतुराः द्विदशाः त्रिदशाः संख्येय इति किं अधिका विंशतिर्गवाम् दिङ्नामा
न्यन्तराले दिशां नामानि दिङ्नामानि उक्तानि अन्तराले वाच्ये समस्यन्ते बहु
ब्रीहिश्च समासो भवति दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालम् दक्षिणपूर्वा विदि

क. पूर्वोत्तरा उत्तरपश्चिमा सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः नामग्रहणात्पूर्वार्थम
इह मा भूत ऐन्द्र्याः प्राच्यकौबेर्याश्च दिशोर्यदन्तरालमिति । नञ्तेनेदमिति स
ये नञेति समस्यन्ते अस्त्यर्थे ते नेति तस्तोयान्तेन रूपग्रहणादनेकमिति सर्वप्र
तेन त्रय समस्यन्ते स्वरूपे पदे ते नेति च तस्तोयान्ते इदमिति तस्मिन्नर्थे समस्यन्ते व
हुव्रीहिश्च समासो भवति इतिकरणात्तत्रश्चन्द्विवक्षार्थे लौकिकमर्थमनवसा
रयति ततश्च ग्रहणाग्रहणां कर्मव्यतिहारेण युद्ध एव समासार्थे इति सर्वं लभ्यन्ते य
त्रेति निर्दिश्य ग्रहणां वेन भवति यत्रेनेति निर्दिश्य ग्रहणाञ्च न भवति यत्रेदिद
मिति निर्दिश्य युद्धे वेन भवति केशेषु च केशेषु च गृहीत्वा इदं युद्धं प्रवृत्तं केशाके
शि कचाकचि दण्डैश्च दण्डैश्च प्रहृत्यप्रदण्डादण्डि मुसलामुसलि इच् कर्मव्यतिहारे
समासान्तः स चाव्ययम् अन्येषामपि दृश्यते इति पूर्वपदस्य दीर्घत्वं स्वरूपे इति कि
हलेषु च हलेषु च दृपयुद्धम् तेन सहेति तुल्ययोगे सहेत्येतच्छब्दरूपं तुल्ययोगे व
र्तमानं तेनेति तस्तोयान्तेन सह समस्यते बहुव्रीहिश्च समासो भवति सपुत्र आगतः

का॰
वृ॰
८३

सच्छात्रः आगतः सकर्मकः तुल्ययोग इति किम् सहैव दशभिः पुत्रैर्भारं वहति गर्दभी विद्यमानेष्वेव पुत्रैर्भारं वहति गर्दभीत्यर्थः कथं सकर्मकः सलोमकः सपक्षक इति नात्र तुल्ययोगो गम्यते किन्तर्हि विद्यमानता प्रत्ययिके तुल्ययोग इति विशेषणाम् अन्यत्रापि दृश्यते समासः। चार्थे द्वन्द्वः। अनेकमिति वर्तते अनेकं सुबन्तं चार्थे वर्तमानं समस्यते द्वन्द्वसंज्ञकश्च समासो भवति समुच्चयान्वाचयेतरेतरयोः समाहारश्चेति चार्थः तत्र समुच्चयान्वाचययोरसामर्थ्यान्नास्ति समासः इतरेतरयोगसमाहारयोर्विधीयते प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ धवखदिरपलाशाः वाक्त्वचम् वाक्दृषदम् द्वन्द्वात् चुदषहान्तात् समाहारे इति टच् द्वन्द्वप्रदेशाः द्वन्द्वे चेत्येवमादयः। उपसर्जनं पूर्वं। समास इति वर्तते उपसर्जनसंज्ञकं समासे पूर्वं प्रयोक्तव्यम् पूर्ववचनेऽप्रयोगनिवृत्त्यर्थं अनियमो हि स्यात् द्वितीया कष्टश्रितः तृतीया शङ्कुलाखण्डः चतुर्थी यूपदारु पञ्चमी वृकभयम् षष्ठी राजपुरुषः सप्तमी अक्षशौण्डः। राजदन्तादिषु परम्। पूर्वनिपाते प्राप्ते परप्रयोगार्थं

वचनम् राजदन्तादिषु परम् उपसर्जनं प्रयोक्तव्यम् न केवलम् उपसर्जनस्यान्यस्यापि
वाग्रादेर्यथालक्षणं विहितस्य पूर्वनिपातस्य परनिपातो विधीयते दन्तानां राजा
राजदन्तः वनस्य अग्रे अग्रेवनम् निपातनादलुक् राजदन्तः अग्रेवनम् लिप्तवा-
सितं नग्नमुषितम् सिक्तसंमृष्टम् मृष्टलुञ्चितं अवक्लिन्नपक्वम् अर्पितोतम् उप्त
गाढम् पूर्वकालस्य निपातः उलूखलमुसलम् तण्डुलकिण्वम् दृषदुपलम्
आरग्वायनबन्धकी चित्ररथबाह्लीकम् अवन्त्यश्मकम् शूद्रार्यम् स्नातकरा
जानौ विष्वक्सेनार्जुनौ अक्षिभ्रुवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ अनि
यमस्त्वाश्रीयते अर्थशब्दौ अर्थधर्मौ अर्थकामौ तत्कथं भवतीदम् धर्मादिष्वनियमि
ति वैकारिमतम् गोजानिकम् गोपालधानपूलासकारण्डकम् स्थूलपूलासम्
उशीरबीजम् सिञ्जास्थि चित्रास्वाती जायापती जंपती जायायाः शब्दस्य जंभावो दंभा
वश्च निपात्यते पुत्रपती पुत्रपशू केशश्मश्रू शिरोग्रीवम् सर्पिर्मधुनी मधुसर्पि
षी आद्यन्तौ अन्तादी गुणवृद्धी वृद्धिगुणौ द्वन्द्वेपि पूर्वमिति वक्तव्ये तेन द्वन्द्वसमा

का· वृ४ ८४

सेचान्नपूर्वं प्रयोक्तव्यम पटुगुप्तौ मृदुगुप्तौ अनेकप्राप्तावेकस्य नियमो ऽनियमः शे-
षे पटुमृदुशुक्लाः द्वन्द्व इति किम विस्पष्टपटुः अजाद्यदन्तम द्वन्द्व इत्यनुवर्तते पू-
र्वमिति च अजादि अदन्तं च शब्दरूपं द्वन्द्वसमासे पूर्वं प्रयोक्तव्यम उष्ट्रखरम उष्ट्र-
शशम बहुष्वनियमः अश्वरथेन्द्राः द्वन्द्वे चि अजाद्यदन्तविप्रतिषेधेन इन्द्राग्नी इं-
द्रवायू तत्परकरणं किं अश्ववडवौ वडवाश्व इतिवा अल्पाच्तरम अल्पाच्तरं शब्दरू-
पं द्वन्द्वसमासे पूर्वं प्रयोक्तव्यम प्लक्षन्यग्रोधधवाश्वकर्णाम बहुष्वनियमः शंखदुंदु-
भिवीणाः वीणाशंखदुन्दुभयः ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणां पूर्व-
निपातो वक्तव्यः हेमन्तशिशिरवसन्ताः भरणीकृत्तिकारोहिण्यः समानाक्षराणा-
मिति किम ग्रीष्मवसन्तौ लघ्वक्षरं पूर्वं निपतति कुशकाशम शरशीर्णं अभ्यर्हितं
च मातापितरौ श्रद्धामेधे दीक्षातपसी वर्णानामानुपूर्व्येण ब्राह्मणक्षत्रियविट्शू-
द्राः समानाक्षराणामित्यत्रनास्ति भ्रातुश्च ज्यायसः युधिष्ठिरार्जुनौ संख्याया अ-
ल्पीयस्याः द्वित्राः त्रिचतुराः नवतिशतम सप्तमीविशेषणे बहुव्रीहौ सर्वोपसर्ज-

नवाद्बहुब्रीहेरतिनियमेप्राप्तेवचनम् सप्तम्यन्तंविशेषणञ्चबहुब्रीहौसमासेपूर्वं
प्रयोक्तव्यम् कण्ठेकालः उरसिलोमा उदरेमणिः विशेषणान्चित्रगुः शबलगुः
सर्वनामसंख्ययोरुपसंख्यानम् सर्वश्वेतः सर्वकृष्णः द्विशुक्लः द्विकृष्णः अनयोरे
वमिथः सर्वसंख्ययोर्गणायोपरत्वात्संख्यायाः पूर्वनिपातः द्व्यन्यः त्र्यन्यः वाप्रियस्य
गुडप्रियः प्रियगुडः सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनम् गडुकण्ठः गडुशि
रः कथंवहेगडुः प्राप्तस्यवाबाधाव्याख्येया निष्ठा निष्ठान्तंबहुब्रीहौसमासेपू
र्वंप्रयोक्तव्यम् कृतकटः भिक्षितभिक्षः अवमुक्तोपानत्कः आहूतसुब्रह्मण्यः
ननुचविशेषणमेवात्रनिष्ठान्तेषुनियमोविशेषणविशेष्यभावस्याविवक्षानि
यतत्वात् कण्ठेकृतमनेननिष्ठायाः पूर्वनिपातेजातिकालसुखादिभ्यः परवचनं
शार्ङ्गरजग्धीमासयातासुखयाताक्वचिन्नकृतकटः प्राप्तस्यवाबाधाव्याख्येयाप्र
हरणार्थेभ्यः परेनिष्ठासप्तम्यौभवतइतिवक्तव्यम् अस्युद्यतः दण्डपाणिः कथंउद्य
तगदः उद्यतासिः प्राप्तस्यवाबाधा वाहिताग्न्यादिषु निष्ठेतिपूर्वनिपातेप्राप्तेवि

कल्पस्त्राख्यते वाहिताग्न्यादिषु निष्ठान्तं वा पूर्वं प्रयोक्तव्यम् आहिताग्निः अग्न्या
हितो वा आहिताग्निः जातपुत्रः जातः दन्तजात जातश्मश्रु तैलपीत पीततैल घृतपीत
मद्यपीत ऊढभार्य गतार्थ आकृतिगणश्चायम् तेन गडुकण्ठप्रभृतय इह द्रष्ट
व्याः कडाराः कर्मधारये गुणशब्दानां विशेषणत्वात्पूर्वनिपाते प्राप्ते विकल्प उ
च्यते कडारादयः शब्दाः कर्मधारये समासे वा पूर्वं प्रयोक्तव्याः कडारजैमिनिः जैमि
निकडारो वा कडार गडुल काण खञ्ज कुण्ठ खेलति गौर वृद्ध भिक्षुक पिङ्गल
तनु वटर कर्मधारय इति किम् कडारपुरुषको ग्रामः ॥ इति काशिकायां
वृत्तौ द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ अनभिहिते अनभिहित इत्ययमधिका
रो वेदितव्यः यदित ऊर्ध्वमनुक्रमिष्यामः अनभिहित इत्येवं तद्वेदितव्यम् अनभि
हिते अनुक्ते अनिर्दिष्टे कर्मादौ कारके विभक्तिर्भवति केनानभिहिते तिङ्कृत्तद्धित
समासैः परिसंख्यानम् वक्ष्यति कर्मणि द्वितीया कटं करोति ग्रामं गच्छति अनभि
हित इति किम् तिङ् क्रियते कटः कृत कृतः कटः तद्धित शतेन क्रीतः शतिकः शत्यः

पदः समासः ग्राममस्तकं ग्रामम् प्राप्तोदको ग्रामः परिमाणेनं किं कटं करोति भीष्म
महारं दर्शनीयम् बहुषु बहुवचनमित्येवमादिना संख्यावाच्येन विभक्तीनामप
देष्टान्तरविशेषणार्थमिदमारभ्यते अनभिहितकर्माद्यर्थेषु कतादिषु द्वितीया
द्यो वेदितव्या इति कर्मणि द्वितीया द्वितीयादयः शब्दाः पूर्वाचार्यैः सुपां त्रिकेषु
स्मर्यन्ते तेनैवात्र व्यवहारः कर्मणि कारके या संख्या तत्र द्वितीया विभक्तिर्भवति कटं करोति
ग्रामं गच्छति उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोऽन्य
त्रापि दृश्यते उभयतो ग्रामम् सर्वतो ग्रामम् धिग्देवदत्तम् उपर्युपरि ग्रामम् अध्यधि
ग्रामम् अधोधो ग्रामम् अभितः परितः समया निकषा हा प्रतियोगेषु च दृश्यते अ
भितो ग्रामम् परितो ग्रामम् समया ग्रामम् निकषा ग्रामम् हा देवदत्तं बुभुक्षितं न
प्रतिभाति किञ्चित् तृतीया च होश्छन्दसि कर्मणि विवर्तते द्वितीयायां प्राप्ता
यां तृतीया विधीयते चशब्दात् सापि भवति छन्दसि विषये जुहोतेः कर्मणि कारके
तृतीया विभक्तिर्भवति द्वितीया च यवाग्वा यवागूं अग्निहोत्रं जुहोति यवाग्वाग्निहोत्र

का. वृष ८९

जुहोति केदसीति किम् यवागूं जुहोति अन्तरान्तरेण युक्ते द्वितीया स्यात् तेन न तृ-
तीया अन्तरान्तरेण युक्तौ निपातौ साहचर्यात् एतेन ताभ्यां योगे द्वितीया
विभक्तिर्भवति षष्ठ्यपवादो योगः तत्रान्तराशब्दो मध्यमाधेयप्रधानमाचष्टे अन्तरेण
शब्दस्तु तद्विनार्थे व अन्तरा त्वांच मांच कमण्डलुः अन्तरेण त्वांच मांच कमण्डलुः
अन्तरेण पुरुषकारं न किंचिल्लभ्यते युक्त इति किम् अन्तरा तक्षशिलां पाटलिपु-
त्रंच स्रुघ्नस्य प्राकारः कालाध्वनोरत्यन्तसंयोगे कालशब्देभ्यः अध्वशब्देभ्यश्च अ-
त्यन्तसंयोगे गम्यमाने द्वितीया विभक्तिर्भवति क्रियागुणद्रव्यैः साकल्येन कालाध्व-
नोः संबन्धः अत्यन्तसंयोगः मासमधीते संवत्सरमधीते मासं कल्याणी संवत्सरं कल्या-
णी मासं गुडधानाः संवत्सरं गुडधानाः क्रोशमधीते योजनमधीते क्रोशं कुटिला
नदी योजनं कुटिला नदी क्रोशं पर्वतः योजनं पर्वतः अत्यन्तसंयोग इति किम् मास-
स्य द्विरधीते क्रोशस्यैकदेशे पर्वतः अपवर्गे तृतीया अत्यन्तसंयोग इति वर्त्तते अपव-
र्गः फलप्राप्तौ सत्यां क्रियापरिसमाप्तिः अपवर्गे गम्यमाने कालाध्वनोरत्यन्तसंयोगे

स्तृतीया विभक्तिर्भवति मासेनानुवाकोऽधीतः संवत्सरेणानुवाकोऽधीतः क्रोशेना
नुवाकोऽधीतः योजनेनानुवाकोऽधीतः कर्त्तव्यार्हतो फलसिद्धेरभावात् तृतीया न भव
ति मासमधीतोऽनुवाकः न चानेन गृहीतः सप्तमीपञ्चम्यौ कारकमध्ये काला
ध्वनोरिति वर्त्तते कारकयोर्मध्ये यौ कालाध्वनौ ताभ्यां सप्तमीपञ्चम्यौ विभक्ती भ
वतः अद्य भुक्त्वा देवदत्तो द्व्यहे भोक्ता द्व्यहाद्भोक्ता कर्तृशक्त्योर्मध्ये कालः इहस्थो
यमिष्वासः क्रोशे लक्ष्यं विध्यति क्रोशाल्लक्ष्यं विध्यति कर्त्तृकर्मणोः कारकयोः क
र्मापादानयोः कर्मापिकरणीयाः वा मध्ये क्रोशः सा ख्यातान देशान्त भवति स्वरवि
तस्मात् कर्मप्रवचनीययुक्ते द्वितीया कर्मप्रवचनीयैर्युक्ते द्वितीया विभक्तिर्भव
ति यथा कल्पसंहितामन्वप्रावर्षत् अग्रामन्तमनुत्पन्नजाः यस्मादधिकं यस्या
स्य चेश्वरवचनं तत्र सप्तमी कर्मप्रवचनीययुक्ते इति वर्त्तते यस्मादधिकं यस्य चेश्व
रवचनं तत्र कर्मप्रवचनीयैर्युक्ते सप्तमी विभक्तिर्भवति उपखार्यां द्रोणः उपनि
ष्के कार्षापणम् यस्य चेश्वरवचनमिति सप्तम्यभिनोऽह्यो योगेऽपि पर्यायेण विभक्तिः

सप्तमीभवति अपि ब्रूयात्पंचालाः अपिपंचालेषुब्रह्मदत्ताः पंचम्यपाङ्परिभिः
अपत्राङ्परिइत्येतैः कर्म्मप्रवचनीययुक्ते पंचमीविभक्तिर्भवति अपत्रिगर्त्तेभ्यो
वृष्टो देवः आपाटलिपुत्राद्वृष्टो देवः परित्रिगर्त्तेभ्यो वृष्टो देवः अपेन सह वर्ज्जनार्थे परि
वर्ज्जनार्थे इदंग्रहणम् तेन लक्षणादिषु न भवति वृक्षं परि विद्योतते प्रतिनिधि
प्रतिदाने च यस्मात् मुख्यसदृशः प्रतिनिधिः दत्तस्य प्रतिनिर्यातनं प्रतिदानम्
यस्मात्प्रतिनिधिर्यतश्च प्रतिदानं तत्र कर्म्मप्रवचनीययुक्ते पंचमीविभक्तिर्भवति
अभिमन्युरर्ज्जुनतः प्रति माषानस्मै तिलेभ्यः प्रति प्रयच्छति तेन च प्रतिनिधिप्रति
दाने संबंध एव यान्तस्यापि योगेऽस्त गत्यर्थकर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टाया
मनध्वनि गत्यर्थानां धातूनां चेष्टाक्रियाणां परिस्पंदक्रियाणां कर्म्मणि कार
के अप्रवर्त्तिते द्वितीयाचतुर्थ्यौ विभक्ती भवतः ग्रामं गच्छति ग्रामाय गच्छति ग्रा
मं व्रजति ग्रामाय व्रजति गत्यर्थानामिति किं ओदनं पचति कर्म्मणीति किम् अ
श्वेन व्रजति चेष्टायामिति किम् मनसा पाटलिपुत्रं गच्छति अध्वनीति किम् अ

थानंगच्छति ग्रधनीत्वर्थग्रहणं पंथानं गच्छति मार्गं गच्छति आस्थितप्रतिषेध
श्चार्थं विज्ञेयाः आस्थितः संप्राप्तः आक्रान्त उच्यते यत्र तत्पथेन पन्थानं गच्छतीत
त्र भवितव्यमेव चतुर्थ्यापथे गच्छति द्वितीयाग्रहणं किं न चतुर्थ्येव विलप्यते अप
वादविषये यथा स्यात ग्रामं गन्ता कृत्यागल्लक्षणा षष्ठी न भवति चतुर्थी संप्र
दाने संप्रदाने कारके चतुर्थी विभक्तिर्भवति उपाध्यायाय गां ददाति कान्यायकं
बलं ददाति स्वदन्नाय रोचते पुष्पेभ्यः स्पृहयति चतुर्थी विधाने तादर्थ्य उपसंख्या
नम यूपाय दारु रन्धनाय स्थाली क्लृपि संपद्यमाने चतुर्थी वक्तव्या मूत्राय कल्पते
यवागूः क्लृपिरर्थनिर्देशः मूत्राय संपद्यते मूत्राय जायते यवागूः उत्पातेन ज्ञाप्य
माने चतुर्थी वक्तव्या वाताय कपिला विद्युदातपाय चलोहिनी हितयोगे च चतुर्थी
वक्तव्या ग्रोचाकिने हितम ग्रामयातिने हितम क्रियार्थोपपदस्य च कर्मणि स्था
निनः क्रियाक्रियार्थोपपदं यस्य सोयं क्रियार्थोपपदः तस्मेड्रलोकि क्रियायां क्रिया
र्थायामित्यविषयो लक्षणे क्रियार्थोपपदस्य स्थानिनः अप्रयुज्यमानस्य धातोः

कर्म्मणि कारके चतुर्थी विभक्तिर्भवति द्वितीयापवादोयोगः । एधेभ्यो व्रजति फलेभ्यो
व्रजति क्रियार्थोपपदस्येति किम् प्रविशति पिंडी प्रविश तर्पणम् भक्षिरस्या
नी क्रियार्थोपपदः कर्म्मणीति किम् एधेभ्यो व्रजति पाकेन स्थानिन इति किम् ए
धानाहर्त्तुं व्रजति ॥ तुमर्थाच्च भाववचनात् ॥ तुमा समानार्थस्तुमर्थः तुमर्थभाव
वचनेभ्यः प्रत्ययान्तेभ्यः प्रातिपदिकात् चतुर्थी विभक्तिर्भवति भाववचनाश्चेति वक्ष्यति
तस्येदं ग्रहणम् । पाकाय व्रजति त्यागाय व्रजति भूतये व्रजति संपत्तये व्रजति तुमर्था
दिति किम् पाकः त्यागः रागः भाववचनादिति किम् कारको व्रजति ॥ नमः स्वस्ति
स्वाहा स्वधालंवषड्योगाच्च ॥ नमस् स्वस्ति स्वाहा स्वधालंवषड् इत्येतैर्योगे चतु
र्थी विभक्तिर्भवति नमो देवेभ्यः स्वस्ति प्रजाभ्यः स्वाहाग्नये स्वधा पितृभ्यः अलम
ल्लो मल्लाय अलमिति पर्य्याप्त्यर्थग्रहणम् प्रभुर्मल्लो मल्लाय वषडग्नये वषडिन्द्राय
चकारः पुनरस्यैव समुच्चयार्थः तेनाशीर्विवक्षायामपि षष्ठी वा पिनाचतुर्थ्येव य
थास्यात् स्वस्ति गोभ्यो भूयात् स्वस्ति ब्राह्मणेभ्यो ॥ मन्यकर्म्मण्यनादरे विभाषाप्रा।

णिषु मन्यतेः कर्म्मण्यनकर्म्मणि प्राणिषु विवर्जिते विभाषा चतुर्थी विभ
क्तिर्भवति अनादरे गम्यमाने अनादरस्तिरस्कारः न त्वा तृणं मन्ये न त्वा तृणाय मन्ये
न त्वा बुसं मन्ये न त्वा बुसाय मन्ये मन्यतेरिति ग्रहणं किम् न त्वा तृणं चिन्तयामि विक
रणनिर्देशः किम् न त्वा तृणं मन्यसे अनादर इति किम् अश्मानं दृषदं मन्ये मन्ये का
ष्ठमलाबुं बलम् अन्यायान्तस्तत्त्वं मन्ये यस्य माता न पश्यति यदेतत् प्राणिविवर्जिते
तत्र नावादिष्विति वक्तव्यम् व्यवस्थितविभाषा विज्ञेया न त्वा नावं मन्ये यावत्तीर्णं
नाव्यम् न त्वान्नं मन्ये यावद्भुक्तं श्राद्धं न त्वा काकं मन्ये न त्वा शृगालं मन्ये इह चतु
र्थी भवति न त्वा शुकं मन्ये न त्वा शुने मन्ये युष्मदः कस्मान्न भवति एतदपि हि मन्यतेः
कर्म व्यवस्थितविभाषाविज्ञानादेव न भवति कर्तृकरणयोस्तृतीया कर्तरि
करणे च कारके तृतीया विभक्तिर्भवति कर्तरि देवदत्तेन कृतम् यज्ञदत्तेन कृतम्
करणे दात्रेण लुनाति परशुना छिनत्ति तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्या
नम् प्रकृत्याभिरूपः प्रकृत्या दर्शनीयः प्रायेण याज्ञिकः गार्ग्योऽस्मि गोत्रेण समे

का॰
वृ॰ प्र॰
८५

नयावतिविषमेणधावति द्विद्रोणेन धान्यं क्रीणाति पंचकेन पशून्क्रीणाति स
हयुक्तेऽप्रधाने सहार्थेन युक्तेऽप्रधाने तृतीया विभक्तिर्भवति पुत्रेण सहागतः
पुत्रेण सह स्थूलः पुत्रेण सह गोमान् पितरञ्चक्रियादिसम्बन्धः शब्देनोच्यते
पुत्रस्य तु प्रतीयमान इति तस्याप्राधान्यम् सहार्थेन च योगविधानात् पर्यायप्रयो
गेऽपि भवति पुत्रेण साकम् पुत्रेण सार्धम् इति विनापि शब्दप्रयोगेन भवति वृद्धो
यूनेति अप्रधान इति किम् शिष्येण सहोपाध्यायस्य गौः येनाङ्गविकारः अ
ङ्गशब्देनाङ्गसमुदाय एवाभिधीयते येनेति च तदवयवो हेतुत्वेन निर्दिश्यते ये-
नावयवेन विकृतेनाङ्गिनो विकारो लक्ष्यते तत्र तृतीया विभक्तिर्भवति अक्ष्णा
काणः पादेन खञ्जः पाणिना कुणिः अवयवद्वारेण समुदायो व्यपदिश्यते अ
ङ्गविकार इति किम् अक्षि काणमस्य इत्थंभूतलक्षणे किञ्चित्प्रकारं प्राप्त इ
त्थंभूतः तस्य लक्षणमित्थंभूतलक्षणम् तत्र तृतीया विभक्तिर्भवति अपि भवा
न्कमण्डलुना छात्रमद्राक्षीत् छात्रेणोपाध्यायम् शिखया परिव्राजकम्

इद्धन भवति कर्मेत्युपाणिनिव्याकरणे इति लक्षणाप्समसमासेन्तर्भूतत्वात् संज्ञोन्यतर
स्यांकर्मणि संपूर्वस्य जानातेः कर्मणि कारके द्वितीया यथाप्राप्तमन्यतरस्यां तृ
तीया विभक्तिर्भवति मात्रा संजानीते मातरं संजानीते पित्रा संजानीते पितरं संजानी
ते हेतौ फलसाधनयोग्यः पदार्थो हेतुरित्युच्यते तद्वाचिनस्तृतीया विभक्तिर्भ
वति धनेन कुलम विद्यया यशः कन्यया शोकः अकर्तर्यृणे पंचमी हेताविति
वर्तते कर्तृवर्जिते यदृणं हेतुः ततः पंचमी विभक्ति भवति तृतीयापवादो योगः श
ताद्बद्धः सहस्राद्बद्धः अकर्तरीति किम शतेन बन्धितः शतस्य ऋणं भवति प्रयोजक
त्वात्कर्तृसंज्ञः विभाषा गुणेस्त्रियाम हेताविति वर्तते गुणे हेतावस्त्रीलिंगे वि
भाषा पंचमी विभक्ति भवति जाड्याद्बद्धः जाड्येन बद्धः पाण्डित्यान्मुक्तः पाण्डित्या
तेन मुक्तः पाण्डित्यान्मुक्तः पाण्डित्येन मुक्तः गुणइति किम धनेन कुलम अ
स्त्रियामिति किम बुद्ध्या मुक्तः प्रज्ञया मुक्तः षष्ठी हेतुप्रयोगे हेतुशब्दस्य प्र
योगे हेतौ द्योत्ये षष्ठी विभक्तिर्भवति अन्नस्य हेतोर्वसति अध्ययनस्य हेतोर्वसति

का॰
वृ॰
५९

भिक्षाणांहेतोर्वसति सर्वनाम्नस्तृतीयाच सर्वनाम्नोहेतुप्रयोगेतृतीयाविभक्ति
र्भवतिषष्ठीचसर्वेणषष्ठीमेवप्राप्तायाम इदंवचनमारभ्यतेकस्यहेतोर्वसति
केनहेतुनावसतियस्यहेतोर्वसतियेनहेतुनावसतिनिमित्तकारणहेतुषुसर्वा
साप्रायदर्शनम किंनिमित्तंवसतिकेननिमित्तेनवसतिकस्मैनिमित्तायवा
सतिकस्मान्निमित्ताद्वसतिकस्यनिमित्तस्यवसतिकस्मिन्निमित्तेवसतिएवंकारणे
ष्वुदाहार्यम अर्थग्रहणंचैतम पर्यायोपादानेनतुस्वरूपविधर्माविज्ञायीतितेनेहा
पिभवतिकिंप्रयोजनंवसतिकेनप्रयोजनेनवसतिकस्मैप्रयोजनायवसतिकस्मा
त्प्रयोजनाद्वसतिकस्यप्रयोजनस्यवसतिकस्मिन्प्रयोजनेवसति अपादानेपंच
मी अपादानकारकेपंचमीविभक्तिर्भवति ग्रामादागच्छतिपर्वतादवरोहति।
वृकेभ्योविभेतिअध्ययनात्पराजयतेमार्थाद्धीनःरक्षात्पतितःस्थाल्याउद्धरतिपं
चमीविधानेल्यल्लोपेकर्मण्युपसंख्यानं प्रासादमारुह्यप्रेक्षते प्रासादात्प्रेक्षते
अधिकरणेचोपसंख्यानम आसनेउपविश्यप्रेक्षते आसनात्प्रेक्षते शयनात्प्रे

ल्यते ग्रामाद्याख्यानयोश्च पंचमी वक्तव्या गवीधुमतः संकाशं चत्वारि योजनानि कार्त्ति
क्या आग्रहायणी मासे तद्युक्तात्काले सप्तमी वक्तव्या कार्त्तिक्या आग्रहायण्यां मा
से अध्वनः प्रथमा च सप्तमी वक्तव्या गवीधुमतः संकाशं चत्वारि योजनानि चत्वर्षु ।
योजनेषु अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते अन्य आरात् इतर ऋ
ते दिक्शब्द अञ्चूत्तरपद आच् आहि इत्येतैर्योगे पंचमी विभक्तिर्भवति अन्य इ
त्यर्थग्रहणम् तेन पर्यायप्रयोगेपि भवति अन्यो देवदत्तात् भिन्नो देवदत्तात् अर्था
न्तरं देवदत्तात् विलक्षणो देवदत्तात् आरात् इति दूरान्तिकयोर्वर्त्तते तत्र दूरान्तिका
र्थैः षष्ठ्यन्यतरस्यामिति प्राप्ते पंचमी विधीयते आराद्देवदत्तात् आराद्यज्ञदत्तात्
इतर इति निर्दिश्यमानप्रतियोगिपदार्थ उच्यते इतरो देवदत्तात् इतरो यज्ञदत्तात्
ऋते इत्ययं वर्जनार्थः ऋते देवदत्तात् ऋते यज्ञदत्तात् दिक्शब्दः पूर्वो ग्रामात् ।
उत्तरो ग्रामात् प्राग्ग्रहणं देशकालवृत्तिनापि योगे यथा स्यात् इतरथा हि दि
ग्वृत्तिनैव स्यात् इयमस्याः पूर्वेति अञ्चूत्तरपद प्राग्ग्रामात् नन्वस्यापि दिक्

का
वृ
५८

दृषवषष्ठ्यन्तमर्थप्रत्ययेनेतिवर्त्तते तस्यायमथकर्थः आचू दक्षिणाग्रामात् उत्तरा
ग्रामात् दक्षिणाहिग्रामात् उत्तराहिग्रामात् षष्ठ्यन्तमर्थप्रत्ययेन दक्षिणोत्तरा
भ्यामतस्सुजितिवर्त्तते अन्तसर्थेनप्रत्ययेनयुक्ते षष्ठीविभक्तिर्भवति दक्षिणतोग्रा
मस्य उत्तरतोग्रामस्य पुरतोग्रामस्य पुरस्ताद्ग्रामस्य उपरिग्रामस्य उपरिष्टाद्ग्रामस्य
एनपाद्वितीया एनबन्यतरस्यामदूरेपंचमीइतिवर्त्तते तेनयुक्ते द्वितीयाविभ
क्तिर्भवति पूर्वेणषष्ठीप्राप्तायामिदंवचनम् दक्षिणेनग्रामम् उत्तरेणग्रामम् षष्ठ्य
पीष्यते दक्षिणेनग्रामस्य उत्तरेणग्रामस्य तदर्थं योगविभागः कर्तव्यः पृथग्विना
नानाभिस्तृतीयान्यतरस्याम् पंचमीग्रहणमनुवर्त्तते पृथक् विनानानाइत्येतैर्यो
गेतृतीयाविभक्तिर्भवति अन्यतरस्याम् पृथग्देवदत्तेन पृथग्देवदत्तात् विनादेवद
त्तेनविनादेवदत्तात् नानादेवदत्तेननानादेवदत्तात् पृथग्विनानानाभिरितियो
गविभागो द्वितीयार्थः विनावातेन विनावर्षं विद्युत्प्रपतनं विनाविनाहस्तिकृतं दो
षं केनेमौ पातितौ तोद्भुमौ विनावातेन विनापितृदैवयोः पकरणं विनाविनादैवपकृतं दो

५८

षंकेनैमौ मासितो नैरौ करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य स्तोक
अल्पकृच्छ्रकतिपय इत्येतेभ्यः असत्त्ववचनेभ्यः करणे कारके अन्यतरस्यां तृतीया
विभक्तिर्भवति पंचम्यत्र उपदिष्टे विपरीयते तत्र तृतीयात्र करणादित्येव सिद्धा यदा न पंचमी सा
त्र करणेन तया विवक्ष्यते नद्रव्यं तदा स्तोकादीनाम असत्त्ववचनता स्तोकान्मुक्तः
स्तोकेन मुक्तः अल्पान्मुक्तः अल्पेन मुक्तः कृच्छ्रान्मुक्तः कृच्छ्रेण मुक्तः कति
पयान्मुक्तः कतिपयेन मुक्तः असत्त्ववचनस्येति किम् स्तोकेन विषेण हतः अ
ल्पेन मधुना मत्तः करणादिति किम् क्रियाविशेषणे कर्मणि मा भूत् स्तोकं वल
ति दूरान्तिकार्थैश्चान्यतरस्याम् पंचम्यनुवर्तते दूरान्तिकार्थैः शब्दैर्योगे षष्ठी।
विभक्तिर्भवति अन्यतरस्यां दूरं ग्रामात् दूरं ग्रामस्य विप्रकृष्टं ग्रामात् विप्रकृष्टं
ग्रामस्य अभ्याशं ग्रामात् अभ्याशं ग्रामस्य अन्यतरस्यां ग्रहणं पंचम्यर्थम् इतरथा।
हि पक्षे तृतीया स्यात् दूरान्तिकार्थेभ्यो द्वितीया च पंचम्यनुवर्तते दूरान्तिकार्थे
भ्यः शब्देभ्यः द्वितीया विभक्तिर्भवति पंचमी च तृतीया च सप्तमी यत्ते दूरं ग्रामस्य दू

द्ग्रामस्य दूरेण ग्रामस्य अन्तिके ग्रामस्य अन्तिकात् ग्रामस्य अन्तिकेन ग्रामस्य श्रा।
तिपदिकार्थे विधानम् असत्ववचनग्रहणं चानुवर्त्तते सत्ववचनेभ्यो हि यथायथं
विभक्तयो भवन्ति दूरः पन्थाः दूराय पथे देहि दूरस्य पथः स्वम् सप्तम्यधिकरणे च
अधिकरणे कारके सप्तमी विभक्तिर्भवति चकाराद्दूरान्तिकार्थेभ्यश्च कटे आस्ते
शकटे आस्ते दूरान्तिकार्थेभ्यः खल्वपि दूरे ग्रामस्य अन्तिके ग्रामस्य दूरान्तिका
र्थेभ्यश्च तस्रो विभक्तयो भवन्ति द्वितीया तृतीया पंचमी सप्तम्यः सप्तमीविधानेक्त
स्पत्विषयस्य कर्मण उपसंख्यानम् अधीती व्याकरणे परिगणिती याज्ञिक्ये आ
म्नाती छन्दसि साधुप्रयोगे सप्तमी वक्तव्या साधुर्देवदत्तो मातरि असाधुः पितरि।
कारकार्हाणां च कारकत्वे सप्तमी वक्तव्या ऋद्धेषु भुंजानेषु दरिद्रा आसते ब्राह्मणे
षु तरत्सु वृषला आसते अकारकार्हाणां कारकत्वे सप्तमी वक्तव्या दरिद्रेष्वासीने
षु ऋद्धा भुंजते वृषलेष्वासीनेषु ब्राह्मणास्तरन्ति तद्विपर्यासे च सप्तमी वक्तव्या ऋ
द्धेष्वासीनेषु दरिद्रा भुंजते ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति निमित्तात्कर्मसंयो

गोसप्तमीवक्तव्या चर्मणिद्वीपिनंहन्तिदन्तयोर्हन्तिकुंजरंकेशेषुचमरींहन्तिसी
म्निपुष्कलकोहतःकर्मयोगादितिकिम् वेतनेनधान्यंलुनाति यस्यचभावेनभा
वलक्षणम् सप्तमीतिवर्त्ततेभावःक्रियायस्यभावेनक्रिययाक्रियान्तरंलक्ष्य
तेततोभाववतःसप्तमीविभक्तिर्भवतिप्रसिद्धाचक्रियाक्रियान्तरंलक्षयति
गोषुदुह्यमानासुगतादुग्धास्वागताअग्निषुहूयमानेषुगतःहुतेष्वागतःभावेने
तिकिम् योजटाभिःसभुंक्तेपुनर्भावग्रहणंयोभुंक्तेपुनर्भाग्रहणंयोभुंक्तेसदेव
दत्तः षष्ठीचानादरे पूर्वेणसप्तम्यांप्राप्तायांषष्ठीविधीयतेचकारात्सप्तम्यपिभवति
अनादरोधिकारेभावलक्षणेभाववतःषष्ठीसप्तम्यौविभक्तीभवतःरुदतःप्रा
व्राजीत् रुदतिप्राव्राजीत् क्रोशतःप्राव्राजीत् क्रोशतिप्राव्राजीत् क्रोशत्सु
प्रव्रजितस्तदर्थः स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च षष्ठीसप्तम्यौ
वैतैतेस्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतइत्येतैर्योगेषष्ठीस-
प्तम्यौविभक्तीभवतःगवांस्वामीगोषुस्वामीगवामीश्वरःगोष्वीश्वरःगवामधिप

तिः गोष्वधिपतिः गवां दायादः गोषु दायादः गवां साक्षी गोषु साक्षी गवां प्रतिभूः गोषु
प्रतिभूः गवां प्रसूतः गोषु प्रसूतः षष्ठ्यां प्राप्तायां पक्षे सप्तमीविधानार्थं वचनम्
आयुक्तकुशलाभ्यां चासेवायाम् षष्ठीसप्तम्यौ वर्त्तेते आयुक्तो व्यापृतः कुशलो
निपुणः ताभ्यां योगे आसेवायां गम्यमानायां षष्ठीसप्तम्यौ विभक्ती भवतः आसे
वा तात्पर्यम् आयुक्तः कटकरणे आयुक्तः कटकरणस्य कुशलः कटकरणे कु
शलः कटकरणस्य आसेवायामिति किम् आयुक्तो गौः शकटे ईषद्युक्त इत्यर्थः
तत्र सप्तम्येवाधिकरणे भवति यतश्च निर्धारणं षष्ठीसप्तम्यौ वर्त्तेते जातिगुणक्रि
याभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतो निर्धारणं तत्र षष्ठीसप्तम्यौ
विभक्ती भवतः मनुष्याणां क्षत्रियः शूरतमः मनुष्येषु क्षत्रियः शूरतमः गवां कृष्णा
संपन्नक्षीरतमा अध्वगानां धावन्तः शीघ्रतमा अध्वगेषु धावन्तः शीघ्रतमाः पञ्च
मी विभक्ते यतश्च निर्धारणमिति वर्त्तते षष्ठीसप्तम्यपवादोऽयं योगः विभागो विभक्तं
यस्मिन्निर्धारणाश्रये विभक्तमस्ति ततः पञ्चमी विभक्तिर्भवति माथुराः पाटलिपु

चकेभ्यग्राप्यतवः सङ्क्रमाद साधुनिपुणाभ्यामर्च्चायां सप्तम्यप्रतेः साधुनिपुण
इत्येताभ्यां योगे अर्च्चायां गम्यमानायां सप्तमी विभक्तिर्भवति न चेत्प्रतिः प्रयु
ज्यते मातरि साधुः पितरि साधुः मातरि निपुणः पितरि निपुणः अर्च्चायामिति किं नि॰
साधुर्भृत्यो राज्ञः तत्त्वकथनेन भवति अप्रतेरिति किम् साधुर्देवदत्तो मातरं प्रति
अप्रत्यादिभिरिति वक्तव्यम् साधुर्देवदत्तो मातरं परि मातरमनु प्रसितोत्सुका
भ्यां तृतीया च प्रसित उत्सुक इत्येताभ्यां योगे तृतीया विभक्तिर्भवति चकारात्स
प्तमी च प्रसितः प्रसक्तः यस्तत्र नित्यमवबेयः स उच्यते केशैः प्रसितः केशेषु प्रसितः के
शैरुत्सुकः केशेषूत्सुकः नक्षत्रे च लुपि तृतीयासप्तम्यौ वर्त्तेते लुबन्तान्नक्षत्रशब्दा
ह्रात तृतीयासप्तम्यौ विभक्ती भवतः पुष्येणापायसमश्नीयात् पुष्ये पायसमश्नीयात्
मघाभिः पललौदनम् मघासु पललौदनम् नक्षत्र इति किम् पञ्चालेषु वसति
लुपीति किम् मघासु यत्तत्कस्मान्न भवति अद्य पुष्यः अद्य कृत्तिका अद्य पिकचाला
इति वर्त्तते वचनेन पक्षे तृतीयाविधानार्थम् प्रातिपदिकार्थलिङ्गपरिमाणवच

का॰ वृ॰ प्र॰ ५४

नमात्रे प्रथमा प्रातिपदिकार्थः सत्ता लिङ्गं स्त्रीपुंनपुंसकानि परिमाणं द्रोणः खारी
आढकमिति वचनमेकत्वद्वित्वबहुत्वानि प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे
प्रथमाविभक्तिर्भवति प्रातिपदिकार्थे उच्चैः नीचैः लिङ्गग्रहणं किम् कुमारी वृक्षः
कुण्डमित्यत्रापि यथा स्यात् परिमाणग्रहणं किम् द्रोणः खारी आढकमित्यत्रापि
यथा स्यात् वचनग्रहणं किम् उक्तेष्वप्येकत्वादिषु यथा स्यात् एकः द्वौ बहवः प्राति
पदिकग्रहणं किं निपातस्यानर्थकस्य प्रातिपदिकत्वमुक्तं तत्रापि यथा स्यात् प्रल
वते प्रधानात्कृति सम्बोधने च आभिमुख्यकरणं सम्बोधनम् तदधिके प्राति
पदिकार्थे प्रथमा न प्राप्नोतीति वचनमिदमारभ्यते सम्बोधने च प्रथमाविभक्तिर्भव
ति हे देवदत्त हे देवदत्तौ हे देवदत्ताः आमन्त्रितम् सम्बोधने या प्रथमा विहिता तदन्तं
शब्दरूपमामन्त्रितसंज्ञं भवति तथा चैवमुदाहृतम् आमन्त्रितप्रदेशाः आमन्त्रित
स्यैवमादयः एकवचने सम्बुद्धिः आमन्त्रितप्रथमायाः एकवचनं सम्बुद्धिसंज्ञं भ
वति हे पटो देवदत्त सम्बुद्धिप्रदेशाः षड्ह्रस्वात्सम्बुद्धेरित्येवमादयः षष्ठी शेषे ॥

कर्मादिभ्योः प्रातिपदिकार्थव्यतिरेकः स्वस्वामिसंबंधादिः शेषः तत्र षष्ठी विभक्ति
र्भवति राज्ञः पुरुषः पशोः पादः पितुः पुत्रः ज्ञोविदर्थस्य करणे जानातेरवि
दर्थस्याज्ञानार्थस्य करणे कारके षष्ठी विभक्तिर्भवति सर्पिषो ज्ञानीते मधुनो
जानीते सर्पिषा करणभूतेन प्रवर्त्तत इत्यर्थः प्रवृत्तिवचनो जानातिरविदर्थः
अथवा मिथ्याज्ञानवचनः सर्पिषि रक्तः प्रतिहतो वा चित्तभ्रमविभ्रान्त्या तदात्म
नासर्वमेव ग्राह्यं प्रतिपद्यते मिथ्याज्ञानमज्ञानमेव अविदर्थस्येति किम् स्वरेण पु
त्रं जानाति ॥ अधीगर्थदयेषां कर्मणि शेषे इति वर्तते अधीगर्थाः स्मरणार्थाः
दयदानगतिरक्षणहिंसादानेषु ईशऐश्वर्ये एतेषां कर्मणि कारके शेषत्वेन वि
वक्षिते षष्ठी विभक्तिर्भवति मातुरध्येति मातुः स्मरति सर्पिषो दयते सर्पिष
ईष्टे कर्मणीति किम् मातृगुणैः स्मरति शेष इत्येव मातरं स्मरति ॥ कृञः प्रतिय
त्ने ॥ सतो गुणाधानं प्रतियत्नः करोतेः कर्मणि कारके प्रतियत्ने गम्यमाने षष्ठी
विभक्तिर्भवति एधोदकस्योपस्कुरुते काण्डगुणस्योपस्कुरुते [illegible]स्योपा

स्कुरुते प्रतियत्न इति किं कटं करोति कर्म्मणीत्येव एधोदकस्योपस्कुरुते प्रजया
पीम्र इत्येव एधोदकमुपस्कुरुते रुजार्थानां भाववचनानामज्वरेः रुजार्थानां भा
ववचनानां भावकर्तृकाणां ज्वरवर्जितानां कर्म्मणि कारके षष्ठी विभ
क्तिर्भवति चौरस्य रुजति चौरस्योद्विजते रुजाज्ञानामिति किम् जातिजीवन्त
मानन्दो नरं वर्षशतादपि भाववचनानामिति किम् नदी कूलानि रुजति अज्व
रेरिति किम् चौरं ज्वरयति ज्वरः अज्वरतिसन्ताप्योरिति वक्तव्यम् चौरं सन्तापय
ति रोष इत्येव चौरं रुजति आशिषि नाथः नाथृ याच्ञोपतापैश्वर्याशीःष्वस्य
तेरस्याशीर्विषयस्य कर्म्मणि कारके षष्ठी विभक्तिर्भवति सर्पिषो नाथते मधुनो
नाथते आशिषीति किम् माणवकमुपनाथति अङ्ग पुत्राधीष्व जासिनिप्रह
णनाटक्राथपिषां हिंसायाम् जासि नि प्रहण नाट क्राथ पिष इत्येतेषां
हिंसाक्रियाणां कर्म्मणि कारके षष्ठी विभक्तिर्भवति जस हिंसायाम् जसन्ता
डन इति चुरादौ पठ्यते तेन सिद्धं ग्रहणं नटेर्वादिकस्य जस्तमोतानाण इति चौरस्यो

ति

त्तासयति वृषलस्योज्जासयति निप्रहणा इति संघातविगृहीतविपर्यस्तग्रहणम्
चौरस्य निप्रहन्ति चौरस्य संहन्ति चौरस्य प्रहन्ति चौरस्य प्रणिहन्ति चौरस्योन्नाट
यति वृषलस्योन्नाटयति चौरस्य क्राथयति निपातनाद्वृद्धिरयं घटादौ पठ्यते स्व
थ क्रथ क्लथ चक्रथ हिंसार्था इति तत्र घटादयो मितादृति ह्रस्वत्वं स्यात् चौरस्य
पिनष्टि वृषलस्य पिनष्टि हिंसायामिति किम् धानाः पिनष्टि शेषत्वे व चौरमुज्जा
सयति व्यवहृपणोः समर्थयोः व्यवहृपणोः इत्येतयोः समानार्थयोः कर्मणि
कारके षष्ठी विभक्तिर्भवति घृते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः
शतस्य व्यवहरते सहस्रस्य व्यवहरते शतस्य पणते सहस्रस्य पणते अत्रायप्रत्य
यः कस्मान्न भवति स्तुत्यर्थस्य पणतेरायप्रत्यय इष्यते समर्थयोरिति किम् शला
कां व्यवहरति विक्षिपतीत्यर्थः ब्राह्मणान् पणायति स्तौतीत्यर्थः शेषत्वे व शतं
पणते सहस्रं व्यवहरति दिवस्तदर्थस्य व्यवहृपणोः समानार्थस्य दीव्यतेः कर्म
णि कारके षष्ठी विभक्तिर्भवति शतस्य दीव्यति सहस्रस्य दीव्यति तदर्थस्येति कि

का॰
वृ॰ प्र॰
५८

ब्राह्मणन्दीव्यति योगविभाग उत्तरार्थः विभाषोपसर्गे दिवस्तदर्थ-
स्येति षष्ठ्यां प्राप्तायां सोपसर्गस्य विकल्प उच्यते उपसर्गे सति दिवक्कर्मणि षष्ठी
विभक्तिर्भवति विभाषा शतं प्रतिदीव्यति शतस्य प्रतिदीव्यति सहस्रं प्रतिदी-
व्यति सहस्रस्य प्रतिदीव्यति उपसर्ग इति किम् शतस्य दीव्यति न तदर्थस्येव श-
लाकां प्रतिदीव्यति द्वितीया ब्राह्मणे ब्राह्मणे विषये प्रयोगे दिवस्तदर्थस्य क-
र्मणि कारके द्वितीया विभक्तिर्भवति गामस्य तदहः सभायां दीव्येयुः अनुपसर्ग-
स्येति षष्ठ्यां प्राप्तायां द्वितीया विधीयते उपसर्गे सति केचिदव्यवस्थितविभाषा-
यामिच्छन्ति प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने प्रेष्य इत्येष्यते दैवादिकस्य लोण्म-
ध्यमपुरुषैकवचनम् तत्साहचर्यात् ब्रुविरपि तद्विषय एव गृह्यते प्रेष्यब्रुवोः ह-
विषः कर्मणि कारके षष्ठी विभक्तिर्भवति देवतासम्प्रदाने सति अग्नये छागस्य
हविषो वपाया मेदसः प्रेष्य अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रूहि प्रेष्य-
ब्रुवोरिति किम् अग्नये छागं हविर्वपां मेदो जुहुधि हविष इति किम् अग्नये गो-

मयाल्पेष देवतासंप्रदान इति किम् माणवकाय पुरोडाशान्प्रेष्य हविषः प्र
स्थितः प्रतिषेधो वक्तव्यः इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य चतुर्थ्या
र्थे बहुलं छन्दसि छन्दसि विषये चतुर्थ्यर्थे बहुलं षष्ठी विभक्तिर्भवति पुरुष
मृगश्चन्द्रमसः पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पतिभ्यः वन
स्पतीनाम बहुलग्रहणं किं कृष्णो नाभ्यै हि भवते कृष्णो लोहितश्चेति षष्ठ्यर्थे चतुर्थी वक्तव्या
या खर्वेण पिबति तस्यै खर्वो जायते याऽदतो धावति तस्यै श्यावदन् या नखानि निकृ
न्तति तस्यै कुनखी या कृणत्ति तस्यै काणो याऽभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिख
ति लिखति तस्यै खलतिः अत्र षष्ठ्यर्थे चतुर्थी यजेश्च करणे यजेर्धातोः करण
कारके छन्दसि विषये बहुलं षष्ठी विभक्तिर्भवति घृतस्य यजते घृतेनेमे यजा
घृतेन यजते सोमस्य सोमस्य यजते सोमेन यजते कृत्वोर्थप्रयोगे कालेऽधिकर
णे षष्ठी विभक्तिर्भवति पञ्चकृत्वोऽह्नो भुङ्क्ते द्विरह्नो भुङ्क्ते कृत्वोर्थग्रहणं किम् अ
हनि शयाने रात्रौ शेते प्रयोग इति किम् अह्नि भुङ्क्ते रात्रौ भुङ्क्ते गम्यते द्विस्त्रि

का॰
वृ॰
८७

नरचिनवर्थं प्रयुज्यमाने भवति कालः इति किम् द्विः कांस्यपात्र्यां भुंक्ते अधिकरण
इति किम् द्विरह्नाभुंक्ते शेषइत्येव द्विरहन्यधीते कर्तृकर्मणोः कृति कृत्प्रयो
गे कर्तरि कर्मणि च षष्ठी विभक्तिर्भवति भवतः शायिका भवतः सक्तूनां पायकः
कर्तृकर्मणोरिति किं शास्त्रेण भेत्ता कृतीति किम् तद्धितप्रयोगे माभूत् कृत
पूर्वी कटम् भुक्तपूर्वी ओदनम् शेषइति निवृत्तं पुनः कर्मग्रहणात् इतरथा
हि कर्तरि च कृतीति ब्रूयात् उभयप्राप्तौ कर्मणि उभयोः षष्ठीप्राप्तानि यस्मिन्
उभयप्राप्ताविति बहुव्रीहिः उभयप्राप्तिर्यस्मिन् कृति सोयमुभयप्राप्तिः तत्र कर्म
ण्येव षष्ठी विभक्तिर्भवति न कर्तरि आश्चर्यो गवां दोहः अगोपालकेन साधुव
लपयसः पानं यज्ञदत्तेन बहुव्रीहिविज्ञानादिह नियमो न भवति आश्चर्यमि
दमोदनस्य नाम पाकः ब्राह्मणानां च प्रादुर्भावः अकाकारयोरिति अकाकार
योः प्रयोगे नेति वक्तव्यम् भेदिका देवदत्तस्य काष्ठानां चिकीर्षा विष्णुमित्रस्य
कटस्य शेषे विभाषा अकाकारयोः स्त्रीप्रत्यययोर्ग्रहणं तदपेक्षा शेषः स्त्रीप्रत्य

८७

यएवमस्त्वेते विचित्रे सूत्रस्य कृतिः पाणिनिना विचित्रस्य कृतिः पाणिनेः केचिद
विशेषेणैव विभाषामिच्छन्ति शोभना नाम खलु शाम्भनमाचार्यपाणिना क्तस्य च व
र्तमाने नलोकाव्ययनिष्ठाखलर्थतृनामिति प्रतिषेधे प्राप्ते पुनः षष्ठी विधीयते क्तस्य च वर्तमान
कालविहितस्य प्रयोगे षष्ठी विभक्तिर्भवति राज्ञां मतः राज्ञां बुद्धः राज्ञां
पूजितः क्तस्येति किम् ओदनं पचमानः वर्तमान इति किम् ग्रामं गतः नपुंसके
भावे उपसंख्यानम् छात्रस्य हसितम् मयूरस्य नृत्तम् कोकिलस्य व्याहृतम् शे
षविज्ञानात् सिद्धं तथा च कर्तरि विवक्षायां तृतीया भवति छात्रेण हसितमिति
अधिकरणवाचिनश्च क्तोधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य इति विहित
तस्य प्रयोगे षष्ठी विभक्तिर्भवति अयमपि प्रतिषेधापवादे योगः इदमेषामा
सितम् इदमेषां यातम् इदमेषां शायितम् इदमेषां भुक्तम् इदं ननकपेयातं इ
दमेषां पराक्रान्तं सिंहनामिवपल्वलम् नलोकाव्ययनिष्ठाखलर्थतृनाम् क
र्मणोः कृतीति षष्ठी प्राप्ता प्रतिषिध्यते ल उ उक अव्ययनिष्ठाखलर्थतृन

का॰
वृ॰ प्र
५८

इत्येतेषां प्रयोगे षष्ठी विभक्तिर्न भवति। ल इति शानन्शानचौ कानः क्वसु कि किनौ
वरत्यन्ते ओदनं पचन् ओदनं पचमानः ओदनं पेचानः ओदनं पेचिवान् दद्धिः सोमं
पपिः सोमम् उ कटं चिकीर्षुः ओदनं बुभुक्षुः कन्यामलंकरिष्णुः खमुत्पतिष्णुः ओ
का आगामुकं वाराणसीं रक्ष आहुः उक प्रतिषेधे कमेर्भाषायाम प्रतिषेधः दा
स्याः कामुकः अव्यय कटं कृत्वा ओदनं भुक्त्वा अव्यय प्रतिषेधे तोसुन्कसुनोर प्र
तिषेधः पुरा सूर्यस्योदेतोराधेयः पुरा क्रूरस्य विसृपो विरप्शिन् निष्ठा ओदनं भुक्त
वान् देवदत्तेन भुक्तं खलर्थ ईषत्करः कटो भवता ईषत्पानः सोमो भवता तृ
न्निति प्रत्याहारग्रहणम् लटः शानन्शानचावित्यत आरभ्य तृन्नो नकारा न तेन शा
कानच्क्वन्तानामपि प्रतिषेधो भवति सोमं पवमानः नडमाघ्नानः अधीयन्पारा
यणम् कर्त्ता कटान् वदिता जनापवादान् भिषद्वान्देवी वचनम् चौरस्य द्विष
न् चौरं द्विषन् अकेनोर्भविष्यदाधमर्ण्ययोः अकस्य भविष्यत्काले विहितः
तस्य इन्तस्य भविष्यति आधमर्ण्ये विहितस्य प्रयोगे षष्ठी विभक्तिर्न भवति कटं का

रकोव्रजति डोह्नं भोजकोव्रजति इन्नः खलपिग्रामंगामीग्रामगामी ग्रामयमल्प
मानेदायीसहस्रंदायीभविष्यदाधमर्ण्ययोरितिकिं यवान्लावकः स्रवमप
कारीकाटस्यकृत्कक्रमात्रभवतिष्यदपिकारविहितस्याकस्पदंग्रहणम् ॥
कृत्यानांकर्त्तरिवा कर्त्तृकर्मणोः कृतीतिनित्येषष्ठीप्राप्ताकर्त्तरिविकल्प्यते
कृत्यानांकर्त्तरिवाषष्ठीविभक्तिर्भवति भवताकटःकर्त्तव्यःकर्त्तरीतिकिम ।
गेयोमाणवकः साम्नाम् उभयप्राप्तौकृतेषष्ठ्याःप्रतिषेधोवक्तव्यः उभयप्राप्ता
विति क्रश्चर्यागवान्दोहदेनैनतव्याग्राममजायक्तादलेन तव्यार्थेरतलोपमाभ्यां
तृतीयान्यतरस्याम् तव्यार्थैः प्राप्नुयोगेतृतीयाविभक्तिर्भवति अन्यतरस्यां
तुलोपमाभ्यांवर्जयित्वाप्राप्तविषयेविधानात् तयायुक्तेषष्ठीविभक्तिर्भव
ति तुल्योदेवदत्तेन तुल्योदेवदत्तस्य सदृशोदेवदत्तेन सदृशोदेवदत्तस्य अतु
लोपमाभ्यामितिकिम् तुलादेवदत्तस्यनास्ति उपमाकृष्णस्यनविद्यते वदि
वतेषुशिष्यन्यतरस्यामर्थ्यग्रहणमन्यत्रभावकारणात तस्यानुकर्षणार्थं इतरथा

का·
वृ·
५५

हितृतीयानकृष्णेन चतुर्थी चाशिष्यायुष्यमद्रकुशलसुखार्थहितैः आशि
षि गम्यमानायामायुष्यमद्रकुशलसुखार्थहितैरेतैर्योगे चतुर्थी विभ
क्तिर्भवति चकारो विकल्पानुकर्षणार्थः शेषे चतुर्थीविधानात् तया विमुक्ते
षष्ठी विभक्तिर्भवति आयुष्यं देवदत्तस्य भूयात् आयुष्यं देवदत्ताय चिरंजीवि
तं देवदत्तस्य चिरंजीवितं देवदत्ताय भद्रं देवदत्तस्य भद्रं देवदत्ताय मद्रं देवदत्तस्य म
देवदत्ताय कुशलं देवदत्तस्य कुशलं देवदत्ताय निरामयं देवदत्तस्य निरामयं देव
दत्तस्य निरामयं देवदत्ताय सुखं देवदत्तस्य सुखं देवदत्ताय शं देवदत्तस्य शं शो
देवदत्ताय अर्थो देवदत्तस्य अर्थो देवदत्ताय प्रयोजनं देवदत्तस्य प्रयोजनं देवद
त्ताय हितं देवदत्तस्य हितं देवदत्ताय पथ्यं देवदत्तस्य पथ्यं देवदत्ताय आशिषी
ति किम् आयुष्यं देवदत्तस्य तपः ॥ इति श्रीजयादित्यविरचितायां काशिका
यां वृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः ॥ द्विगुरेकवचनम् द्विगुः समासए
कवचनं भवति एकस्य वचनमेकवचनम् एकस्यार्थस्य वाचको भवतीत्यर्थः

५५

तदनेन प्रकारेण द्विगुरर्थे स्यैकवचनं विधीयते द्विगुरेकवद्भवतीति समाहा
रद्विगुश्च द्वंद्वश्च हूयोर्णानामस्य पंचमूलाः समाहृताः पंचमूली द्विमूली त्रि
र्थे स्यैकवद्द्वंद्वप्रयोगेष्वेकवचनं भवति पंचमूली इयं शोभना पंचराजा ॥
द्वन्द्वश्च प्राणितूर्यसेनांगानाम् एकवद्वचनमिति वर्तते प्राण्यंगस्य प्रत्येकं प
विसमासप्राप्तौ वाक्यवाचनिसंप्रयन्ते प्राण्यंगानां द्वन्द्व एकवद्भवति तथा तूर्यां
गानां सेनांगानां च प्राण्यंगानां तावत् पाणिपादम् शिरोग्रीवम् दन्तोष्ठ
म् तूर्यांगानाम् मार्दंगिकपाणविकम् वीणावादकपरिवादकम् सेनांगा
नां रथिकाश्वारोहम् रथिकपादातम् हस्त्यादिषु परत्वात् सह द्वन्द्वविभाष
या भवितव्यम् इतरेतरयोगसमाहारे च द्वंद्वो विहितः तत्र समाहारे सैक
त्वात् सिद्धमेवैकवचनम् इदं तु प्रकरणे विषयभागार्थं प्राण्यंगानां समा
हारे द्वन्द्व एव दधिपयः आदीनामितरेतरयोग एव वृक्षमृगादीनामुभय
त्रेभ ग्रनवादे चरणानाम् चरणाः शाखाः पाठा वा निमित्तकः पुरुषेषु वर्तते

चरणानां द्वन्द्व एकवद्भवति अनुवादे गम्यमाने प्रमाणान्तरावगतस्यार्थ
स्य शब्देन संकीर्तनमात्रमनुवादः। उदगात् कठकालापम्। प्रत्यष्ठात् कठकौथु
मं। कठकालापानामुदयः प्रतिष्ठा प्रमाणान्तरावगते यदा पुनः शब्देनानू
द्यते तदैतदुदाहरणम्। यदा तु प्रथमत एवोपदेशस्तदा प्रत्युदाहरणं भव
ति। अनुवाद इति किम्। उदगुः कठकालापाः। प्रत्यष्ठुः कठकौथुमाः। स्थेणोरद्य
तन्यां चेति वक्तव्यम्। स्थेणोरिति किम्। अनिन्दिषुः कठकालापाः। अद्यतन्या
मिति किं। उद्यन्ति कठकालापाः। अध्वर्युक्रतुरनपुंसकम्। अध्वर्यौ वेदे यस्य
विधानम् सोध्वर्युक्रतुः। क्रतुर्यज्ञः। अध्वर्युक्रतुवाचिनां शब्दानामनपुंसकलि
ङ्गानां द्वन्द्व एकवद्भवति। अध्वर्युक्रतुः अनपुंसके द्वन्द्व इति गौणो निर्देशः। अ
र्काश्वमेधम्। साह्नातिरात्रम्। पौण्डरीकातिरात्रं। अध्वर्युक्रतुरिति किम्। इषुव
ज्रौ। उद्भिद्बलभिदौ। अनपुंसकमिति किम्। वाजपेयराजसूये। इह कस्मान्न भव
ति दर्शपौर्णमासौ। क्रतुशब्दः सोमयागेषु रूढः। अध्ययनतोऽविप्रकृष्टाख्या

नो अध्ययनेननिमित्तेनयेषामविप्रकृष्टाख्याप्रत्यासन्नाआख्यातेषांद्वन्द्वएक
वद्भवतिपदकक्रमकम् क्रमकवार्त्तिकम् संपाठः पदानांक्रमस्यचपाठः
प्रत्यासन्नः अध्ययनत इतिकिम् पितापुत्रौ आचार्यदरिद्रौ अविप्रकृष्टाख्या
नामितिकिम् याज्ञिकवैयाकरणौ जातिरप्राणिनाम् जातिवाचिनांशब्दा
नांद्वन्द्वएकवद्भवतिप्राणिनोवर्जयित्वा आराशस्त्रि धानाशष्कुलि जा
तिरितिकिं नन्दकपाञ्चजन्यौ अप्राणिनामितिकिम् ब्राह्मणक्षत्रियविट्
शूद्राः नञिवयुक्तन्यायेन द्रव्यजातीनामयमेकवद्भावोनगुण क्रियाजाती
नाम् रूपरसगन्धस्पर्शाः गमनार्थंचनप्रमाणानिजातिपरत्वेचजातिप्राधान्या
मयमेकवद्भावोनतियतद्रव्यविवक्षायाम् बदरामलकानितिष्ठन्तीति ।
विशिष्टलिङ्गोनदीदेशोऽग्रामाः भिन्नलिङ्गानांनदीवाचिनांचशब्दानांदे
शवाचिनांचग्रामवर्जितानांद्वन्द्वएकवद्भवतिनयवयवोद्वन्द्वोनदीनामुदा
ते देशावयवश्चदेशाः नदीदेशः इत्यसमासनिर्देशएवायम् उध्यश्चइरावती

का॰
वृ॰
११

वुद्येरावति गंगाशोणं देशः खल्वपि कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं कुरु
कुरुजङ्गलम् दार्व्वाभिसारम् कश्मीराभिसारम् विशिष्टलिङ्ग इति किम् गं
गायमुने मद्रकेकयाः नदीदेशा इति किम् कुक्कुटमयूर्यौ अग्रामा इति कि
म् जाम्बवश्च शालूकिनी च जाम्बवशालूकिन्यौ नदीग्रहणम् अदेशत्वाज्जनपदो
हि देशः तथा च पर्वतानां ग्रहणं भवति केलासश्च गन्धमादनं च केलासग
न्धमादने ग्रामशब्दोऽत्र नगरस्य प्रतिषेधो वक्तव्यः इह मा भूत् मथुरापाटलिपु
त्रे उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः शौर्यं च नगरं केतवता च ग्रामः शौर्य
केतवते क्षुद्रजन्तवः अपठितपरिमाणाः क्षुद्राः क्षुद्रजन्तुवाचिनां शब्दानां
द्वन्द्व एकवद्भवति दंशमशकम् यूकालिक्षम् क्षुद्रजन्तव इति किम् ब्राह्म
णक्षत्रियौ क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः शतं वा प्रसृतौ येषां केचिदा
नकुलादपि अन्ये नकुलाद्वितीयमेव स्मृतिः प्रमाणमितरासां तद्विरोधात् ये
षां च विरोधः शाश्वतिकः विरोधो वैरम् शाश्वतिको नित्यः येषां च शाश्वतिको

विरोधः तद्वाचिनांशब्दानांद्वन्द्वएकवद्भवति मार्जारमूषिकम् श्वशृगालम्
अहिनकुलम् श्ववराहम् शाश्वतइतिकिम् गोपालिशालङ्कायनाःकल
हायन्तेचकारःपुनरस्यैवममस्यार्थःतेनयेषाञ्चनिर्द्देशे विरोधिनाम
तेनैनित्यमेकवद्भवति अश्वमहिषम्काकोलूकम् शूद्राणामनिरवसि
तानाम् निरवसानंबहिष्करणंकृतावहिष्करणपात्राम् येर्भुक्तेपात्रेसंस्का
रेणानशुध्यतितेनितेनिरवसिताःअनिरवसितास्तुशूद्रवाचिनांशब्दानांद्व
न्द्वएकवद्भवतितक्षायस्कारम् रजकतन्तुवायम् अनिरवसितानामिति
किम् चण्डालमृतपाः गवाश्वप्रभृतीनिच कृतैकवद्भावानिद्वन्द्वरूपाणि।
साधूनिभवन्तिगवाश्वम्गवाविकम् गवैडकम् अजाविकम् अजैडकम्
कुब्जवामनम् कुब्जकैरातकम् पुत्रपौत्रम् श्वचण्डालम् स्त्रीकुमारम् दासी
माणवकम् शाटीपिच्छिकं उष्ट्रखरं उष्ट्रशशम् मूत्रशकृम् मूत्रपुरीषं
यकृन्मेदःमांसशोणितम् दर्भशरम् दर्भपूतीकम् अर्जुनशिरीषम् तृ

णोलपम दासीदासम कुटीकुटम भागवतीभागवतम गवाश्वप्रभृतिषु य
थोच्चारितम द्वन्द्ववृत्तं रूपान्तरेण नायं विधिर्भवति गोश्वौ गोश्वम पशुद्वन्द्वः
विभाषयैकवद्भवति विभाषावृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडव
पूर्वापराधरोत्तराणाम वृक्षमृगतृणधान्यव्यंजनपशुशकुनि अश्ववडव
पूर्वापर अधरोत्तर इत्येतेषां द्वन्द्वो विभाषाएकवद्भवति प्लक्षन्यग्रोधम प्लक्ष
वर्गान्तादकारोपधात् यत्प्रत्ययो भवति ण्यतोऽपवादः शप शप्यं लभ लभ्यम् प
वर्गान्तादिति किम् पाक्यम् वाक्यम् अकारोपधादिति किम् कोप्यम् गोप्यम्
तपरकरणं तत्कालार्थं आप्यम् शकिसहोश्च शकि सहि इत्येतयोः धात्वोः
यत्प्रत्ययो भवति शक्यम् सह्यं गदमदचरयमश्चानुपसर्गे गदमदचरयम इत्येतेभ्यः
अनुपसर्गेभ्यः यत्प्रत्ययो भवति गद्यं मद्यं चर्यं यम्यम् अनुपसर्गादिति किम् प्रगाद्यं
प्रमाद्यम् प्रचार्यं प्रयाम्यम् यमेः सर्वेणासिद्धे नियमार्थं वचनम् चरेराङि चागुरौ ।
आचार्यो देशः अगुराविति किम् आचार्य उपनेता अवद्यपण्यवर्या गर्ह्यपणितव्या
निरोधेषु अवद्य इत्याद्याः शब्दा निपात्यन्ते गर्ह्यपणितव्यानिरोध इत्येतेष्वर्थेषु
यथासंख्यं अवद्यमिति निपात्यते गर्ह्यं चेद्भवति अवद्यं पापम् अनद्यमन्यत् वदः
सुपि क्यम् पण्यमिति निपात्यते पणितव्यं चेद्भवेत् व्यवहर्तव्यम् पण्यः कंबलः प

का॰ वृ॰ १२१

ण्यो गोः पाण्यमन्यत् वर्येति स्त्रियां निपात्यते अनिरोधश्चेत् अप्रतिबंधः शतेन वर्या स
हस्रेण वर्या वृत्यान्या स्त्रीलिङ्गनिर्देशः किमर्थः वार्या ऋत्विजः वह्यं करणे वह्य
मिति वहेर्धातोः करणे यत्प्रत्ययो निपात्यते वहन्ति तेनेति वह्यम् शाकटं करणइ
ति किम् वाह्यमन्यत् अर्यः स्वामिवैश्ययोः ऋ गतौ अस्मात् ण्यति प्राप्ते स्वामिवैश्ययो
रभिधेययोः यत्प्रत्ययो निपात्यते अर्यः स्वामी अर्यो वैश्यः यतो नाव इस्मदान्ते प्राप्ते
स्वामिन्यन्तोदात्तत्वं च वक्तव्यम् स्वामिवैश्ययोरिति किम् आर्यो ब्राह्मणः उपसर्या
काल्याप्रजने उपसर्येति निपात्यते काल्या चेत् प्रजने भवति उपपूर्वात् सर्तेर्यत्प्रत्ययः
प्राप्तकाला काल्या प्रजनः प्रथमं गर्भग्रहणं गर्भग्रहणे प्राप्तकाला गौरुपसर्या
वडवा च काल्या प्रजन इति किम् उपसार्या शरदि मथुरा अजर्यं संगतम् अजर्यं
मिति निपात्यते न जीर्यते इत्यजर्यम् अजर्यमार्यसंगतम् अजर्यं नोऽस्तु संगतम्।
संगतमिति किम् अजरिता कम्बलः वदः सुपि क्यप् च अनुपसर्ग इति वर्त्तते वदे
र्धातोः सुबन्ते उपपदे अनुपसर्गे क्यप्प्रत्ययो भवति चकाराद्यश्च ब्रह्मोद्यं ब्रह्मवद्यम्

१२१

सम्बोध्ये सन्यवयं लृपीतिकिम् बाधम् अन्तस्थोऽस्त्येव अबाधम् भवोभावे सप्यन्त
उपसर्गे इति वर्त्तते भवेत धातोः सवलेऽउपपदे अन्तेपसर्गे भावेक्य प्रत्ययो भवति यत्तुनान
वर्त्तते बलसम्भूयं याततः बलनम् देवसम्भूयं गतोऽद्वेवं भावग्रहणमनुवाद्यं लृपीत्येवम
बम् अन्तेपसर्गोऽस्त्येव प्रभव्य हन्तव्य सप्यन्तेपसर्गे इत्यनुवर्त्तते भावइति वहन्तेः
धातोः सवन्ते उपपदे अन्तेपसर्गे भावेक्य प्रत्ययो भवति तकारस्यान्तादेशः बलाह
त्याय हत्यालृपीत्येव घातावर्त्तते एपदे भावेन भवत्यनभिधानात् अन्तेपसर्गेऽस्त्येव
उपघातोवर्त्तते पतिल्लघाम् वृह ज्वलः क्य सप्यनुपसर्गो भावइति च निवृत्तम् सा
मान्यनविधाने पतिल्लघाम् वृह ज्वल इत्यतेभ्यः क्य प्रत्ययो भवति इत्यः लभ्यः
पिप्यः वृत्यः ग्राह्यः ज्वल्यः क्वचिन्निवर्त्तमाने पुनः क्य ग्रहणं बाधकबाधनार्थम
उपावसृप के एपनेबाधिनाक्य एव भवति अवपस्ताम्यः दृग्रहणेन वृजोऽग्रहणमिष्य
तेन दृढः वार्यो ऋत्विजः शासिदुहि गुहि भ्यो वा ति वक्तव्यम् शास्यम् दुह्यम् दोह्य
गुह्यम् ग्राह्यं प्रवदेन्नैर्मसंज्ञाभ्याम् उपसेव्यावानम् आज्यम् कथमपेयमिति ॥ ३ ॥ ३ ॥ ३ ॥

का॰ वृ॰ २३

पंतोगाः ॥ ऋदुपधाच्चाक्लृपिचृतेः ॥ ऋकारोपधाद्धातोः क्यप्प्रत्ययो भवति क्लृपि
चृतीयवर्जयित्वा ॥ वृतु वृत्यम् ॥ वृधु वृध्यम् ॥ अक्लृपिचृतेरिति किम् ॥ कल्प्यम् ॥ चर्त्यं
तपरकरणं किं ॥ कृतसंशब्दनेन ण्यदेव भवति कीर्त्यं पाणौ सृजेर्ण्यदेव वक्तव्यः पा
णिसर्ग्या रज्जुः ॥ समवपूर्वाच्च ॥ समवसर्ग्यः ॥ ई च खनः ॥ खनतेर्धातोः क्यप्प्रत्ययो भवति
ईकारश्चान्तादेशः ॥ खेयम् ॥ दीर्घनिर्देशः प्रश्लेषार्थः तत्र द्वितीय इकारः ये विभाषेत्या
त्ववाधनार्थः ॥ भृञोऽसंज्ञायाम् ॥ भृञो धातोरसंज्ञायां विषये क्यप्प्रत्ययो भवति भृत्याः
कर्मकराः भर्तव्या इत्यर्थः ॥ असंज्ञायामिति किं ॥ भार्या नाम क्षत्रियाः ॥ संपूर्वाद्विभाषा ॥ सं
पूर्वाद्विभाषा ॥ संभृत्याः ॥ संभार्याः ॥ संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिद्ध्यति ॥ स्त्रियां भावा
धिकारोऽस्ति तेन भार्या प्रसिद्ध्यति ॥ मृजेर्विभाषा ॥ मृजेर्धातोर्विभाषा क्यप्प्रत्ययो भव
ति ॥ ऋदुपधत्वात्प्राप्ते विभाषेयम् ॥ परिमृज्यः ॥ परिमार्ग्यः ॥ राजसूयसूर्यमृषोद्यरुच्य
कुप्यकृष्टपच्याव्यथ्याः ॥ राजसूय सूर्य मृषोद्य रुच्य कुप्य कृष्टपच्य अव्यथ्य इत्ये
ते क्यपि निपात्यन्ते राजपूर्वात्सुनोतेर्याले प्रथमान्ते वोपपदे सुनोतेः क्यप् राजसूयः

२३

राजावाइष्यते राजसूयः क्रतुः सूसर्तिभ्यां क्यप् सर्तेः ऊर्ध्वं सुवतेर्वा रुडागमः सरतिसुव
तिवा सूर्यः मृषापूर्वस्य वदतेः पक्षे यतिप्राप्ते नित्यं क्यब्निपात्यते मृषोद्यम् रोचतेसौरु
च्यः गुपेरादिकत्वं च संज्ञायाम् कुप्यम् गोप्यं अन्यत् कृष्टे पच्यन्ते कृष्टपच्याः शाल।
याः कर्मकर्तरीति निपातनम् न व्यथ्यते अव्यथ्यः भिद्योद्ध्यौ नदे भिदेरुज्झतेश्च कर्तरि
क्यप्निपात्यते नदे अभिधेये उज्झेर्धत्वं च भिनत्ति कूलमिति भिद्यम् उज्झत्युदकमित्यु।
द्ध्यः नदे इति किम् भेत्ता उज्झिता पुष्यसिद्ध्यौ नक्षत्रे पुषेः सिधेश्चाधिकरणे क्यब्नि
पात्यते नक्षत्रे अभिधेये पुष्यन्त्यस्मिन्नर्था इति पुष्यः सिध्यन्त्यस्मिन्नर्था इति सिध्यः नक्षत्र इ
ति किम् पोषणः सेधनः विपूयविनीयजित्या मुञ्जकल्कहलिषु विपूयविनीय।
जित्या इत्येते शब्दा निपात्यन्ते यथासंख्यं मुञ्जकल्कहलिष्वभिधेयेषु विपूर्वात्पवतेर्नयते
श्च नञ्पूर्वाज्जयतेर्यति प्राप्ते कर्मणि क्यब्निपात्यते विपूयो मुञ्जः विपव्यमन्यत् विनीयः क
ल्कः विनेयमन्यत् जित्यो हलिः जेयमन्यत् प्रत्यपिभ्यां ग्रहेश्छन्दसि प्रतिगृह्यमपिगृ।
ह्यमेवं ब्रवीत् ग्रहेश्छन्दसि विषये क्यप्प्रत्ययो भवति मत्तस्य न प्रतिगृह्यम् तस्मान्नापि

गृह्यम् छन्दसीति किं प्रतिग्राह्यं अपिग्राह्यं पदास्वैरिबाह्यापक्ष्येषु च पदेष्वस्वैरि
णिबाह्यायां पक्ष्ये चार्थे ग्रहेः क्यप् प्रत्ययो भवति पदे तावत् प्रगृह्यं पदम् यस्य प्रगृह्यसं
ज्ञा विहिता अवगृह्यं पदं यस्यावग्रहः क्रियते अस्वैरिणि गृह्यका इमे गृहीतका
इत्यर्थः स्त्रीलिङ्गनिर्देशादन्यत्र न भवति पक्ष्ये भवः पक्ष्यः वासुदेवगृह्याः अर्जुनगृ
ह्याः तत्पक्षाश्रिता इत्यर्थः विभाषा कृवृषोः करोतेर्वर्षतेश्च विभाषा क्यप् प्रत्ययो
भवति करोतेर्ण्यति प्राप्ते वर्षतेरपि ऋदुपधान्नित्ये क्यपि प्राप्ते विकल्प आरभ्यते।
कृत्यं कार्यं वृष्यं वर्ष्यम् युग्यञ्च पत्रे युग्यमिति निपात्यते पत्रञ्चेद्भवति पतन्ति तेन
इति पत्रं वाहनं युग्यो गौः युग्यो हस्ती युजेः क्यप् कुत्वञ्च निपात्यते पत्र इति किम् यो
ग्यमन्यत् अमावस्यदन्यतरस्याम् अमाशब्दः सहार्थे वर्त्तते तस्मिन्नुपपदे वसेर्धा
तोः कालेऽधिकरणे ण्यत् प्रत्ययः तस्मिन्नन्यतरस्यां वृद्ध्यभावो निपात्यते सह वसतो
ऽस्मिन् काले सूर्याचन्द्रमसाविति अमावस्या अमावास्या वा एकदेशविकृतस्या
नन्यत्वात् अमावस्याया वेत्यत्र अमावास्याशब्दस्यापि ग्रहणं भवति अमावस्यारंहः।

ण्यतो निपातनयास्यवृद्धिताम तथैकवृत्ति नातयो स्वरस्त्रमेषामित्यति छंदसि
निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्य्यस्तर्य्याध्वर्य्यखन्यखान्यदेवयज्यापृच्छ्यप्र
तिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि निष्टर्क्यादयः शब्दाः छंद
सि विषये निपात्यन्ते यदिलक्षणेनानुपपन्नं तन्निपातनात्सिद्धम् निष्ट
र्क्य इति कृती छेदने इत्यस्मात् निः पूर्वात् क्यपि प्राप्ते ण्यत्प्रत्ययः आद्यन्तविप
र्ययो निसः षत्वं च निपात्यते निष्टर्क्यं चिन्वीत पशुकामः देवशब्द उपपदे ह्वयते
र्जुहोतेर्वा कर्मणि देवहूयः प्रपूर्वात् उत्पूर्वाच्च नयतेः क्यप् प्रणीयः उन्नीयः उत्पू
र्वाच्छिषेः क्यप् उच्छिष्यः मृङ् प्राणत्यागे स्तृञ् आच्छादने ध्वृ हूर्छने एतेभ्यः य
त्प्रत्ययः मर्य्यः स्तर्य्याः स्त्रियामेव निपातनम् ध्वर्य्यः खनतेर्यत् ण्यत् एतस्मादेवा
ण्यत् खान्यः देवशब्द उपपदे यजेर्यशब्दः प्रत्ययः देवयज्या स्त्रीलिङ्गे निपातनं
आङ्पूर्वात् प्रच्छेः क्यप् आपृच्छ्यः प्रतिपूर्वात् सिवेः क्यप् षत्वं च प्रतिषीव्यः ब्रह्म
ण्युपपदे वदेर्ण्यत् ब्रह्मवाद्यः भाव्यः स्ताव्यः उपपूर्वस्य चिनोतेः ण्यद् आयादेशो

का॰
वृ॰
१३४

पवाय्यप्प्रुवम् प्रडवव उत्तरपदे निपातनमेतत् ह्रियण्यमितिचवक्तव्ये ह्रिर
ण्यादन्यत्रउपावयम् प्रडमेव निष्पन्नेऽप्ययंविधा निःसःषवेनिपातनात्
ण्यदयादेशाद्दूतेता वपवाय्येनिपातितौ ण्यदेकस्मात्तत्तत्रर्भः क्यन्नत्रयाः
तोविधि ण्यदेकस्मात्प्रयाह्रस्व द्दौक्यपौण्यदिधिश्चन्तः ऋहलोर्ण्यत्।
पवमध्येषष्ठी ऋवर्णान्ताद्धातोः हलन्ताश्च ण्यत्प्रत्ययोभवति कार्यम् हार्यं
पाक्यम् वाक्यम् उगावश्यके अवश्यभाव आवश्यकम् उवर्णान्ताद्धातोः
ण्यत्प्रत्ययोभवति आवश्यके द्योत्ये लाव्यम् पाव्यम् आवश्यके इति किम्।
लव्यं पव्यम् आवश्यके द्योत्य इति वेत्स्वरसमासमानपपत्तिः अवश्यलाव्यम्
वश्यपाव्यमिति नैषदोषः मयूरव्यंसकादित्वात्समासो भविष्यति उत्तरपदप्र
कृतिस्वरे हेवयत्नः करिष्यते आसुयुवपिरपिलपित्रपिचमश्च आङ्पूर्वात्
धातोः युवपिरपिलपित्रपिचे इत्येतेभ्यश्च ण्यत्प्रत्ययो भवति यतोऽपवादः आसाव्य
याव्यम् वाप्यं राप्यम् लाप्यम् अपत्राप्यम् आचाम्यम् अन्तकसमस्तयार्थो।

श्चकारः दभेश्छन्दसि आनाय्योऽनित्ये आनाय्य इति निपात्यते अनित्येऽभिधेये न
यतेराङ्पूर्वाण्ण्यत्प्रत्यय आयादेशो निपात्यते अनित्यार्थं वाच्यैः आनाय्यो दक्षिणाग्निः
रूढिरेषा तस्मादनित्यविशेषे दक्षिणाग्नावेवावतिष्ठते तस्य चानित्यत्वमसजा
गणगात् अस्त्रगार्हपत्या दानीयते दक्षिणाग्निराहवनीयेन सहैकयोनित्वे
दनिपातने न दक्षिणाग्निमात्रे तस्य हि नयतीति विकल्प्यते वैश्यकुलाद्वित्तव
तत्प्रदीयभ्राष्ट्राद्वाह्वाहपत्याद्वा होति आनाय्यो नित्य इति वदक्षिणाग्नेरुक्तं भवे
त एकयोनौ तत्रविभाग दानेयोपासम्यावभवेत् प्रणाय्योऽसम्मतौ अविषय
त्वात् सम्मतिरभिप्रीतिः सम्मतिः सम्मतेरसम्मतिः प्रणाय्य इति निपात्यते अ
७. सम्मतावभिधेये प्रणाय्यश्चोरः असम्मतावितिकिम् प्रणेयोऽश्वः यद्येवं कथं तद्
तत् ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्यायान्तेवासिने नान्यस्मै कस्मै
चनेति एवं तर्हि संपत्ति रभिलाषो वाक्यते तदभावेन निष्कामतया असम्म
तिरन्तेवासी भवति तस्मै निष्कामायान्तेवासिने प्रणाय्याय ब्रह्म प्रब्रूयादि

नियुज्यते पाय्यासान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु पाय्यसा
न्नाय्यनिकाय्य धाय्या इत्येते निपात्यन्ते यथासंख्यं मानहविर्निवाससामिधे
न्योर्वाभिधेयायां पाय इति माङः ण्यप्रत्ययः आदिपत्वं च निपात्यते सान्नाय्यं हविः
सन्नेयमन्यत् वृद्धिश्चावक हविर्विशेषे निष्पन्ने निपूर्वाच्चिनोतेर्ण्यप्रत्यय आदेशः।
वादिकत्वं च निपात्यते निवासे निकाय्यो ऽन्यत्र निचेयमन्यत् धाञो ण्यप्रत्ययो निपात्यते सा
मिधेनीत्वे इव निपात्यते धेयमन्यत् सामिधेनीशब्दः ऋग्विशेषस्य वाचकः तत्र धा
य्येति न सर्वा सामिधेन्य उच्यन्ते किन्तर्हि काचिदेव वृद्धिश्चात्र यथा च सामिधे
न्यामपि दृश्यते धाय्याः शंसति अग्निर्नेता स सोमक्रतुभिरिति क्रतौ कुण्डपाय्यसं
चाय्यौ कुण्डपाय्यसंचाय्याविति एतौ शब्दौ निपात्येते क्रतावभिधेये कुण्डशब्देन्तो
पान्ते उपपदे पिबतेर्धातोरधिकरणे यत्प्रत्ययो युक् च निपात्यते कुण्डेन पीयते अस्मि
न्सोम इति कुण्डपाय्यः क्रतुः यतेनाव इति स्ववः संपूर्वाच्चिनोतेः ण्यप्रत्यय आदेशो निपा
त्यते संचीयते सोमो ऽस्मिन्निति संचाय्यः क्रतावितिकिं कुण्डपानं संचेयः अग्नौ परिचाय्योप

वाय्यसमूह्याः परिचाय्यउपचाय्यसमूह्याः इत्येतेशब्दानिपात्यन्ते अग्नावभिधेये।
चिनोतेःण्यप्रत्यायादेशोनिपात्यते परिचाय्यः उपचाय्यः समपूर्वाद्वहेः सम्प्रसारणं दी
र्घत्वंचनिपात्यते समूह्यं चिन्वीत पशुकामः अग्नावितिकिम परिचेयः उपचेयः
चित्याग्निचित्येच चित्यशब्दः अग्निचित्याशब्दश्चनिपात्यते चित्याग्निः अग्निचयन
मेवाग्निचित्याभावे यकारप्रत्ययः तकारान्तेनोदात्तत्वं भवति अग्नावित्येव चेयमन्य
त्र ण्वुल्तृचौ धातोरितिवर्त्तते सर्वधातुभ्यः ण्वुल्तृचौ प्रत्ययौ भवतः कारकः
कर्त्ता हारकः हर्त्ता वकारः सामान्यग्रहणाविघातार्थः तृच्कं दमितव्यं मेयः स्वि
ति नन्दिग्रहिपचादिभ्योल्युणिन्यचः प्रत्येकमादिशब्दः सम्बध्यते त्रिभ्योगणेभ्या
स्त्रयः प्रत्ययाः यथासंख्यं भवन्ति नन्द्यादिभ्योल्युः ग्रहादिभ्योणिनिः पचादिभ्यः
अच् नन्दिग्रहिपचादयश्च न धातुपाठसन्निविष्टा गृह्यन्ते किन्तर्हि नन्दनरमण
इत्येवमादिषु प्रातिपदिकगणेषु उद्भूतप्रकृतयोनिर्दिश्यन्ते नन्दिवासिमदि
दूषिसाधि वर्द्धिशोभि रोचिभ्यः ण्यन्तेभ्यः संज्ञायां नन्दनः वासनः मदनः दूषणः

का॰
वृ॰
१३९

मथनः वर्धनः शोभनः रोचनः सहितपिदमेसंज्ञायाम् सहनः तपनः दमनः जल्प-
नः दर्पणः रमणः संक्रन्दनः संकर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः ल-
वणः निपातनात् णत्वम् वित्तविनाशनः कुलदमनः शत्रुदमनः नेम्यादिः ग्रह
उत्साह उद्दाम स्था मंत्र संमर्द मन्त्री ग्राही उत्साही उद्दामी उद्भासी स्थायी मंत्री संमर्दी र-
क्षश्रुवषशां नौ निरक्षी निश्रावी निवाषी निशायी याच् व्याहृ संव्याहृ व्रज वद
वसां प्रतिषिद्धानाम् अयाची अव्याहारी अविनायी विषयि विशायि देशे विषयी
विशायी देशः अभिभाविभूते अभिभावी अपराधी उपरोधी परिभवी परिभावी ग्र-
हादिः पच वच वप वद चल पत नदट् भषट् प्लवट् चरट् गरट् तरट् चोरट् गा-
हट् जगपर हर सूदट् देवट् सेव मेष कोषमेथ नन्त व्रज दर्श दंभ सर्प जर।
रा श्वपच पचादिराकृतिगणः इगुपधज्ञाप्रीकिरः कः इगुपधेभ्यो धातुभ्यः ज्ञा-
नातेः प्रीणातेः किरतेश्च कप्रत्ययो भवति विक्षिपः विलिखः बुधः कृशः जानाती-
ति ज्ञः प्रीणातीति प्रियः किरतीति किरः देवसेयमेघादयः पचादौ पठितव्याः आत

श्चोपसर्गे आकारान्तेभ्यो धातुभ्यः उपसर्गे उपपदे कप्रत्ययो भवति सुग्लः सुम्लः पाघ्रा
ध्माधेट्दृशः शः पाघ्राध्माधेट्दृश इत्येतेभ्यः धातुभ्यः शप्रत्ययो भवति पा उत्पिबः घ्रा उ
ज्जिघ्रः विजिघ्रः ध्मा उद्धमः विधमः धेट् उद्धयः विधयः दृश् उत्पश्यः विपश्यः उ
पसर्गे इति केचिदनुवर्त्तन्ति पश्यतीति पश्यः जिघ्रः संज्ञायां प्रतिषेधः व्याघ्रः अनु
पसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च अनुपसर्गेभ्यः लिम्पादिभ्यः
शप्रत्ययो भवति लिम्पतीति लिम्पः विन्दतीति विन्दः धारयतीति धारयः वेदयतीति
वेदयः उदेजयतीति उदेजयः चेतयतीति चेतयः साति सौत्रो धातुः सातयतीति सात
यः साहयतीति साहयः अनुपसर्गादिति किम् प्रलिपः नौ लिम्पेरिति वक्तव्यम् नि
लिम्पाः देवाः गवादिषु विन्देः संज्ञायामिति वक्तव्यम् गोविन्दः अरविन्दः ददातिद
धात्योर्विभाषा ददातेर्दधातेश्च विभाषा शप्रत्ययो भवति णस्यापवादः ददः दायः दधः
धायः अनुपसर्गादित्येव प्रदः प्रधः ज्वलितिकसन्तेभ्यो णः इति धात्वारभ्य ज
लतेर्धातोरेवमादिभ्यो धातुभ्यः कसगतावित्येवमन्तेभ्यः विभाषा णप्रत्ययो भवति

अवोपवादः ज्वालः ज्वलः चालः अनुपसर्गादित्येव प्रज्वलः तनोतेः णः उपसंख्यानम्
अवतनोतीत्यवतानः श्याद्व्यधास्रुसंस्रुतीणवसावहृलिहश्लिषश्वसश्च अनुपसर्गा
दिति निवृत्तम् विभाषेति च शेषः आकारान्तेभ्यः श्याधान्तेभ्यः व्यध आस्रु संस्रु अत
ण अवसा अवहृ लिह श्लिष श्वस इत्येतेभ्यश्च णप्रत्ययो भवति आकारान्तता
देवसणापयतेः प्रत्यये सिद्धे वचनं बाधकबाधनार्थं उपसर्गे कबाधयितुमयमेव भा
ति अवश्यायः दायः धायः व्याधः आस्रावः संस्रावः अत्यायः अवश्यायः अवहारः लेहः
श्लेषः श्वासः दुन्योरनुपसर्गे दुनोतेर्नयतेश्च अनुपसर्गात् णप्रत्ययो भवति दुनोती
ति दावः नयतीति नायः अनुपसर्गे इति किम् प्रदवः प्रणायः विभाषा ग्रहेः ग्रहे धा
तो विभाषा णप्रत्ययो भवति अवोपवादः ग्राहः ग्रहः व्यवस्थितविभाषेयम् जल
चरे ग्राह एव ज्योतिषि ग्रह एव भवतेश्चेति वक्तव्यम् भवतीति भावः भवः गेहे कः ग्र
हेर्धातोः कप्रत्ययो भवति गेहे कर्मणि गेहं वेश्म तत्स्थाद् दाराश्च गृह्णन्तीति गृहा दा
राः गृहं वेश्म शिल्पिनि ष्वुन् धातोः ष्वुन्प्रत्ययो भवति शिल्पिनि कर्तरि नृतिखनि

रञ्जिभ्यः परिगणनम् नर्त्तकः खनकः रजकः नर्त्तकी खनकी रजकी रंजेस्य नलोपश्च गस्थकन् गायतेः थकन् प्रत्ययो भवति शिल्पिनि कर्त्तरि गायतीति गाथकः ण्युट् च चकारात् गायतेः ण्युट् प्रत्ययो भवति गायतेः शिल्पिनि कर्त्तरि गायनः गायनी योगविभाग उत्तरार्थः हश्च व्रीहिकालयोः चकारेण ण्युडनुकृष्यते जहातेर्धातोः जिहीतेश्च ण्युट् प्रत्ययो भवति व्रीहौ काले च कर्त्तरि हायना नाम व्रीहयो भवन्ति जहत्युदकमिति कृत्वा काले हायनः सांवत्सरः जहाति भावानिति कृत्वा प्रुसृल्वः समभिहारे वुन् प्रुसृलू इत्येतेभ्यः धातुभ्यः समभिहारे वुन् प्रत्ययो भवति प्रवकः सरकः लवकः समभिहारग्रहणेनात्र साधुकारित्वं लक्ष्यते साधुकारिणि वुन्विधानम् सकृदपि यः सुष्ठु करोति तत्र भवति बहुशोपि यो दुष्ठु करोति तत्र न भवति आशिषि च आशिषि गम्यमानायाम् धातोर्वुन् प्रत्ययो भवति जीवतात् जीवकः नन्दतात् नन्दकः आशीः प्रार्थनाविशेषः स चेह क्रियाविशेषः अस्याः क्रियायाः कर्त्ता भवते आशास्यते ॥ इति तृजादिप्रविर

पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् मांसशीलः मांसशीला मांसशीलाः मांसकामः ५

का॰ वृ॰ १३८

विता यां काशिकायां वृत्तौ तृतीयस्याध्यायस्य प्रथमः पादः कर्मण्यण् त्रिविधं
कर्म्म कर्म्म निर्वर्त्यं विकार्यं प्राप्यं च सर्वत्र कर्मण्युपपदे धातोरण् प्रत्ययो भवति नि
र्वर्त्यं कुम्भकारः विकार्यं काण्डलावः प्राप्यं वेदाध्यायः चर्चापारः ग्रामं गच्छति आदि
त्यं पश्यति हिमवन्तं शृणोतीत्यत्र प्रत्ययो न भवति अनभिधानात् शीलिकामिभिक्षा
चरिभ्यो णः मांसकामा मांसभक्षः मांसभक्षा कल्याणाचारः कल्याणाचारा ई
क्षिक्षमिभ्यां चेति वक्तव्यम् सुखप्रतीक्षः सुखप्रतीक्षा बहुक्षमः बहुक्षमा ह्वावा
मश्च ह्वेञ्स्पर्धायां शब्दे च वेञ् तन्तुसन्ताने माङ् माने इत्येतेभ्यः कर्मण्युपपदे अण् प्र
त्ययो भवति कप्रत्ययस्यापवादः स्वर्गह्वायः तन्तुवायः धान्यमायः आतोनुपसर्गे कः
आकारान्तेभ्यः धातुभ्यः अनुपसर्गेभ्यः कर्मण्युपपदे कप्रत्ययो भवति अणोपवा
दः गोदः कम्बलदः पार्ष्णित्रम् अङ्गुलित्रम् अनुपसर्ग इति किम् वड्वा समाह्वायः
सुपि स्थः समवन्ते उपपदे तिष्ठतेर्धातोः कप्रत्ययो भवति समस्थः विषमस्थः कूट
स्थः अत्र योगविभागः क्रियते सुपि आकारान्तेभ्यः धातुभ्यः कप्रत्ययो भवति द्वा

१३८

ंपिबतीति द्विपः पादपः कच्छपः समस्थः विषमस्थः कूटस्थः नतस्थः स्थस्थस्थत्वह
पिकप्रत्ययो भवति किमर्थमिदं कर्तरि प्रयोगः अनेन भवे यथा स्यात् आखूनामु
त्थानम् आखूत्थः शलभोत्थः अनेनानुवर्तते तेनोत्तरं कर्मणि सुपीति वक्ष्यमाणमनु
वर्तते तत्र सकर्मकेषु धातुषु कर्मण्येवोपपदे प्रतिस्थते तत्र सुपीति तुन्दशोकयोः परि
मृजापनुदोः तुन्दशोक इत्येतयोः कर्मणोरुपपदयोः परिमृजापनुदोर्धात्वोः क
प्रत्ययो भवति तुन्दपरिमृज आस्ते शोकापनुदः पुत्रो जातः आलस्यसुखाहरणयो
रिति वक्तव्यम् अलसस्तुन्दपरिमृज उच्यते तुन्दपरिमार्ज एवान्यः सुखस्याहर्ता
शोकापनुदः शोकापनोद एवान्यः कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् मू
लानि विभुजति मूलविभुजो रथः नखमुचानि धनूंषि काकगुहास्तिलाः कौमोद
ते कुमुदम् प्रे दाज्ञः सोपसर्गार्थ आरम्भः दधाते जानातेश्च प्रोपसृष्टात्क
र्मण्युपपदे कप्रत्ययो भवति अणोपवादः सर्वप्रदः पथिप्रज्ञः प्र इति किम् ज्ञानदायः
समि ख्यः सोपसर्गार्थ आरम्भः संपूर्वात् ख्याड् इत्येतस्माद्धातोः कर्मण्युपपदे कप्रत्ययो

भवति। गाः संचष्टे गोसंख्यः पशुसंख्यः॥ गापोष्टक्॥ कर्मण्युपनाम इति वर्त्तते गायतेः पिब
तेश्च धातोः कर्मण्युपपदे अनुपसर्गे टक् प्रत्ययो भवति कस्यापवादः। वज्रं गायति वज्र
गः सामगः वज्रगी सामगी॥ सुराशीध्वोः पिबतेः॥ अनेन सुरापः शीधुपः सुरापी शीधुपी। सु
राशीध्वोरिति किम्। क्षीरं पिबतीति क्षीरपा ब्राह्मणी। पिबतेरिति किम्। सुरां पाति सु
रापा। अनुपसर्ग इत्येव। वज्रं संगायः सामसंगायः॥ बहुलं छन्दसीति वक्तव्यम्। या ब्राह्म
णी सुरापा भवति नैनां देवाः पतिलोकं नयन्ति॥ हरतेरनुद्यमनेऽच्॥ हरतेर्धातोरनुद्यम
ने वर्त्तमानात् कर्मण्युपपदे अच् प्रत्ययो भवति। अणोऽपवादः। उद्यमनमुत्क्षेपणम्। अं
शहरः। रिक्थहरः। अनुद्यमन इति किम्। भारहारः॥ अच्प्रकरणे शक्तिलाङ्गलाङ्कु
शयष्टितोमरघटघटीधनुःषु ग्रहेरुपसंख्याने शक्तिग्रहः। लाङ्गलग्रहः। अङ्कुशग्रा
हः। यष्टिग्रहः। तोमरग्रहः। घटग्रहः। घटीग्रहः। धनुर्ग्रहः। सूत्रे च धार्यर्थे। सूत्रग्रहः। सू
त्रं धारयतीत्यर्थः। सूत्रग्राह एवान्यत्र॥ वयसि च॥ वयसि गम्यमाने हरतेः कर्मण्युपपदे अ
च् प्रत्ययो भवति। उद्यमनार्थः आरम्भः। कालकृता शरीरस्यावस्था यौवनादिर्वयः। य

द्यमने क्रियमाणे संभाव्यमाने वा वयो गम्यते तत्रायं भवति अस्थिहरः श्वाकवच
हरः क्षत्रियकुमारः आङि ताच्छील्ये आङ्पूर्वाद्धरतेः कर्मण्युपपदे अच्प्रत्ययो भ
वति ताच्छील्ये गम्यमाने ताच्छील्यं तत्स्वभावता पुष्पाहारः फलाहारः पुष्पाह
रणे स्वाभाविकी फलानपेक्षा प्रवृत्तिरस्येत्यर्थः ताच्छील्य इति किम भारमाहर
ति भाराहारः अर्हः अर्हेः स्त्रियाम अस्माद्धातोः कर्मण्युपपदे अच्प्रत्ययो भवति
अणोपवादः स्त्रियां विशेषः पूजार्हा ब्राह्मणी गंधार्हा मालार्हा स्तम्बकर्णयो रमि
जपोः स्तम्बकर्ण इत्येतयोः सुबन्तयोरुपपदयोः यथासंख्यं रमिजपोः धात्वोः अ
च्प्रत्ययो भवति अमरकत्वा जपश्च शब्दकर्मकत्वात्कर्मत्वे भवतीति सुपीत्येतद
भिसंबध्यते हस्तिसूचकयोरिति वक्तव्यम स्तम्बेरमते स्तम्बेरमो हस्ती कर्णेजपा
ति कर्णेजपः सूचकः हस्तिसूचकयोरिति किं स्तम्बे रन्ता कर्णे जपिता शमि धा
तोः संज्ञायाम शमि उपपदे धातुमात्रात् संज्ञायां विषये अच्प्रत्ययो भवति शंकरः
शंभवः शंवदः धातुग्रहणं किम यावन्ता धातो विन्ति वर्तते व शमि संज्ञायां धातुग्र

का॰ वृं॰ २४

ष्टणं कृञो हेत्वादिषु प्रतिषेधार्थं शंकरा नाम परिव्राजिका शंकरा शकृत् निकृत् कृत्वा
ला अधिकरणे शेतेः सप्तीति सेवध्यते शेतेर्धातोरधिकरणे सुबन्ते उपपदे अप्रत्य
त्ययो भवति खे शेते खशयः गर्तशयः पार्श्वादिषूपसंख्यानं पार्श्वाभ्यां शेते पार्श्वश
यः उदरशयः पृष्ठशयः दिग्धसहपूर्वाच्च दिग्धेन सह शेते दिग्धसहशयः उत्ताना
दिषु कर्तृषु उत्तानशयः अवमूर्धशयः गिरौ डश्छन्दसि गिरौ शेते गिरिशः चरे
ष्टः अधिकरणे इति वर्त्तते चरेर्धातोरधिकरणे उपपदे टप्रत्ययो भवति कुरुषु चर
तीति कुरुचरः मद्रचरः कुरुचरी मद्रचरी प्रत्ययान्तकरणं ङीवर्थम् भिक्षासेनादा
येषु च अनधिकरणार्थ आरंभः भिक्षासेनादायेष्वेतेषूपपदेषु चरतेः टप्रत्य
यो भवति भिक्षाचरः सेनाचरः आदायचरः पुरोऽग्रतोऽग्रेषु सर्त्तेः पुरस् अग्रतस् अ
ग्रे इत्येतेषूपपदेषु सर्त्तेर्धातोः टप्रत्ययो भवति पुरः सरतीति पुरस्सरः अग्रतस्सरः
अग्रेसरः पूर्वे कर्त्तरि पूर्वे शब्दे कर्त्तृवाचिन्युपपदे सर्त्तेर्धातोः टप्रत्ययो भवति पू
र्वः सरति पूर्वसरः कर्त्तरीति किं पूर्वं देशं सरति पूर्वसरः कृञो हेतुताच्छील्या

प्र॰

नुलोमेषु कर्त्तरीति वर्त्तते न कर्म्मण्युपपदे करोतेर्धातोः टप्रत्ययो भवति हेतौ ता।
च्छील्ये आनुलोम्ये च गम्यमाने हेतुरैकान्तिकं कारणं ताच्छील्यं तत्स्वभावता
आनुलोम्यमनुकूलता हेतौ तावत् कन्याशोककरी विद्या यशस्करी ताच्छील्ये
श्राद्धकरः अर्थकरः आनुलोम्ये प्रेषकरः वचनकरः एतेष्विति किम् कुंभकारः
दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृ
चित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुररुष्षु कर्म्मणीत्यपीति द्वयमनुवर्त्तते त
त्र यथायोगं संबंधः दिवादिषूपपदेषु करोतेर्धातोष्टप्रत्ययो भवति अहेत्वाद्यर्थं आ
रंभः दिवाशब्दोऽधिकरणवचनः सुपीत्यस्य विशेषणं दिवा करोति प्राणिनश्चेष्टा
युक्तानिति दिवाकरः विभां करोति विभाकरः प्रभाकरः भास्करः सकारस्य नि
पातनाद्विसर्ज्जनीयजिह्वामूलीयौ न भवतः कारकरः अन्तकरः अनन्तकरः आ
दिकरः बहुकरः नान्दीकरः किंकरः लिपिकरः लिबिकरः बलिकरः भक्तिकरः
कर्तृकरः चित्रकरः क्षेत्रकरः सेख्यापककरः द्विकरः जंघाकरः बाहुकरः अहस्क

रः यत्करः तत्करः धनुष्करः अरुष्करः किंयत्तद्बहुषु कृञो ऽज्विधानं किंकरा यत्करा त
त्करा बहुकरा कर्मणि भृतौ कर्मणीति स्वरूपग्रहणं कर्मशब्द उपपदे कर्मवाचि
नि करोतेः टप्रत्ययो भवति भृतौ गम्यमानायाम् भृतिर्वेतनम् कर्मनिर्वेशः कर्म क
रोतीति कर्मकरो भृतकः भृताविति किम् कर्मकारः न शब्दश्लोककलहगाथावैर
चाटुसूत्रमन्त्रपदेषु शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपद इत्येतेषूपपदेषु
करोतेष्टप्रत्ययो न भवति हेत्वादिषु प्राप्तः प्रतिषिध्यते शब्दकारः श्लोककारः कल
हकारः गाथाकारः वैरकारः चाटुकारः सूत्रकारः मन्त्रकारः पदकारः स्तंबशकृ
तोरिन् स्तंबशकृत इत्येतयोः कर्मणोरुपपदयोः करोतेरिन्प्रत्ययो भवति व्रीहि
वत्सयोरिति वक्तव्यम् स्तंबकरिः व्रीहिः शकृत्करिः वत्सः व्रीहिवत्सयोरिति किं
स्तंबकारः शकृत्कारः हरतेर्दृतिनाथयोः पशौ दृतिनाथ इत्येतयोः कर्मणो
रुपपदयोर्हरतेर्धातोः पशौ कर्तरि इन्प्रत्ययो भवति दृतिं हरतीति दृतिहरिः पशुः
नाथहरिः पशाविति किम् दृतिहारः नाथहारः फलेग्रहिरात्मंभरिश्च फ

लेग्रहिरात्मंभरिश्च एतौ शब्दौ निपात्येते फलानि गृह्णातीति फलेग्रहिः वृक्षः उपप
दस्य समासः इंकारस्य च अम् आगमो निपात्यते आत्मानं बिभर्ति आत्मंभरिः अत्र च समुच्च
यार्थकारः कुक्षिंभरिः छन्दसि वनसनरक्षिमथाम् वनषणसंभक्तौ रक्षणपाल
ने मथो विलोडने इत्येतेभ्यो धातुभ्यः कर्मण्युपपदे छन्दसि विषये इन्प्रत्ययो भवति
ब्रह्मवनिं त्वा क्षत्रवनिं त्वा गोसनिं अश्वसनिं यो पथिरक्षी श्वानौ हविर्मथीनाम् ए
जेः खश् एजेर्ण्यन्ते अस्माण्ण्यन्ताद्धातोः कर्मण्युपपदे खश्प्रत्ययो भवति खकारो
मुमर्थः शकारः सार्वधातुकसंज्ञार्थः अङ्गमेजयः +जहातिभ्यः उपसंख्यानम् वातमजा मृ
गाः शुनिन्धयः तिलन्तुदः शर्धञ्जहा माषाः नासिकास्तनयोर्ध्माधेटोः नासिका
स्तनयोः कर्मणोरुपपदयोः ध्माधेटोर्धातोः खश्प्रत्ययो भवति यथासंख्यमत्र नेष्य
ते स्तने धेटः स्तनन्धयः नासिकायां तु ध्मेधेटश्च नासिकन्धमः नासिकन्धयः त
स्मैतन्नासिकास्तनयोरिति लक्षणव्यभिचारचिह्नादल्पाच्तरस्य पूर्वनिपातात् ल
भते धेट इति वात स्त्रियां ङीप् स्तनन्धयी नाडीमुष्ट्योश्च नाडीमुष्टिः इत्येतयोश्च कर्म

+यः जनमेजयः स्वश्कसूगवातस्मुनीतिलशर्वेष जेधटतुदज+ ९

का. वृ. १४२

णोरुपपदयोः ध्माधेटोर्धातोः खश्प्रत्ययो भवति अत्रापि खान्तस्यापूर्वं निपातश्च हृ
स्वान्तादेशो न भवति नाडिन्धमः मुष्टिन्धमः नाडिन्धयः मुष्टिन्धयः अनन्तरस
मुच्चयार्थश्चकारः घटिन्धमः घटिन्धयः खारिन्धमः खारिन्धयः वातन्धमः वातन्ध
यः पवनः ॥ उदि कूले रुजिवहोः ॥ रुजो भंगे वह प्रापणे एताभ्यां धातुभ्यां उत्पूर्वा
भ्यां कूले कर्मण्युपपदे खश्प्रत्ययो भवति कूलमुद्रुजः कूलमुद्वहः ॥ वहाभ्रे लिहः ॥
वह अभ्र इत्येतयोः कर्मणोरुपपदयोः लिह धातोः खश्प्रत्ययो भवति वहंलिह
वहंलिहो गौः अभ्रंलिहो वायुः ॥ परिमाणे पचः ॥ परिमाणं प्रस्थादि तस्मिन् कर्मण्यु
पपदे पचेर्धातोः खश्प्रत्ययो भवति प्रस्थं पचतीति प्रस्थंपचा स्थाली द्रोणंपचा खारिं
पचः कटाहः ॥ मितनखे च ॥ मित नख इत्येतयोः कर्मणोरुपपदयोः पचेः खश्प्रत्ययो भ
वति अपरिमाणार्थः आरम्भः मितंपचा ब्राह्मणी नखंपचा यवागूः ॥ वि
धुरुषोस्तुदः ॥ विधु अरुस इत्येतयोः कर्मणोरुपपदयोस्तुदेर्धातोः खश्प्रत्ययो भ
वति विधुन्तुदः अरुन्तुदः ॥ असूर्यललाटयोर्दृशितपोः ॥ असूर्यललाट इत्येतन

योः कर्मणोरुपपदयोः दृशितपोर्धात्वोः खश्प्रत्ययो भवति असूर्यंपश्या राजदारा
ललाटन्तपः सूर्यः । असूर्यं इति वा समर्थसमासो दृशिना नञः संबन्धात् सूर्यं न पश्य
न्तीति गुप्तिपरं चैतत् एवं नाम गुप्ता राजदाराः यत्परिहार्यदर्शनं सूर्यमपि न पश्यन्तीति
उग्रंपश्येरंमदपाणिंधमाश्च उग्रंपश्येरंमदपाणिंधमा इत्येते शब्दा निपात्यन्ते
उग्रं पश्यतीति उग्रंपश्यः इरया माद्यतीति इरंमदः पाणयो ध्मायन्ते इति पाणिन्धमः
पन्थानः प्रियवशे वदः खच् प्रियवश इत्येतयोः कर्मणोरुपपदयोर्वदेर्धातोः
खच्प्रत्ययो भवति प्रियं वदतीति प्रियंवदः वशंवदः खकारः खशि ह्रस्वः इति विशेष
णार्थः चकारो मुमर्थः अन्यथा अलंकरणस्य तदर्थे खश्प्रकरणे गमेः सुप्युपसंख्या
नं मितं गमः मितंगमो हस्ती विहायसो विह च विहायसा गच्छतीति विहंग
मः खच्च डिद्वा वक्तव्यः विहंगः डे च विहायसो विहादेशो वक्तव्यः विहगः द्विषत्परा
योस्तापेः द्विषत्पर इत्येतयोः कर्मणोरुपपदयोः तपेर्धातोः खच्प्रत्ययो भवति ।
उपदाह इति चुरादेः उपसन्तापे भूवादेः द्वयोरपि ग्रहणम् द्विषन्तं तापयति द्विषन्तपः

का॰
वृं॰
खे॰

परन्तपः द्विषत्परयोरिति द्वितकारकोतिदेशः तेन स्त्रियां न भवति द्विषतीताप्य
तीति द्विषतीतापः वाचियमो व्रते वाचीत्येकं मे वाचि एषु पपदे यमे धातोः खप्र
त्ययो भवति व्रते गम्यमाने व्रतमिति शास्त्रितो नियमः वाचंयम आस्ते व्रत इति किं
वाचयामः पुरिसर्वयोर्दारिसहोः पुर सर्व इत्येतः कर्मणोरुपपदयोर्यथासंख्यं
दारिसहोर्धात्वोः खप्रत्ययो भवति पुरं दारयति पुरन्दरः सर्वंसहः भगे च दारेरिति
वक्तव्यम् भगन्दरः सर्वकूलाभ्रकरीषेषु कषः सर्वकूलाभ्र करीष इत्येतेषूप
पदेषु कर्मसु कषेर्धातोः खप्रत्ययो भवति सर्वंकषः खलः कूलंकषा नदी अभ्रं
कषो वायुः करीषंकषा वात्या भवति मेघर्त्तिभयेषु कृञः मेघ ऋति भयः इत्येतेषूपपदे
षु कर्मसु कृञो धातोः खप्रत्ययो भवति मेघंकरः ऋतिंकरः भयंकरः क्षेमप्रि
यमद्रभद्रेषु च क्षेमप्रियमद्र इत्येतेषु कर्मसूपपदेषु कृञो धातोः खप्रत्ययो भवा
ति चकारादण् च क्षेमकारः क्षेमंकरः प्रियकारः प्रियंकरः मद्रकारः मद्रंकरः
भद्रकारः भद्रंकरः वेति वक्तव्यम् ग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थम् ।

५१

आशितेभुवःकरणभावयोः अत्रसुपीत्यनुवर्तते आशितशब्दे सुबन्ते उपपदेभ

वतेर्धातोःकरणेभावेचार्थेखश्प्रत्ययोभवति आशितोभवत्यनेनेत्याशितंभव

उदनः भावे आशितंभवनम् आशितंभवोवर्तते संज्ञायाम् भृभृ वृजिधारि

सहि तपि दमः कर्मणि सुपीपिप्रकृते संज्ञावशाद्यथासंभवंसंबध्यते भृभृवृ

वृजिधारिसहि तपिदम इत्येतेभ्यः धातुभ्यः संज्ञायांविषयेखश्प्रत्ययोभवति

विश्वंभरावसुधारथन्तरंसामपतिंवराकन्याशत्रुंजयोहस्तीयुगन्धरःपर्वतःश

त्रुंसहशत्रुंतपःअरिंदमःसंज्ञायामितिकिम् कुटुंबंबिभर्ति कुटुंबभारः गमश्च

गमेर्धातोःसुप्युपपदेसंज्ञायांविषयेखश्प्रत्ययोभवतिसुतंगमोनामयस्यासौ

तेनामिःशुडःयोगविभागउत्तरार्थः अन्तात्यन्ताध्वदूरपारसर्वानन्तेषुडः संज्ञा

यामितिनानुवर्तते अन्त अत्यन्त अध्वन् दूरपार सर्व अनन्त इत्येतेषुकर्मसूपपदेगमे

र्धातोःडप्रत्ययोभवतिअन्तंगच्छति अन्तगः अत्यन्तगः अध्वगः दूरगः पारगः

सर्वगः अनन्तगः डकारष्टिलोपार्थःडित्यभस्यानत्रपकरणसामर्थ्यादितिडग

का॰ वृं
१५४

करणे सर्वत्रपन्नयोरुपसंख्यानम् सर्वत्रगः सर्वगः उरसो लोपश्च उरसा गच्छतीति उर
गः सुडुरोरधिकरणे सुखेन गच्छन्त्यस्मिन्निति सुगः दुर्गः निसो देशे निर्गो देशः
अपरस्मादुड प्रकरणादन्यत्रापि दृश्यते तुरगाः भगाः ग्रामगाः गुरुतल्पगाः आशिषि
हनः ड इति वर्त्तते आशिषि अप्रमानायां हन्तेर्धातोः कर्मण्युपपदे ड प्रत्ययो भव
ति तिमिं वध्यायन्ति तिमिहः शत्रुहः दारावाहनोऽन्त्यस्य च टः संज्ञायाम् दारावु
पपदे आङ्पूर्वात् हन्तेः अण् प्रत्ययो भवति अन्त्यस्य च टकार आदेशो भवति दार्वा
हन्तीति दार्वाघाटः चारौ वा अन्त्यस्य टकारः दार्वाघाटः चार्वाघातः कर्मणि स
मि च कर्मण्युपपदे सम्पूर्वात् हन्तेरन्त्यस्य च टकारो भवति वर्णान् संहन्ति वर्णसं
घाटः वर्णसंघातः पदसंघाटः पदसंघातः अपे क्लेशतमसोः अपपूर्वात् हन्तेः
क्लेशतमसोः कर्मणोरुपपदयोः ड प्रत्ययो भवति क्लेशापहः पुत्रः तमोपहः
सूर्यः शुनाशीरस्थं आरम्भः कुमारशीर्षयोर्णिनिः हन इति वर्त्तते कुमारशीर्षयो
स्तेनयोः कर्मणोरुपपदयोः हन्तेः णिनि प्रत्ययो भवति कुमारघाती शीर्षघाती

१५४

निपातनाच्छिरसः शीर्षभावः लक्षणे जायापत्योष्टक् हन्तेर्धातोः जायापत्योः
कर्मणोरुपपदयोः लक्षणवति कर्त्तरि टक्प्रत्ययो भवति जायाघ्नो ब्राह्मणः पति
घ्नी वृषली अमनुष्यकर्त्तृके च अमनुष्यकर्त्तृके यावदर्थे वर्त्तमानाद्धन्तेः कर्मण्यु
पपदे टक्प्रत्ययो भवति जायाघ्नस्तिलकालकः पतिघ्नी खिला श्लेष्मघ्नं मधु पित
त्तघ्नं घृतम् अमनुष्यकर्त्तृक इति किं आखुघातः शूद्रः इह कस्मान्न भवति चौरघा
तो हस्ती कृतघ्नस्तु दैवकुलमिति बहुलग्रहणाद्भविष्यति शक्तौ हस्तिकवाट
योः शक्तौ गम्यमानायां हस्तिकवाटयोः कर्मणोरुपपदयोः हन्तेष्टक्प्रत्ययो भ
वति अमनुष्यकर्त्तृकार्थ आरम्भः हस्तिनं हन्तुं शक्तः हस्तिघ्नो मनुष्यः कवाटघ्नः
शक्ताविति किम् विषेण हस्तिनं हन्ति हस्तिघातः पाणिघताडघौ शिल्पिनि
पाणिघ ताडिघ इत्येतौ शब्दौ निपात्येते शिल्पिनि कर्त्तरि वाद्ये पाणिघः ताडघः
शिल्पिनीति किम् पाणिघातः ताडघातः राजघ उपसंख्यानम् राजानं हन्ति रा
जघः आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन ॥

आढ्यादिषूपपदेषु च्व्यर्थेषु अच्व्यन्तेषु करोतेर्धातोः करणे कारके ख्युन् प्रत्ययो भवति
च्वेर्विकल्पविधानात् द्विविधाः च्व्यर्थाः आढ्यादयः च्व्यन्ताः अच्व्यन्ताश्च तत्र च्व्य-
न्ताः पर्युदस्यन्ते अनाढ्यम् आढ्यं कुर्वन्त्यनेन आढ्यंकरणम् सुभगंकरणम् स्थूलंक-
रणम् पलितंकरणम् नग्नंकरणम् अन्धंकरणम् प्रियंकरणम् च्व्यर्थेष्विति किं
आढ्यं तैलेन कुर्वन्ति अभ्यञ्जयन्तीत्यर्थः प्रकृतेरविवक्षायामभूतप्रादुर्भावेपि
प्रत्युदाहरणं भवति अच्वाविति किं आढ्यीकुर्वन्त्यनेन ननु च ख्युना मुक्ते ल्युटा
भवितव्यम् न च ल्युटः ख्युनश्च विशेषोस्ति तत्र किं प्रतिषेधेन एवं तर्हि प्रतिषेधसा-
मर्थ्यात् ख्युन्मुक्ते ल्युडपि न भवति ल्युटोप्ययमर्थतः प्रतिषेधः उत्तरार्थश्च वि-
प्रतिषेधः कर्तरि भुवः खिष्णुच्खुकञौ आढ्यादिषूपपदेषु च्व्यर्थेषु अच्व्यर्थेषु उप-
पदेषु भवतेर्धातोः कर्तरि कारके खिष्णुच् खुकञ् इत्येतौ प्रत्ययौ भवतः आढ्यं-
भविष्णुः आढ्यंभावुकः सुभगंभविष्णुः सुभगंभावुकः स्थूलंभविष्णुः स्थूलंभा-
वुकः पलितंभावुकः पलितंभविष्णुः पलितंभावुकः नग्नंभविष्णुः नग्नंभावुकः

अन्धंभविष्णुः अन्धंभावुकः प्रियंभविष्णुः प्रियंभावुकः कर्त्तरीति किम् करणो।

माभूत् स्वार्थे ष्णिन्येव आढ्यो भविता अच्वाविष्णैव आढ्यीभविता उदात्तना।

ग्नुवः। सिद्धमिकारादित्वमिष्णुचः तत्र अस्त्वरसिद्ध्यर्थमिकारादित्वमिष्यते स्पृ

शोऽनुदके क्विन् स्पृशो धातोरनुदके सुबन्ते उपपदे क्विन् प्रत्ययो भवति ननु च

सकर्मकत्वात् स्पृशेः कर्मण्येवोपपदं प्राप्नोति नैष दोषः कर्त्तरीति पूर्वसूत्रादनु

वर्त्ततेन तत्र कर्तृप्रत्ययार्थं विज्ञायते सुबन्तमात्र एवोपपदे कर्तृप्रत्ययो लभ्यते घृ

तं स्पृशतीति घृतस्पृक् मन्त्रेण स्पृशतीति मन्त्रस्पृक् हलस्पृक् अनुदके इ

ति किं उदकस्पर्शः नकारः क्विन्प्रत्ययस्य कुत्वार्थं इति विशेषणार्थः ऋत्विग्दधृ

क्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ऋत्विगादयः पञ्च शब्दा निपात्यन्ते अपरे तेषां

तु एवञ्चयानि निर्दिश्यन्ते ऋतु शब्दे उपपदे यजेः क्विन् निपात्यते ऋतुं यजति ऋ

तं प्रयुक्तो वा यजतीति ऋत्विक् ऊढिरेषा यथा कथं चिदनयान्तव्याहृत्योः क्वि

न् द्विर्वचनम् अन्तोदात्तत्वं च निपात्यते दधृक् सृजेः कर्मणि क्विन् अमागमः

का
वृं
१४९

अमागमश्च निपात्यते स्रजन्ति तामिति स्रक् दिशेः कर्मणि क्विन् निपात्यते दिश
न्ति तामिति दिक् उत्पूर्वस्य स्निहेः क्विन्नुपसर्गान्तलोपः षत्वं च निपात्यते उष्णि
क् अञ्चुयुजिक्रुञ्चं इत्येतेषां धातूनां क्विन्प्रत्ययो भवति निपातनैः सह निर्देशा
दत्रापि किंचिदस्त्यातो णकं कार्यमस्ति प्रवर्त्ततेः सुबन्तमात्र उपपदे क्विन् भवति प्रा
ङ् प्रत्यङ् उदङ् युजेः केवलादेव युङ् युञ्जौ युञ्जः सोपपदात् सत्सूद्विषद्रुहयु
जेति क्विः भवति अश्वयुक् अश्वयुजौ अश्वयुजः क्रुञ्च् क्रुङ् क्रुञ्चौ क्रुञ्चः नलोपः
कस्मान्न भवति निपातनसामर्थ्यात् त्यदादिषु दृशेरनालोचने कञ्च दृशोर्थो
लोचनालोचने वर्त्तमानात् त्यदादिषूपपदेषु कञ् प्रत्ययो भवति चकारात् क्वि
श्च तादृक् तादृशः यादृक् यादृशः कञो ञकारो विशेषणार्थः कस्मिन्नुक्ता
इति अनालोचन इति किम् तं पश्यति तद्दर्शः तादृशा तादृशः इत्यपि शब्दप्रकाराः
नैवात्र दर्शनक्रिया विद्यते समानान्ययोश्चेति वक्तव्यम् सदृक् सदृशः अन्यादृ
क् अन्यादृशः कसश्च प्रत्ययो वक्तव्यः तादृक्षः यादृक्षः सदृक्षः अन्यादृक्षः सस्य

द्विषद्रुहदुहयुजविदभिदछिदजिनीराजामुपसर्गेपि क्विप् सूपीति वर्त्तते क
र्मण्युपपदे सूपशोवदके क्विर्निस्पतः प्रभृति नवामयने सदादिभ्यो धातुभ्यः सुब
न्ते उपपदे उपसर्गे वाक्विपि क्विप्प्रत्ययो भवति उपसर्गग्रहणं ज्ञापनार्थमन्य
त्र सूः ग्रहणे उपसर्गग्रहणं न भवति वदस्सूपि क्य वेति सूत्रं निर्द्दिष्टा साहचर्यान्स
नैमित्तिकस्य ग्रहणं न स्यवतेः युजिर्योगे युज समाधाविति द्वयोरपि ग्रहणम् वि
द ज्ञाने विद सत्तायां विद विचारणे इति त्रयाणामपि ग्रहणम् नलाभार्थ्ये
स्याविदेरकारस्याविवक्षितत्वात् सत् सूविषत् अन्तरिक्षसत् उपसत् सू अण्डसूः
प्रसूः शतसूः द्विष मित्रद्विट् प्रद्विट् द्रुह मित्रध्रुक् प्रध्रुक् दुह गोधुक् प्रधुक् युज
अश्वयुक् प्रयुक् विद वेदवित् प्रवित् भिद काष्ठभित् प्रभित् छिद रज्जुच्छित्
प्रच्छित् जि शत्रुजित् प्रजित् नी सेनानीः प्रणीः अग्रणीः ग्रामणीः कथमत्र
णत्वं सपर्वग्रामणीरिति ज्ञापकात्त्रयतेः पूर्वपदात्संज्ञायामपि णत्वं भवति र
ति राज विराट् सम्राट् यो राजिसमः क्वाविति मकारः क्विवन्तेभ्यो षिट् संपतेः ॥

का॰
वृ॰
१४०

तिसामान्येनवक्ष्यतेतस्मैवार्थंप्रपंच भजोण्विः उपसर्गेप्यपीतिवर्त्ततेभजेर्ण्वितोः
सुबन्तेउपपदेण्विप्रत्ययोभवति अर्द्धभाक् पादभाक् तुर्यभाक् प्रभाक् छंद
सिसहः उपसर्गेप्यपीतिवर्त्ततेसहेर्ण्वितोच्छंदसिविषयेण्विप्रत्ययोभवतिजला
साषट् तुराषाट्सहेःसाडःसः इतिषत्वम् वहश्चछंदसिविषयेण्विप्रत्ययोभवति
षष्ठवाट् दित्यवाट्योगविभागउत्तरार्थः कव्यपुरीषपुरीषेषुञ्युट् कव्यपुरीष
पुरीषइत्येतेषूपपदेषुछंदसिविषयेवहतेःञ्युट्प्रत्ययोभवतिकव्यवाहनःपि
तृणाम् पुरीषवाहनपुरीष्यवाहनः हव्ये हव्यशब्देउपपदेछंदसिविषयेव
हतेःञ्युट्प्रत्ययोभवत्यनन्तःपादंचेदिहिवर्त्ततेअग्निश्चहव्यवाहनःअनन्तः
पादइतिकिम् हव्यवाडग्निरजरःपितानः जनसनखनक्रमगमांविट् छं
दसिउपसर्गेप्यपीतिवर्त्ततेजनजननेजनीप्रादुर्भावे द्वयोरपिग्रहणम् तथा
षणुदानेखनषणाम्क्रमावितिजनादिभ्योधातुभ्यःछंदसिविषयेविट्प्रत्ययो
भवतिटकारःसामान्यग्रहणाविघातार्थःवरष्टकस्येतिविशेषणार्थश्चवि

१४०

ड्वनोरनुनासिकस्यादिति अब्जाः गोजाः सन गोषा इन्दो नृषा असि खन बिसखाः

कूपखाः क्रम दधिक्राः गम अग्रेगा उन्नेतृणाम् अदोनन्ने छंदसीति निवृत्ते

अत्तेर्धातोरनन्नेऽप्युपपदे विट्प्रत्ययो भवति आममत्ति आमात् सस्यमत्ति

सस्यात् अनन्न इति किम् अन्नादः क्रव्ये च क्रव्यशब्दे उपपदे अत्तेर्विट्प्रत्ययो

भवति क्रव्यमत्ति क्रव्यात् पूर्वेणैव सिद्धे वचनमसरूपबाधनार्थमणपि भव

ति कथं तर्हि क्रव्यादः कृतविकृतशब्दे उपपदे अण् तस्य च पृषोदरादित्वात्क्र

व्यभावः कृतविकृतपक्वमांसभक्षः क्रव्याद उच्यते आममांसभक्षः क्रव्यादिति

दुहः कब्घश्च दुहेर्धातोः सुप्युपपदे कप्रत्ययो भवति हकारस्य घान्तादेशः

कामदुघः कामदुघा धेनुः मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् श्वेतवह उ

क्थशस् पुरोडाश इत्येतेभ्यः ण्विन्प्रत्ययो भवति मंत्रे विषये धातूपपदसमुदाया

निपात्यन्ते अलाक्षणिककार्यसिद्ध्यर्थं प्रत्ययस्तु विधीयत एव श्वेत शब्दे क

र्तृवाचिन्युपपदे वहेर्धातोः कर्मणि कारके ण्विन्प्रत्ययो भवति श्वेता एनं वह

का॰
वृ॰
१५८

न्तिश्वेतवाहेडुः अन्यथा ह्यकर्मणि करणे वा उपपदे ऽधामतेः णिन्प्रत्ययो भवन्तिनका
रलोपश्च निपात्यते अन्यानिधां सति उन्येर्वा धां सति अन्यथा दासूटानडुप्रस्यपुरः
पूर्वस्य डः कर्मणि च प्रत्ययः पुरोडाशान्त इति पुरोडाः श्वेतवहादीनां डस्पदस्येति
वक्तव्यम् श्वेतवोभ्यां श्वेतवोभिः पदस्येति किं श्वेतवाहौ श्वेतवाहः अवेयजः।
अवे उपपदे यजेर्धातोः छन्दसि विषये विण्प्रत्ययो भवति उपयड्भिः स्वोहन्त उपयु
जामुपयजामुपयुजम् छन्दोग्रहणं ब्राह्मणार्थम् विकल्पेन भाषायामन्विधाना
र्थम् वेदस्य छन्दस्येति किम् पुनरिदमुच्यते यावत् अन्येभ्योपि दृश्यन्त इति यजेरपि
विप्सिद्धः नियमार्थमेतत् उपयजां छन्दस्येव न भाषायामिति आतो मनिक्
निब्वनिपश्च छन्दसीति वर्त्तते सुपि उपसर्गेपीति च आकारान्तेभ्यः धातुभ्यः छन्द
सि विषये मनिन् क्वनिप् वनिप् इत्येते प्रत्यया भवन्ति चकाराद्विच्च सुदामा अश्व
त्थामा निप् सुधीवा सुपीवा वनिप् भूरिदावा घृतपावा विचः खेलपि अन्ये
याः कीलालपाः रायस्पोषदाः अन्येभ्योपि दृश्यन्ते छन्दसीति निवृत्तम् अन्ये

१५८

भ्योपि धातुभ्यः अनाकारान्तेभ्यः मनिप् क्वनिप् वनिप् प्रत्यया दृश्यन्ते विच्च ।
सुशर्मा क्वनिप् प्रातरित्वा प्रातरित्वानौ वनिप् विजावा अग्रेगावा विचः ।
रेल्लिषि रेड्भिषण्णोर्न्नुवः अपिशब्दः सर्वव्यभिचारार्थः निरुपपदादपि भव ।
ति पीवा धीवा दृशिग्रहणं प्रयोगानुसारणार्थं क्विप् च सर्वधातुभ्यः सोपप
देभ्यः निरुपपदेभ्यश्च छन्दसि भाषायां च क्विप् प्रत्ययो दृश्यते उखायां स्रंसते उ
खायां स्रंसते उखास्रत् पर्णाध्वत् वहाद्भ्रश्यति वहभ्रट् सः कचः समुपस
र्गेपीति वर्त्तते स्याद्दमेन स्मादृतोः समुपपदे कप्रत्ययो भवति क्विप् च किमर्थं
मिदं यावता सम्पि स्यादिति कः सिद्धः अन्येभ्योपि दृश्यन्त इति क्विप् बाधकबा
धनार्थं पुनर्वचनम् शमिधातोः संज्ञायामचेवाधेत शास्युः शास्युः सम्प्रजातो
णि नित्ताच्छील्ये अजातिवाचिनि सुवन्ते उपपदे ताच्छील्ये गम्यमाने धातो
णि नित्प्रत्ययो भवति उष्णभोजी शीतभोजी अजाताविति किं ब्राह्मणाना
मन्त्रयिता ताच्छील्य इति किम् उष्णभक्षो कदाचित् सुपीति वर्त्तमाने पुनः

मः ग्रहणं उपसर्गनिवृत्यर्थं उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानम् उदासारिण्यः
प्रत्यासारिण्यः साधुकारिणि च साधुकारी साधुदायी ब्रह्मणि वदः ब्रह्मवादिनो
वदन्ति कर्त्तर्युपमाने कर्त्तृवाचिनि उपमाने उपपदे धातोः णिनिः प्रत्ययो भवति
उपपदकर्त्ता प्रत्ययार्थस्य कर्त्तुरुपमानम् उष्ट्र इव क्रोशति उष्ट्रक्रोशी ध्वांक्षविना
रावी अताच्छीलार्थं आरंभः जात्यर्थोश्च कर्त्तरीति किम् अपूपानिव भक्षयति
माषान् उपमान इति किम् उष्ट्रः क्रोशति व्रते व्रतमिति शास्त्रतो नियम उच्यते
व्रते गम्यमाने सुबन्ते उपपदे धातोः णिनिः प्रत्ययो भवति समुदायोपाधिश्चा
यं धातूपपदप्रत्ययसमुदायेन चेद्व्रतं गम्यत इति स्थण्डिलशायी अश्राद्ध अश्रा
द्धभोजी कामचारप्राप्तो नियमः प्रतिपाद्यते स्थण्डिल एव शेते नान्यत्रेति भुञ्
क्ते अश्राद्धमेव भुंक्ते न श्राद्धमिति व्रत इति किं स्थण्डिले शेते देवदत्तः अताच्छी
ल्यार्थ आरंभः जात्यर्थो वा बहुलमाभीक्ष्ण्ये आभीक्ष्ण्ये गम्यमाने सुबन्त उप
पदे धातोः णिनिः प्रत्ययः बहुलं भवति आभीक्ष्ण्यं पौनःपुन्यम् तात्पर्यमासेवा

ताच्छील्यादन्यत्र कषायपायिनो गान्धाराः क्षीरपायिन उशीनराः सौवीरपायि-
नो वाह्लीकाः बहुलग्रहणात् कुल्माषखादादस्य च न भवति मनेतश्च सुपीति
वर्त्तते मन्यतेर्धातोः सुबन्त उपपदे णिनिप्रत्ययो भवति दर्शनीयमानी शोभन-
मानी बहुलग्रहणानुवृत्तेर्मन्यतेर्ग्रहणं न मनतेः तनादेरस्तु दिवादेरप्रत्ययवि-
कारकृतो विशेषः स्यात् आत्ममाने खश्च आत्मनो मननम् आत्ममानः आत्म-
माने वर्त्तमानान्मन्यतेः सुप्युपपदे खश्प्रत्ययो भवति चकाराण्णिनिश्च यदा प्रत्य-
यार्थः कर्त्ता आत्मानमेव दर्शनीयत्वादिना धर्मेणायुक्तं मन्यते तदायं विधिः
दर्शनीयमात्मानं मन्यते दर्शनीयंमन्यः दर्शनीयमानी पण्डितंमन्यः पण्डितमा-
नी आत्ममान इति किम् दर्शनीयमानी देवदत्तस्य भूते भूत इत्यधिकारो व-
र्त्तमाने लडिति यावत् यदित ऊर्ध्वमनुक्रमिष्यामः भूते तद्वेदितव्यम् याव-
धिकारश्च यावदर्थे भूत इति विज्ञायते बहुलात् करणे यजः अग्निष्टोमेनेष्टवा-
न् अग्निष्टोमयाजी भूत इति किम् अग्निष्टोमेन यजते करणे यजः णिनिरत्र

का॰ वृ॰ ९५

वर्त्तते तेन वेषा यजेर्धातोः करणेउपपदे णिनिप्रत्ययो भवति भूते अग्निष्टोमयाजी
वाजपेययाजी अग्निष्टोमः फलभावनायां करणं भवति कर्मणि हनः कर्मण्यु
पपदे हन्तेर्धातोः भूते णिनिप्रत्ययो भवति पितृव्यघाती मातुलघाती कुत्सितग्र
हणं कर्त्तव्यम इह मा भूत चौरं हतवानिति ब्रह्मभ्रूणवृत्रेषु क्विप कर्मणीति
वर्त्तते ब्रह्मादिषु कर्मसूपपदेषु हन्तेः क्विप्प्रत्ययो भवति ब्रह्महा भ्रूणहा वृत्र
हा किमर्थमिदं यावता सर्वधातुभ्यः क्विप् विहित एव ब्रह्मादिषु हन्तेः क्विब्वचनं नि
यमार्थम चतुर्विधश्चात्र नियम इष्यते ब्रह्मादिष्वेव हन्तेः नान्यस्मिन्नुपपदे इह
न भवति पुरुषं हतवानिति ब्रह्मादिषु हन्तेरेव नान्यतः ब्रह्माधीतवानिति ब्र
ह्मादिषु क्विबेव नान्यः प्रत्ययः तथा भूत एव नान्यस्मिन्काले ब्राह्मणं हन्ति हनि
ष्यति वेति तदेतद्वक्ष्यमाणस्य बहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यते बहुल
छन्दसि पूर्वेण नियमात्प्राप्तो विधीयते छन्दसि विषये उपपदान्तरेऽपि हन्तेर्बहु
लं क्विप्प्रत्ययो भवति यो मातृहा पितृहा च न भवति मातृघातः पितृघातः स

वति बुद्धिजः संस्कारः स्वेदजो डंशः खेम अजाताविति किम् अश्वाजातः हस्ति
नो जातः उपसर्गे च संज्ञायाम् उपसर्गे चोपपदे संज्ञायां विषये जनेर्ड प्रत्ययो
भवति समुदायोपाधिः संज्ञाश्चेषमामान्तवीः प्रजाः अनौ कर्मणि अनुपूर्वा
ज्जनेः कर्मण्युपपदे ड प्रत्ययो भवति पुमांसमनुजातः पुमनुजः स्त्रियमनुजा
तः स्त्र्यनुजः अन्येष्वपि दृश्यते अन्येष्वप्युपपदेषु कारकेषु जनेर्ड प्रत्ययो
दृश्यते सप्तम्यामित्युक्तमसप्तम्यामपि दृश्यते न जातः अजः द्विर्जातः द्विजः
पञ्चम्यामजातावित्युक्तम् जाताविपि दृश्यते ब्राह्मणजो धर्मः क्षत्रियजं युद्धं
उपसर्गे च संज्ञायामित्युक्तमसंज्ञायामपि दृश्यते अभिजाः परिजाः केशाः ।
नौ कर्मणीत्युक्तमकर्मण्यपि दृश्यते अनुजातः अनुजः अपि शब्दः सम्भाप
पि व्यभिचारार्थः तेन यथाऽनन्तरादपि भवति कारकान्तरेऽपि विधानात्तावपि विधाना
आख्याताता वा निष्ठा क्तक्तवन्तू निष्ठेति क्तक्तवन्तौ निष्ठासंज्ञः प्रत्ययो भूते भव
ति कृतः कृतवान् भुक्तः भुक्तवान् निष्ठायामितरेतराश्रयत्वात् प्रसिद्धिः संज्ञया क्त

कृवन्तुभावेन सतोऽन्तयोः संज्ञया भवितव्यम् तेषु दोषः भाविनी संज्ञा विज्ञायते
सम्भूते भविष्यति सम्भाव्य स्वनिष्ठेनोऽस्य संज्ञा भवतीति सामर्थ्यात् कृवतोर्वि
धानमेवैतत् आदिकर्मणि निष्ठा वक्तव्या प्रकृतः कटं देवदत्तः प्रकृतवान् कटं
देवदत्तः मयजोर्द्दूतिष मनुतेर्यजतेश्च हृदि निष्ठा प्रत्ययो भवति सुत्वा नीय जाता
जीयते रस्नन भूतेः पत्वतीयते धातोः भूते अत्र प्रत्ययो भवति जरन् जस्मनो
जरन्तः वामनूपाणि निष्ठा जीर्णाः जीर्णवानिति कं सिलिट् भूते प्रत्ययः कन्वसि
विषये धातोः लिट् प्रत्ययो भवति भूते अहं सूर्यमभयतो ददर्श अहं द्यावापृथिवी आ
ततान कं सलि लेले लिट् इति सामान्येन लिट् विहित एव धातोः सर्वेषां
यिः अयं न विशेषेण लिटः कानज्वा लिटः कानजित्ययमादेशो भवति अ
ग्निं चिक्यानः वहस्मौ सुषुवाणाः न च भवति अहं द्यावापृथिवी आततान लिट्
ग्रहणं किम् न पूर्वस्यैव प्रकृतस्य आदेशविधाने विभक्तिविपरिणामो भविष्य
ति लिट्मात्रस्य यथा स्यात् योऽपि परोक्षे विहितस्तस्याप्ययमादेशो भवति ॥

कर्मपापमंत्रपुण्येषुकृञः कर्मणीतिवर्त्ततेतत्संभवात्सुशब्दंवर्ज्जयित्वावशिष्टा
नांविशेषणानाम् स्वादिषुकर्मसूपपदेषुकरोतेर्धातोःक्विप्प्रत्ययोभवति सुकृत क
र्मकृत पापकृत मंत्रकृत पुण्यकृत अयमपि नियमार्थआरंभः त्रिविधश्चात्रनि
यमइष्यतेधातुनियमंवर्ज्जयित्वाकालोपपदप्रत्ययविषयःधातोरनियुक्तत्वात अ
स्मिन्नुपपदेभवतिशास्त्रकृत भाष्यकृत विहारकृतमठकृत सोमेसुञः
कर्मणीतिवर्त्ततेसोमेकर्मण्युपपदेसुञ्धातोःक्विप्प्रत्ययोभवतिसोमसुत सो
मसुतौसोमसुतःअयमपिनियमार्थआरंभःचत्रविधश्चात्रनियमइष्यतेकालभू
पपदप्रत्ययविषयः अग्नौचे कर्मणीत्येवाग्नौकर्मण्युपपदेचिनोतेर्धातोःक्वि
प्प्रत्ययोभवतिअग्निचित अग्निचितौअग्निचितःअत्रापिपूर्ववच्चतुर्विधानियम
इष्यते कर्मण्यग्न्याख्यायाम चेःकर्मणीतिवर्त्ततेकर्मण्युपपदेचिनोतेर्धातोः
कर्मण्येवकारकेक्विप्प्रत्ययोभवतिअग्न्याख्यायाम धातूपपदप्रत्ययसमुदायेन
चेदग्न्याख्यागम्यते श्येनइवचीयतेश्येनचित काकचित रथचक्रचित अग्न्याख्या
थ

ग्रहणांश्रुतिसंप्रत्ययार्थम अप्रत्ययोहिस्यात्कावयउभनेषपतसिदिति कर्मणीनि
विक्रियः कर्मण्युपपदेविपूर्वात्क्रीणातेर्धातोरिनिप्रत्ययोभवतिकर्मणीतिव
र्तमानेपुनःकर्मग्रहणंकर्तुःकृत्यानितिमित्रेकर्मणियथास्यात् कर्ममात्रेमाभू
त् सोमविक्रयीघृतविक्रयीतैलविक्रयीइहनभवतिधान्यविक्रायः दृशेःक्व।
निप् कर्मणीत्येवदृशोधातोःकर्मण्युपपदेक्वनिप्प्रत्ययोभवतिमेरुदृश्वापरलो।
कदृश्वाअन्यत्रभापिदृशपनइतिक्वनिपिसिद्धेपुनर्वचनंप्रत्ययान्तरनिवृत्त्यर्थम ।
राजनियुधिकृञोः कर्मणीत्येवराजशब्देकर्मवाचिन्युपपदेयुध्यतेःकरोतेश्चक्व
निप्प्रत्ययोभवतिननवयुध्यतेरकर्मकःअन्तर्भावितण्यर्थःसकर्मकोभवतिरा
जयुध्वाराजानंयोधितवानित्यर्थः राजकृत्वा सहेच सहशब्देचोपपदेयुधिकृञः
क्वनिप्प्रत्ययोभवतिसन्ननवचनमात्रोपपदंकर्मणाविशिष्यतेसहयुध्वासहकृ
त्वा सप्तम्यांजनेर्डः सप्तम्यन्तउपपदेजनेर्धातोर्डप्रत्ययोभवतिउपसरेजातउप
सरजःमन्दुरजः पंचम्यामजातौ पंचम्यन्तउपपदेजातिवर्जितेजनेर्डप्रत्ययोभ

क्वसुश्च लिटः क्वसुरादेशो भवति वा जक्षिवान् पपिवान् तत्र भवति ग्रहेस्पृ
सुभयतोदृश्यतोगोविभाषाउत्तरार्थः भाषायांसदवसश्रुवः सदवसश्रुभ्यउत्तरस्यैत
भाषाभूतभूः परस्य लिटः भाषायांविषये क्वसुरादेशो भवति आदेशविधानादेव
लिडप्यत्रविषयेऽनुमीयते उपसेदिवान्कौत्सः पाणिनिं उपासदत् उपासीद
त् उपाससाद अनूषिवान्कौत्सः पाणिनिम् अन्ववात्सीत् अन्ववसत् अनू
वास उपशुश्रुवान्कौत्सः पाणिनिम् उपाश्रौषीत् उपाशृणोत् उपशुश्राव
लुङ्लङ्लिड्विषयेपि पर्यायेण भवन्ति उपेयिवाननाश्वाननूचानश्च उपेयि
वान् अनाश्वान् अनूचान इत्येते शब्दा निपात्यन्ते उपपूर्वादिणः क्वसुर्द्विर्व
चनमभ्यासदीर्घत्वम् तत्सामर्थ्यादेवादेशाप्रतिषेधः एकाजाद्यमाभित
त्येकाः त्वासदीर्घाभ्यासोतिनिवर्णयते अभ्यासस्य सवर्णे परतो रूपस्य यणादेशः
उपेयिवान् क्रादिनियमप्राप्तस्य प्रतिषेधः सपुनरिट् प्रतिप्रसूयते तेन तार्जादे
न भवति उपेयुषा उपेयुषेन वाङ्गोपसर्गसंग्रहम् अन्योपसर्गपूर्वो निरुपसर्गो

अभवन्नेव समीयिवान् ईयिवान् वा वचनादुभे पूर्वेवल्लादयो भवन्ति उ
पागात् उपैत् उपेयाय अज्ञाते नेष्पूर्वोक्ता सन्निपात्यते इह भावस्य अनाख्यान्
नाषीत् नाख्यान् नाश्र वचेरन पूर्वोक्ते तिरिकानद्वि पात्यते अन्वानः अन्व
वोचत् अनब्रवीत् अनुवाच लुङ् भूत इत्येव भूते अर्थे वर्तमानाद्धातोर्लुङ् ।
प्रत्ययो भवति अकार्षीत् अहार्षीत् वसेर्ल जागर्ति घोषे जागरण मन्त्रो तोऽक
भवान्नुषितः अमुत्रावासम अनद्यतने लङ् भूत इत्येव अनभूत इति बहु
व्रीहिनिर्देशः अविद्यमानाद्यतने भूतेऽर्थे वर्तमानाद्धातोर्लङ् प्रत्ययो भवति अ
करोत् अहरत् बहुव्रीहिनिर्देशः किमर्थं अद्य ह्यो भूत्स्य हि व्यामिश्रे मा भूत
परोक्षे लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः अरुणद्यवनः साकेत
अरुणद्यवनो माध्यमिकान् अभिज्ञावचने लृट् अभिज्ञा स्मृतिः तद्वचने उप
पदे अनद्यतने लृट् प्रत्ययो भवति लङोऽपवादः अभिजानासि देवदत्त कश्मी
रेषु वत्स्यामः अभिजानासि देवदत्त मगधेषु वत्स्यामः वचनग्रहणं पर्यायार्थम

अभिजानासिस्मरसिचेतयसीति नयदि यच्छब्देनसहितेअभिज्ञावचने
उपपदेलृट्प्रत्ययोनभवति पूर्वेणप्राप्तःप्रतिषिध्यते अभिजानासिदेवदत्त
यत्कश्मीरेषुवसामवासमाश्चतत्रस्मर्यतेनवपरोक्षंकिंचिल्लक्ष्यते विभाषासा
कांक्षे यदीतिनानुवर्त्ततेतत्रयदिविभाषेयं अभिज्ञावचनेउपपदेयच्छब्दस
हितेकेवलेचविभाषालृट्प्रत्ययोभवति साकांक्षश्चेत्प्रयोक्तालक्ष्यल
क्षणयोःसंबंधेप्रयोक्तुःसाकांक्षताभवति अभिजानासिदेवदत्तकश्मीरेषुवत्स्या
मःतत्रौदनंभोक्ष्यामहे अभिजानासिदेवदत्तकश्मीरेषुवसाम तत्रौदनंभुं
ज्महि यदिखल्वपि अभिजानासिदेवदत्तकश्मीरेषुवसामयत्तत्रौदनंभुंजम
हि वासोलक्षणंभोजनंलक्ष्यम् परोक्षेलिट् भूतेअनद्यतनइतिवर्त्ततेतत
स्यविशेषणंअपरोक्षम् भूतानद्यतनपरोक्षेवर्त्तमानाद्धातोःलिट्प्रत्ययो
भवतिनत्वथानर्थःसर्वःपरोक्षएवमन्यमेतदस्तित्तलोकेतत्रापिप्रत्यक्षा
भिमानःसपत्नास्तिनपरोक्षम् इत्युच्यतेचकारजहार उत्तमविषयेपिचि

त्व्याहे पाण्डवे हन्ता मं म भवत्येवं तद्यथा मत्तोहं किल विललाप मत्तोहं किल
विललाप अत्यन्तापह्नवे लिड्वक्तव्यः कलिङ्गेषु स्थितोसि नाहं कलिङ्गान् जगा
म नाहं दक्षिणापथं प्रविवेश। हशश्वतोर्लङ् च भूतानद्यतनपरोक्षे लिटि
प्राप्ते हशश्वतोरुपपदयोर्लङ् प्रत्ययो भवति चकाराल्लिट् च इति हाकरोत्
इति ह चकार शश्वदकरोत् शश्वच्चकार। प्रश्ने चासन्नकाले भूतानद्यतन
परोक्ष इति वर्त्तते तस्य विशेषणमेतत् पृच्छ्यत इति प्रश्नः आसन्नकाले पृच्छ्यमा
ने भूतानद्यतनपरोक्षे वर्त्तमानाद्धातोः लङ्लिटौ प्रत्ययौ भवतः कश्चित्कंचित्
पृच्छति अगच्छद्देवदत्तः यजद्देवदत्तः इयाज देवदत्तः प्रश्न इति किं
देवदत्तो जगाम ग्रामम् आसन्नकाल इति किम् भवन्तं पृच्छामि जघान कंसं किल
वासुदेवः। लट् स्मे भूतानद्यतनपरोक्ष इति वर्त्तते स्मशब्द उपपदे परोक्षे
लट् प्रत्ययो भवति लिटोपवादः नडेन स्म पुराधीयते ऊर्ल्या स्म पुराधी
यते। अपरोक्षे च अपरोक्षे च भूतानद्यतनेर्थे वर्त्तमानाद्धातोः स्मशब्द उप

पलट्प्रत्ययो भवति एवं स्म पिताब्रवीत् इति स्म उपाध्यायः कथयति ननौ पृ
ष्टप्रतिवचने अनद्यतने परोक्षे इति निवृत्तम् भूतमात्रे अविपर्ययम् ननुश
ब्दे उपपदे प्रश्नपूर्वके प्रतिवचने गम्यमाने भूते लट्प्रत्ययो भवति अकार्षीः क
टं देवदत्त ननु करोमि भोः अवोचस्तत्र किंचिद्देवदत्त ननु ब्रवीमि भोः पृष्टप्र
तिवचने इति किम् नन्वकार्षीन्माणवकः नन्वोर्विभाषा नशब्दे नुशब्दे चोपप
दे पृष्टप्रतिवचने विभाषा लट्प्रत्ययो भवति अकार्षीः कटं देवदत्त न करो
मि भोः नाकार्षं अहं नु करोमि अहं न्वकार्षं पुरे लट् चास्मे अनद्यतनग्रहण
मिह न संबध्यते अनुवर्तते पुराशब्दे उपपदे स्मवर्जिते भूतानद्यतने विभाषा
लट्प्रत्ययो भवति लङ् च ताभ्यां मुक्ते यथाविषयमन्योपि प्रत्ययो भवति वसन्ती
ह पुरा छात्राः अवात्सुरिह पुरा छात्राः अवसन्निह पुरा छात्राः
ऊषुरिह पुरा छात्राः स्मे इति किं न पेठुः स्म पुरा अधीयते वर्तमाने लट् प्रारब्धा
परिसमाप्तश्च वर्तमानः वर्तमानेर्थे वर्तमानाद्धातोः लट्प्रत्ययो भवति पच

का॰
वृ ३
१५५

तिनयति लटः शतृशानचावप्रथमासमानाधिकरणे लटः शतृशानचावादेशौ
भवतः प्रथमान्तेनचेत्समानाधिकरणं भवति पचन्तं पश्य पचन्ता
कृतम् पचमानेन कृतम् अप्रथमासमानाधिकरणे इति किम् पचति देवदत्तः
लडिति वर्तमाने पुनर्लड्ग्रहणमधिकवचनार्थं क्वचित्प्रथमासमानाधिक
रणेपि भवति सन्ब्राह्मणः अस्ति ब्राह्मणः विद्यमानः विद्यते जुह्वत् जुहोति अधी
यानः अधीते मास्माकोषी मापचन् मापचमानः केचिद्विभाषाग्रहणमनुवर्तय
न्ति न त्वेविभाषेति सा च व्यवस्थितविभाषा तत्र यथादर्शनं प्रयोगानेतव्याः ।
संबोधनेच प्रथमासमानाधिकरणार्थं आरंभः संबोधने विषये लटः शतृशा
नचावादेशौ भवतः हे पचन् हे पचमान लक्षणहेत्वोः क्रियायाः लक्ष्यते चि
ह्नते येन तल्लक्षणम् जनको हेतुः यानयानर्थविशेषणे चैतत् लक्षणहेत्वो
र्थे वर्तमानात् धातोः परस्य लटः शतृशानचावादेशौ भवतः तौ चेल्लक्षण
हेतू क्रियाविशेषौ भवतः शयाना भुञ्जते यवनाः तिष्ठन्तो न शासति गणकाः

हेतावर्जयन्वसतिग्रुणीषानोवसतिलक्षणहेत्वोरितिकिम् पचतिपठतिवर्जि
यायाइतिकिम् प्रभूतगुणयोगाभ्भूत् यःकंपतेसोश्वत्थःयउपम्रवतेसयुलड्
णाहेत्वोरितितिर्देशःपूर्वनिपातव्यभिचारलिंगम् तौसत् तौशतृशानचौसत्सं
ज्ञौभवतः तौग्रहणमुपाधसमस्तगार्थे शानट्शानच्मात्रस्यसंज्ञाभवति ब्राह्मणस्य
कुर्वन् ब्राह्मणस्यकुर्वाणः ब्राह्मणस्यकरिष्यन् ब्राह्मणस्यकरिष्यमाणः
सत्प्रदेशाः पूरणगुणसुहितार्थसदव्ययमादयः पूङ्यजोःशानन् पूङःयजश्च
शानन्प्रत्ययोभवतिपचमानः यजमानः यदिप्रत्ययाःशाननादयोनलादेशा
कथंसोमंपवमानः नडमाघ्नानइतिषष्ठीप्रतिषेधः चत्विति प्रत्याहारनिर्देशा
त् कसन्निविष्टानांप्रत्याहारः लट्शतृशानच् इत्यतः प्रभृति आतृन्नोनकारात् द्वि
षःशतुर्वावचनम् चोरस्यद्विषन् चोरंद्विषन् ताच्छील्यवयोवचनशक्तिषु
चानश् ताच्छील्येनस्वभावता वयःशरीरावस्थायौवनादिः शक्तिःसामर्थ्य
म् ताच्छील्यादिषुगम्यमानेषुधातोःचानश्प्रत्ययोभवतिताच्छील्येताव

का. वृ. १५९

न कतीह मेरुयमानाः कतीह भूषयमाणाः वयोवचने कतीह शिखंडं वहमानाः ।
कतीह शिखंडं वहमानाः शक्तौ कतीह निघ्नानाः कतीह पचमानाः ॥ इङ्धार्योः श
त्रकृच्छ्रिणि ॥ इङ्धार्योः शन्तृप्रत्ययो भवति अकृच्छ्रिणि कर्त्तरि अकृच्छ्रेणा
त्वमाध्येयस्य कर्त्तुर्धीनत्वं सोऽकृच्छ्री अधीयन् पारायणम् धारयन्नुपनिषदम् अ
कृच्छ्रिणीति किम् कृच्छ्रेणाधीते कृच्छ्रेण धारयति ॥ द्विषोऽमित्रे ॥ अमित्रः श
त्रुः अमित्रे कर्त्तरि द्विषधातोः शन्तृप्रत्ययो भवति द्विषन् द्विषन्तौ द्विषन्तः अमित्र इ
ति किम् द्वेष्टि पतिं भार्या ॥ सुञो यज्ञसंयोगे ॥ यज्ञसंयोगे यज्ञसंयुक्ते
ऽभिषवे वर्त्तमानात् सुनोतेर्धातोः शन्तृप्रत्ययो भवति सर्वे सुन्वन्तः सर्वे यजमा
नाः सत्रिण उच्यन्ते संयोगग्रहणं प्रधानभूतकर्त्तृप्रतिपत्त्यर्थं याजकेषु माभू
दिति यज्ञसंयोग इति किं सुनोति सुराम् ॥ अर्हः प्रशंसायाम् ॥ प्रशंसा स्तुतिः प्र
शंसाविषये अर्हतेर्धातोः शन्तृप्रत्ययो भवति अर्हन्निह भवान् विद्याम् अर्हन्नि
ह भवान् पूजाम् प्रशंसायामिति किम् अर्हति चौरो वधम् ॥ आक्वेस्तच्छीलतद्ध

+ तच्छीलादिषु कर्तृषु ते वेदितव्याः अभिविधौ चायमाकारः क्विपो ऽप्ययं मध्यनिर्देशः ॥२

मेतत्साधिकारिषु भ्राजभासेति क्विपं वक्ष्यति आ ततः क्विपः शब्दनाद्यानित ऊ
र्ध्वमनुक्रमिष्यामः + तदिति धात्वर्थः शीलादिविशेषणत्वेन निर्दिश्य
ते तच्छीलो यः स्वभावतः फलनिरपेक्षस्तत्र प्रवर्तते तद्धर्मा तदाचारो यः स्व
धर्मोऽयं ममेति प्रवर्तते विनापि शीलेन तत्साधुकारी यो यावदर्थं साधु करो
ति उदाहरणान्युदाहरिष्यामः तृन् सार्वधातुकः भाः तृन्प्रत्ययो भवति तच्छीलादि
षु कर्तृषु नकारः स्वरार्थः तच्छीले तावत् कर्ता कटान् वदिता जनवादा
न् तद्धर्मिणि मुण्डयितारः श्राविष्ठायना भवन्ति वधूमूढामपहर्तारः आह्व
रका भवन्ति श्राद्धे सिद्धे तत्साधुकारिणि कर्ता विकटः गन्ता खलवः तृन्वि
धावृत्विक्षु चानुपसर्गस्य होता पोता अनुपसर्गस्येति किम् उद्गाता प्रतिह
र्ता तृजेव भवति स्वरे विशेषः नयतेः षुक्च नेष्टा त्विषेर्देवतायामकारश्चोप
धाया अनिट्त्वं च त्वष्टा क्षदेश्च युक्ते क्षत्ता विरशिक्रतम् उच्यते कदसिवस्य
हन्तृ तृजेव स्वरविशेषः अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यप

का॰ वृ॰ ५८

उणविरुच्यपत्रपवृतुवृधुसहचरइष्णुच् अलंकृञ् निराकृञ् प्रजन उत्पच उत्पत उत्पद
रुचि अपत्रप वृतु वृधु सह चर इत्येतेभ्यः धातुभ्यः तच्छीलादिषु कर्तृष्विष्णु।
च्प्रत्ययो भवति अलंकरिष्णुः निराकरिष्णुः प्रजनिष्णुः उत्पचिष्णुः उत्पति
ष्णुः उत्पदिष्णुः उन्मदिष्णुः रोचिष्णुः अपत्रपिष्णुः वर्तिष्णुः वर्धिष्णुः सहिष्णुः
चरिष्णुः णेश्छन्दसि णिजन्ताद्धातोश्छन्दसि विषये इष्णुच्प्रत्ययो भवति
दृषद्धारयिष्णवः वीरुधः पारयिष्णवः भुवश्च भवतेर्धातोश्छन्दसि विषये
तच्छीलादिषु इष्णुच्प्रत्ययो भवति भविष्णुः योगविभाग उत्तरार्थः चकारा
नुकृष्टसमुच्चयार्थः भ्राजिष्णुः नालोहिजं च दनेन ग्लाजिस्थश्च क्स्नुः स्वच्छ
न्दसीति निवृत्तम् ग्लाजिस्था इत्येतेभ्यः धातुभ्यः चकाराद्भुवश्च तच्छीलादि
षु क्स्नुः प्रत्ययो भवति ग्लास्नुः जिष्णुः स्थास्नुः भूष्णुः गित्त्वाय प्रत्ययान्तकिन ते
न स्थइकारो न भवति निष्क्रिति चेत्यत्र गकारोपि चेन भूतो निर्दिश्यते तेन गु
णो न भवति भूक्कः कितीत्यत्रापि तेन भवतेर्गुणो न भवति स्नोर्दीर्घान्नस्य इका

१५७

रिद्धितोमीनस्य श्यामनातः ग्लाणाभावस्थिष्मार्यः श्नुकोनित्वंगोकोविनोः
दर्षोक्ते दमिदेन्त्वः पञावः उमिम्प्वीपञ्चोषिद्विषः क्रुः उमादिभ्योधातुभ्यः
तत्कोलादिष्वकुप्रत्ययोभवति उमुः दमूः श्रमुः शिमुः शमित्राह्मो।
विनाः इतिघाञ्जुग्राघर्षेशमादिभ्यः उष्ट्राभ्योधातुभ्यः तत्कोलादिषु वि
नाः प्रत्ययोभवति मटीहर्षेद्रत्येवमूतः शमादिर्दिवाद्यन्तर्गणः ये कारः उ
वर्णकुवार्थः उकार उच्चारणार्थः शमीतमी दमी श्रमी भ्रमी क्रमी क्लमी प्र
मादी उष्ट्राभ्यइतिकिम उमिता संघवान् क्वाथाद्यमासम्पीत्यत्र जपा
विदेविमजवयोविलिष्पयोरटपक्लिवृदपोदहदपोमिहृडधादिषु दुःरुद्दल्प
जाकीडविविदत्यसनजभजातिवुताप वनास्तुषाभ्याह नतश्च चिनसि भ्यत
वर्तते संप्रवादिभ्योधातुभ्यः तत्कोलादिषु यिनाप्रत्ययोभवति संवीसं
पर्कहतिस्यादिनिदत्युनेनवदादिः न्वविकरणार्थात् अस्तु यकामे यम
परेम यमयन्ते स्वगतोस्त्ज विस्मरो पनिटेवि भवादिः देवृदेवने विपश्च

दिवादिस्त्वादिस्त्वादिश्च सामान्येन गृह्यते अजन्तमाथौ दिवादिः युजि
र्योगे रुधादिः द्वयोरपि ग्रहणं रञ्जेर्नलोपनिपातनं दंशेर्नासिकलोपः संप
र्की अनुरोधी आयामी आयासी परिसारी संसर्गी परिदेवी संज्वारी परिक्षेपी
परिरापी परिरटी परिवादी परिदाही परिमोही दोषी द्वेषी द्रोही दोही यो
गी आक्रीडी विवेकी त्यागी रागी भागी अतिचारी अपचारी आमोषी अभ्या
घाती वौ कषलसकत्थस्रम्भः कषहिंसार्थः लस श्लेषणक्रीडनयोः क
त्थश्लाघायां स्रन्भु विश्वासे एभ्यो धातुभ्यः विशब्द उपपदे घिनुण्प्रत्ययो
भवति विकाषी वि विकासी विकत्थी विस्रंभी अपे च लषः लष कान्ता
वस्माद्धातोः अपे उपपदे चशब्दाद्वौ च घिनुण्प्रत्ययो भवति अपलाषी वि
लाषी प्रे लपसृद्रुमथवदवसः प्रे उपपदे लपादिभ्यो धातुभ्यः घिनुण्प्रत्ययो
भवति प्रलापी प्रसारी प्रद्रावी प्रमाथी प्रवादी प्रवासी वसतिभासहत्यस्य
ग्रहणं नाच्छादनार्थस्य लुग्विकरणात् निन्दहिंसक्लिशखादविना

शिपपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् निंदादिभ्यो धातुभ्यः तच्छी
लादिषु वुञ् प्रत्ययो भवति पंचम्यर्थे प्रथमा क्लिश उपतापे क्लिशू विबाधने द्व
योरपि ग्रहणम् निंदकः हिंसकः क्लेशकः खादकः विनाशकः परिक्षेपकः
परिवादकः व्याभाषकः असूयकः वुल्वसिद्धे वुञ्विधानं ज्ञापकं ताच्छीलि
केषु वासरूपन्यायेन तृजादयो न भवन्ति देविक्रुशोश्चोपसर्गे देवयतेः
क्रोशतेश्च धातोरुपसर्गे उपपदे तच्छीलादिषु वुञ् प्रत्ययो भवति आदेवकः
परिदेवकः आक्रोशकः परिक्रोशकः उपसर्गे इति किं देवयिता क्रोष्टा ।
चलनशब्दार्थादकर्मकाद्युच् चलनार्थेभ्यः शब्दार्थेभ्यः धातुभ्यः अकर्म
केभ्यः तच्छीलादिषु युच्प्रत्ययो भवति चलनः चोपनः शब्दार्थेभ्यः शब्द
नः रवणः अकर्मकादिति किम् पठिता विद्याम् अनुदात्तेतश्च हलादेः अ
नुदात्तेभ्यो धातुभ्यः हलादिभ्यः तच्छीलादिषु युच्प्रत्ययो भवति वर्तनः
वर्धनः अनुदात्तेत इति किं भविता हलादेरिति किम् एधिता आदिग्रहणं

का॰
वृ॰
१५८

किम् जुगुप्सतः मीमांसतः अकर्मकादित्येव वसिता वस्त्रम् जुचंक्रम्यदन्द्रम्यसृ
गृधिज्वलशुचलषपतपदः जुप्रभृतिभ्यः धातुभ्यः तच्छीलादिषु युच्प्रत्ययो भ
वति जवनः चंक्रमणः दन्द्रमणः सरणः गर्धनः ज्वलनः शोचनः लषणः पतनः
पदनः चलनार्थानां पदेश्च ग्रहणम् इह सकर्मकार्थं ज्ञापनार्थं च पदिग्रहणम्
एवं ज्ञापयति ताच्छीलिकेषु वासरूपविधिर्न भवतीति अलंकृञः तृन्न भवति अ
लंकर्तेति तथा क्विप्चेस्फुक आदिशेषविहितेन सामान्यविहितास्तृजसरूपत्वा
त्समाविशेयुः किमनेन विधानेन ज्ञापनार्थं तत्पुनर्विधीयते ज्ञापकं चेदं ज्ञाप
कं क्वचिन्न समावेश इष्यते एवं गन्ता लम्बा विकत्थना क्रुधमण्डार्थेभ्यश्च क्रुध
कोपे मडि भूषायां एतदर्थेभ्यो धातुभ्यः युच्प्रत्ययो भवति क्रोधनः रोषणः म
ण्डनः भूषणः न यः यकारान्ताद्धातोः युच्प्रत्ययो न भवति पूर्वेण
प्राप्तः प्रतिषिध्यते क्नूयिता क्ष्मायिता सूददीपदीक्षश्च सूददीपदीक्ष इत्ये
तेभ्यः धातुभ्यः युच्प्रत्ययो न भवति अनुदात्तेत इति प्राप्तः प्रतिषिध्यते सूदिता

१५८

तादीपितादीक्षिता नन्वदीपीति विशेषविहितोस्य प्रत्ययः नर्त्तकी मिकपीति सपवर्वाधको
भविष्यतीत्येती किं प्रतिषेधेन वासरूपेणायुजपि प्राप्नोति ताना त्वकीलिके षुवासरूपविधि
र्नास्तीति प्रायिकमेतदित्युक्तं तथा च समावेशात् रूपते कपायुवतिः कपना युवतिः
कपाश्रुताखाकं पनाशाखावास्त्रूदे तु प्रतिषिद्धः कथं मधुसूदनः रिपुसूदनः बलसूदनः
अनित्यायं प्रतिषिद्धः इति योगविभागाद्विज्ञायते स्व अवथा नन्द्यादिषु मधुसूदनादयो द्रष्ट
व्ये लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् लषादिभ्यो धातुभ्यः उकञ् प्रत्ययो
भवति अपलाषुकं वृषलसंगतं अपात्तकामा गर्भा भवन्ति उपपादुकं सत्वं उपस्थायुकाए
नं पशवो भवन्ति प्रभावुकमन्नं भवति प्रवर्षुकः पर्जन्यः आघातुकं पाकं एतत्समूद्रम
कामुका एनं स्त्रियो भवन्ति आकामुकं वासः आशारुकः किंशारुकं तीक्ष्णमाहुः
जल्पभिक्षकुट्टलुण्ठवृङः षाकन् जल्पादिभ्यो धातुभ्यः षाकन् प्रत्ययो भवति षकारो
ङीषर्थः जल्पाकः भिक्षाकः कुट्टाकः लुण्ठाकः वराकः वराकी प्रजोरिनिः प्रपूर्वाज्ज
वतेरिनिः प्रत्ययो भवति प्रजवी प्रजविनौ प्रजविनः जिदृक्षिविश्रीण्वमाव्यथाभ्यम
परिभूप्रसूभ्यश्च जिदृक्षये द्विविधामहात्पोपिरितिद्वयोरपि ग्रहणं प्रप्रेशोनद्रत्यमग्रह

का॰
वृ॰
१८॰

णम् जिप्रभृतिभ्यो धातुभ्यः इनिप्रत्ययो भवति जयी दरी क्षयी विश्रयी अत्ययी अभ्यमी अ-
व्ययी अभ्यमी परिभवी प्रसवी स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् स्पृ-
हई स्पारलप्त्यगुणो पदगतौ अदादावदन्ताः पठ्यन्ते दयदानगतिरक्षणेषु द्राकुत्सि-
तायां गतौ निपूर्वः उत्पूर्वश्च तत् तदो नकारान्तता च निपात्यते दुधाञ् श्रत्पूर्वः एतेभ्यो
धातुभ्यः आलुच्प्रत्ययो भवति स्पृहयालुः गृहयालुः पतयालुः दयालुः निद्रालुः
तन्द्रालुः श्रद्धालुः आलुविधौ अयामन्तेत्याम शयालु दाधेसिशदसदो रुः दाधेट्सि शद सद
इत्येतेभ्यः धातुभ्यः रुप्रत्ययो भवति दारुः धारुः धारुर्विवत्सो मातरम् न लोकाव्य-
यनिष्ठेति उकारप्रश्लेषात् षष्ठी न भवति सेरुः शद्रुः सद्रुः सृघस्यदः क्मरच् सृघसि
अद इत्येतेभ्यो धातुभ्यः क्मरच् प्रत्ययो भवति सृमरः घस्मरः अद्मरः भञ्जभासमि-
दो घुरच् भञ्जभासमिद इत्येतेभ्यो धातुभ्यः घुरच्प्रत्ययो भवति भङ्गुरं काष्ठं भासुरं
ज्योतिः मेदुरः पशुः भञ्जेः कर्तरि अस्य अभावात् विदिभिदिच्छिदेः कुरच् ज्ञानार्थस्य विदेर्ग्र-
हणाम् अतः लाभार्थस्य असम्भवात् विदादिभ्यो धातुभ्यः कुरच्प्रत्ययो भवति विदुरः पं-
डितः विदुरं काष्ठम् छिदुरा रज्जुः भिदिच्छिदोः कर्मकर्तरि प्रत्ययः इणनशजिसर्ति

१८॰

भ्यः क्वरप् इणनशजिसृ इत्येतेभ्यो धातुभ्यः क्वरप्प्रत्ययो भवति इत्वरः नश्वरः जित्व
रः सृत्वरः गत्वरश्च गत्वर इति निपात्यते गमेरनुनासिकलोपः क्वरप्प्रत्ययः गत्वरः
जागरूकः जागर्तेर्धातोः ऊकप्रत्ययो भवति जागरूकः यजजपदशां यङः ।
यजजपदश इत्येतेषां यङन्तानां ऊकप्रत्ययो भवति यायजूकः जंजपूकः दन्दशू
कः नमिकम्पिस्म्यजसकमहिंसदीपो रः नमि कम्पि स्मि अजस कम हिंस दीप इ
त्येतेभ्यो धातुभ्यः रप्रत्ययो भवति नम्रं काष्ठं कम्प्रा शाखा स्मेरं मुखम् अजस्रं कम्रा
युवतिः हिंस्रं रक्षः दीप्रं काष्ठं अजस्रमिति जसु मोक्षणे नञ्पूर्वस्य रप्रत्ययः क्रियासा
तत्ये वर्त्तते सनाशंसभिक्ष उः सन्प्रत्ययान्तेन सनिधातुः तेन सनन्तेभ्यो धातु।
भ्यः आशंसेः भिक्षेश्च उप्रत्ययो भवति तच्छीलादिषु कर्म्मसु चिकीर्षुः आशंसुः भि
क्षुः आङः शासिरिच्छायामित्यनेन सूत्रेण आशंसेरिच्छार्थस्य विन्दुरिच्छुः विदे
र्नुमागमः इषेश्छत्वमकारस्य उप्रत्ययो निपात्यते वेदनशीलः विन्दुः एषणशीलः इ।
च्छुः क्याच्छन्दसि क्य इति क्यप्रत्ययान्तानां सामान्यग्रहणम् क्यान्ताद्धातोः छन्दसि विष
य उप्रत्ययो भवति तच्छीलादिषु मित्रयुः सुम्नयुः संस्वेदयुः आदृगमहनजनः किकि

नौलिङ्गवत् आकारान्तेभ्यो धातुभ्यः ऋकारान्तेभ्य गमहनजनहनेभ्यः क्वंसिविषये
तु क्वीलादिषु किकिनौ प्रत्ययौ भवतः लिड्वच्चैतौ भवतः आदितितकारो मुखसुखा
र्थः तद्वयेन परः मादिभ्यस्तादपि परस्तपरः इति ऋकारेण त्कालग्रहणम् पपिः सोमं
ददिर्गाः ऋकारान्तेभ्यः मित्रावरुणौ उभुरिष्टूरे सभ्रा जगुरि गमि जघ्निमन्त्रवाहन
जघ्निर्वृत्रम् जन जज्ञिर्बीज वर्षा सपर्जन्यः अथ किन्नो किमर्थम् यावता तद्गमैया
यात्स्विकिदिति सिद्धमेव ऋक्वकृतामिति लिड्वि गुणः प्रतिषेधविषय आरभ्यते
तस्यापि बाधनार्थं किन्नम उत्सर्गो क्वंदसिसदादिभ्योदर्शनात् सेदिः नेमिः भाषा
यां यथाक्रमं जन्निनमिभ्यः दधिचक्रिः सस्त्रिः जज्ञिनमिः सहिर्वाहिर्वलिपतिभ्यो य
ङन्तेभ्यः किकिनौ वक्तव्यौ सासहिः वावहिः वावलिः पापतिः स्वपितृषोर्नजि
ङ् कस्मीतिनिवृत्तम् स्वपेस्तृषेश्च धातोः तव्क्वीलादिषु नजिङ्प्रत्ययो भवति
स्वप्नक् स्वप्नजो स्वप्नजः तृष्णक् तृष्णजो तृष्णजः धृषन्तोरणः धृषि मायाम
वदि अभिवादनस्तम्भोः एताभ्यां धातुभ्यां तव्क्वीलादिषु आरुप्रत्ययो भवति शर
रुः वन्दारुः भियः क्रुक्लुकानौ त्रिभी भये एतस्माद्धातोः क्रुक्लुकानौ प्रत्ययौ भ।

वतः भीरुः भीलुकः भियः क्रुक्लुकनौ वक्तव्यम् भीरुकः स्थेशभासपिसकसो वरच् स्था
गतिनिवृत्तौ ईश ऐश्वर्ये भासृ दीप्तौ पिसृ पेसृ गतौ कस गतौ एतेभ्यो धातुभ्यः वरच्प्र
त्ययो भवति स्थावरः ईश्वरः भास्वरः पेस्वरः कस्वरः यश्च यङः या प्रापणे अस्माद्यङ
न्ताद्वरच्प्रत्ययो भवति यायावरः भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् भ्रा
जादिभ्यो धातुभ्यः तच्छीलादिषु कर्त्तृषु क्विप्प्रत्ययो भवति विभ्राट् विभ्राजौ भाः भासौ धूः
धुरौ विद्युत् विद्युतौ ऊः ऊर्जौ पूः पुरौ यजतेर्दीर्घश्च निपात्यते जूः जुवौ ग्रावस्तु
वत् ग्रावस्तुवौ किमर्थमिदमुच्यते यावता अन्येभ्योपि दृश्यते यावता अन्येभ्योपि
दृश्यते क्विबिति सिद्ध एव क्विप् ताच्छीलिकैर्न बाध्यते वासरूपविधिश्च नास्तीत्युक्तं
प्रथमं प्रायिके वा यं ततस्तस्यैवायं प्रपञ्चः अन्येभ्योपि दृश्यते अन्येभ्योपि धातु
भ्यः तच्छीलादिषु क्विप्प्रत्ययो दृश्यते पक् भिद् छिद् दृषिग्रहणं विध्यन्तरोपसं
ग्रहणं विध्यन्तरोपसंग्रहार्थं क्वचिद्दीर्घः क्वचिद्द्विर्वचनं क्वचित्संप्रसारणम् त
थाचाह क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोसंप्रसारणं च भवति वाक् प्र

क्विप् वाक् प्राट् आयतस्तूः कटप्रूः जूः श्रीः जुग्रहणोनार्थः भ्राजादिसूत्रेण प्रवृत्तहीत
त्वात् द्युतिगमिजुहोतीनां द्वे च दिद्युत् जगत् जुहोतेर्दीर्घश्च जुहूः दृभयेर्ह्रस्व
ह्रस्वश्च द्वे च ददृत् ध्यायतेः संप्रसारणं च धीः भुवः संज्ञान्तरयोः भवतेर्धातोः सं
ज्ञायामन्तरे च गम्यमाने क्विप्प्रत्ययो भवति मित्रभूर्नाम कश्चित् अन्तरे प्रतिभूः
धनिकाधमर्णयोरन्तरे तिष्ठति स प्रतिभूः विप्रसंभ्यो ड्वसंज्ञायाम् भ
वतेरिति वर्तते विप्रसम इत्येवं पूर्वाद्भवतेर्डुप्रत्ययो भवति न चेत्संज्ञा गम्यते विभुः
सर्वगतः प्रभुः स्वामी संभुर्जनिता असंज्ञायामिति किम् विभूर्नाम कश्चित् डुप्र
करणे मितद्र्वादिभ्य उपसंख्यानम् मितं द्रवति मितद्रुः शम्भुः धः कर्मणि ष्ट्रन् ध
यतेर्दधातेश्च धातोः कर्मणि कारके ष्ट्रन्प्रत्ययो भवति षकारो ङीषर्थः धयन्ति तां
दधति तां वा भैषज्यार्थमिति धात्री स्तनदायिनी आमलकी चोच्यते दाम्नीशसयुयु
जस्तुतुदसिसिचमिहपतदशनहः करणे दाप् लवने णीञ् प्रापणे शसु हिं
सायाम् यु मिश्रणे युजिर् योगे ष्टुञ् स्तुतौ तुद व्यथने षिञ् बन्धने सिच क्षरणे मिह

सेचने मतल्लगनौ दर्शादशनेनाहवेधनेनाप भ्यो धातुभ्यः करणे कारके ष्ट्रन् प्र
त्ययो भवति दाम्नितेनेति दात्रम् नेत्रम् शास्त्रम् योत्रम् योक्त्रम् स्तोत्रम् तोत्रम् से
त्रम् सेक्त्रम् मेढ्रम् पत्रम् दंष्ट्रा नद्ध्रीदंशेरनुनासिकलोपनिर्देशो ज्ञापनार्थः क्ङि
तोन्यस्मिन्नपि प्रत्यये भवतीति तेन लुप्यपि भवति दष्टानम् हलसूकरयोः पु
वः पूङ्पूञोरविशेषेण ग्रहणम् पूवो धातोः करणे कारके ष्ट्रन्प्रत्ययो भवति न
चेत्करणं हलसूकरयोरेव यो भवति हलस्य पोत्रं सूकरस्य पोत्रम् मुखमित्यर्थः
अर्तिलूधूसूखनसहचर इत्रः करणार्थे लूञ् छेदने धूविधूनने षूञ् प्रेरणे खन
अवदारणे षह मर्षणे चरगत्यर्थः इत्येतेभ्यो धातुभ्यः करणे कारके इत्रप्र
त्ययो भवति अरित्रम् लवित्रम् धवित्रम् सवित्रं खनित्रं सहित्रम् चरित्रम् पुवः
संज्ञायाम् पूङ्पूञोः सामान्येन ग्रहणं पूवो धातोः करणे कारके इत्रप्रत्ययो भ
वति समुदायेन चेत्संज्ञा गम्यते दर्भः पवित्रम् बर्हिः पवित्रम् कर्तरि चर्षिदेवतयोः
पूव इत्यनुवर्तते पूवो धातोः कर्तरि कारके इत्रप्रत्ययो भवति ऋषिदेवतयोर्यथा

का॰
वृ॰

संबन्धः ऋषौ करणे देवतायां कर्त्तरीति पूयतेनेन पवित्रोयमृषिः देवतायाम्
अग्निः पवित्रम् समांपुनातु वायुः सोमः सूर्यः इन्द्रः पवित्रम् तेमांपुनन्तु ञीतः क्तः ॥
ञिदाहस्मरन्न् अनुसञ्जीत तस्मात् ञीतोधातोः वर्त्तमानेक्तप्रत्ययोभवति भूते।
निष्ठाविहितावर्त्तमानेनप्राप्तोत्पानेनविधीयते ञिमिदा मिन्नः ञिक्ष्विदा क्ष्विण्णः
ञिधृषा धृष्टः मतिबुद्धिपूजार्थेभ्यश्च मतिरिच्छा बुद्धिर्ज्ञानम् पूजासंस्कारः एव
मर्थेभ्यः धातुभ्यः वर्त्तमानेक्तप्रत्ययोभवति राज्ञांमतः राज्ञामिष्टः राज्ञांबुद्धः
राज्ञांमतः राज्ञांपूजितः राज्ञामर्चितः अनुक्तसमुच्चयार्थश्चकारः शीलितो
रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि रुष्टश्च रुषितस्तथाभावविद्याद्धृतस्तथापि
हृष्टस्तुष्टस्तथा कान्तस्तथोभौ संयतोद्यतौ कष्टं भविष्यतीत्याहुरमृताः
पूर्ववत्स्मृतः कष्टमाश्रोभविष्यतिकालेश्रमृतशब्दः पूर्ववत् वर्त्तमानेप्यर्थः
तथाध्रुष्टः शयितः आश्रितः लिप्तः त्यक्तः इत्येवमादयोपिवर्त्तमानेद्रष्टव्याः ॥
इतिश्रीकाशिकायांवृत्तौतृतीयस्याध्यायस्यद्वितीयःपादः ॥ समाप्तः ॥ ॥

उणादयोबहुलम् वर्त्तमानइतिवर्त्ततेसंज्ञायामितिच उणादयः प्रत्ययाभवंति
वर्त्तमानेप्यर्थेसंज्ञायांविषयेचबहुलंभवंति यतोविहितास्ततोन्यत्रापिभवंति
केचिद्विहिताएवमप्रयोगतनत्रीयते कृवापाजिमिस्वदिसाध्यशूभ्यउण् कारुः
वायुः पायुः जायुः मायुः स्वादुः साधुः आशुः बाहुलकंप्रकृतेस्तनुदृष्टेः प्राय
समुच्चयनादपितेषाम् कार्यसशेषविधेश्चतदुक्तं नैगमरूढिभवंहिसुसाधु ना
मचधातुजमाहनिरुक्ते व्याकरणेशकटस्यचतोकम् यन्नपदार्थविशेषसमुत्थं
प्रत्ययतः प्रकृतेश्चतदूह्यम् संज्ञासुधातुरूपाणि प्रत्ययाश्चततःपरे कार्याद्
विद्यादनुबंधमेतच्छास्त्रमुणादिषु भूतेपिदृश्यंते पूर्वंवर्त्तमानाधिकारादिद
मुच्यते भूतेपिकालेउणादयः प्रत्ययादृश्यंते वर्त्ततदितिवर्त्म चरितंचर्म भा
सितंभस्म दृशिग्रहणंप्रयोगानुसरणार्थम् भविष्यतिगम्यादयश्च भविष्यति
कालेगम्यादयःशब्दाःसाधवोभवंति प्रत्ययस्यैवभविष्यत्कालताविधीयते ग
मीग्रामम् आगामी प्रस्थायी प्रतियोगी प्रतिरोधीप्रतिरोधी प्रयायी भावी अ

का
वृ·२
८४

घनननतपसंख्यानम् प्रबोधगमीग्रामम् यावत्पुरानिपातयोर्लट् भविष्यतीत्येव या
वत्पुराशब्दयोर्निपातयोरुपपदयोर्भविष्यति काले धातोः लट्प्रत्ययो भवति याव
द्भुङ्क्ते पुरा भुङ्क्ते निपातयोरिति किम् यावद्दास्यते तावद्भोक्ष्यते करणभूतया पुरा
व्रजिष्यति विभाषा कदाकर्ह्योः कदाकर्ह्योरित्येतयोरुपपदयोर्भविष्यति काले
विभाषा धातोः लट्प्रत्ययो भवति कदा भुङ्क्ते कदा भोक्ष्यते कदा भोक्ता कर्हि भुङ्क्ते
कर्हि भोक्ष्यते कर्हि भोक्ता किंवृत्ते लिप्स्यायाम् विभाषेति वर्त्तते किमो वृत्तं किं
वृत्तम् वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयते डतरडतमौ चेति परिसंख्यानं पर्यन्ते
किंवृत्त उपपदे लिप्स्यायां गम्यमानायां भविष्यति काले विभाषा लट्प्रत्ययो भवति
लिप्सा लब्धुमिच्छा प्रार्थनाभिलाषः कं भवन्तो भोजयन्ति कं भवन्तो भोजयिष्यन्ति कं
भवन्तो भोजयितारः अन्नकामः पृच्छति कतरो भिक्षां ददाति दास्यति दाता वा क
तमो भिक्षां ददाति दास्यति दाता वा लिप्स्यायामिति किं कः पाटलिपुत्रं गमिष्य
ति लिप्स्यमानसिद्धौ च विभाषेत्येव लिप्स्यमानात् सिद्धिः लिप्स्यमानसिद्धिः तस्यां

गम्यमानायांभविष्यतिकालेविभाषालेट्प्रत्ययोभवति अकिंहज्ञार्थायमारेभा यो
भक्तंददाति सस्वर्गंगच्छति योभक्तंदास्यति सस्वर्गंगमिष्यति योभक्तंदाता स
स्वर्गंगन्ता लिप्स्यमानाद्भक्तात्स्वर्गसिद्धिर्भावलक्षणेदातारंप्रोत्साहयति लोडर्थल
क्षणेच लोडर्थाःप्रैषादिः लक्ष्यतेयेनसलोडर्थः लक्षणोपात्तार्थः तस्मिन्व
र्त्तमानाद्धातोर्भविष्यतिकालेविभाषालेट्प्रत्ययोभवति उपाध्यायश्चेदागच्छति उ
पाध्यायश्चेदागमिष्यति उपाध्यायश्चेदागन्ता अथत्वंछन्दोधीष्वाथत्वंव्याकरण
मधीष्व उपाध्यायागमनमध्ययनप्रैषस्यलक्षणम् लिङ्योर्ध्वंमौहूर्तिके भवि
ष्यतिविभाषालोडर्थलक्षणइतिचवर्त्तते ऊर्ध्वंमौहूर्तिके भविष्यतिकालेलोड
र्थलक्षणोपात्तेर्थेवर्त्तमानाद्धातोर्लिङ्प्रत्ययोभवति चकाराल्लेटविभाषा ऊर्ध्वंमुहू
र्तादिव ऊर्ध्वंमौहूर्तिकः निपातनात्समासः उत्तरपदवृद्धिश्च भविष्यतश्चेतद्वि
शेषणम् ऊर्ध्वंमुहूर्तादुपरिमुहूर्तस्य उपाध्यायश्चेदागच्छति उपाध्यायश्चेदागमि
ष्यति उपाध्यायश्चेदागन्ता अथत्वंछन्दोधीष्व अथत्वंव्याकरणमधीष्व तुमुन्ण्वुलौ

का
वृ.न.
१८७

क्रियायांक्रियार्थायाम् भविष्यतीत्येव क्रियायामुपपदेक्रियार्थायांधातोर्भवि
ष्यतिकालेतुमुण्वुलौप्रत्ययौभवतः भोक्तुंव्रजति भोजकोव्रजति भुजिक्रियार्था
व्रजिरत्रोपपदम् क्रियायामितिकिं भिक्षिष्य इत्यस्यजटाः क्रियार्थायामितिकिं
धावतस्तेपतिष्यतिदण्डः ण्वुलएवाकिमर्थंविधीयते यावताण्वुल्तृचावितिसा
मान्येनविहितएव सोसतिलविधयेपिभविष्यति लृटाक्रियार्थोपपदेनवाध्यते वा
सरूपविधिनासोपिभविष्यति एवंतर्हितज्ज्ञापयतिक्रियायांक्रियार्थायामुपपदेवासरू
पेणलृटाण्वुलनभवतीति तेनकर्त्ताव्रजति विक्षिपोव्रजतीत्येवमादिनिवर्त्तते
भाववचनाश्च भविष्यतीत्येव भावइतिप्रकृत्ययेविहिता घञादयस्तेभाववच
नाभविष्यतिकालेक्रियायामुपपदेक्रियार्थायांभवन्तिकिमर्थमिदंयावताविहि
ताएवतेक्रियार्थोपपदविहितेनास्मिन्विषयेतुमुनावाध्यन्ते वासरूपविधिश्च
नास्तीत्युक्तम् भूयश्चवचनग्रहणंकिमर्थम् वाचकायथास्युः कथंचतेवाचकाभवे
तियास्युः प्रकृतिभ्योयेनविशेषणेनविहितास्तदभिधायकत्वेनैवभवति नासमंजस्य

न पाकाय व्रजति त्यागाय व्रजति पुष्टये व्रजति भूतये व्रजति संपत्तये व्रजति
अण्कर्मणि च भविष्यतीत्येव अण्प्रत्ययो भवति धातोः कर्मण्युपपदे क्रियायां च ।
क्रियार्थायां कर्मण्युपति सामान्यविहितो वासरूपविधेरभावात् ण्वुला बाधितः पु
नर्विधीयते सोपवादस्तण्वुलैवाध्यते परत्वात्काकादीन् तेनापवादविषयेपि
भवत्येव काण्डलावो व्रजति गोदायो व्रजति कम्बलदायो व्रजति अश्वपायो व्र
जति सीधुपायो व्रजति लृट्शेषे च भविष्यतीत्येव शेषः क्रियार्थोपपदादन्यः
शेषे शुद्धे भविष्यति काले वकारात्क्रियायां वोपपदे क्रियार्थायां धातोर्लृट्प्रत्ययो
भवति करिष्यामीति व्रजति करिष्यामीति व्रजति शेषत्वेलपि हरिष्यति करिष्य
ति लृटः सद्वा लृटः स्थाने सत्संज्ञौ शतृशानचौ वादेशौ भवतः व्यवस्थितवि ।
भाषा चेयं तेन यथा लटः शतृशानचौ तथास्यापि भवतः अप्रथमासमानाधि
करणादिषु नित्यमन्यत्र विकल्पः करिष्यन्तं देवदत्तं पश्य करिष्यमाणं देवदत्तं प
श्य हे करिष्यन् हे करिष्यमाण अर्जयिष्यन्वसति अध्येष्यमाणो वसति अप्र

का
वृ ट
१५५

सामसमानाधिकरणेनविकल्पः करिष्यति करिष्यन् करिष्यते करिष्यमाणः अ
नद्यतनेलृट् भविष्यतीत्येव भविष्यदनद्यतनेर्थेवर्तमानाद्धातोः लुट्प्रत्ययोभव
ति लृटोपवादः श्वःकर्ताश्वोभोक्ता अनद्यतनइतिबहुव्रीहिनिर्देशः तेनव्या
मिश्रेनभवति अद्यश्वोवागमिष्यतीति परिदेवनेश्वस्तनीभविष्यतीत्यत्रवक्तव्या इ
यंनुकदागंता यैवंपादौविदधाति अयंनुकदाध्येता यएवमनभियुक्तः पदरु
जविशस्पृशोघञ् भविष्यतीतिनिवृत्तम् पदादिभ्योधातुभ्योघञ् प्रत्ययोभव
ति पद्यतेसौपादः रुजतिसौरोगः विशत्यसौवेशः स्पृशउपतापइतिवक्तव्यम्
स्पृशतीतिस्पर्शः उपतापः नतेनान्यत्र पदायज्ञभवति स्पर्शोदेवदत्तः स्वरे विशेषः
सृस्थिरे सर्त्तेर्धातोः स्थिरेकर्त्तरिघञ्प्रत्ययोभवति स्थिरइतिकालान्तरस्थायी पदा
र्थउच्यते सचिरंतिष्ठन्कालान्तरंसरतीतिधात्वर्थस्यकर्तोच्यते चंदनसारः खदि
रसारः स्थिरइतिकिंसर्त्ता सारकः व्याधिमत्स्यबलेष्वितिवक्तव्यम् अतीसारोव्या
धिः विसारोमत्स्यः सारोबलम् भावे भावेवाच्येधातोर्घञ्प्रत्ययोभवति पाकःत्या

गः क्रियासामान्यवाची भवति तेनार्थनिर्देशः क्रियमाणः सर्वधातुकविषयः क्र
तो भवति धात्वर्थश्च धातुनैवोच्यते यत्तस्यामिह तथा मयपर्मल्लञ्चञ्चाद्या प्रत्यया
विधीयन्ते पुंलिङ्गैकवचनेनाननतेषम् लिङ्गान्तरेऽपि वचनान्तरे च प्रत्यया भवन्त्येव
पक्तिः पचनम् पाकः पाका इति शकनेरिचकारके संज्ञायाम् कर्त्तृवर्जिते कार
के संज्ञायां विषये धातोः घञ् प्रत्ययो भवति प्रास्यन्ति तेषु प्रासः प्रास्यन्त्यैति ते प्रसे
वः आहरन्ति तस्मात्कण्टुरः आहारः तत्त्वशिलाहारः शकनेरीति किं मिषत्वसौ मा
षः संज्ञायामिति किं कर्त्तव्यः कटः चकारः संज्ञाव्यभिचारार्थः को भवता दा
योदत्तः को भवता लाभो लब्धः कारकग्रहणं पर्युदासेन कर्त्तव्यम् नक्रियते
प्रसज्यप्रतिषेधेऽपि समासोऽस्तीति ज्ञापनार्थम् आदेवउपदेशिनीति इत उत्तरं
भावे शकनेरिचकारके इति द्वयमप्यनुवर्त्तते परिमाणाख्यायां सर्वेभ्यः परिमा
णाख्यायां गम्यमानायां सर्वेभ्यो धातुभ्यः घञ् प्रत्ययो भवति एकस्तण्डुलनिश्च
यः द्वौ शूर्पनिष्पावौ कः द्वौ कारौ त्रयः काराः सर्वग्रहणमपोऽपि बाधनार्थम् पु

का
कृ.२.
११३

रस्मादपवादविधानन्यायेनघञमेववाधेत परिमाणाख्यायामितिकिम् विस्तवः
शाल्याग्रहणंरूढिनिरासार्थम् संख्योपिग्रहणे उत्तमक्रमण म नधिषयेस्त्री
प्रत्ययास्तुनवाध्यते एकात्तिलोक्षितः ह्वस्तनी दारजारौ कर्मणि लक्षु दारये-
तीतिदारः जरयंतीजारः इङश्च इङ्श्रुधात्वोः घञ्प्रत्ययोभवति अलोपवादः अ-
ध्यायः अपादानेस्त्रियामुपसंख्यानम् उपेत्याधीयतेऽस्या उपाध्यायी उपाध्याया घञ्
वायुवर्णे निवृतेषु शारोवायुः शारोवर्णः गौरिवाकृतनीशारः कृतनीशारः प्रा-
वरणाशिशिरेङ्कृषाः उपसर्गेरुवः उपसर्गेउपपदेरौतेः धातोर्घञ् प्रत्ययोभवति अ-
लोपवादः संरावः उपरावः उपसर्गेइतिकिम् रावः समियुद्रुदुवः समुपपदेभ्यः यु-
द्रुदुभ्यो धातुभ्यो घञ्प्रत्ययोभवति संयावः संद्रावः संदावः समीतिकिम् यवः
श्रिणीभुवोनुपसर्गे श्रिणीभू इत्येतेभ्योधातुभ्योनुपसर्गेभ्यो घञ्प्रत्ययोभवति श्रायः
नायः भावः अनुपसर्गेइतिकिम् प्रश्रयः प्रणयः प्रभवः कथंप्रभावोराज्ञः प्रकृ-
ष्टोभावः प्रभावइतिप्रादिसमासः भविष्यतिकथंन्यायागतः प्रकृत्यन्तरोवहुल

मित्यभविष्यति वौ क्षुश्रुवः वावुपपदे क्षु श्रु इत्येताभ्यां धातुभ्यां घंप्रत्ययो भवति
विक्षावः विश्रावः वाविति किम् क्षवः श्रवः अवोदोर्नियः अवउद इत्येतयोरुपपद
योर्नयतेर्धातोः घंप्रत्ययो भवति अवनायः उन्नायः कथमुन्नयः पदार्थानाम् कृ
त्स्नेशोबहुलमिति प्रे द्रुस्तुस्रुवः प्रशब्दे उपपदे द्रुस्तुस्रु इत्येतेभ्यो धातुभ्यो घंप्र
त्ययो भवति प्रद्रावः प्रस्तावः प्रस्रावः प्र इति किम् द्रवः स्तवः स्रवः निरभ्योः पूल्वो :
रिति पूल्वोः सामान्यग्रहणम् लूञ् छेदने यथासंख्या मुपसर्गसंबन्धो निरभि
पूर्वयोः पूल्वोर्धात्वोर्घंप्रत्ययो भवति निष्पावः अभिलावः निरभ्योरिति किं पवः
लवः उन्न्योर्ग्रः ग्रु शब्दे ग्र निगरणे द्वयोरपि ग्रहणम् उन्नि उपपदयोः ग्र इत्येत
स्माद्धातोर्घंप्रत्ययो भवति उद्गारः निगारः उन्न्योरिति किम् गरः कृ धान्ये उन्न्यो
रुपपदयोः कृ इत्येतस्माद्धातोः घंप्रत्ययो भवति विक्षेपार्थस्य किरतेर्ग्रहणं नहि
सार्थस्यानभिधानात् उत्कारो धान्यस्य निकारो धान्यस्य धान्य इति किम् भैक्षनि
कारः पुष्पनिकारः यज्ञे समि स्तुवः यज्ञविषये प्रयोगे समपूर्वात् स्तौतेः घंप्र

का
वृ.स.
५८

त्ययो भवति संस्तावश्छंदोगानाम् समेत्य स्तुवंति यस्मिन्देशे छंदोगास्स देशः
संस्ताव इत्युच्यते यज्ञ इति किम् संस्तवश्छात्रयोः प्रे स्त्रोयज्ञेः स्तृञ् छादने प्रस्ता
दृणातेः प्रपात्पूर्वात्पदे घञ् प्रत्ययो भवति न चेद्यज्ञविषयः प्रयोगो भवति शब्दप्रस्ता
रः मणिप्रस्तारः अयज्ञ इति किम् बर्हिप्रस्तरः प्रथने वावशब्दे स्तृ इति वर्त्तते
प्रथने गम्यमाने विपूर्वात्स्तृणातेः घञ् प्रत्ययो भवति न चेच्छब्दविषयं प्रथनं भ
वति प्रथनं विस्तीर्णता पटस्य विस्तारः केवलस्य विस्तारः प्रथन इति किम्
तृणस्य विस्तरः अशब्द इति किम् विस्तरो वचसाम् छंदोनाम्नि च वौ स्त्र इति व
र्त्तते विपूर्वात्स्तृणातेश्छंदोनाम्नि घञ् प्रत्ययो भवति वृत्तमिह छंदो गृह्यते पा
स्रगायत्र्यादयो विशेषाः न मंत्रब्राह्मणं नामग्रहणाल्लिंगात् विष्टारपंक्तिश्छंदः
विष्टारो बृहती छंदः विष्टारपंक्तिशब्दोऽत्र छंदोनाम न यत्नेन तच्छब्दरूपम् तत्रेदम
वयवेन तद्वतोऽपि छंदोनाम्नीत्यधिकरणसप्तमी एषा उदि ग्रहः उपपदे ग्रहेर्धातोर्घं
प्रत्ययो भवति अपापवादः उद्ग्राहः छंदसि निपूर्वादपीष्यते स्रुगुद्यमननिपा

तयोः तद्ग्रामस्य निग्रामस्य चान्तराले देवोऽवर्षत्। सामीप्ये। अनुर्हीनेव समुपपदे
ग्रहेऽनोर्द्वितीया भवति। मोक्षविषयज्ञानेन द्वितीया भवति। मोक्षहेतुर्गौतमस्त्रिदशः
श्रेष्ठो महत्स्य संग्रहः। कृतं सौहित्याख्यापने महत्त्वमिति किम्। संग्रहोपान्त्यस्य परि।
यानीति। लक्षणेत्थंभूतयोः परिशब्देऽपि शाहेव यथासंख्यमनुपदे नियमेनश्च यानोर्द्वि
तीया भवत्यनुषवादः। लक्षणेत्थंभूतयोः यत्रापि यथासंख्यमेवं संबंधः। लक्षणविषयस्य
त्रयस्य द्वितीया भवन्ति त्रयविषयस्य वीप्सायाः। परार्थानामनुपचारः। यथाप्रामकारणं
मत्रेषः। एतेनावत् परिगणेयेन भागीरथीति समेनानुपदेन। अत्रैव यथासंख्यः
हृतात्रैषयोरिति किम्। परिणयः। नयगतः पापः। परावर्त्य पात्मयपश्चणः। परियाहृ
उपपदे ऋणोयानोः द्वितीया भवति। अनुपात्ययेगम्यमाने क्रमप्राप्यस्यानति या
नोः अनुपात्ययः। परिपाटी। नवपर्यायो ममपर्यायः। अनुपात्ययइति किम्। काल
स्यपर्ययो निपातनउन्मयः। अनुपयो ज्ञानेपर्याये वि उपश्रुत्यन्तयोर्मुपपदयोश्च नेयानो
द्वितीया भवति। पर्यायेगम्यमाने नवविस्थायो ममविशायः। नववानोपशायः

का
वृ.३
१६४

समराजोपशायः तवराजानमप्यपरिच्छेद्यपर्याय इत्यर्थः पर्याय इति किम् विशायः उ
पशायः हस्तादाने चेरस्तेये हस्तादाने गम्यमाने चिनोतेर्धातोः घञ्प्रत्ययो भवति न
चेत्स्वयं चौर्यं भवति हस्तादानग्रहणेन प्रत्यासत्तिरादेयस्य लक्ष्यते पुष्पप्रचायः फ
लप्रचायः हस्तादान इति किम् वृक्षशिखरे फलप्रचयं करोति अस्तेय इति किं
पुष्पप्रचयश्चौर्येण निवासचितिशरीरोपसमाधानेष्वादेश्च कः चेरित्येव निवस
न्त्यस्मिन्निति निवासः चीयते सौ चितिः पाण्यादिसमुदायः शरीरम् राशीकर
णमुपसमाधानम् एतेष्वर्थेषु चिनोतेर्घञ्प्रत्ययो भवति आदेश्चकारादेशः निवासे
तावत् चिखिल्लिनिकायः चितौ आकायमग्निं चिन्वीत शरीरे अनित्यः कायः
उपसमाधाने महान्गोमयनिकायः एतेष्विति किम् चयः इह कस्मान्न भवति
महान्काष्ठनिचयः महत्त्वमत्र विवक्षितं नोपसमाधानम् संघे चानौत्तराधर्ये
चेरित्येव प्राणिनां समुदायः संघः स च द्वाभ्यां प्रकाराभ्यां भवति एकधर्मावेश
न औत्तराधर्येण चानौत्तराधर्येऽभिधेये गम्यमाने संघे वा चिनोतेर्घञ्प्रत्य

योभवति आदेश्चककारः भिक्षुनिकायः ब्राह्मणनिकायः वैयाकरणनिकायः
अनौत्तराधर्यइतिकिम् सूकरनिचयः प्राणिनोविषयत्वात्संघस्येहनभवति कृ
ताकृतसमुच्चयः तृणसमुच्चयः कर्मव्यतिहारेणच्स्त्रियाम् कर्मक्रियाव्यतिहा
रःपरस्परकरणम् कर्मव्यतिहारेगम्यमानेधातोर्णच्प्रत्ययोभवति स्त्रीलिंगेभावेच
कारोविशेषणार्थः णचःस्त्रियामितिनित्यव्याक्रोशीव्यावलेखीव्यावहासीवर्तते स्त्रिया
मितिकिम् व्यतीपाकोवर्तते यावताविषयेपिकृद्विधिष्यते व्यावचोरीव्यावचर्चीव
र्तते इहनभवति व्यतीक्षा व्यतीहावर्तते व्यत्युक्षीवर्ततइतिभवति नेदंतद्धिविज्ञे
कृतस्यैवाबहुलमिति लभ्यते अभिविधौभावइनुण अभिविधिरभिव्याप्तिः क्रि
यागुणाभ्यांकार्त्स्न्येनसंबंधः अभिविधौगम्यमानेधातोर्भावइनुण्प्रत्ययोभवति सा
रविणंवर्तते सांराविणम् सांद्राविणम् अभिविधावितिकिम् संरावः सांद्रावः भा
वइतिवर्तमानेपुनर्भावग्रहणंबाधकनिवृत्त्यर्थम् ल्युटोपिसमावेशइष्यते सांरा
विणंवर्तते तत्कथंकृतस्यैवाबहुलमिति आक्रोशेवन्योर्ग्रहः हन्ताववहन्त्रिसामर्थ्या

का
वृ.त.
१२

न चेवर्तते नीवारः इत्याण अवनि इत्येतयोरुपपदयोः ग्रहेर्धातोर्घञ्प्रत्ययो भवति आक्रो
शे गम्यमाने आक्रोशः शपनम् अवग्राहो हन्ते वृषल भूयात् निग्राहो हन्ते वृषल भूयात्
आक्रोश इति किम् अवग्रहः पदस्य निग्रहश्चोरस्य प्रे लिप्सायाम् ग्रह इत्येव प्रशब्द उप
पदे ग्रहेर्धातोर्लिप्सायां गम्यमानायां घञ्प्रत्ययो भवति पात्रप्रग्राहेण चरति भिक्षुः पिंड
पातार्थी स्रुवप्रग्राहेण चरति द्विजो दक्षिणार्थी लिप्सायामिति किं प्रग्रहो देवदत्त
स्य परौ यज्ञे ग्रह इत्येव परिशब्द उपपदे ग्रहेर्घञ् प्रत्ययो भवति यज्ञविषये चेत्प्रत्ययान्त
स्याभिधेये भवति उत्तरः परिग्राहः अधरः परिग्राहः यज्ञ इति किं परिग्रहो देवदत्तस्य
नौवृधान्ये वृ इति वृङ्वृञोः सामान्येन ग्रहणम् नि शब्द उपपदे वृ इत्येतस्माद्धातोर्धान्य
विशेषेऽभिधेये घञ्प्रत्ययो भवति अपोऽपवादः नीवारा नाम व्रीहयो भवन्ति धान्य इति
किं निवरा कन्या उदि श्रयतियौतिपूद्रुवः उत्शब्द उपपदे श्रयत्यादिभ्यो धातुभ्यो घञ्
प्रत्ययो भवति अजपोरपवादः उच्छ्रायः उद्यावः उत्पावः उद्द्रावः कथं पतनान्ताः समु
च्छ्रायः वक्ष्यमाणविभाषाग्रहणमिह सिंहावलोकितन्यायेन संबध्यते विभाषाङि

रुप्लवोः ॥ आङ्युपपदे रौतेः प्लवतेश्च धातोर्विभाषा घञ्प्रत्ययो भवति ॥ आरावः । आरवः । आ
प्लावः । आप्लवः ॥ अवे ग्रहो वर्षप्रतिबन्धे ॥ विभाषेति वर्त्तते । अवे उपपदे ग्रहे र्धातोर्घञ्प्रत्य
यो भवति विभाषा वर्षप्रतिबन्धेऽभिधेये । प्राप्तकालस्य वर्षस्य कुतश्चिन्निमित्तादभावो
वर्षप्रतिबन्धः । अवग्राहो देवस्य । अवग्रहो देवस्य । वर्षप्रतिबन्ध इति किम् । अवग्रहः पद
स्य ॥ प्रे वणिजाम् ॥ विभाषेत्येव । प्रशब्द उपपदे ग्रहे र्धातोर्विभाषा घञ्प्रत्ययो भवति प्र
त्ययान्तश्चेद्वणिजां सम्बन्धि भवति । वणिक्सम्बन्धेन तुलासूत्रं लक्ष्यते । तत्र व
णिजस्तत्रम् तुलाप्रग्रहस्तेन येन सूत्रेणान्नमशाश्चार्थः । तुलाप्रग्राहेण चरति । तुलाप्र
ग्रहेण चरति । वणिग्भ्योऽन्यत्र वणिजामिति किम् । प्रग्रहो देवदत्तस्य ॥ रश्मौ च ॥ ग्रहो वि
भाषा प्रश्च वर्त्तते । प्रशब्द उपपदे ग्रहे र्धातोर्घञ्प्रत्ययो भवति विभाषा रश्मिश्चेत्प्रत्य
यान्तेनाभिधीयते । यावद्धि प्रयुक्तानाम् अश्वादीनां संयमनार्थ्या रज्जुः रश्मिरिह गृह्यते ।
प्रग्राहः । प्रग्रहः ॥ वृणोतेराच्छादने ॥ विभाषा प्रश्च वर्त्तते । प्रशब्द उपपदे वृणोतेर्धातो
र्विभाषा घञ्प्रत्ययो भवति प्रत्ययान्तेन चेदाच्छादनविशेष उच्यते । प्रावारः । प्रवरः । प्रा

का
वृ.क
17

ज्ञाने इतिकिम् प्रवेशो गौः परौ भुवोऽवज्ञाने विभाषास्येव परिशब्द उपपदे भवतेर्धातोर्वि
भाषा घञ्प्रत्ययो भवति अवज्ञाने गम्यमाने अवज्ञानम् असत्कारः परिभावः अवज्ञाने इतिकि
म् सर्वतो भवनं परिभवः यश्च भावे चाकर्त्तरि च कारके इत्यनुवर्त्तनं यावत् कृत्यल्युटो ब
हुलम् इति इवर्णान्ताद्धातोर्भावे चाकर्त्तरि च कारके संज्ञायाम् अप्प्रत्ययो भवति घञोऽपवा
दः चकारो विशेषणार्थः पायये[illegible]विप्रकाणामिति चयः जयः क्षयः इवर्णेना
मिति किम् भेदनम् कथनम् ऋच्छियोऽभयादीनामुपसंख्यानम् नपुंसके क्तादि
नियमार्थम् भयं वर्षम् जवसवौ छन्दसि वक्तव्यौ ऋवर्णस्तु मेजवः पंचौदनः सवः
ऋदोरप् ऋवर्णान्तेभ्य उवर्णान्तेभ्यश्च धातुभ्योऽप्प्रत्ययो भवति घञोऽपवादः पित्क
रणार्थम् करः गरः शरः उवर्णान्तेभ्यः यवः लवः स्तवः पवः ऋकारो[illegible]
र्थः ग्रहवृदृ निश्चिगमश्च ग्रहादिभ्यो धातुभ्योऽप्प्रत्ययो भवति घञोऽपवादः
निश्चिनोतेस्तु अपवादः ग्रहः वरः दरः निश्चयः गमः निश्चिग्रहणं स्वार्थम् वशर
णोरुपसंख्यानम् वशः रणः घञर्थे कविधाने स्थास्नापाव्यधिहनियुध्यर्थम् प्रति

हेतेस्मिन्निति प्रस्थः प्रस्थीयतेस्मिन्निति प्रस्थः प्रपिबन्ति तस्मादिति प्रपा आविध्यन्ति
तेनेत्याविधम् विहन्यतेस्मिन्निति विघ्नः आखुघ्नन्त्यनेनेत्याखुघम् उपसर्गेदः अदितेव
व उपसर्गे उपपदे अदधातोरप्प्रत्ययो भवति प्रघसः विघसः उपसर्ग इति किम् घासः
नौणच निशब्द उपपदे अदधातोः णप्रत्ययो भवति चकाराच्चप्प्रत्ययः निघसः व्य
धजपोरनुपसर्गे व्यधजप इत्येतयोरनुपसर्गयोर्धात्वोरप्प्रत्ययो भवति वृद्ध्यपवादः व्यधः
जपः अनुपसर्ग इति किम् आव्याधः उपजापः स्वनहसोर्वा अनुपसर्ग इत्येव स्वन
हसोर्वा अनुपसर्ग इत्येव स्वनहसोरनुपसर्गयोर्धात्वोर्वाप्प्रत्ययो भवति स्वनः स्वा
नः हसो हासः अनुपसर्ग इत्येव प्रस्वानः प्रहासः यमः समुपनिविषु च अनुपसर्गे वे
ति च वर्तते सम् उप नि वि इत्येतेषूपपदेषु अनुपसर्गे च यमेर्धातोर्वाप्प्रत्ययो भवति सं
यमः वियामः अनुपसर्गेनचलोपि यमः यामः नौगदनदपठस्वनः वेत्येव निश
ब्द उपपदे गदनदपठस्वन इत्येतेभ्यो धातुभ्यो वाप्प्रत्ययो भवति वृद्ध्यपवादः निगदः नि
गादः क्वणो वीणायां च नौ वा अनुपसर्ग इति वर्तते क्वणतेर्धातोर्निपूर्वा दनुपस

का
१२
१२२

गे ह्वाणविषयाश्च घञ्प्रत्ययो भवति यञोऽपवादः सोपसर्गस्यैवास्य ग्रहणम् निक्व
णः निक्वाणः अनुपसर्गात् क्वणः क्वाणः वीणायामिति किम् कल्याणप्रक्वाणो वीणा
कल्याणप्रक्वाणयतेष्विति किम् प्रतिक्वाणो वननेन नित्यम्पणः परिमाणे पणतेर्व्यव
हारे स्मादन्तो नित्यमल्प्रत्ययो भवति परिमाणे गम्यमाने नित्यग्रहणं विकल्पनिवृत्त्य
र्थम् मूलकपणः शाकपणः संव्यवहाराय मूलकादीनां परिमितानां मुष्टिर्बध्यते तस्ये
दमभिधानम् परिमाण इति किं पाणः मदोऽनुपसर्गे मदेर्धातोरनुपसर्गादल्प्रत्य
यो भवति घञोऽपवादः विद्यामदः धनमदः कुलमदः अनुपसर्ग इति किम् उन्मा
दः प्रमादः प्रमदसम्मदौ हर्षे प्रमदसम्मदावेतौ शब्दौ निपात्येते हर्षेऽभिधेये कन्या
नां प्रमदः कोकिलानां सम्मदः हर्ष इति किम् प्रमादः सम्मादः प्रसम्भ्यामिति नोक्तम्
निपातनेनास्यार्थम् समुदोरजः पशुषु समुदोरुपपदयोरजतेर्धातोः पशुवि
षयेऽलर्थे प्रत्ययो भवति घञोऽपवादः अजगतिक्षेपणयोः पश्वने समं पूर्वः सम्मुद
येवर्तते नन्वन्वेष्वप्रेरणे समजः पशूनां समुदाय इत्यर्थः उदजः पशूनां प्रेरणमि

त्पर्थः पशुष्विति किम् समाजो ब्राह्मणानाम् उदाजः क्षत्रियाणाम् अक्षेषु ग्लहः
ग्लहइतिनिपात्यते अक्षविषयेग्रहेरप्प्रत्ययो भवति ग्रहेरप्सिद्धएव लत्वार्थंनिपा
तनम् अक्षस्यग्लहः अक्षेष्विति किम् ग्रहःपदस्य अन्येग्लहिंप्रकृत्यन्तरमाहुः म्लेछ
ने प्रत्युदाहरंति ग्लहः प्रजनेसर्त्ते सर्तेर्धातोः प्रजनेविषयेऽप्प्रत्ययोभवति घञो
पवादः प्रजनःप्रथमगर्भग्रहणम् गवामुपसरः पशूनामुपसरः स्त्रीगवेषु पुंग
वानांगर्भाधानायप्रथममुपसरणमुच्यते ह्वः संप्रसारणंचन्यभ्युपविषु नि अभि
उप वि इत्येतेषूपपदेषु ह्वयतेर्धातोः संप्रसारणमप्प्रत्ययोभवति घञोपवादः
निहवः अभिहवः उपहवः विहवः एतेष्विति किम् प्रह्वायः आङियुद्धे युद्ध
उपपदेह्वयतेः संप्रसारणमप्प्रत्ययोभवति युद्धेभिधेये आहूयन्तेऽस्मिन्नित्याहवः
युद्धइतिकिम् आह्वायः निपानमाहावः आङ्पूर्वस्यह्वयतेः संप्रसारणमप्प्र
त्ययोवृद्धिश्चनिपात्यते निपानंचेदभिधेयंभवति निपिबन्तितस्मिन्निति निपानमाह
कथायामुच्यते निपानंचेदभिधेयंभवति निपिबन्तितस्मिन्निति निपानमुच्यते आ

का
वृ

ह्वावः पशूनाम् क्रपोपसर्गेषु नरकाथारन्तश्चाहूपानाथापशवश्चाहूयन्ते निपानमि।
तिकिम् आह्वयः भावेनुपसर्गस्य अनुपसर्गस्य ह्वयते संप्रसारणमम् प्रत्ययः भावे।
भिधेये हवः हवे हवेभ्यः हवेष्विमिदम् अनुपसर्गस्येतिकिम् आह्वायः भावग्रहणा।
मकर्तरि च कारकेऽस्याभिधानार्थम् हनश्च वधः भावेऽनुपसर्गस्येति वर्त्तते हं
तेर्धातोरनुपसर्गाद्भावेऽप्रत्ययो भवति तत्सन्नियोगेन वधादेशः सर्वांतो घातवतो
दात्तनिवृत्त्यर्थम् वधस्तोरणम् वधादस्तूनाम् भाव इत्येव घातः
अनुपसर्गस्येत्येव आघातो निघातः वकारोऽभिव्यक्तमना आदेशेन संबध्यते किंत
र्हि प्रकृतेन प्रत्ययेन अस्य यदस्याघुरः यामेति तेन चेन्नपि भवति घातो वर्त्तते मूर्त्तौ
घनः मूर्त्तिः काठिन्यम् मूर्त्तावभिधेयायां हन्तेरप्प्रत्ययो भवति घनश्चास्य घादेशः
अभ्रघनः दधिघनः कथंघनेऽदधीति धर्मशब्देन धर्मी भाष्यते अन्तर्घनो देशः अन्तः
पूर्वाद्धन्तेरप्प्रत्ययो भवति घनादेशश्च देशाभिधेयो अन्तर्घनः संतीभूतो वाहीकेषु
देशविशेष उच्यते अन्यणकारं पठन्ति अन्तर्घणो देश इति नरपिग्राममिव देशः

१७३

इतिकिम् अन्तर्घातोऽन्यः ॥ अगारैकदेशे प्रघणः प्रघाणश्च ॥ प्रपूर्वस्य हन्तेः प्रघण प्र
घाण इति च निपात्यते अगारैकदेशे वाच्ये प्रघणः प्रघाणः द्वारकोष्ठको बाह्य उच्य
ते अगारैकदेश इतिकिम् प्रघातोऽन्यः ॥ उद्घनोऽत्याधानम् ॥ उत्पूर्वस्य हन्तेः उद्घन इति
निपात्यते अत्याधानं चेद्भवति उद्घनः यस्मिन्काष्ठे अन्यानि काष्ठानि
न्यस्य तक्ष्यन्ते तदभिधीयते उद्घातोऽन्यः ॥ अपघनोऽङ्गम् ॥ अपपूर्वस्य हन्तेः अपघन इति निपा
त्यते अङ्गं चेद्भवति अपघनः अङ्गम् अवयवैकदेशो न च सर्वः किं तर्हि पाणिः पा
दश्चाभिधीयते अपघातोऽन्यः ॥ करणेऽयोविद्रुषु ॥ हन इति वर्तते अयस् वि द्रु इत्येते
षूपपदेषु हन्तेर्धातोः करणे कारके अप्प्रत्ययो भवति घनादेशश्च अयो ह
न्यतेऽनेनायोघनः विघनः द्रुघनः द्रुघण इति केचिदुदाहरन्ति कथं णत्वम्
ग्रीहणादिषु प्रक्षेपात् पूर्वपदात्संज्ञायामगः इति वा ॥ स्तम्भे क च ॥ करणे हन इ
ति वर्तते स्तम्भशब्द उपपदे हन्तेर्धातोः करणे कारके कप्रत्ययो भवति चकारादप् च न
घनादेशः स्तम्भघ्नः स्तम्भघनः ॥ परौ घः ॥ करणे हन इति वर्तते परिशब्द उपपदे

का वृं
१४

हन्तेः करणेऽप् प्रत्ययो भवति घश्चादेशः परिहन्यतेऽनेनेति परिघः पलिघः
उपघ्न आश्रये उपपूर्वस्य हन्तेरप् प्रत्ययः उपधालोपश्च निपात्यते आश्रयेऽभिधेये
आश्रयशब्दः सामीप्यं प्रत्यासत्तिं लक्षयति पर्वतोपघ्नः ग्रामोपघ्नः उपघ्नानन्यः
संघोद्घौ गणप्रशंसयोः समुदोरुपपदयोः हन्तेर्धातोरप्प्रत्ययष्टिलोपः घत्वंच
निपात्यते यथासंख्यं गणेऽभिधेये प्रशंसायां गम्यमानायां संघः पशूनाम् उ
द्घो मनुष्यः गणप्रशंसयोरिति किम् संघातः उद्घातः निघो निमितम् निगदाति
हन्तेरपि टिलोपो घत्वं च निपात्यते निमितेऽभिधेये भवति समन्तान्मितं निमि
तं समारोहपरिणाहम् निघा वृक्षाः निघः शालयः निमितमिति किम् नि
घातः ड्वितः क्त्रि भावेऽकर्तरि च कारके ड्वितेते ड्वनुबन्धस्यात्मोऽस्तिन् तस्मात्
ड्वितो धातोः क्त्रिप्रत्ययो भवति तेर्मम् नित्यमिति केवलेन प्रयुज्यते डुपचष् पाके
पाकेन निर्वृत्तं पक्त्रिमम् डुवप् उप्त्रिमम् डुकृञ् कृत्रिमम् ट्वितोऽथुच् ट्वनुबन्धस्य तस्मा
ट्वितो धातोरथुप्रत्ययो भवति टुवेपृ वेपथुः टुओश्वि श्वयथुः टुक्षु क्षवथुः य

जयाचयतविछप्रछरक्षोनङ्. भावेस्त्रकर्तरिचकारके इतिवर्तते यजादिभ्योधा-
तुभ्योनङ्प्रत्ययोभवति ङकारोविछ्धेर्गुणप्रतिषेधार्थः यज्ञः याञ्चा यत्नः विश्नः
प्रश्नः रक्ष्णः प्रछ्रसंप्रसारणंनापकान्प्रश्नेवासप्तकालइति स्वपोनन् स्वपेर्धा-
तोर्नन्प्रत्ययोभवति नकारः स्वरार्थः स्वप्नः उपसर्गेघोःकिः भावेस्त्रकर्तरिचेति
वर्त्तते उपसर्गेउपपदे घुसंज्ञकेभ्योधातुभ्यः किप्रत्ययोभवति किन्करणमातोलो-
पार्थम् प्रदिः प्रधिः विधिः निधिः कर्म्मण्यधिकरणेच घोरितिच कर्म्मण्युपपदे घु-
संज्ञकेभ्योधिकरणेकारकेकिप्रत्ययोभवति जलेधीयतेस्मिन्जलधिः शरधिः
नवालधिः अधिकरणग्रहणमर्थान्तरनिरासार्थम् चकारः प्रत्ययानुकर्षणा-
त् स्त्रियांक्तिन् भावेस्त्रकर्तरिचेतिवर्त्तते स्त्रीलिंगेभावादौधातोः क्तिप्रत्ययोभ-
वति घञजपामपवादः कृतिः चितिः धृतिः क्तिन्नाबादिभ्योवक्तव्यः स्रवापयः
प्रयोगतोनुसर्त्तव्याः आप्तिः राद्धिः दीप्तिः स्रस्तिः ध्वस्तिः लब्धिः श्रुयजीषिस्तुभि-
भ्यः करणे श्रूयतेनयाश्रुतिः इष्टिः इष्टिः स्तुतिः ग्लाम्लाहाभ्योनिः ग्लानिः म्लानिः

का
सू.
१२५

ह्रानिः ऋकारल्वादिभ्यः क्तिर्निष्ठावद्भवतीति वक्तव्यम् कीर्णिः गीर्णिः जीनिः लू
निः सम्पदादिभ्यः क्विप् सम्पत् विपत् प्रतिपत् क्तिन्नपीष्यते सम्पत्तिः विपत्तिः प्रति
पत्तिः स्थागापापचोभावे स्त्रियामिति वर्तते स्थादिभ्यो धातुभ्यो भावे स्त्रीलिङ्गे क्ति
प्रत्ययो भवति अङोऽपवादस्सबाधकः प्रस्थितिः उद्गीतिः संगीतिः प्रपीतिः स
पीतिः पक्तिः भावग्रहणमर्थान्तरनिरासार्थम् कथमवस्था संस्थेति अवस्था
यामसंज्ञायामिति बाधकात् नाम्यन्तापुवाबाधोवाधाभवतीति संज्ञापूर्वकत्वम्
नविदम्भूतोनानदात्रः संपदिषयह्नादिभ्यो धातुभ्यः क्तिप्रत्ययो भवति उदात्तः प्र
कृतिप्रत्यययोः प्रथमं तयोर्विभक्तिर्विपरिणामेन संबद्धः कस्मादेवं कृतेनैव वि
धार्थम् वृष्टिः इष्टिः पक्तिः मतिः वित्तिः भूतिः वीतिः रातिः सर्वत्र धातुसामान्येन
विहितत्वात् क्तिन् तदानार्थमिदं वचनम् इषिभ्रस्जोर्ति निपातनेव सातिनतः।
क्तिन्नपि विधीयते संज्ञाद्यन्तादिरूपदानः कतिमिर्नितिमाविदेतिकीर्तिपश्चु संत्र
इति नानुवर्तते रूपादयः भाषाणि पात्यते उदात्त इति वर्तते प्रवतेर्ज्वरत्वरस्त्रिव्य

विभवाम्नुपधायाश्चेत्स्यद् ऊतिः स्वरार्थे वचनम् यौतेर्जवतेश्च यूतिः जूतिः दीर्घ-
त्वं च निपात्यते स्यतेः सातिः इत्वाभावो निपात्यते सनोतेर्वा रङ्नलोपनस्यात्वमि-
ष्यते कृते स्वरार्थं निपातनं हन्तेर्हिनोतेर्वा हेतिः कीर्तयतेः कीर्तिः व्रजयजो-
र्भावे क्यप् उदात्त इत्येव व्रजयजोर्धात्वोः स्त्रीलिंगे भावे क्यप् प्रत्ययो भवति तदा
त्तः क्तिनोऽपवादः व्रज्या इज्या पितृकरणमत्र व्रजनवर्षम् संज्ञायां समजनिषद-
निपतमनविदषुञ्शीङ्भृञिणः भाव इति निवृत्तं पूर्वेण व्याप्त्याधिकारः समजा-
दिभ्यो धातुभ्यः स्त्रियां क्यप् प्रत्ययो भवति उदात्तः संज्ञायां विषये समजन्ति न-
स्यां समज्या निषद्या निपत्या मन्या विद्या सुत्या शय्या भृत्या इत्या कथं तर्हि कृत्य-
स्त्रियां भावाधिकारोऽस्ति तेन भार्यायां सिध्यति भावाधिकारो भावव्याप्त्यर्थो वा
प्येतेन विवक्षितो न व्याप्तौ योऽधिकारः कृञः श च करोतेर्धातोः स्त्रियां च प्रत्य-
यो भवति चकारात्क्यप् योगविभाग उत्तरार्थः क्तिन्नपि यथाप्राप्तं क्रिया कृ-
त्या कृतिः इच्छा इषेर्भावे श प्रत्ययो यगभावश्च निपात्यते इच्छा क्तिनोऽपवादः परिच

का
कृ
१२९

यो योगमयो स्त्रयोरात्मनामप्रसंख्यानम् जागर्तेरकारो वा जागर्या जागरा अ
प्रत्ययात् प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारः प्रत्ययो भवति क्तिनोपवादः चि
कीर्षा पुत्रीया पुत्रकाम्या लोलूया कण्डूया गुरोश्च हलः हलन्तेभ्यो धातुभ्यो गुरुम
न्तः स्त्रियामकारः प्रत्ययो भवति क्तिनोपवादः ऊहा ईहा एहा ऊहा गुरोरि
ति किम् भक्तिः हल इति किम् नीतिः षिद्भिदादिभ्योऽङ् षिद्भ्यो धातुभ्यो भिदादिभ्य
श्च स्त्रियामङ् प्रत्ययो भवति गणपाठेषु भिदादिषु निकृष्य प्रकृतयो विहिते स्थाने
जृष् जरा त्रपूष् त्रपा भिदादिभ्यः खल्वपि भिदा छिदा विदा क्षिपा गुहा गिर्यो
षध्योः गूढिरन्या श्रद्धा मेधा गोधा हारा कारा क्षिया तारा धारा रेखा लेखा चूडा
पीडा वपा वसा मृजा कृपेः सम्प्रसारणं च कृपा भिदा विदारणे भित्तिरन्या छि
दा द्वैधीकरणे छित्तिरन्या धारा प्रपाते धृतिरन्या चिन्तिपूजिकथिकुम्बिचर्चश्च
चिति स्मृत्याम् पूज पूजायाम् कथ वाक्यप्रबन्धे कुबि आच्छादने चर्च अध्ययने चु
रादिभ्यः ण्यन्तेभ्यः युचि प्राप्ते स्त्रियामङ् प्रत्ययो भवति चिन्ता पूजा कथा कु

पा वर्त्ता आतश्चोपसर्गे आकारान्तेभ्यो धातुभ्य उपसर्गे उपपदे स्त्रियामङ्प्रत्ययो भव
ति क्तिनोपवादः प्रदा उपदा उपधा श्रदन्तरोरुपसर्गवद्वृत्तिः श्रत् अन्तर् एतयो रुपसं
ग्रक्रोष्ण्व एतेभ्योधातुभ्यः श्रत् श्रक इत्येताभ्यां चस्त्रियामङ्प्रत्ययो भवति श्रका
रस्यापवादः कारणा हारणा श्रासनाग्रन्थना कथमास्या पेहलोरपेदिति एवना
भविष्यति वामरूपग्रविशेषस्य नोष कारणविषयस्यैवोत्पत्तिपत्वादस्य ग्रेक्तिः का
दिः गरहते ग्रन्थविमोचन प्रहृत्ययोरितिनञ्जुवादिः श्रन्थ ग्रन्थ संदर्भे इतिएषत
वैनवमिडत्वात वेदिवंदिविदिभ्यतपसंख्यानम वेदना वंदना वेदना वेदेर्भो
वादिकस्यग्रहणम् वेदवलनेइतिनचौरादिकस्यवेदसंवरणोइतिएणिस्यैव
मिडत्वात रोषविशेषस्यपठनकथ्वः श्रन्वेषणान्तरवेदवो पर्येषणाएषदीष्यः रोगा
ख्यायांएवुलम धातोर्एवुल्प्रत्ययोभवति रोगाख्यायांवकुलम क्तिनादीना
मपवादः श्राख्यायग्रहणंरोगस्येवेत्प्रत्ययांतःसंज्ञाभवति बहुलग्रहणंव्यभिचा
रार्थम प्रच्छर्दिका प्रवाहिका विचर्चिका नचभवति शिरोर्तिः श्रर्म इतिन

का.
वृ.
१२२

स्यात्क्रान्तरूपे धात्वर्थनिर्देशोऽयं लक्षणः श्वसिका शायिकावर्त्तते इक्श्तिपौ धातुनि
र्देशे भिदिः छिदिः पचतिः पठतिः कर्णान्कारः निर्देशस्तिप्रकृतम् अकारः इका
रः शारिफः रेफः मत्वर्थाच्छः मत्वर्थीयः भवेत्ताच्छवत्कृत्या इवर्णादिभ्यः श्रुतिः
श्रुतिः इक्कृष्यादिभ्यः कृषिः गिरिः किरिः संज्ञायाम संज्ञायां विषये धातोः एव
स्त्रत्ययो भवति उद्दालकपुष्पभंजिका वारणपुष्पप्रचायिका अभ्योषखादिका
अवोषखादिका शालभंजिका तालभंजिका विभाषाख्यानपरिप्रश्नयोरिञ्च
एवं लिखेव पूर्वं परिप्रश्नः पश्चादाख्यानम् सूत्रेतत्वाच पूर्वनिपातः परिप्रश्ने
आख्याने च गम्यमाने धातोरिञ् प्रत्ययो भवति चकारात् ण्वुल्च विभाषाग्रहणाद्यथाप्राप्तो
ऽपि प्रत्ययः समभवति कांत्वं कारिम कार्षीः कांकारिकां कांक्रियां कांकृत्याम का
कृतिं सर्वाः कारिं अकार्षम् सर्वाः कारिकाः सर्वाः क्रियाः सर्वाः कृत्याः सर्वाः कृतीः
कांत्वं गाणिम जोगणः कांगाणिकां कांगणनाम सर्वां गाणिमजोगणम् सर्वां ग
णिकाः सर्वां गणनाः एवं कांपाचिम् कांपाठिम् कांपक्षिमित्यादि ह्यष्टम आख्या

नपरिप्रश्नयोरितिकिम् कृतिः हृति पर्यायार्हर्णोत्पत्तिषु ण्वुच् पर्यायः परिपाटी
क्रमः अर्हणमर्हः योग्यता ऋणं यत्परस्मै धार्यते उत्पत्तिर्जन्म एतेष्वर्थेषु गम्य
मानेषु धातोः स्त्रियां ण्वुच्प्रत्ययो भवति क्तिनादीनामपवादः पर्याये तावत् भवत आ
सिका भवतः शायिका भवतोग्रग्रासिका अर्हे अर्हति भवानिक्षुभक्षिकाम्
ओदनभोजिकाम् पयःपायिकाम् ऋणे इक्षुभक्षिकां मे धारयसि ओदनभो
जिकाम् पयःपायिकाम् उत्पत्तौ इक्षुभक्षिका मे उदपादि ओदनभोजिका प
यःपायिका विभाषाख्यानेत्येव चिकीर्षा जायते एवलिप्सकेनेप्रत्ययान्तरकारणे स्व
रार्थम् आक्रोशे नञ्यनिः विभाषेतिनिवृत्तम् आक्रोशः शापनम् आक्रोशे ग
म्यमाने नञ्युपपदे धातोरनिप्रत्ययो भवति क्तिनादीनामपवादः अकरणिस्ते
ते वृषल भूयात् अप्रयाणिः आक्रोश इतिकिम् अकृतिस्तस्य कटस्य नञी
तिकिम् मृतिस्ते वृषल कृत्यल्युटो बहुलम् भावेअकर्तरिचकारकेइतिनिवृ
त्तम् कृत्यसंज्ञकाः प्रत्ययाः ल्युट्च बहुलमर्थेषु भवन्ति यत्रोक्तास्ततोन्यत्रापि भवन्ति

भावकर्मणोः कृत्या उक्ताः कारकेऽपि भवन्ति स्नानीयं चूर्णम् दानीयो ब्राह्मणः
करणाधिकरणभावेष्वानयुट्प्रत्ययोऽपि भवति श्रयमेचनम् प्रवस्नावणम् गतमो
नताः शालयाः गन्धाछादनानिवासोऽस्मि प्रस्कन्दनम् प्रपतनम् बहुलग्रहणात्
दृश्येऽपि कृतः श्राममृगमेयविभवन्ति पादाभ्यां ह्रियते पादहारकः गलेचाप
ते गलेचोपकः नपुंसकभावे क्तः नपुंसकलिङ्गभावे धातोः क्तप्रत्ययो भवति
हसितं छात्रस्य शोभनं जल्पितम् शयितम् आसितम् ल्युट् च ल्युट्प्रत्ययो भव
ति धातोर्नपुंसकलिङ्गभावे हसनं छात्रस्य शोभनं जल्पनम् शयनम् आस
नं योगविभागउत्तरार्थः कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् येन क
र्मणा संस्पृश्यमानस्य कर्तुः शरीरसुखमुत्पद्यते तस्मिन् कर्मण्युपपदे धातोर्न
पुंसकलिङ्गभावे ल्युट्प्रत्ययो भवति पूर्वेणैव सिद्धे प्रत्यये नित्यसमासार्थं वचनं
उपपदसमासो हि नित्यः पयःपानं सुखम् ओदनभोजनं सुखम् कर्मणीति कि
म् तूलिकाया उत्थानं सुखम् संस्पर्शादिति किम् अग्निकुण्डस्योपासनं सुखम्

कर्त्तरीतिकिम् गुरोः स्नापयते स्नाति(?) स्नापयते न उग्रकः कर्त्ता किन्तर्हि कर्म पायी
रग्रहणंकिम् पुत्रमपरिभुजनेस्नावयम् मानसीप्रीतिः स्नावोमितिकिम् केवका
नोमरंवेद्रः स्वम सर्वोज्ञाममामः प्रमुदाह्रियते करणाधिकरणयोश्च करणा
धिकरणयोश्चकारके भिधेये धातोः ल्युप्रत्ययो भवति इध्मप्रवश्चनः पलाशशातनः अधि
करणे गोदोहनी सक्तुधानी पुंसि संज्ञायां घः प्रायेण करणाधिकरणयोरित्येव
पुंलिङ्गयोः करणाधिकरणयोरभिधेययोर्धातोर्घप्रत्ययो भवति समुदायेन चे।
न्मेहागम्यते प्रायग्रहणमकार्त्स्न्यार्थम् दन्तच्छदः उरश्छदः सवः अधिकरणे ए
ल्लिपि यत्नतस्मिन्कुर्वन्तीत्याकारः आलापः पुंसीतिकिम् प्रस्नापनम् संज्ञाया
मितिकिम् प्रावरणो दन्तः चकारश्चादेशे इति विशेषणार्थः गोचरसंचारवह
व्रजव्यजापणनिगमाश्च गोचरादयः शब्दा घप्रत्ययान्ता निपात्यन्ते पूर्वस्मिन्नेवार्थे र
लश्चेति गोदस्याति तस्यायमपवादः गावश्चरन्त्यस्मिन्निति गोचरो देशः संचरन्ति
न्तेनेति संचरः वहन्तितेनेति वहः व्रजन्तितेनेति व्रजः व्यजन्तितेनेति व्यजः विपाननादी

का
वृ.

भावो न भवति यन्त्रे निवृत्तात्परो णेन स्यात्। निगडेति नस्मात्रेति निगमः वका
रोजन्तस्यस्थाथैः कषः निकषः एवेरन्येनोचेन एवमुपपदे स्त्रवतेः स्त्रणंनेश्र्या
नोः करणाधिकरणयोर्घप्रत्ययो भवति जकारोन्द्रिङ्गेत्स्वरार्थः यकारस्तस्य बहुला
र्थः प्रवनोदः प्रवत्तारः कथमवतारो वयाः वहीयमेत्तां प्रायान्त्रेण्ठेमेवाथा
मपि भवति हलश्च हलेनादानोः करणाधिकरणयोः घेप्रत्ययो भवति गस्यापवा
दः लेखः वेदः वेष्टः वेधः नीमार्गः अपामार्गः अपायापन्यायोध्यावसंहारा धारावा
याश्च अध्याधारः याज्ञानिपात्यन्ते भुमिस्मेनायोवेश्राम यन्निपीयते अवलेहा
योश्रावेमः अधीयतेस्मिन्नध्यायः नीयतेनेनन्यायः उद्धवति तस्मिन्नुद्भावः सं
ह्रियन्तेनेनेमेसंहारः अधियतेस्मिन्निन्याधारः आवयन्तितस्मिन्नावायः वकारो
न्तस्य समस्थाथाः अवहारः उदकोदनकै उदकस्येति निपात्यते अवन्तुकाविषय
पूज्ञानर्थाभवति उत्पन्नोदवनेः यन्निपात्यते नन्वव हलश्चेति निषिद्धात्मन् उद
कथंतिघपौर्ववचनम् तैलोदकः वनोदकः प्रवदकसेतिकिम उदकोदञ्चनः यः

कस्मात्तत्प्रसङ्गो गृह्यते विशेषाभावात् तेन धिरिपापादिस्वेरेणं नोदात्तस्यव
नात्मनाय: ग्रान्याय इतिनिश्चीयते नालेचेइवति ग्रेपूर्वाद्ययतेः कारणेवेति
पाम्पते ग्रावाणोमन्मानाम् ग्रावाणोमघवानाम् त्वेनोयव त्वेनतेर्थ: कारणा।
धिकारणयो: मध्यनयोभवति तेव ग्राव्णेः ग्राव्णोः शेवक्तव्यः ग्राव्णेः इत्येव
क्तव्यः ग्राव्णः इकोवक्तव्यः ग्राव्णिकः इकवकोवक्तव्यः ग्राव्णिकवकः त्वले
भगःपरेचेतिवक्तव्यम् गोषः इःमघुक्ष्णार्थेधत्वेल कारणाधिकारणयोरितिनि
मन्नम् गोषन् इइ मतेयेनेषुक्ष्णाकक्ष्णार्थेषुपपदेषुपातो त्वेस्यधनयोभवति
क्षुइः त्वम् गम्भोविशेषाणाम् प्रक्षुञ्जत्वम् नरिनरयोर्विशेषणाम्सभवात्
गोषत्कारः कर्तोभवतः पुङ्कारः मकारः गोषज्ञोनप्रद्नोभवता दर्भौजः मभौजः
गोषदादिष्विति किम् क्षुङ्णकार्थः क्षुणाक्षुणार्थेष्विति किम् गोषत्कार्थः ल
कारःमगालित्कारणमन्नरत्रमसर्थम् कारेकर्माणाश्चभूकेनोः भवनेकर्त्ता ने
श्चपातेषपा सरव्यकर्तेतिकर्माणिबोपपदेचकारादीषदादिषुबवत्वस्यनयो

का
सू
१८

भवति ईश्वराच्छत्रमेवं भवता गुरोश्छत्रमेवं स्नाताच्छत्रमेवं ईश्वराच्छत्रं करोत्येवं छत्रो भवता
गुरोश्छत्रकरः स्नातच्छत्रकरः कर्त्तृकर्मणोः कृतीति नित्यं समास इह मा भूत् स्ना
तच्छत्रं भूषयति श्रातोपूर्व ईश्वरस्य चानुवर्त्तते कर्त्तृकर्मणोः कृतीति नित्यं समस्यते ईश्वरा
दिषु कृत्कृत्सु कृञ्चापूर्वपदस्य आकारान्तेभ्यो भावानां पुनः स्वपदस्य भवति लोपश्चातः
स्वपरस्तोत्रः स्वपरस्तनमन्तरितम् प्रत्येभ्योपि स्वपरे प्रत्येभ्योपि भावभ्यः प्रया
मर्थ्यं भक्ष्यं समितिवस्य पुनः स्वपरस्य पादपदे स्वदोश्च नाम तृणेन्द्रा स्नातो गाम् भाषायां
यामि पुत्रि सुखिमिन्ये पुनः स्वनङ्कुच्यः कः श्रातनः कर्यायनः कर्ददेवः कर्येशत्यः
कर्मवधाः वर्त्तमानसामीप्ये वर्त्तमानवद्वा समीपमेव सामीप्यम् श्वः स्नार्थिक
तत्राप्यते वाक्यवर्णितादि सिद्ध्यर्थम् वर्त्तमाने लडिता भ्यपादेव च्यन्तारयोबहुल
मिति वर्त्तमाने प्रत्ययाः युक्ता नेम्नं भविष्यतोर्विधीयन्ते कदा देवदत्त गतोसि
श्रयमागच्छामि श्रागच्छन्तमेवं मां विद्धि अयमागमम् यद्यागतः कदा देव
दत्त गमिष्यसि एष गच्छामि गच्छन्तमेव मां विद्धि गमिष्यामि गतोस्मि वर्त्तकर

गोमाहवपायेम् येनविशेषणेनवर्तमानेप्रत्ययाविहिताः शत्रन्मपपादिस्तेन
पैवात्रभवंतिपवमानः यजमानः सुलेकमिल्लुः सामीप्यग्रहणेविप्रकर्षविवा
लार्थामाभूत पर्वतगङ्गामाहलिपुत्रं गमिष्यतिवर्षेणयामन्येनगसामीतिपर
म् वर्तमानएवकालोवर्तते कालान्तरगतिस्तत्वाभ्याइ वति नचवाकागम्यः
कालः परमेस्कारउपयुज्यतेवर्ततेनात्मसंवाकार्थेनुपुतिपश्चात्शतिप्रका
णमिटनाव्यममेव तथाचप्रवः कारिष्यति वर्षेणकारिष्यति इतिसर्वेष्वप्ययं
ने प्रांशमाराभूतवच्च वेत्येतवर्तमानसामीप्यइतिनानुवर्तते प्रासेसनमा
शेमा प्रश्नामस्थियायेमसामीप्या तस्माचभविष्यत्कालोविषयस्तत्रभवि
ष्यति काले प्रांशमायांगम्यमानायांविभाषाभूतवत्प्रत्ययाभवंति यकाराद्र
तेमानस्य उपाध्यायश्चेदागतः एतेव्याकरणमधीमहे प्रयोष्यामहे प्रध्यगी
ष्महि एतद्व्याकरणमधीतम् सामान्यातिदेशो विशेषानतिदेशः तेनलोगि
शेनभवतः प्रांशेमायामितिकिम् प्रागमिष्यति विप्रवनेलट् प्रांशमाया

का
वृ.
१८८

मितिकिम् आगमिष्योऽत्र क्षिप्रवचन उपपदे आशंसायां गम्यमानायां लृट्प्रत्ययो
भवति भूतवच्चेत्यस्यापवादः उपाध्यायश्चेदागतः क्षिप्रमागमिष्यति एतेन व्याकरणमध्ये-
ष्यामहे वचनग्रहणं पर्यायार्थम् शीघ्रमाशु त्वरितमध्येष्यामहे नेतिवक्तव्ये ल्लृटो
विग्रहणं ल्लृटोऽपि विषयेऽपि यथा स्यात् यदा क्षिप्रमध्येष्यामहे आशंसावचने लिङ्
आशंसायेनोच्यते तदाशंसावचनम् तस्मिन्नुपपदे धातोः लिङ्प्रत्ययो भवति
भूतवच्चेत्यस्यापवादः उपाध्यायश्चेदागच्छेत् आशंसे युक्तोऽधीयीय विकल्पये यु-
क्तोऽधीयीय आशंसे क्षिप्रमधीयीय नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः भूता-
नद्यतनभविष्यदनद्यतनेवल्लङ्लुटौ विहितौ तयोः प्रतिषेधः अनद्यतनवत्प्रत्य-
यविधिर्न भवति क्रियाप्रबन्धे सामीप्ये च गम्यमाने क्रियाणां प्रबन्धः सातत्येनानु-
ष्ठानं कालानां सामीप्यं तुल्यजातीयेनाव्यवधानम् यावज्जीवं युक्तोऽध्यापिपत्
यावज्जीवं युक्तोऽध्यापयिष्यति सामीप्ये खल्वपि येयं पौर्णमास्यतिक्रान्ता एतस्या-
मग्न्याधेयोऽग्नीनाधास्यते सोमेन यक्ष्यते सर्वान्तास्यते होष्यतिपौर्णमास्यामस्या

न्तानाय भविष्यतिमर्यादावचनेवरस्मिन् नानद्यतनवदितिवर्त्तते क्रियाप्रबं
धसामीप्यार्थेवचनम् भविष्यतिकालेमर्यादावचनेवरस्मिन् अवरस्मिन्प्रविभा
गेनद्यतनवत्प्रत्ययविधिर्नभवति योयमध्वागंतव्यआपाटलिपुत्रात्तस्ययदवरंकौशां
म्ब्यास्तत्रयुक्ताःपास्यामहे द्विःसक्तूनपिबाम मर्यादावचनइतिकिं योयमध्वानिरव
धिकोगंतव्यस्तस्ययदवरंकौशाम्ब्यास्तत्रद्विरोदनंभोक्ष्यामहे तत्रसक्तून्पास्यामः
अवरस्मिन्निति किम् योयमध्वागंतव्यआपाटलिपुत्रात्तस्ययत्परंकौशाम्ब्यास्तत्र
द्विरोदनंभोक्ष्यामहे परस्तद्देशकृतमर्यादानत्वकालकृता ने प्रवि
भागेवस्यति कालविभागेचानहोरात्राणाम् भविष्यतिमर्यादावचनेवरस्मिन्निति
सर्वमनुवर्त्तते कालमर्यादाविभागेसत्यवरस्मिन्प्रविभागेभविष्यति कालेनद्यत
नवत्प्रत्ययविधिर्नभवति नचेदहोरात्रसंबंधीप्रविभागस्तेषांचप्रविभागेप्रतिषेधः
पूर्वेणैवसिद्धेवचनमहोरात्रप्रतिषेधार्थमेव योयंविभागउत्तरार्थः योयंसंवत्सरआगा
मीतस्ययदवरमाग्रहायण्यास्तत्रयुक्ताःपास्यामहे नचोदनंभोक्ष्यामहे भविष्य

का॰
वृ॰
१८२

नीत्येव योयं संवत्सरो तीतस्तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्यैष्महि तत्रौदन
मभुञ्ज्महि मर्यादावचन इत्येव योयं निरवधिकः काल आगामी तस्य यदवरमाग्रहाय
ण्यास्तत्र युक्ता अध्येतास्महे तत्रौदनं भोक्तास्महे अवरस्मिन्नित्येव परस्मिन्विभाषां वक्ष्य
ति अनहोरात्राणामिति किम् त्रिविधमहारणम् योयं मास आगामी तस्य यदवरं मा
ग्रहायण्यास्तत्र युक्ता अध्येतास्महे तत्रौदनं भोक्तास्महे योयं त्रिंशद्रात्र आगामी तस्य
योवरो यो मासो योयं त्रिंशद्रात्र आगामी तस्य योवरः पंचदशरात्रस्तत्राउ   काध्य
ध्येतास्महे तत्रसक्तून्पातास्मः सर्वथाहोरात्रस्पर्शे प्रतिषेधः परस्मिन्विभाषा भवि
ष्यति मर्यादावचने कालविभागे चानहोरात्राणामिति वर्तते काल मर्यादावच
ने कालविभागे चानहोरात्राणां भविष्यति काले परस्मिन्विभागे विभाषानद्य
तनवत्प्रत्ययविधिर्भवति नचेदहोरात्रसंबन्धी प्रविभागः अवरस्मिन्पूर्वेण प्रति
षेध उक्तः सोयं तु परस्मिन्नप्राप्तविकल्प उच्यते योयं संवत्सर आगामी तस्य
परमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे तत्र युक्ता अध्येतास्महे तत्रसक्तून्पा।

स्यामः नवमकन्यानामासः अनद्यतनाधिकारात्रिरात्राणामित्येव योयंत्रिंशद्रात्र आगामी तस्य पः पा
येवरस्यात्रवत्तउकाअर्धेनामसेहेतव्रमेकन्यानामासः भविष्यतीत्येव योयंसंवत्सर आगा
मीतस्ययदवरमाग्रहायण्याः मर्यादावचनइत्येव योयंनिरवधिकःकालआगा
मीतस्ययदवरमाग्रहायण्याः कालविभागइत्येव योयमध्वागंतव्यआपाटलिपुत्रात्तस्य
यदवरंकौशांब्याइति सर्वत्रानद्यतनप्रत्ययउदाहृतः लिङ्निमित्ते लृङ् क्रियातिपत्तौ भ
विष्यतीत्यनुवर्त्तते हेतुहेतुमतोर्लिङ् इत्येवमादिको लिङ् निमित्तंतत्र लिङ्निमित्ते भ
विष्यतिकाले लृङ् प्रत्ययोभवति क्रियातिपत्तौ सत्यां कुतश्चिद्वैगुण्यादनभिनिर्वृ
त्तिः क्रियायाः क्रियातिपत्तिः दक्षिणेन चेदयास्यत् न शकटं पर्याभविष्यत् यदि का
मलकमाह्वास्यत् न शकटं पर्याभविष्यत् अभोक्ष्यत भवान्घृतेन यदि मत्समीपमागमि
ष्यत् भविष्यत्कालविषयमेतद्वचनम् भविष्यत्पर्याभवनं हेतुमत् न हेतुभूतं वक
मलकाह्वानं लिङ्गेन दृष्टान्तरनिपत्तिं प्रमाणेन गतस्वयमवकाशाकोश्नेको य
दिकमलकमाह्वास्यत् न शकटं पर्याभविष्यदिति हेतुहेतुमतोराह्वानपर्याभवने।

कां॰
वृ॰
१८२

योर्भविष्यत्कालयोरतिपत्तिर्निवाकाङ्क्ष्यते भूतेच लिङ्मित्ते लृङ् क्रियातिपत्तौ।
इति सर्वमनुवर्तते पूर्वेणाभविष्यति विहितः सम्प्रति भूते विधीयते भूते च काले लि
ङ्मित्ते क्रियातिपत्तौ सत्यां लृङ् प्रत्ययो भवति उताप्योर्विभाषास्या लिङ्मित्ते विधा
नमेतत् प्राक्तनविकल्पवस्याति दृष्टो मया भवतः पुत्रोऽन्नार्थी चङ्क्रम्यमाणोऽपर
श्च ब्राह्मणार्थी यदि स तेन दृष्टो नाभविष्यत् तदाभोक्ष्यत न तु भुक्तवान् अन्येन पथा स
गतः। वोताप्योः। भूते लिङ्मित्ते क्रियातिपत्तौ इति सर्वमनुवर्तते वा आ उताप्यो :
वोताप्योः मर्यादायामाङ् नाभिविधौ उताप्योः समर्थयोर्लिङ् इति वक्ष्यति प्रागे
तस्मात् सूत्राद्यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र भूते लिङ्मित्ते क्रियातिपत्तौ लृ
ङ्वा भवतीत्येतदधिकृतं वेदितव्यम् वक्ष्यति विभाषा कथमि लिङ् च कथं नाम तत्र
भवान् वृषलमयाजयिष्यत् यथाप्राप्तमेव भवति गर्हायां लडपिजात्वोः गर्हाग्र
ऊत्सेमर्यांतरम् गर्हायां गम्यमानायां अपिजात्वोरुपपदयोर्धातोर्लट्प्रत्य
यो भवति वर्तमाने लडुक्तः कालसामान्येन प्राप्नोतीति विधीयते कालविशेष

विहितोऽप्रमत्यानयेपरनाद्भिन्नियेवायते श्रपितत्रभवान्फलेप्राज्ञयति म
ततत्रभवान्फलेप्राज्ञयति गहामहेप्रम्याप्रमेतत् विनिमित्राभवावि हेक्रियानिय
द्वैलेनभवति विभाषाकयामिति च गहोयामितिवनेते कथशाह्यपप्रदेगहोया
गम्ममानायोपानोः लिप्रमयोभवति वकायतेच विभाषाग्रहणेयपास्वकालानि
शेषविहितानांप्रमयानामवाधनायेम कथंनाममतत्रभवान्फलेप्राज्ञयेत कथं
नाममतत्रभवान्फलमपोपजत् कथंनाममतत्रभवान्फलेप्राज्ञयति कथंनाममत
त्रभवान्फलेप्राज्ञयिष्यति कथंनाममतत्रभवान्फलेप्राज्ञयिता कथंनाममतत्रभ
वान्फलमप्राज्ञयत कथंनाममतत्रभवान्फलेप्राज्ञयोचकार श्रद्धालिङ्। मित्रम
लोनिभूनिविवत्तायोक्रियातिपत्तौवाल्भवति भविष्यतिवत्तायोत्रमवेत्रनिमे
नेवल्ल्वाभविनयम किंहृलितिल्ज्ञो गहोयामित्येव विभाषाशनस्वर्पते किंवृत्र
त्रपपदेगहोयोगम्ममापानोपानोः लिङ्नोप्रमयोभवतः सर्वलकाराणामपवादः
लिङ्रङ्लः परिहारार्थम कोनामवृषलः यंतत्रभवान्प्राज्ञयेत यंतत्रभवान्प्रा

का.
वृ.
१८४

जयिष्यति भूतेक्रियातिपत्तौवालृङ्भविष्यतीतिनियम कोनामवृषलःयंतत्रभवान्वृ
षलमयाजयिष्यत् अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि गर्हायामितिनिवृत्तम अनव
क्लृप्तिरसंभावना अमर्षोऽक्षमा किंवृत्तेवाकिंवृत्तेवोपपदेऽनवक्लृप्त्यमर्षयोः गम्यमा
नयोर्धातोर्लिङ्लृटौप्रत्ययौभवतः सर्वलकाराणामपवादः बहुवचः पूर्वनिपातोल
क्षणव्यभिचारचिह्नंतेनयथासंख्यंनभवति अनवक्लृप्तौतावत् नावकल्पयामिन
संभावयामिनश्रद्दधे तत्रभवान्नामवृषलंयाजयेत् तत्रभवान्नामवृषलंयाजयिष्य
ति कोनामवृषलोयंतत्रभवान्याजयेत् कोनामवृषलःयंतत्रभवान्याजयिष्यति
अमर्षेनमर्षयामि तत्रभवान्नामवृषलंयाजयेत् वृषलंयाजयिष्यति भूतविवक्षा
यांक्रियातिपत्तौवालृङ्भविष्यतीतिनियम नावकल्पयामितितत्रभवान्नामवृषलम
याजयिष्यत् किंकिलास्त्यर्थेषुलृट् अनवक्लृप्त्यमर्षयोरितिवर्त्तते किंकिलास्त्यर्थेषू
पपदेषु अनवक्लृप्त्यमर्षयोर्गम्यमानयोर्धातोः लृट्प्रत्ययोभवति लिङोपवादः किं
किलनामतत्रभवान्वृषलंयाजयिष्यति अस्तिनामतत्रभवान्वृषलंयाजयिष्यति

भवति नाम तत्रभवान्वृषलं याजयिष्यति विद्यते नाम तत्रभवान्वृषलं याजयिष्यति
न श्रद्दधे न मर्षयामि लिङ्. किंवृत्तमिह नास्ति तेन लृट्. भवति जात्वपदोर्लिङ्. अन-
वक्लृप्त्यमर्षयोरित्यनुवर्तते जात्वपद् यत्वेयोरुपपदयोरनवक्लृप्त्यमर्षयोर्गम्यमा-
नयोर्धातोर्लिङ्प्रत्ययो भवति लृडपवादः जातु तत्रभवान्वृषलं याजयेत् यत्तत्रभ-
वान्वृषलं याजयेत् न श्रद्दधे न मर्षयामि जात्वयदोर्लिङ्. ध्वने यदायदोरुपसंख्या-
नम् यदा भवद्विधः क्षत्रियं याजयेत् क्रियातिपत्तौ भूते वा लृङ् भविष्यतीति तमम् यच्च
यत्रयोः अनवक्लृप्त्यमर्षयोर्गम्यमानयोर्धातोर्लिङ्प्रत्ययो भवति लृटः ऽपवादः
योगविभाग उत्तरार्थः यथासंख्यमिह नेष्यते यच्च तत्रभवान्वृषलं याजयेत् यत्र त-
त्रभवान्वृषलं याजयेत् क्रियातिपत्तौ यथापूर्वं लृङ् भवति गर्हायां च अनवक्लृप्त्यम-
र्षयोरिति निवृत्तम् यच्च यत्रयोरुपपदयोः गर्हायाङ्गम्यमानायां धातोः लिङ् प्र-
त्ययो भवति सर्वलकाराणामपवादः यच्च तत्रभवान्वृषलं याजयेत् यत्र तत्रभ-
वान्वृषलं याजयेत् [illegible] गर्हामहे ऽन्याय्यम् क्रियातिपत्तौ यथा

यथाल्लृङ्प्रत्ययो भवति चित्रीकरणे च यच्चयत्रयोरित्येव चित्रीकरणमाश्चर्यम अद्भुतं।
विस्मयनीयम् यच्चयत्रयोरुपपद-योश्चित्रीकरणे गम्यमाने धातोर्लिङ्प्रत्ययो भवति
सर्वलकाराणामपवादः यच्च तत्रभवान् वृषलं याजयेत् यत्र तत्रभवान् वृषलं याजयेत्
आश्चर्यमेतत् क्रियातिपत्तौ यथायथं लृङ् भवति शेषे लृडयदौ यच्चयत्राभ्यामन्यस्मिन् चि
त्रीकरणे शेषः शेषे चित्रीकरणे गम्यमाने धातोः लृट्प्रत्ययो भवति यदि शब्दश्चेन्न प्र
युज्यते सर्वलकाराणामपवादः आश्चर्यं चित्रमद्भुतं विस्मयनीयम् अन्धो नाम पर्वत
मारोक्ष्यति बधिरो नाम व्याकरणमध्येष्यते अयदाविति किं आश्चर्यं यदि स भुञ्जीत
चित्रं यदि सोऽधीयीत लिङ्निमित्ताभावादिह लृङ् नास्ति उताप्योः समर्थयोर्लिङ्। उतअ
पि इत्येतयोः समानार्थयोरुपपदयोर्धातोर्लिङ्प्रत्ययो भवति सर्वलकाराणामपवा
दः बाढमित्येतस्मिन्नर्थे समानार्थत्वमनयोः उत कुर्यात् अपि कुर्यात् उताधीयीत अ
प्यधीयीत बाढमध्येष्यते इत्यर्थः समर्थयोरिति किं उत दण्डः पतिष्यति अपिधास्य
ति द्वारम् प्रश्नः प्रच्छादनं च गम्यते वोताप्योरिति विकल्पो निवृत्तः यतः प्रभृति

नेलिविधिरेव क्रियातिपत्तौ निमित्ताल्से भविष्यति न सर्वत्रैव नित्यः कामप्रवेदनेऽकच्चि
ति स्वाभिप्रायाविष्करणं कामप्रवेदने कामश्छाभिलाषस्तस्यार्थान्तरम् तस्य प्रवेद
नेऽप्रकाशनम् तस्मिन्गम्यमानेऽकच्चित्युपपदे धातोर्लिङ्प्रत्ययो भवति सर्वलका
राणामपवादः कामो मे भुञ्जीत भवान् अभिप्रायो मे भुञ्जीत भवान् श्रद्धा मे भुञ्जीत
भवान् अकच्चितीति किम् कच्चिज्जीवति मे माता कच्चिज्जीवति मे पिता मातावि
दनापृच्छामि कच्चिज्जीवति पार्वती संभावनेऽलमिति चेत्सिद्धाप्रयोगे लिङित्येव
स्त्रियामेवरूढं न भवति महोधाः पर्जन्यः संख्याव्ययादेर्ङीप् पूर्वेणाङीषि प्राप्ते ङीब्विधी
यते संख्यादेरव्ययादेश्च बहुव्रीहेः ऊधःशब्दान्तात् ङीप्प्रत्ययो भवति द्व्यूध्नी त्र्यूध्नी अव्ययादेः अत्यू
ध्नी निरूध्नी आदिकरणं किं द्विविधोध्नी त्रिविधोध्नी इदमत्रापि यथा स्यात् दामहायनान्ताच्च
संख्याग्रहणमनुवर्तते नाव्ययग्रहणं संख्यादेर्बहुव्रीहेर्दामशब्दान्तात् हायनशब्दा
न्ताच्च स्त्रियां ङीप्प्रत्ययो भवति दामान्तात् डाप्प्रतिषेधविकल्पेषु प्राप्तेषु नित्यार्थं वचनं द्वि
दाम्नी त्रिदाम्नी हायनान्तात् टापि प्राप्ते द्विहायनी त्रिहायणी चतुर्हायणी हायनो वयसि
स्मृतः इष्टं न भवति द्विहायना शाला त्रिहायना चतुर्हायना एतमपि त्रिचतुर्भ्यो हाय
नस्येति वयस्येव स्मर्यते अन उपधालोपिनोन्यतरस्यां बहुव्रीहेरित्येव अन्नन्तो यो बहुव्री
हिरुपधालोपी तस्मादन्यतरस्यां ङीप्प्रत्ययो भवति ङीपाभावे डाप्प्रतिषेधौ भवतः किमर्थं

का· वृ· २१२

तर्हीङस्यायंतेनत्वसिद्धापवद्पूर्वेणङापप्रतिषेधङीपः अनुपधालोपिनोङीपः प्रतिषेधार्थंवचने
बहुराजाबहुराजानौबहुराजेबहुराज्ञीबहुतक्षाबहुतक्ष्यौबहुतक्षाणः अनइतिकिं बहु
मत्स्याउपधालोपिनइतिकिं सुपर्वासुपर्वाणौसुपर्वाणःसुपर्वीसुपर्व्यौसुपर्व्यः नित्यंसंज्ञा
छन्दसोः अन्नन्ताद्बहुव्रीहेरुपधालोपिनः संज्ञाछन्दसोर्विषयेनित्यंङीप्प्रत्ययोभवतिवि
कल्पस्यापवादः सुराज्ञीअधिराज्ञीनामग्रामःछन्दसिगौःपंचदाम्नीएकमूर्ध्नीसमानमूर्ध्नी
केवलमामकभागधेयपापापरसमानार्यकृतसुमंगलभेषजाच्च संज्ञाछन्दसोरितिवर्त
तेकेवलादिभ्यःप्रातिपदिकेभ्यःसंज्ञाछन्दसिचविषयेङीप्प्रत्ययोभवतियाभाषायामिति के
वलीकेवलेतिभाषायां मामकीमामकेतिभाषायांमित्रावरुणयोर्भागधेयीभागधेयेतिभा
षायां पापीनियंपापामितिभाषायां उतापरीभ्योमघवाविजिग्ये अपराभ्यइतिभाषायाम
समानीप्रहृवणीःसमानेतिभाषायां आर्यकृतीआर्यकृतेतिभाषायांसुमंगलीसुमंगले
तिभाषायां भेषजीभेषजेतिभाषायां रात्रेश्चाजसौ जसविषयादन्यत्रसंज्ञायांछन्दसिवि
षयेरात्रिशब्दात्ङीप्प्रत्ययोभवतियारात्रीसृष्टारात्रीभिः अजसावितिकिं यास्तारात्रयः अ
जसादिष्वितिवाच्यं रात्रिंरात्रिंसहोषिताकथंतिमिरपटैरवगुंठिताश्चनार्यः ङीषयंबहुला

दिलक्षणात्वङीप्पद्यते कृदिकारादक्तिन इति अन्तर्वत्पतिवतोर्नुक् प्रकृतिर्निपात्यते तन्मा
गमस्तु विधीयते अन्तर्वत्पतिवतोः नुग्भवति ङीप् च प्रत्ययः स च नकारान्तत्वादेव सिद्धः निपा
तनसामर्थ्यात्तु विशेषे वृत्तिर्भवति अन्तर्वत्नी गर्भिणी भर्तृसंयोगे तु न भवति अन्तर
स्यां शालायां विद्यते मतिमती पृथिवीति अन्तर्वदिति मतुब्निपात्यते वत्वं सिद्धं पतिवदिति व
त्वं निपात्यते मतुप्सिद्धः अन्तर्वत्नी गर्भिणी पतिमती जीवपतिः अन्तर्वत्पतिवतोस्तु मतुब्व
त्वे निपातनात् गर्भिण्यां जीवपत्यां च वा च छन्दसि नुम्विधिः सान्तर्वत्नी देवानुपैत् सान्तर्व
त्नी देवानुपैत् वीतिवत्नी तरुणवत्सा पतिवत्नी तरुणवत्सा पत्युर्नो यज्ञसंयोगे पतिशब्द
स्य नकारान्तादेशः स्त्रियां विधीयते स्त्रीप्रत्ययस्तु नकारान्तत्वादेव सिद्धः यज्ञसंयोगो यज्ञे
न संयोगः तत्साधनत्वात्फलग्रहीतृत्वाद्वा यजमानस्य पत्नी पत्नी वाचं प्रयच्छ यज्ञसंयोगा
दिति किं ग्रामस्य पतिरियं ब्राह्मणी कथं वृषलस्य पत्नी उपमानाद्भविष्यति विभाषा सपू
र्वस्य पत्युर्न इति वर्त्तते पतिशब्दान्तस्य प्रातिपदिकस्य सपूर्वस्यानुपसर्जनस्य नकारादेशो
विभाषा भवति ङीप् तु लभ्यते एव वृद्धपतिः वृद्धपत्नी स्थूलपतिः स्थूलपत्नी अप्राप्तविभाषे
यमयज्ञसंयोगत्वात् सपूर्वस्येति किं पतिरियं ब्राह्मणी ग्रामस्य नित्यं सपत्न्यादिषु सप

का॰
वृ ४
२२७

न्तादिषु पत्युर्नकारादेशो भवति ङीप् तु लभ्यत एव सर्वेणा विकल्पे प्राप्ते नित्यार्थं वचनं नित्य
ग्रहणं विस्पष्टार्थं समानः पतिर्यस्याः सपत्नी समान एव वीरः पिंड पुत्र भ्रातृ दासाच्छंदसि
दासपत्नी पूतक्रतोरै च पूतक्रतुशब्दस्य स्त्रियामैकारान्तादेशो भवति ङीप् च प्रत्ययः
पूतक्रतोः स्त्री पूतक्रतायी त्रय एते योगाः पुंयोगप्रकरणेऽष्टव्याः यथा पूताः क्रतव इति पू
तक्रतुः सा भवति वृषाकप्यग्निकुसितकुसिदानामुदात्तः वृषाकप्यादीनामुदात्त ऐकारादे
शो भवति स्त्रियां ङीप् च प्रत्ययः वृषाकपिशब्दो मध्योदात्तः उदात्तवचनं प्रयोजयति अग्न्यादिषु
पुनरन्तोदात्तेषु स्थानिवद्भावात् सिद्धं वृषाकपेः स्त्री वृषाकपायी अग्नायी कुसितायी कुसि
दायी पुंयोगादित्येव वृषाकपिः स्त्री मनोरौ वा ऐउदात्त इति मनुशब्दात् स्त्रियां ङीप् प्रत्ययो
भवति औकारश्चान्तादेशः ऐकारश्चोदात्तः वाग्रहणेन द्वावपि विकल्प्येते तेन त्रैरूप्यं भवति
मनोः स्त्री मनावी मनायी मनुः मनुशब्द आद्युदात्तः वर्णादनुदात्तात्तोपधात्तो नः वेति वर्त्तते व
र्णवाचिनः प्रातिपदिकादनुदात्तान्तात्तकारोपधाद्वा ङीप् प्रत्ययो भवति तकारस्य च नकारादे
शः एता एनी श्येता श्येनी हरिता हरिणी रोहिता रोहिणी सर्वा एवाद्युदात्ता वर्णानां तणति
नितान्तानामिति वचनात् वर्णादिति किं प्रकृता प्रकृता गतिस्वरेणायमुदात्तः अनुदा

श्रे

८

नादितिकिं श्येताघृतादिनाद्यन्तोदात्तः तोपधादितिकिं अन्यतोङीषंवक्ष्यति अन्तस्तेपवाधितित्रो
त्ताणीपिशंगादुपसंख्यानं पिशंगी असितपलितयोः प्रतिषेधो वक्तव्यः असिता पलिता छन्द
सिक्नमित्येके असिक्नी पलिक्नी भाषायामपीष्यते गतोगुणस्तूर्णमसिक्निकानां अन्यतोङीष्
वेतिनिवृत्तं वर्णादनुदात्तादितिवर्त्तते तोपधात्तु अन्यत् तोपधादन्यतः प्रातिपदिकाद्वर्णवा
चिनः अनुदात्तान्तात् स्त्रियांङीष्प्रत्ययोभवति स्वरविशेषः सारंगी कल्माषी शबली वर्णादित्येव
खट्वा अनुदात्तादित्येव कृष्णा कपिला षिद्गौरादिभ्यश्च ङीषनुवर्त्तते षिद्भ्यः प्रातिपदिकेभ्यः गौ
रादिभ्यश्च ङीष्प्रत्ययोभवति शिल्पिनिष्वुन् खनकी नर्त्तकी रजकी गौरादिभ्यः गौरी मत्सी गौर
मत्स्यमनुष्यशृंगगवयहयमुष्या ऋष्यपुटद्रोणद्रोणहरीणकणपटरउकण आमलककु
वलवदर विल्वतंकरशांकश शाकरशाषांड षावल पलल्दगानु जपाषाण्डश आण्डक।
आनन्द सृपाट षष्कुल सूर्मसूर्म सूद सूप यूष सूष घातक सल्लुक मालक मालत उल्वय
वेतस वृष अतस उपरतस सङ्गासकेट श्वन् तक्षन् अनडुही आनड्वाही एषणाकरणे देह
देहल काकादन गवादन गुजसमारमत गौतम युगुस्थूल भौरिक भौलिक भौलिंगी औद्गा
हमानि आलंवि आपश्वि आलश्वि कालवित्कुरटटेटनाट मातन पातन आतरणाअथि

का॰
वृ॰
२२४

करणअधिकर आग्रहायणीप्रत्यवरोहिणीसेवनसुमंगलात्संज्ञायां मंदरमंडल पटपिंड उ
र्दसूर्मसूर्मि पाटल लोहांड कदर कन्दल कदल तरुण तलुन बृहत महत्सौधर्मरोहि
णीनक्षत्रेरेवतीनक्षत्रे नीलक निष्कलक पुष्कलक कटाच्छ्रोणिवचनेटी पिप्पल्यादयश्चपि
प्पलीहरीतकीकोशातकी शमीकरीरीपृथिवीक्रोष्टु मातामह पितामह मातामहपिताम
ह्यौ मौ नियमेत्यिति षिद्वादेव सिद्धे ज्ञापनार्थं वचनं अनित्यः षिल्लक्षणो ङीषिति तेन दंष्ट्रेत्युपपन्नं
भवति जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृ
त्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु जानपदादिभ्यः प्रा
तिपदिकेभ्यः एकादशभ्यो वृत्त्यादिष्वर्थेषु यथासंख्यं ङीष्प्रत्ययो भवति जानपदी भवति वृत्तिश्चे
त् जानपद्यन्या स्वरे विशेषः उत्सादिभ्योऽञिति कृते ङीपा उदात्तं भवति कुंडी भवत्यमत्रं चेत् कुंडान्या
गोणी भवत्यावपनं चेत् गोणान्या स्थली भवत्यकृत्रिमा चेत् स्थलान्या भाजी भवति श्रा
णा चेत् पक्वान्नार्थः भाजान्या नागी भवति स्थौल्ये ङीषमुत्पादयति अन्यत्र गुणे एव टाप् जातिव
चनात्तु जातिवचनत्वाद् ङीषेव भवति नागी काली भवति वर्णश्चेत् कालान्या नीली भवत्यनाच्छा
दनं चेत् नीलान्या न च सर्वस्मिन्ननाच्छादने ङीष्यते किं तर्हि नील्या दोषधौ ओषधिर्नीली प्राणि

नित्वरी ली गौः नीली वडवा संज्ञायां वा नीली नीला कुशी भवत्ययोविकारश्चेत् कुशान्या का
मुकी भवति केशवेशश्चेत् कबरान्या शोणात्प्राचां शोणशब्दात्प्राचामाचार्याणां मतेन
स्त्रियां ङीप्रत्ययो भवति शोणी शोणा वडवा वोतो गुणवचनात् गुणमुक्तवान् गुणवचा
नः गुणवचनात्प्रातिपदिकादुकारान्तात् स्त्रियां ङीप्रत्ययो भवति वा पटुः पट्वी मृदुः मृद्वी
उत इति किं शुचिरियं ब्राह्मणी गुणवचनादिति किं आखुः गुणवचनान्ङीबाद्युदात्तार्थं च
खरुसंयोगोपधात् प्रतिषेधो वक्तव्यः खरुरियं ब्राह्मणी पाण्डुरियं स्वेनिविषाते पैतिष्ठथ
ग्जातिर्दुष्टपते अयं यत्रास्ति याजस्वसोसत्र प्रकृतिर्गणः बह्वादिभ्यश्च बह्वादित्येवमादिभ्यः
प्रातिपदिकेभ्यः स्त्रियां ङीष्प्रत्ययो भवति बह्वः बह्वीः पद्धतिः पद्धतीः बहुपद्धतिअंकतिअंच
ति अंहति शकटि शक्ति शारि वारि राति अहि कपि मुनि यष्टि इतः प्राणिनः कृदिकारादा
क्तिनः सर्वतोऽक्तिन्नर्थादित्येके चण्ड अराल कमल कृपाण विकट विकङ्कु विशाल लत रुज चास्म
भागान यो कल्याण उदार पुराण अहन् बहुशब्दो गुणवचन एव तस्येह पाठ उत्तरार्थः नि
त्यं छन्दसि बह्वादिभ्यः छन्दसि विषये नित्यं ङीष्प्रत्ययो भवति बह्वीषु हित्वापवादः बह्वीना
मोषधीभवानि त्वग्रहणमुत्तरार्थं भुवश्च छन्दसि विषये भुवो नित्यं ङीष्प्रत्ययो भवति विभ्वी

का॰
वृ प्र
२२५

प्रष्ठी इह कस्मान्न भवति स्वयंभूः उक्तश्चैतत् न पूर्वेकवर्णामनुवर्त्तते कृत्वा देवैयं पंचमी भवद्वतिसो

ऽयंनिर्देशः पुंयोगादाख्यायां पुमान् योगः पुंयोगः पुंयोगाद्धेतोर्यत्प्रातिपदिकं स्त्रियां वर्त्तते

पुमस्त्राख्याभूतं तस्मान्ङीष् प्रत्ययो भवति गणकस्य स्त्री गणकी महामात्री प्रष्ठी प्रचरी पु

सिषाह प्रष्ठत्वनिमित्तस्य संभवात् शब्दप्रवृत्तेतद्योगात्स्त्रियां वर्त्तते पुंयोगादिति किं देव

दत्ताय सदत्ता आख्याग्रहणं किं परिसृष्टा प्रजाता प्रसूता पुंयोगादेते स्त्रियां वर्त्तन्ते न तु पु

मांसमाचक्षते गोपालिकादीनां प्रतिषेधः गोपालस्य स्त्री गोपालिका पशुपालिका सूर्या

देवतायां चाव्वक्तव्यः सूर्या देवतायामिति किं सूरी इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययव

यवनमातुलाचार्याणामानुक् इन्द्रादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीष् प्रत्ययो भवति आनु

गागमस्तु येषामत्र योगापवेक्ष्य तेते षामागममात्रं विधेयं प्रत्ययः पूर्वेणैव सिद्धः अन्येषामुभ

यं विधीयते इन्द्राणी वरुणानी भवानी शर्वाणी रुद्राणी मृडानी हिमारण्ययोः महत्त्वे महद्धि

मं हिमानी महदरण्यम् अरण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्यां यवनानी लिपिः उपाध्याय

मातुलाभ्यां वा उपाध्यायी उपाध्यायानी मातुली मातुलानी आचार्यादणत्वं च आचार्या

नी आर्यक्षत्रियाभ्यां वा आर्या आर्याणी क्षत्रिया क्षत्रियाणी विना पुंयोगेन स्वार्थ एवायं विधिः

पुंयोगे तु ङीषेव भवति तद्यथा आर्यी क्षत्रियी मुद्गलाच्छन्दसि लिश्च रथीरभून्मुद्गलानी क्रीता

त्करणपूर्वात् करणं पूर्वं यस्मिंस्तदिति करणपूर्वं प्रातिपदिकं क्रीतशब्दान्तं तस्मात्प्रातिपदिका

त् करणपूर्वात्स्त्रियां ङीष् प्रत्ययो भवति वस्त्रक्रीती वसनक्रीती करणपूर्वादिति किं सुक्री

ता दुष्क्रीता इह कस्मान्न भवत्याहितस्वपतनक्रीता प्राणेभ्यो पितरीयसीति टावन्तेन समा

सवचने प्राक्सुबुत्पत्तेरिति बहुलं तदनेकार्थं करणेन बहुलमिति ॥ क्तादल्पाख्यायाम्

करणपूर्वादित्येव करणपूर्वात्प्रातिपदिकात् क्तान्तादल्पाख्यायां स्त्रियां ङीष् प्रत्ययो भव

ति अल्पाख्यायामिति किं चन्दनानुलिप्ता ब्राह्मणी ॥ बहुव्रीहेश्चान्तोदात्तात् क्तादित्येव ।

बहुव्रीहेर्योन्तोदात्तः क्तान्तस्तस्मात् स्त्रियां ङीष् प्रत्ययो भवति स्वाङ्गपूर्वपदमिहोदाहरणं

अस्वाङ्गपूर्वपदाद्विकल्पेनेच्छन्ति शङ्खभिन्नी ऊरुभिन्नी गलकोत्कृत्ती केशलूनी बहुव्रीहे

रिति किं पादपतिता अन्तोदात्तादिति किं वस्त्रच्छन्ना वसनच्छन्ना अन्तोदात्ताज्जातात्प्रति

षेधः दन्तजाता स्तनजाता पाणिगृहीतीत्यादीनां विशेषे पाणिगृहीती भार्या यस्यास्त

यथा कथंचित्पाणिर्गृह्यते पाणिगृहीता सा भवति अबहुनञ्सुकालसुखादिपूर्वा

दिति वक्तव्यं बहुकृता नञ् अकृता सुकृता कालमासयाता संवत्सरयातासु

त्वादिसुखयानाङः शवयाता जातिकालसुखादिभ्यो नान्तक्तान्तादित्येवमादिना बहुव्रीहेरन्तो
दात्तत्वं अस्वाङ्गपूर्वपदाद्वा अन्तोदात्तात् क्तान्तादिति निवर्तते अस्वाङ्गपूर्वपदादन्तोदात्तात् क्ता
न्ताद् बहुव्रीहेः स्त्रियां वा ङी प्रत्ययो भवति पूर्वेणाप्राप्ते प्राप्ते विकल्पार्थं वचनं शार्ङ्गरजग्धी।
शार्ङ्गरजग्धा पलाण्डुभक्षिती पलाण्डुभक्षिता सुरापीती सुरापीता अस्वाङ्गपूर्वपदादिति किं
शंखभिन्नी ऊरुभिन्नी अन्तोदात्तादित्येव वस्त्रच्छन्ना वसनच्छन्ना बहुलं संज्ञाछन्दसोरिति
वचनं प्रवृद्धविलूनी प्रवृद्धविलूना प्रवृद्धा चासौ विलूनेति नायं बहुव्रीहिः स्वाङ्गाच्चोप
सर्जनादसंयोगोपधात् बहुव्रीहेः अन्तोदात्तादिति सर्वं निवृत्तं वा ग्रहणमनुवर्तते
स्वाङ्गं यदुपसर्जनमसंयोगोपधं तदन्तात् स्त्रियां ङीप्रत्ययो भवति चन्द्रमुखी चन्द्रमुखा अ
तिक्रान्ता केशान् अतिकेशी अतिकेशा माला स्वाङ्गादिति किं बहुयवा उपसर्जनादिति किं शिखा असं
योगोपधादिति किं सुगुल्फा सुपार्श्वा अङ्गगात्रकण्ठेभ्य इति वक्तव्यं मृद्वङ्गी मृद्व
ङ्गा मृदुगात्री मृदुगात्रा स्निग्धकण्ठी स्निग्धकण्ठा अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविका
रजं अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतं नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च स्वाङ्गाच्चो
पसर्जनादित्येव बह्वच्लक्षणं संयोगोपधलक्षणं च प्रतिषेधं प्राप्ते वचनं सहनञ्विद्यमान

लक्षणारन्तप्रतिषेधो भवत्येव नासिकाद्यन्तात्प्रातिपदिकात् स्त्रियां वा ङीप्प्रत्ययो भवति तुंगनासि
की तुंगनासिका बलोटी बलोटा बिंबोष्टी दीर्घजंघी दीर्घजंघा समदन्ती समदन्ता जरत्कर्णी चा
रुकर्णी तीक्ष्णशृंगी तीक्ष्णशृंगा पुच्छाच्चेति वक्तव्यं कल्याणपुच्छी कल्याणपुच्छा कबरम
णिविषमेभ्यो नित्यं कबरपुच्छी मणिपुच्छी विषपुच्छी शरपुच्छी उपमानात्पक्षात्पुच्छाच्च
उलूकपक्षी शाला बलूकपुच्छी सेना नक्रोडादिबह्वचः स्वाङ्गान्ङीप्प्रत्ययः प्रतिषिध्यते क्रोडा
द्यन्ताद्बह्वजन्ताच्च प्रातिपदिकात् ङीप्प्रत्ययो न भवति कल्याणक्रोडा कल्याणगोखा कल्या
णवाला कल्याणशफा कल्याणजघा क्रोडादिराकृतिगणः स्वभगाः सुगला बह्वचः स्वल्ल
पिपृथुजघना महाललाटा सहनञ्विद्यमानपूर्वाच्च स्वाङ्गाच्चोपसर्जनादिति प्राप्ते नासिको
दरेति च ङीप्प्रतिषिध्यते सहनञ्विद्यमान इत्येवं पूर्वात्प्रातिपदिकात् ङीप्प्रत्ययो न भवति सके
शाः अकेशा विद्यमानकेशा सनासिका अनासिका विद्यमाननासिका नखमुखात्संज्ञायाम्
नखमुखान्तात्प्रातिपदिकात्संज्ञायां विषये ङीप्प्रत्ययो न भवति शूर्पणखा वज्रणखा गौरमु
खा कालमुखा संज्ञायामिति किं ताम्रमुखी कन्या दीर्घजिह्वी च छन्दसि दीर्घजिह्वीति के

का० वृ० ११०

दसिविषयेनिपात्यते संयोगोपधत्वादप्राप्तोऽपिङीविधीयते दीर्घजिह्वीवैदेहभ्नाहव्यमालेट्
वकारः संज्ञाकर्षणार्थः दीर्घजिह्वाकन्या निपातनेनित्यार्थं टिकृद्वंपदाङ्डीप् स्वांगाच्चोपस
र्जनादित्येवमादिविधिप्रतिषेधविषयः सर्वउपलक्ष्यतेयत्रङीविहितस्तत्रायमपवादः टिकृ
द्वीत्प्रातिपदिकात् ङीप्प्रत्ययोभवति स्वरोविशेषः प्राग्गुल्खी प्राग्गुल्खा प्राङ्गासिकी प्राङ्गासि
का इहनभवति प्राग्गुल्फा प्राक्क्रोडा प्राग्गलग्जेनेति बहुङ्ःङीषेव स्वयंतेवङीष् बहेरयाविप्रस
यान्तस्यनिर्देशः सामर्थ्यात् दन्तविधित्वात् बहून्तात्प्रातिपदिकात् स्त्रियांङीष्भवति दिस्योह्री
पक्षोह्री सखीशिशीभाषायां सखीश्रीशिशीभाषायामिति किं सखावासमपदामव श्रीशि
श्रीरिवसमायंशपाड्राभिमन्यते जातेरस्त्रीविषयादयोपधात् जातिवाचियत्प्रातिपदिकं
तदस्त्रियामेवनियतमस्त्रीविषयमयकारोपधंचतस्मात् स्त्रियांङीष्प्रत्ययोभवति आकृ
तिग्रहणाजातिर्लिङ्गानांनचसर्वभाक् सकृदाख्यातनिर्ग्राह्यागोत्रंचचरणैःसह कुक्कु
टीसूकरीब्राह्मणीवृषलीनाडायनीचारायणीकठीबह्वृचीजातेरितिकिं मुण्डाअस्त्रीवि
षयादितिकिं मक्षिका अयोपधादितिकिं क्षत्रियायोपधग्रहणंगवयहयमुकयमत्स्य

मनुष्याणामप्रतिषेधः॥ गवयी हयी मवयी मत्सी मनुषी॥ पाककर्णपुष्पफलमूलवालोत्तर
पदाच्च॥ जातेरित्येव पाकाद्युत्तरपदाज्जातिवाचिनः प्रातिपदिकात् स्त्रियां ङीष्प्रत्ययो भवति
स्त्रीविषयत्वादेषां पूर्वेणाप्राप्तः प्रत्ययो विधीयते॥ ओदनपाकी शंकुकर्णी मालपर्णी शंखपु
ष्पी दासीफली दर्भमूली गोवाली॥ पुष्पफलवालोत्तरपदान्नियतो नेष्यते तदजातिरुपद्यते
सत्पाककाण्डशाल्मलीपातकेभ्यः पुष्पात् सत्त्वाजिनसनपिंडेभ्यः फलात् मूलान्नञ इति
इतो मनुष्यजातेः॥ इकारान्तात्प्रातिपदिकान्मनुष्यजातिवाचिनः स्त्रियां ङीष्प्रत्ययो भवति
अवन्ती कुन्ती दाक्षी प्लाक्षी॥ इत इति किं विड् दरत्॥ मनुष्यग्रहणं किं तित्तिरिः॥ जातेरित्येव
तैमानेष्टुनर्जातिग्रहणं योपधार्थं अपि यथा स्यात्॥ औदमेयी उरुडपसंख्याने अजाद्यदन्त्यपु
मोडं गासी मौनिचित्ती सुतंगमादिभ्यश्चात इति कइज नेयं जातिः॥ ऊङुतः॥ मनुष्यजा
तेरित्येव॥ उकारान्तात्प्रातिपदिकात् मनुष्यात् स्त्रियामूङ्प्रत्ययो भवति॥ कुरूः ब्रह्मबन्
धूः॥ ऊकारो नो जातो वेति विशेषणार्थः दीर्घोच्चारणं कपोबाधनार्थं अयोपधादित्येव॥
तदनापेक्ष्यते अध्वर्युः ब्राह्मणी अप्राणिजातेश्चारज्ज्वादीनामिति वक्तव्यं अलाबूः क

कैश्रूः अप्राणिग्रहणं किं कृकवाकुः अरज्ज्वादीनामिति किं रज्जुः हनुः बाह्वन्तात्संज्ञायां
बाह्वन्तात्प्रातिपदिकात् स्त्रियां संज्ञायां विषये ऊङ् प्रत्ययो भवति मद्रबाहूः जाम्बबाहूः भ
द्रबाहूः संज्ञायामिति किं वृत्तौ बाहू यस्याः सा वृत्तबाहुः पङ्गोश्च पङ्गुशब्दात्स्त्रियामूङ् प्रत्ययो
भवति पंगूः श्वशुरस्य उकाराकारलोपश्चेति वक्तव्यं श्वश्रूः ऊरूत्तरपदादौपम्ये ऊरूत्तरपदा
त्प्रातिपदिकादौपम्ये गम्यमाने स्त्रियामूङ् भवति कदलीस्तम्भोरूः नागनासोरूः औपम्य इति
किं वृत्तोरुः संहितशफलक्षणवामादेश्च संहितशफलक्षणवाम इत्येवमादेः प्रातिपदि
कात्स्त्रियामूङ् प्रत्ययो भवति अनौपम्यार्थ आरम्भः संहितोरूः शफोरूः लक्षणोरूः वामो
रूः सहितसहाभ्यां चेति वक्तव्यं सहितोरूः सहोरूः कद्रुकमण्डल्वोश्छन्दसि कद्रुशब्दात्क
मण्डलुशब्दाच्च प्रातिपदिकाच्छन्दसि विषये स्त्रियामूङ् भवति कद्रूश्च वै सुपर्णी च मा च कम
ण्डलूं शूद्राय दद्यादिति छन्दसीति किं कद्रुः कमण्डलुः गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यं
गुग्गुलूः मधूः जतूः पतयालूः संज्ञायां कद्रुकमण्डलुशब्दाभ्यां संज्ञायां विषये स्त्रियामूङ्
प्रत्ययो भवति अच्छन्दोर्थं वचनं कद्रूः कमण्डलूः संज्ञायामिति किं कद्रुः कमण्डलुः शार्ङ्ग

रवाद्यञो ङीन् शार्ङ्गरवादिभ्यः अञन्तेभ्यश्च प्रातिपदिकेभ्यः ङीन् प्रत्ययो भवति शार्ङ्गरवी का
पटवी अञन्तेभ्यः बैदी और्वी जातिग्रहणं चानुवर्तते तेन जातिलक्षणो ङीष् तेन बाध्यते बैद
स्य स्त्री बैदी शार्ङ्गरव कापटव वाङ्कृतव गौतम गौग्गुलव ब्राह्मण एते अञन्ताः कामण्डलेय
ब्राह्मणकृतेय आनीचीय आशोकेय एते ढगन्ताः वात्स्यायन मौञ्जायन जातिः कैकसेय ढ
गन्तः काव्य शैव्य ष्यङन्ता एहि पर्येहि क्विबन्तौ आश्मरथ्य यञन्तः औदपान स्त्रैडिकाय
तन्तः प्रयोजयति अराल चण्डाल वतण्ड जातिः भोगवद्गौरिमतोः संज्ञायां घादिषु नित्यं ह्रस्वा
र्थं नृनरयोर्वृद्धिश्च एषु यथायोगं ङीबादिषु प्राप्तेषु ङीन् विधीयते यङश्चाप् यङन्तात् प्राति
पदिकात् स्त्रियां चाप् प्रत्ययो भवति ष्यङः ष्यङश्च सामान्यग्रहणमेतत् आम्बष्ठ्या सौवीर्या कौ
मस्या कारीषगन्ध्या वाराह्या बालाक्या षाच्च यङः षात्परो यो यङ् तदन्ताच्चाप् प्रत्ययो भव
ति शार्कराक्ष्या पौतिमाष्या गौकक्ष्या उत्तरसूत्रे चकारः अनुक्तसमुच्चयार्थः तेन वा भविष्य
ति आवट्याच्च अवटशब्दो गर्गादिः तस्माद्यञि कृते ङीषि प्राप्ते वचनमेतत् आवट्याच्च स्त्रि
यां चाप् प्रत्ययो भवति आवट्या प्राचां ष्फ एव भवति सर्वत्रग्रहणात् आवट्यायनी तद्धिताः

का॰
वृ॰प॰
२५५

अपि कारोयं आपंचमाध्यायपरिसमाप्तेः यानित ऊर्द्ध्वमनुक्रमिष्यामः तद्धितसंज्ञा वेदितव्याः वा
त्यतिसूत्रमिदं अवतिः दकृद्वचनमनन्तरं तद्धितपरिग्रहार्थं अपत्यिग्याज्ञायन्नै ग्रयणपत्त्राद्दिमा
मजित्येवमादिलब्धं भवति तद्धितप्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः सूत्रनिस्त पु
वशात्प्रातिपदिकात् स्त्रियां प्रत्ययो भवति तद्धितसंज्ञाः ङीपोपवादः युवति अणि
ञोरनार्षयोर्गुरूपोत्तमयोष्यङ्गोत्रे गोत्रग्रहणं विहितावनार्षौ तदन्तयोः प्रातिपदि
कयोर्गुरूपोत्तमयोः स्त्रियाम् ष्य आदेशो भवति निर्दिश्यमानस्यादेशा भवन्तीत्यणिञोरेवमा
देशो विज्ञायते न समुदायस्य ष्य इकारः सामान्यग्रहणार्थः षकारस्तद्विज्ञातार्थः यङः श्चावि
ति उपोत्तमसंज्ञः स्वभावात् त्रिप्रभृतीनामन्त्यमन्त्यमपेक्ष्य समीपमुपोत्तमं गुरूपोत्तमं य
स्य तद्गुरूपोत्तमं प्रातिपदिकं करीषस्येव गन्धोऽस्य करीषगन्धिः तस्यापत्यं स्यापत्यमित्य
ण् तस्य ष्य आदेशः कारीषगन्ध्या कौमुदगन्ध्या वाराहस्यापत्यमित्यत्र तस्य ष्य आदेशः वारा
ह्या वालाक्या अणिञोरिति किं ऋतभागस्यापत्यं मानभागी बिदादित्वादञ् गुरूपोत्तमादि
सर्वं समस्ति नडादित्वात्फञ्जिति ङीव भवति अनार्षयोरिति किं वासिष्ठी वैश्वामित्री।

गुरूपोत्तमयोरिति किं । औपगवी कापटवी । गोत्र इति किं । तत्र जाता आहिच्छत्री कान्यकुब्जी ।
गोत्रावयवात् । गोत्रावयवा गोत्राभिमताः कुलाख्याः पुणिकभुणिकमुखरप्रभृतयः ततो गो-
त्रे विहितयोरणिञोः स्त्रियां ष्यङादेशो भवति अगुरूपोत्तमार्थ आरम्भः पौणिक्या मौखर्
येषां तु न गोत्रावयवत्वं तेभ्यो नेष्यते दैवदत्त्या याज्ञदत्त्या क्रौड्यादिषु द्रष्टव्याः । क्रौड्यादिभ्यश्च । क्रौडि इ-
त्येवमादिभ्यः स्त्रियां ष्यङ् प्रत्ययो भवति अगुरूपोत्तमार्थ आरम्भः अणिञर्थश्च क्रौड्या लाड्या
क्रौडि लाडि आपिशलि आपक्षिति चैपयत चैटयत बैल्वयत सौधातकि सूत युवत्याम्
भोज क्षत्रिये भौरिकि भौलिकि शाल्मलि शालास्थलि कापिष्ठलि गौकक्ष्य । दैवयज्ञिशौचिवृक्षिसात्यमुग्रि-
काण्ठेविद्धिभ्योऽन्यतरस्यां । दैवयज्ञि शौचिवृक्षि सात्यमुग्रि काण्ठेविद्धि इत्येतेभ्योऽन्यतरस्यां
ष्यङ् प्रत्ययो भवति इञन्ता एते गोत्रग्रहणं चानुवर्तते तेनायमप्रविभाषेयं गोत्रे पूर्वेण
ष्यङादेशः प्राप्तो विकल्प्यते अगोत्रे त्वनन्तरे पदेऽपदे विधीयते तेन पक्षे इतो मनु-
ष्यजातेरिति ङीषेव भवति दैवयज्ञ्या दैवयज्ञी शौचिवृक्ष्या शौचिवृक्षी सात्यमुग्र्या सात्य-
मुग्री काण्ठेविद्ध्या काण्ठेविद्धी । समर्थानां प्रथमाद्वा । अयमप्यधिकारः समर्थानामि-

का॰
वृ॰
२९

तिवप्रथमादितिचवेतिचेतिस्वार्थिकप्रत्ययाविधिस्त्रायं अपिकारः प्रागिदशोविभक्ति
रितियथास्वार्थिके पुत्रस्मात् उपयोगानामितिविकल्पोपितत्रानवस्थितः केचित्तु समे
वमवन्तिलक्षणवाक्यानितस्यापत्यंतेनरथंतत्रभवइत्येवमादीनिभविष्यन्तितेषुसा
मर्थ्येषुसत्सुप्रथमान्निर्दिष्टादेवप्रत्ययोभवतीतिवेदितव्यं समर्थानामितिनिर्धारणेष
ष्ठीसमर्थानांमध्यात्प्रथमः प्रत्ययप्रकृतित्वेननिर्धार्यतेतस्येतिसामान्यविशेषोपलक्ष
णार्थंनटीयंप्राथम्येविशेषणाणांविज्ञायते उपगोरपत्यमौपगवः समर्थानामितिकिं
केवलउपगोरपत्यंदेवदत्तस्यप्रथमादितिकिं षष्ठ्यन्ताद्यथास्यात् प्रथमान्तान्माभू
त् वाग्रहणंकिं वाक्यमपियथास्यात् उपगोरपत्यमितियद्येवंसमासवृत्तिस्तद्धितवृ
त्त्यावाध्यते उपगवपत्यमितिनैषदोषः पूर्वसूत्रादन्यतरस्यांग्रहणमपेरमनुवर्त्ततेनेत
दपिभविष्यति प्राग्दीव्यतोण् तेनदीव्यतीतिवक्ष्यतितदेकदेशोदीव्यच्छब्दोवाधिके
नाश्रूयतेप्राग्दीव्यच्छब्दानाद्यानितद्धर्मकम्मिण्यामस्त्वात्सः प्रत्ययोभवतीतिवेदि
तव्यं अपिकारः परिमाणविधिस्त्रायं निवापिविधयेषुपवा [illegible]

८

१३

स्पतितस्यापत्यं औपगवः कापटवः अश्वपत्यादिभ्यश्च अश्वपत्यादिभ्यः प्राग्दीव्यतीयेष्वा
र्थेष्वण्प्रत्ययो भवति पत्युत्तरपदाण्योबर्हस्पतितस्यापवादो योगः अश्वपत अश्वपतिशत
पतिगणपति धनपति राष्ट्रपति कुलपति गृहपति पशुपति धान्यपति धन्वपतिस
भापति प्राणपति क्षेत्रपति दित्यादित्यादित्युत्तरपदाण्यः प्राग्दीव्यतस्त्येवदितिअदि
ति आदित्यस्त्येतेभ्यः पत्युत्तरपदाच्च प्रातिपदिकात् प्राग्दीव्यतीयेष्वर्थेषु ण्यप्रत्ययो भव
ति अणोपवादः दैत्यं आदित्यं आदित्यं पत्युत्तरपदात् प्राजापत्यं सैनापत्यं यमाश्चेति
याम्यं वामकिपित्समतोक्तं दस्युपं संख्याने वाच्यं मात्स्यपैत्समत्यं पृथिव्याञ्जोञ्जोपार्थि
वाणार्थिवी देवायज्ञञ्जौ दैव्यं दैवं बहिषष्टिलोपो यं च वाह्यं ईकं च बाहीकं ईकंक्
टस्मिबाहीकः स्वेविशेषः किटोपवचनमव्ययानां भमात्रेटिलोपः तस्यानित्यत्वज्ञापना
र्थं आरातीयः स्यात्कारः अश्वत्थामः लोम्नोपत्येषु बहुषु उडुलोमाः शारलोमाः।
बहुष्विति किं औडुलोमिः शारलोमिः सर्वत्र गोपजादिप्रसंगे यत् गव्यं अजादिप्रसंग
इति किं गोपमहतमप्यागतं गोरूप्यं गोमयं एपादयोर्थविशेषलक्षणाद्गणापवादा

पूर्वविप्रतिषिद्धं दितेरप्यन्तं दैत्यं वनस्पतीनां समूहः वानस्पत्यं कथं दैत्येयः दितिशब्दात्कु
दिकापादर्थे न इति ङीषं कृत्वा स्त्रीभ्यो ढक् क्रियते लिङ्गविशिष्टपरिभाषया वा नित्या उत्सादि
भ्योऽञ् दीव्यत इत्येव उत्सादिभ्यः प्राग्भ्यः प्राग्दीव्यतीयेष्वर्थेषु यञ् प्रत्ययो भवति अणस्त
रूपवादानां बाधकः औत्सः औदपानः औत्स उदपान विकर विनद महानद महानस म
हाप्राण तरुण तलुन वष्कयासे देवन पंक्तिः जगती त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर
ग्रीष्म पीलुकुण उदस्थान देशे पृषदंशे भल्लकीय रथन्तर मध्यन्दिन बृहत् महत् सत्वन्तु
मत्वर्थे महत् वहत् ग्रामात् न्यायात् समन्नात् इति कुरु पंचाल इन्द्रावसान उष्णिक् क
कुत् वासुदेव बलदेव ग्रीष्मात् छन्दसीति वक्तव्ये एतस्मात् त्रिष्टुप् ग्रैष्मी छन्दः एतन
स्मृत्यते नवेदः स्त्रीपुंसाभ्यां नस्नञौ भवनात् प्राग्भवन इति वत्पतित समासात्तिपेन
न संबन्धः आभवन संशब्दनाद्येर्थास्तेषु यथाक्रमं स्त्री शब्दात् पुंशब्दाच्च नास्नञौ प्रत्ययौ भव
तः स्त्रैणं पौंस्नं स्त्रियाः पुंवदिति ज्ञापकात् तद्धितार्थे न भवति यो गायेत्त्वज्ञापकमि
ति स्त्रीवदित्यपि सिद्धं द्विगोर्लुगनपत्ये प्राग्दीव्यत इति वर्तते तेन भवन्तादिति द्विगोरिति

षष्ठीद्विगोर्यः संवेधीतिनिमित्तेनतद्धितः प्राग्दीव्यतीयोपत्ययंवर्जयित्वातस्यलुग्भवतिपंच
सुकपालेषुसंस्कृतः पंचकपालः दशकपालः द्वौवेदावधीतेद्विवेदः त्रिवेदः पनपन्नइति
किं द्वैवेददत्तिः द्विगुरितिनिमित्तविज्ञानादिष्टंनभवति पंचकपालस्येदंपांचकपालंशाकले
गुष्यवाद्विगोरेतायलविधीयते द्विगोरितिस्यानषष्ठीनन्वचप्रत्ययादर्शनस्यैताः संज्ञाः
सत्यमेततत उपचारेणतुलक्षणायाद्विगुनिमित्तभूतः प्रत्ययएवद्विगुस्तस्यलुग्भवति द्वि
गुनिःमित्तकोपितद्धितोगणकल्पयाकस्मान्नद्विगुरुच्यते पंचकपालमितिनतस्यद्विगुरिति
मित्ते इतरस्तद्विगुनमित्तेवेतिनिमित्तमितपत्त्तिविशेषः यद्येवंकथमिदंपंचकपालांसंस्कृतः
पंचकपालइतिनैवात्रतद्धितउत्पन्नेवाक्यमेवभवतिशेषाद्विभाषेति पंचसुकपालेषुसं
स्कृतः पंचकपालइतितत्रद्वयोः शब्दयोः समानाधिकरणयोरेकेनविग्रहः अपरस्माद्
त्पत्तिर्भविष्यतिअथैतत्कस्मान्नभवति पंचभ्यः गर्गेभ्यः आगतं पंचगार्गरूप्यं पंचगार्गमय
मितिनन्वनुवर्ततेसाचव्यवस्थितविभाषाविज्ञायते गोत्रचरणाच्च प्राग्दीव्यतइत्येवतय
स्कादिभ्योगोत्रइतिगोत्रप्रकरणेयेषांगोत्रप्रत्ययान्तानांलुगुक्तस्तेषांमजादौप्राग्दीव्य

का॰
वृ॰ प्र॰
२२२

तीये प्रत्यये विषयभूते प्रतिषिध्यते गार्ग्याणां छात्राः गार्गीयाः वात्सीयाः आत्रेयीयाः खानपाते
यीयाः गोत्र इति किं कम्बलस्येदं कौम्बलं बादरं अत्रीति किं गार्गीभ्य आगतं गार्गरूप्यं गार्गमयं
प्राग्दीव्यत इत्येव गार्गीभ्यो हितं गार्गीयं गोत्रस्य बहुत्वे लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्वे
कयोरलुक् विदानामपत्यं युवा वैदः वैदौ वैदश्चात्रादत इञ् तस्य च एप त्वत्रियार्षञितर
तिल्लकि रूपं एकवचनद्विवचनान्तस्य च प्रवृत्तौ बहुषु लोपं प्राप्नुवन्ति वैदस्य वैदयोः वा अपत्यं
माणविका विदा नडादित्वाद्बहुष्वत्रः इति लुक् प्राग्दीव्यतीये जादौ प्रत्यये विवक्षिते वृद्धि
स्येत्यत्र एव युवप्रत्ययस्यालुग्भवति तस्मिंश्चिवृत्ते सति इञन्तं प्रकृतिरूपं योयतः प्राप्नो
ति यतः भवति पांडाहृतस्यापत्यं पांडाहृतिः तस्यापत्यं पांडाहृतस्मिं ताभ्यां ण फिञो
पांडाहृतस्य छात्रा इति विवक्षिते वृद्धिस्येयुवप्रत्ययस्यालुग्भवति तस्मिंश्चिवृत्ते सति इञ
न्ते प्रकृतिरूपे सेप ब्रस्मात् दिञ्श्च भवति यास्कहृताः भागवित्तस्यापत्यं भागवि
त्तिः तस्यापत्यं युवा वृद्धाट्ठक् सौवीरेषु बहुलमिति भागवित्तिकः तस्य छात्राः पूर्ववद्युवप्र
त्यये निवृत्ते भागवित्ताः इति कस्यापत्ययः तिकादिभ्यः फिञ् तैकायनिः तस्यापत्यं युवा।

ऊर्यादिभ्यो णः । कापिंजलाद्यः तस्यच्छात्रा इति णेपि नित्त्वेनेह स्त्रैणा । कापिंजलादाः सुप्रक
स्यापत्यं प्रावामवृद्धान्फिञ् । सौमकायनिः तस्यापत्यं युवा प्राग्दीव्यतो ण । सौमकायनः ता
स्य च्छात्रा इति युवप्रत्यये निवृत्ते सण्वाणो । सौमकायनाः अचीत्येव । पांचालस्तत्र पंचालस्त
मये प्राग्दीव्यत इत्येव भागवित्तिकायनि ते भागवित्तिकीयं फक्तिञोरन्यतरस्यां यूनीत्येव
पूर्वेणा नित्ये प्राप्ते विकल्प उच्यते फक्तिञोर्युवप्रत्यययोः प्राग्दीव्यतीये जादौ प्रत्यये विवक्षि
ते अन्यतरस्यां लुग्भवति गर्गादिभ्यो यञ् तस्मिन्कृते यञिञोश्चेति यूनि फक् । गार्ग्यायणः तस्यच्छा
त्रा गार्गीयाः गार्ग्यायणीया वात्सीयाः वात्स्यायनीयाः फिञः खल्वपि यस्कस्यापत्यं शिवा।
दिभ्यो ण । यास्कः तस्यापत्यं युवा अण्णो द्व्यचः इति फिञ् । यास्कायनिः तस्यच्छात्राः या।
स्कीयाः यास्कायनीयाः तस्यापत्यं अर्थनिर्देशोयं सर्वैरुत्तरैः प्रत्ययैरभिसंबध्यते तस्ये
ति षष्ठीसमर्थात् अपत्यमित्येतस्मिन्नर्थे यथाविहितप्रत्ययो भवति प्रकृत्यार्थविशिष्ट अथ
र्थः अपत्यमात्रे चेह गृह्यते लिंगवचनादिकमन्यत्सर्वमविवक्षितं उपगोरपत्यमौपगवः
आश्वपतः दैत्यः औत्सः स्त्रैणः पौंस्नः तस्येदमित्यपत्येपि दायनार्थं कृतं भवेत उत्सर्गः शेष

एवामीषां वृद्धान्यस्य प्रयोजनं भानोरपत्यं भाववतः प्रपामभावः एको गोत्रे अपत्यं पौत्रप्रभृति
गोत्रं तस्मिन्विवक्षिते भेदेन अपत्यप्रत्ययोत्पत्तिप्रसङ्गे नियमः क्रियते गोत्रे एक एव प्रत्ययो भ
वति सर्वे पत्येन युज्यते अपतनादत्वे यापि अव्यवहितेन जनितः सोपि प्रथमप्रकृतेरपत्यं भव
त्येव गर्गस्यापत्यं गार्ग्यः तत्पुत्रोपि गार्ग्यः सर्वस्मिन्व्यवहितजनितेपि गोत्रापत्ये गोत्रशब्दात्प
त्येव भवतीति प्रत्ययेति नियम्यते अथवा गोत्रापत्ये विवक्षिते एक एव शब्दः प्रथमा प्रकृतिः प्र
त्ययमुत्पादयतीति प्रकृतिर्नियम्यते गार्ग्यः नाडायनः गोत्राद्यून्यस्त्रियां अयमपि नियमः
यून्यपत्ये विवक्षिते गोत्रादेव प्रत्ययो भवति न परमप्रकृतेः तन्त्र युवत्वः गार्ग्यस्यापत्यं युवा गार्ग्या
यणः नाडायनिः वात्स्यायनः दाक्षायणः प्लाक्षायणः औपगवः अस्त्रियामिति किं दाक्षी प्ला
क्षी किं पुनरत्र प्रतिषिध्यते यदि नियमः स्त्रियामनियमः प्राप्नोति अथ युवप्रत्ययः स्त्रियां
गोत्रप्रत्ययेनाभिधाने प्राप्नोति गोत्रसंज्ञया युवसंज्ञया बाधितत्वात् तस्माद्योगविभागः कर्त्त
व्यः गोत्राद्यूनि प्रत्ययो भवति ततः अस्त्रियां यूनि यदुक्तं तन्स्त्रियां न भवति युवसंज्ञैव प्रतिषि।
ध्यते तेन स्त्री गोत्रप्रत्ययेनाभिधास्यते अत इञ् तस्यापत्यमित्येव अकारान्तात्प्रातिप।

दिकादिञ्प्रत्ययोभवति अणोपवादः दक्षस्यापत्यंदाक्षिः प्लाक्षिः तपरकरणंकिं शुभंयाकी
लालपादत्ततोमाभूत् कथंशुद्धोयनंतात्पारस्थायमैथिलीतिशेषविवक्षायांभविष्यति व
ह्वादिभ्यश्च बाह्वादिभ्य एवमादिभ्यः शब्देभ्यः इञ्प्रत्ययोभवति बाहविः औपबाकविः अनका
रान्तआरंभःक्वचिद्वापकवाधनार्थःबकुडउपवार्ग्यंतिवार्यचटार्थउपविंदुमूकलाकक
लाप्रकलाशूद्रावलाका मूषिकाभगलालगलक्षाश्च वकाबुधकाममिवाहइमित्रापुष्कर
सुत् अनरहत् अग्निशर्मिन् देवशर्मिन् कुनामन् पंचन् सप्तन् अष्टन् अमितौजसः
सलोपश्च सुधावन्त उदंकुशिरस् माषशराविन् क्षेमवृद्धिन् शृगालकोदिन् खरनादि
न् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजीगर्त्ता कृष्णयुधिष्ठिर अर्जुनसांब गद ।
प्रद्युम्न राम उदङ्कस्तेत्तायां संज्ञायोंभवतः सलोपश्चबाह्वादिप्रभृतिषुयेषांदर्शनंगो
त्रभावेलौकिकेततोन्यत्रतेषांप्रतिषेधः बाहुर्नामकश्चित्तस्यापत्यंबाहवः संवेधिषाह्वानो
वतस्माद्र्थानान्नप्रतिषेधः सत्तास्त्वभरस्यापत्यंपाथ्रिः वकारोऽत्र समस्वयार्थः आ
कृतिगणतासम्बोधयतिजांघिः पौद्धशार्मि आजयेनविः सुधातकोकद सुधाव

शब्दादपत्यर्थे इञ्प्रत्ययो भवति तत्संनियोगेन चाकङादेशो भवति सौधातकिः व्यासवरुड
निषादचण्डालबिम्बानामिति वक्तव्यं वैयासकिः वारुडकिः नैषादकिः चाण्डालकिः बैम्बकिः ।
गोत्रे कुञ्जादिभ्यः च्फञ् तस्यापत्यमित्येव गोत्रसंज्ञके प्रत्यये वाच्ये कुञ्जादिभ्यः प्रातिपदिकेभ्यः
च्फञ् प्रत्ययो भवति इञोऽपवादः चकारो व्यर्थः ञकारः स्वरार्थः कौञ्जायन्यः कौञ्जायन्यौ
कौञ्जायनाः ब्राध्नायन्यः ब्राध्नायन्यौ ब्राध्नायनाः गोत्र इति किं कुञ्जस्यापत्यमनन्तरः कौ
ञ्जिः एकवचनद्विवचनयोः सति शिष्टत्वात् ञ्यस्वरेणैव भवितव्यं बहुवचने तु कौञ्जायना इति
परमपि ञित्स्वरं च्फञा बाधित्वा यस्वरः प्रवर्तते गोत्राधिकारः लुक् शिवादिभ्योऽणिति यावत् कुञ्ज ब्रध्न
शंख भस्म गण लोम शठ शाक कुण्ड शुभ्र विपाश स्कन्द स्कम्भ ॥ नडादिभ्यः फक्
नडादिभ्यः प्रातिपदिकेभ्यः गोत्रे प्रत्यये फक् प्रत्ययो भवति नडस्यापत्यं नाडायनः चारायणः
गोत्र इत्येव नाडिः शलंकु शलंकं च तत्र पठ्यते शालंकायनः पैलादिषु शालंकि पाठस्तु शा
लंकिरिति अथवा पैलादिषु पाठ एवं ज्ञापनार्थः चारायणकं च इति क अग्निशर्मन्
वृषगण ब्राह्मण स्नातक दामित्र ह्वीप पिंगर पिंगल किंकर केतक कस्थल कश्यप तान्य श्र

त्यग्रमनुष्य कृष्णशारो ब्राह्मणवासिष्ठ ग्रमित्र लिगुविञ्च कुमार कोष्टलोहचमोह उराल्ल
भर्शिंशप ग्रग्रात्मण शाकट समत मित्रत कुकजन हद्द जगदेवर गुगन्धर हेमकदंडि
न् हस्तिन् पेचाल मसिन् रुकृत स्यिस्क ब्राह्मण चटक वदर ग्रश्वलपकामकब
लटञ्ज उदंबर शोणग्रलोच्छ टंडप हरितादिभ्योञः हरितादिर्विदायन्तर्गणः हरि
तादिभ्योञन्तेभ्यः ग्रपत्येफकप्रत्ययो भवति इञोपवादः हारितस्यापत्यं हारितायनः कैदा
सायनः तत्रचगोत्र इति वर्ततेनचगोत्रादपरो गोत्रप्रत्ययो भवति एको गोत्र इति वचनात।
सत्यमेत् इह तुयूनाधिकारेपि सामर्थ्याद्यूनि प्रत्ययो विज्ञायते गोत्राधिकारस्तु तदर्थः
यञिञोश्च यञन्तात् इञन्तात् इञन्ताच्चापत्ये फक्प्रत्ययो भवति गार्ग्यायणः वात्स्या
यनः इञन्तात् खल्वपि दाक्षायणः प्लाक्षायणः द्वीपादनुसमुद्रं यञ् सतेयमादित्यह
ञितितत्तोनभवति गोत्रग्रहणेन यञिञौ विशिष्येते तदन्तात् युवापत्ये प्रत्ययः गोत्राद्यूनी
तिवचनात् शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु गोत्र इत्येव शारद्वत शुनक दर्भ इत्ये
तेभ्यो गोत्रे पत्ये फक्प्रत्ययो भवति यथासंख्यं भृगुवत्साग्रायणेष्वपत्यविशेषेषु शारद्वताय

का·
वृ प्र·
२२५

नोभवतिभार्गवेन्यत्र शारद्वतोन्यः शौनकायनोभवतिवात्स्येन्यत्र शौनकोन्यः दार्भायणोभ
वतिआग्रायणेन्यत्र दार्भिरन्यः शरच्छुनकशब्दौविदादीताभ्यामयमपवादः फक द्रोणपर्वतजी
वन्तादन्यतरस्यां गोत्रइत्येवद्रोणादिभ्यःप्रातिपदिकेभ्यःगोत्रप्रत्ययेन्यतरस्यांफकप्रत्ययोभ
वतिइञोपवादःद्रोणस्यापत्यंद्रोणायनःद्रौणायनःद्रौणिःपार्वतायनःपार्वतिःजैवन्ताय
नःजैवन्तिःकथमनन्तरोत्पत्त्याश्वत्थामाद्रोणायनइत्युच्यतेनैवात्रमहाभारतद्रोणोगोत्रत्वेना
किन्त्वङ्गिरादिःतत्रतुद्रोणेगोत्रप्रत्ययविधानं इतरोगोत्रकृतिसामान्यादारोपेनतथाविधा
नंभवतिअनृष्यानन्तर्ये विदादिभ्योञ गोत्रइत्येवविदादिभ्योगोत्रापत्येञप्रत्ययोभवति
वैदःऔर्वःयेपुनरत्रानन्तर्याःपठ्यन्तेपुत्रादन्यस्मिंस्तेभ्योनन्तरापत्यएवभवति पौत्रःदौहित्रःअनृष्या
नन्तर्यइतस्मादयमर्थःअनृषिभ्योनन्तरेभवतियद्ययमर्थःअपत्येनन्तर्येप्रतिषेधोनकृतःस्यात
स्यात तत्रेदंसिध्यतिइंद्रडुःसम्ममःकाश्यपानामिति अनन्तराश्रूपेणौव ऋष्यणाभिधानं
भविष्यतिअनन्येवैतदेवविज्ञेयं ऋष्यपत्येनरन्तर्यविषयेहि प्रतिषेधेविज्ञायमानेकौशि
कोविश्वामित्रइतिनसिध्यति गोत्रएववैदिःतत्रचऋष्यणांभवितव्यं बाह्वादि

१८

गङ्गामिगाणाः तेनैवं भवतिविद उर्व कश्यप कौशिक भरद्वाज उपमन्यु किलात किनव
विश्वानर ऋष्टिषेण ऋतभार हर्यश्व प्रियक अपलंभ कुवादश शारद्वत शुनक धेन
गोवर्धन शिशिबिन्दु भाजय अश्वावताल श्यामाक श्यामश्री हवित किल्बास वास्य
क स्वक्कलमलव्यसो बृहस्वद प्रतिबोध रथन्तर निषाद मद्र मदाम्न पुनर्भूः पुत्र
दुहितृ ननान्दृ परस्त्री पारशव गार्गादिभ्यो यञ् गार्ग इत्येव गार्गादिभ्यो गोत्रे यञेयं
अत्ययो भवति गार्ग्यः वात्स्यः मनवाक्षोपपद्यते कथं मानवीः प्रजा इति गोत्र इत्युच्यते
अपत्यमात्रमन्येन भविष्यति कथमनन्तरोऽत्र जामदग्न्यः भार्गवः पराशर्य इति गोत्र इ
त्याद्यादेवने भविष्यति अनन्तरापत्यविवक्षायां तु अणेव भवितव्यं जामदग्न्यः पारा
शर इति गार्दबलिः संकृति अजबाहु पात विदभृत प्राचीनयोगः पुलस्ति अग्निवेश।
शोल खदभूम अवट मनस धनंजय वृक्ष विश्वावसु जरमाण लोहित शंसित ब
भ्रु वल्गु मंडु मंक्षु शंडु लिगु गुफल जिगीषु मन्तु मन्त्र मनायी सूत्र नक्र करूष
नलुद नखल नलक तेद वतेड कपि वत कुरु कत शाकल केडु अनड्वाह अन

का॰
वृप्र
२२९

गोकक्ष अगस्त्य कुंडिनी यज्ञवल्क पर्णवल्क अभयजात विरोहित वृषगण रहूगा
ण शंडिल मुद्गल मुसल पाराशर जतूकर्ण मंत्रि अश्मरथ शर्कराक्ष पूतिमाष
स्थूरा अररावाक्ष पिंगल कृष्ण गोलन्द उलूक तितिक्ष भिषज उष्णज भंडित उल्क वि
तिक देवहूः इंद्रहूः एकलू पिप्पिली वृहदग्निः जमदग्नि सुलाभिः उक्थ कुटारु मधुब
भ्रोर्ब्राह्मणकौशिकयोः मधुशब्दाद्बभ्रुशब्दाच्च गोत्रापत्ये यञ्प्रत्ययो भवति यथासंख्यं
ब्राह्मणकौशिकेवाच्ये माधव्यो भवति ब्राह्मणश्चेत् माधवोऽन्यः बाभ्रव्यो भवति कौशिक
श्चेत् बाभ्रवोऽन्यः बभ्रुशब्दो गर्गादिषु पठ्यते ततः सिद्धे कौशिके यञि नियमार्थं वचनं।
गर्गादिपाठो ऽनन्तरणकार्यार्थः सर्वत्र लोहितादिकतन्तेभ्यः इति बाभ्रव्यायणी कौशि
कपिबोधादांगिरसे कपिबोधयितेताभ्यां आंगिरसेऽपत्यविशेषे गोत्रे यञ्प्रत्ययो भवति
काप्यः बौध्यः आंगिरसः इति किं कापेयः बौधिः कपिशब्दो गर्गादिषु पठ्यते तस्य नियमार्थं
ग्रहणं आंगिरसेऽपि वयथास्यात् लोहितादिकार्यार्थश्च गणपाठः काप्यायनी वतंडाच्च
आंगिरसे ऽपत्यवटंडशब्दादांगिरसेऽपत्यविशेषे गोत्रे यञ्प्रत्ययो भवति वातंड्यः अंकमर्यमि

देयाववना गर्गादिभ्यो यञ् यद्यप्येवस्मिवादिषु पठ्यते तत्रांगिरसे शिवायणो बाधनात् पुनर्वचन
मांगिरसे तत् भयत्र पाठसामर्थ्यान्नत्प्रत्ययद्वयमपि भवति वातंड्यः वातंडः लक्षणयो आंगिर
सइत्येव वतंडशब्दादांगिरसस्त्रियां यक्प्रत्ययो भवति तस्य लुग्भवति गार्ग्यादिपाठ्रो
प वतंडी आंगिरसइत्येव वातंड्यायनी शिवाद्यण्वितवातंडी अश्वादिभ्यः फञ् आंगिरसइ
ति निवृत्तं अश्वादिभ्यो गोत्रेपत्ये फञ् प्रत्ययो भवति आश्वायनः आश्मायनः येत्र गोत्र
प्रत्ययान्ताः पठ्यन्ते तेभ्यः सामर्थ्यादनन्तरापत्ये प्रत्ययो विज्ञायते अश्व अश्मन् शंख विद पु
ट रोहिण खर्जूल भरिल भडिल पंडित प्रकृत रामोद क्षान्ति ग्रीवा काश काण।
गोलांक अर्क स्वन वन पद चक्र भल श्रविष्ठा पविन्द पवित्र श्यामधूम्र वाग्मि
नौ विश्वानर कुट शापात्रेये जन वन ग्रीष्म अर्ह बीजविषम विशाल गिरिचपल चु
प दासक वैल्य धर्म्य आनडुह्य पुंसिजात अर्जुन शूद्रसुमनस् प्राच्येय भारद्वाज भर
द्वाजात्रेय उत्स आपद शिव किव खदिर भर्गात्त्रैगर्ते भर्गशब्दादपत्ये गोत्रे त्रैगर्ते फ
ञ्प्रत्ययो भवति भार्गायणो भवति त्रैगर्तश्चेत् भार्गिरन्यः शिवादिभ्योऽण् गोत्र

तिनिठनौ अतःप्रभृतिसामान्येनापन्नमात्रेप्रत्ययाविधीयन्तेशिखादिभ्योपत्ययाः
त्ययोभवतियथायथंसिध्मादीनामपवादः शैवलः श्रीलः तत्वशाह्वेप्रपद्यतेवादिल्व
णामृद्वीवामिनेवाधितेएषप्रत्ययस्तत्वापानमाते तादार्थ्यपः संसारशङ्कः पद्युते
निकादिकाशिपिजाअश्व्यादिपक्ष्कामत्वर्थसमावेशार्थं तेनैवैरूपंभवति गंभाः यो
गायतिः गायेयः विपाटकशोत्रपद्यतेकौंजादिलत्नोणनवकआससमावेशार्थं वै
पाशः वैणपायिनः शिवप्राप्यैषिक संड जेभ ऊठर प्रतिमिलान सन्धि शुचिक
ऊरस्य कोहल कटुयरोयपिल वनाणी तृणकर्ण दीरघट जलहृद परिषिक ।
गोह्रिलिक जटिलकविपिरक मंजरीकवृषिक वर्जल खंजल रेफ आलेख
न विस्त्रवणनवण वर्तनाक्ष पिटक पिटाक तृक्षाक नभाकजलनाप् जनक
न उकेया मराह्निताका प्रातक्षेत्रमपिछ पिह मसूरकर्णउत्थं श्रीष्ठेणा वि
पाणा यक्ष लह प्राप्त ब्रह्मस्थूल वल्लदर विरूपाक्ष भूमितलासपत्नी ग्रवो
नयाः ङिवेणीङिवाञ्च प्रब्रह्मभोनदीमानवीमसत्रामिकाशः हृदिर्यस्या

वामादिस्तत्हृदं ञ्यङ्गञ्याभ्य इति शार्ङ्गरवमनदीमानुषीभ्यः इत्यर्थः तेनाभेदान्वकृतयो
निर्दिष्टपत्ने भद्राभिकाभ्य इति सर्वनाम्नां प्रत्ययप्रकृते प्रकृत्यवमर्थः ञ्यङ्गञ्यानियन्नियानि
नदीनां मानुषीणां च नामधेयानि तेभ्योपत्ये प्रत्ययो भवति ढकोपवादः यमुनाया अप
त्यं यामुनः इरावत्या अपत्यं ऐरावतः वैतस्यः नार्मदः मानुषीभ्यः शिक्षिताया अपत्यं शैक्षि
तः चैन्तितः ञ्यङ्गञ्याभ्य इति किं वोढ्भागाया अपत्यं वाढ्भागेयः वासवदत्तेयः नदीमानु
षीभ्य इति किं सौपर्णेयः वैनतेयः तद्भामिकाभ्य इति किं शोभनाया अपत्यं शौभनेयः
ऋष्यन्धकवृष्णिकुरुभ्यश्च ऋषयः प्रसिद्धा वसिष्ठादयः अन्धकावृष्णयः कुरव इति वंशाख्याः
ऋष्यादिवचनेभ्यः प्रातिपदिकेभ्यः अपत्येः प्रत्ययो भवति इञोपवादः अत्रादिभ्यः त
पुत्रान्त फकादिभिरेव भवति तद्यं ऋषिभ्यस्तावत् वासिष्ठः वैश्वामित्रः अन्धकेभ्यः
श्वाफल्कः रान्धसः वृष्णिभ्यः वासुदेवः आनिरुद्धः नाकुलः साहदेवः कथं पुनर्विमानां
प्राद्यानां अन्धकादिवंशसमाश्रयणेनान्वाख्यानयुज्यते केचिदाहुः कथमपिकाक
तालीयन्यायेन ऊर्वादिवंशोषसंकरेण नकुलसहदेवादयः शाद्धाः सरूपवसंकलिता

का· वृ·
१२८

त्वात्पादाययणीति नास्मृतिरूपनिबद्धेति अथवा अन्यकर्तृभिः कृतं शाखान्तराय
कृतेषु ये शाखाः प्रयुज्यन्ते न जलसहूदेवादयस्तत इदं प्रत्ययविधानमिति न दोषः मातु
रुत्संख्यासंभद्रपूर्वायाः मातृशब्दात्संख्यासंभद्रपूर्वादुत्पूर्वाद्यपत्ये णप्रत्ययो भवा
ति उकारश्चान्तादेशो भवति द्वयोर्मात्रोरपत्यं द्वैमातुरः षाण्मातुरः साम्मातुरः भाद्रमातुरः
मात्रेशार्थे वचने प्रत्ययः पुनरुक्तः गौणो विमध्यः स्त्रीलिङ्गनिर्देशार्थः पितृः तेन धान्यमातु
तेर्न भवति संख्यासंभद्रपूर्वादिति किं सौमात्रः शुभ्रादिपाठाद्वैमात्रेयः कन्यायाः का
नीन च कन्याशब्दादपत्ये णप्रत्ययो भवति तत्संनियोगेन च कनीनादेशः फकोपवा
दः अनूढाया अपत्यं कानीनः कर्णः कानीनो व्यासः विकर्णशुङ्गच्छगलाद्वत्सभर
द्वाजात्रिषु विकर्णशुङ्गच्छगलशब्देभ्यो यथासंख्यं वत्सभरद्वाजात्रिष्वपत्यविशेषे
णप्रत्ययो भवति वैकर्णो भवति वात्स्यश्चेत् वैकर्णिरन्यः शौङ्गो भवति भारद्वाजश्चेत्
शौङ्गिरन्यः छागलो भवति आत्रेयश्चेत् छागलिरन्यः शुङ्गाशब्दं स्त्रीलिङ्गमपि पठन्ति
तेषां फकं प्रत्ययमाहरन्ति इयमपि च प्रमाणमुभयथा सूत्रप्रणयनात् पीलाया वा

त्रामिकाणोवाधकोह्यवइतिढकिप्राप्तेपैलादेरण्यो विधीयतेपीलायाअपत्येवाण्यन्या
योभवति पैलःपैलेयः ढकिसमर्थात् मंडूकशब्दादपत्येढक्वायोभवति चकारा
दण्चवातत्रपक्षेऽण्भवतिमांडूकेयःमांडूकःमांडूकिः स्त्रीभ्योढक् स्त्रीग्रहणेन टावा
दिस्त्रीप्रत्ययान्ताःशब्दागृह्यन्तेतेभ्योऽपत्येढक्प्रत्ययोभवतिसौपलेयःवैनतेयःस्त्रीप्रत्य
यविरहितानादन्तात्समर्थग्रहणेग्रहणंभवति पेडुविडुःदासदद्रुतिवडवायाःवृषेवावृषेवाडव
यावृषःअपत्येप्राप्तेतत्रापवृषेषविधीयतेतेनापत्येवाडवइतिभवति अक्रौञ्चकोकिला
भ्यस्तः क्रौञ्चःकौकिलः ध्यवः स्त्रीसेवध्यवःस्त्रीप्रत्ययान्तादपत्येढक्प्रत्ययोभवति।
तत्रामिकाणापवादःदाक्षायाअपत्यंदाक्षेयःगौलेयः इतश्चानिञः स्त्रीग्रहणेनिवृत्ते
चकारोऽयचोऽनकर्षणार्थःइकारान्तात्अनिञन्तादपत्यविषयोभवति आत्रेयःनाभेयः
इनइतिकिंदाक्षिःसात्यकिःअनिञइतिकिंदाक्षायणःप्लाक्षायणःद्व्यचइतिकिंमरी
चेरपत्यंमारीचः शुभ्रादिभ्यश्च शुभ्रइत्येवमादिभ्यःशब्देभ्यःअपत्यार्थेढक्प्रत्ययोभव
ति यथायोगमिञाद्येनामपवादःशौभ्रेयःवैष्टपुरेयःचकारेणअसमर्थार्थःअकृति

का॰
वृ॰ प्र
२२५

गाङ्गानाम्नःस्त्रीवाऽयति गाङ्गेयः पाण्डवेयः इत्यादि सिद्धं भवति शुभ्रविष्टपुरब्रह्मकृतशतद्वा।
द्वारशालास्थशलाकाभ्रलेखाभ्रविधवविकंसा रोहिणी रुक्मिणी दिवसवाल्कभ्र
जबस्तिशकन्धिलक्ष्मणश्यामयोर्वाशिष्ठे गोधाकृकलासा अणीवि प्रवाहण भरत
भरम कमष्ठ ममष्ठ सकेंडु सकेंडु पाकेंडु कर्पूर इतर अन्यतर आलीढ सुदत्त सु
दत्त सुदामन कद्रु तक्षक वाम कुमारिका किशोरिका कुवेरिका जिह्माशिन प
रिधि वायुदत्त शकल शावल खड्डूल अम्बिका अशोका गन्धपिङ्गला खडोन्मत्ता अनु
दृष्टिन जरतिन बलीवर्द विग्रह बीज श्वन अश्व अजिर विकल कुकीनकाकशपे
विकर्णशाखाकुषीतकशाखास्वापत्यविशेषे काश्यपत्ये ढण्प्रत्ययो भवति वैकर्णेयः
कौषीतकेयः काश्यप इति किं वैकर्णिः कौषीतकिः भ्रुवो वुक् भ्रूशब्दादपत्ये ढण्प्रत्
ययो भवति तत्सन्नियोगेन च वुगागमः भ्रौवेयः कल्याण्यादीनामिनङ् कल्या।
णीत्येवमादीनां शब्दानामपत्ये ढण्प्रत्ययो भवति तत्सन्नियोगेन चेनजादेशः सौभ
स्यानामादेशार्थं वचनं अनयस्मिन्नित्यात अन्येषामभयार्थं ग्रहणं कल्याणिनेयः

सौभाग्यनेयः हृद्भगसिन्ध्वन्त इत्युभयपदवृद्धिः कल्याणीसुभगादुर्भगाबन्धकी अनुदृष्टिः अनु
सृष्टिः जरतीबलीवर्दीज्येष्ठाकनिष्ठामध्यमापरस्त्री कुलटाया वा कुलान्यटतीति कु
लटा पररूपं निपातनात् कुलटाया अपत्ये ढक्प्रत्ययो भवति तत्सन्नियोगेन वाइ
नङादेशो भवति आदेशार्थं वचनं प्रत्ययः पूर्वेणैव सिद्धः कौलटेयः कौलटिनेयः
या कुलान्यटतीति भिक्षुकी भवति ततः क्षुद्राभ्य इति परत्वाड्ढ्रका भवति तत्र कौलटेरः
चटकाया ऐरक् चटकाया अपत्ये ऐरक्प्रत्ययो भवति चाटकैरः चटकाश्चेति वक्तव्यं चटक
स्यापत्यं चाटकैरः स्त्रियामपत्ये लुग्वक्तव्यः चटकाया अपत्यं स्त्री चटका गोधाया
ढ्रक् गोधाया अपत्ये ढ्रक्प्रत्ययो भवति गौधेरः शुभ्रादिषु पाठात् तेन गौधेयः इत्या
पि भवति आरगुदीचां गोधाया अपत्ये आरक्प्रत्ययो भवति उदीचामाचार्याणां मते
न गौधारः आचार्यग्रहणं पूजार्थं वचनसामर्थ्यात्तु ढैणसमावेशो भविष्यति आर
ग्वचनमनर्थकं ढ्रकापि सिद्धत्वात् ज्ञापनार्थं तु अन्येभ्योऽपि भवति जाटारः पाण्टारः क्षु
द्राभ्यो वा ढ्रगनुवर्त्तते नारक् अस्वरितत्वात् क्षुद्रा अङ्गहीनाः शीलहीनाश्च अर्थ

पमेण नदभिधायिन्यः स्त्रीलिङ्गाः प्रकृतयो निर्दिश्यन्ते तदपत्ये वा ढक्प्रत्ययो भवति ढको
पवादः काणेयः काणेरः दासेयः दासेरः पितृष्वसुश्छण् पितृष्वसृशब्दादपत्ये छण्प्र
त्ययो भवति पैतृष्वस्रीयः ढकि लोपः पितृष्वसुरपत्यमर्थे ढकि परतो भवति पैतृष्व
सेयः कथं पुनरिह ढकि प्रत्ययः एतदेव ज्ञापकं ढको भावस्य मातृष्वसुश्च पितृष्वसु
रित्येतस्मिन्नेव पितृष्वसुरर्थे यद्वर्तते तस्मान्मातृष्वसुरपि भवति छण्प्रत्ययः ढकि च लोपः मातृष्व
सेयः मातृष्वस्रीयः चतुष्पाद्भ्यो ढञ् चतुष्पदभिधायिनीभ्यः प्रकृतिभ्योऽपत्ये ढञ्प्र
त्ययो भवति अणादीनामपवादः कामण्डलेयः शैतिबाहेयः जाम्बेयः गृष्ट्यादिभ्यश्च ग
ष्ट्यादिभ्योऽपत्ये ढञ्प्रत्ययो भवति अणादीनामपवादः गार्ष्टेयः वार्ष्टेयः गृष्टिहृष्टिब्राय
सृत्वा व्याख्यानचन्द्रमसा पूर्वेण विहितवचनश्चवनप्यादर्थं गृष्टिहृष्टिहलिबलिविश्रि
कुद्रि अजबस्ति मित्रयु राजश्वशुराद्यत् राजशब्दात् श्वशुरशब्दाच्चापत्ये यत्प्रत्ययो भव
ति अणादीनामपवादः यथाक्रमं राजन्यः श्वशुर्यः राज्ञोऽपत्ये जातिग्रहणं राजन्यो भव।
ति क्षत्रियश्चेत् राजनोऽन्यः क्षत्राद्घः क्षत्रशब्दादपत्ये घप्रत्ययो भवति क्षत्रियः क्षत्र्य।

जरा मुजमारक रथकार वाहुष्क संग्राजः दत्तियेकवि मणिवाव पित्रमत इंद्रजालि
वेजि दामोसीधि गाणवाति कैशोरिकापिंजलादि कुटशलाका भूक पक्ष मुश्रदर्भके
शिनी वेनावंकं दासि मूर्पनाय श्यापावनाय शयावपुत्र संपंकार वडभिकार पथिकारिन म
हाकंभ हरशालीन इन दूधीपिडीवामय शसाशूस्माकं डादि विल्वरवजें सेनान्तल
क्षणकारिभ्यश्च सेनान्तात्पत्यादिकाश्चलक्षणशब्दात् कारिवचनेभ्यश्चापत्य प्रत्यये
ण्य प्रत्ययो भवति कारिशब्दः कारुपर्यायः तेनवाच्यते वाचकः हारिषेण्यः वारिषेण्यः ला
क्षण्यः ताल्लवाय्यः कौम्भकार्यः नापित्यः उदीचामिञ् एषः प्राग्भिरिञ्प्रत्ययो विधीयते सेना
न्तलक्षणकारिभ्योपत्ये इञ् प्रत्ययो भवति उदीचां मतेन हारिषेणिः लाक्षणिः ताल्लवा
यिः नापितिः वचनसामर्थ्यादेव प्रत्ययसमावेशो लब्धः आचार्यग्रहणं वैचित्र्यार्थं नद
शब्दः शिवादिष्वेव नामग्रनिष्ठ्यत्वा तेन नव्यपः नदव्योपत्यं ताल्लव्यपः ताल्लयः तिका
दिभ्यः फिञ् तिकादिभ्यो गोत्रादिभ्यः अपत्ये फिञ् प्रत्ययो भवति तैकायनिः कैतवाय
निः ... प्रत्ययमन्त्रियोगेन यकारान्तनामिष्यते वार्ष्यायणिः कौर

भ्यश्चः पठ्यते स च तद्विषयवचनः औरसशब्देन तत्र प्रत्ययान्तेन साहचर्यात् यस्तु कुर्वादिभ्यो ण्यः
ततस्त्वाभिधेतव्यं तथा च ण्यप्रत्ययार्थनिर्देशस्योदाहृतं कौरव्यः पिता कौरव्यः पुत्र इति ति
ककितवसंज्ञा वालशिखाउरसशाद्य सैन्धवयामुन्द रूप्य ग्राम्यवृषनील अमित्र कुरुदेव
रथ तैतिल औरस शौंकट गौकक्ष्य कौरव्य भौरिकि भौलिकि चैपयत चैटयत शैलयत
क्षैजयत ध्वाजयत चन्द्रमस् शुभ गंगा वरेण्य वस्त खारंकवाह्यक लोमका सुयामन् उा
दन्य यज्ञ कौत्सल्यकार्माय्याभ्यां च॥ कौत्सल्यकार्मार्यशब्दाभ्यामपत्ये फिञ्प्रत्ययो भ
वति कौत्सल्यायनिः कार्मार्यायणिः परमप्रकृतेरेवायमिष्यते कौत्सलस्यापत्यं कर्मारस्या
पत्यमिति प्रत्ययसन्नियोगेन तु प्रकृतिरूपं निपात्यते तथा च सूत्रान्तरं ऋष्ट्यकोमलकर्मा
रच्छागवृषाणां युञ् वादिभ्यश्चेति आर्ष्यायणिः कौत्सल्यायनिः कार्मार्यायणिः छागायनिः
वार्षायणिः अणो द्व्यचः॥ अण्प्रत्ययान्तात् द्व्यचः प्रातिपदिकादपत्ये फिञ्प्रत्ययो भवति का।
त्रायनिः हात्रायणिः अण इति किं दाक्षायणः प्लाक्षायणः द्व्यच इति किं औपगवि उदीचां
वृद्धादगोत्रात्॥ वृद्धं यत्प्रकृतिरूपमगोत्रं तस्मादपत्ये फिञ्प्रत्ययो भवति उदीचामाचार्याणां

मपि जातिशब्दपर्व्वविरमः कुलात्खः उत्तरसूत्रे पूर्व्वप्रतिषेधादिह तदन्तः केवलश्च
गृह्यते कुलशब्दान्तात्प्रातिपदिकात्केवलाच्चापत्ये खप्रत्ययो भवति आढ्यकुलीनः राजकु
लीनः महाकुलीनः कुलीनः अपूर्व्वपदादन्यतरस्यां यड्ढकञौ अविद्यमानं पूर्व्वपदं
यस्मात्तदपूर्व्वपदं समाससंबन्धिनः पूर्व्वपदस्याभावेन कुलशब्दो विशेष्यते अपूर्व्वपदा
त्कुलशब्दादन्यतरस्यां यड्ढकञौ प्रत्ययौ भवतः अन्यतरस्यां ताभ्यां मुक्ते खो भवति कु
ल्यः कौलेयकः कुलीनः पदग्रहणं किं बहुकुलपूर्व्वपदादपि यथा स्यात् बहुकुल्यः ब
हुकौलेयकः बहुकुलीनः महाकुलादञ्खञौ महाकुलशब्दादपत्येऽञ् खञ् प्रत्य
यौ भवतः अन्यतरस्यां ग्रहणात् खश्च माहाकुलीनः माहाकुलः महाकुलीनः दुष्कु
लाड्ढक् दुष्कुलशब्दाड्ढक्प्रत्ययो भवति दौष्कुलेयः अन्यतरस्यां ग्रहणानुवृत्तेः ख
श्च दुष्कुलीनः स्वसुश्छः स्वसृशब्दादपत्ये छप्रत्ययो भवति अणोपवादः स्वस्रप
त्यं स्वस्रीयः भ्रातुर्व्यच्च भ्रातृशब्दादपत्ये व्यत्प्रत्ययो भवति चकाराच्छश्च अणोपवादः
भ्रातृव्यः भ्रात्रीयः तकारः स्वरार्थः व्यन्सपत्ने सपत्नशब्दः शत्रुपर्यायः शब्दान्तरमव्यु

त्वमेव सपत्नशब्दादपरे कारमिवार्थे निपातयन्ति । सपत्नीव सपत्नः । अन्तशब्दाद्यप्रत्ययो
भवति समुदायेन चेदमित्रः सपत्न इत्युच्यते अन्त्यार्थोऽनास्त्येव पाश्चनाग्रान्त्येणाग्रान्त्यः
केवकः । रेवत्यादिभ्यष्ठक् । रेवतीत्येवमादिभ्यः शब्देभ्यः ठक्प्रत्ययो भवति यथायथं ढ
कारादीनामपवादः । रैवतिकः । अश्वपालिकः । रेवती अश्वपाली मणिपाली द्वारपाली वृ
कवञ्चिन् वृकग्राह कर्णग्राह दण्डग्राह कुक्कुटाक्ष । गोत्रस्त्रियाः कुत्सने णश्च । पौत्रप्रभृ
ति गोत्रं तत्र वर्त्तते गोत्रं या स्त्री तदभिधायिनः शब्दादपत्ये णप्रत्ययो भवति चकाराट्ठक् कुत्
सने गम्यमाने पितरसंविज्ञाने मातृव्यपदेशोऽपत्यस्य कुत्सा गार्ग्या अपत्यं गार्गो जाल्मः
गार्गिकः । ग्लौचुकायनः । ग्लौचुकायनिकः । गोत्रादूनीति प्रत्ययो भवतः । गोत्र इति किं । का
रिकेयो जाल्मः । स्त्रिया इति किं । औपगविः जाल्मः । कुत्सन इति किं । गार्गेयो माणवकः ।
वृद्धाट्ठक्सौवीरेषु बहुलं । कुत्सन इत्येव सौवीरेष्विति प्रकृतिविशेषणं वृद्धात्सौवीरगो
त्रादपत्ये बहुलं ठक्प्रत्ययो भवति कुत्सने गम्यमाने भागवित्तेः भागवित्तिकः पक्षे यथा
प्राप्तं फक् भागवित्तायनः । तार्णविन्दवः तार्णविन्दविकः पक्षे तालविन्दविः । आकशापः

ण्यश्वादिः आकशापेयः तस्यापत्यं आकशापेयिकः पक्षे आकशापेयिः भागह्वैदेविन्तिः

द्वितीयस्ताणिबिन्दवः तृतीयः आकशापयोगो नाट्टक्को बहुलन्ततः वृद्धग्रहणं स्त्री।

निवृत्त्यर्थं सौवीरेष्विति किं औपगविः जाल्मः ऊत्सनट् इत्येव भागवित्तायनो माणव

कः बहुलग्रहणमप्यपायिवैविद्यार्थं गोत्रस्त्रियाइत्यारभ चत्वारो योगास्तेषु प्रथमः।

ऊत्सनएव अत्यत् सौवीरगोत्रएव मध्यमोद्वयोरपि तदेतद्बहुलग्रहणाल्लभ्यते।

फेश्च ऊत्सनट् इत्येव सौवीरेष्विति च फेरिति फिञो ग्रहणं न फिनः वृद्धापिकारात्

पिञन्तात् सौवीरगोत्राद् अपत्ये छ प्रत्ययो भवति चकाराट्ठक्क ऊत्सनेन समाने यमुन्दस्या

पत्यं तिकादिभ्यः फिञ् यामुन्दायनिः तस्यापत्यं यामुन्दायनीयः यामुन्दायनिकः ऊत्स

नट् इत्येव यामुन्दायनिः फिञन्तात् सौवीरगोत्राद् औत्सर्गिकस्याण आगतस्य एव इत्त्रिया

र्थमित्त इति लक सौवीरेष्वित्येव यामुन्दायनिः यामुन्दाश्वस्य यामाचवार्षायणि फिञः

स्तृतः सौवीरेषु च ऊत्सनायां द्वयोयोगोयोर्द्वाविकल्पयेत **फांटाहृतिमिमताभ्यां णफिञौ**

प्रत्ययौ भवतः फकोपवादः अल्पाच्तरस्य परनिपातो लक्षणव्यभिचारचिह्नमपत्ये

का॰
वृ॰प्र
२२२

यथासंख्यं न भवतीति पौण्डाहृत्तः पौण्डाहृत्तायनिः मैमतः मैमतायनिः सौवीरेष्वित्येव पौण्डा
हृत्तायनः मैमतायनः पौण्डाहृत्ते यन्मिञ इति फक् मिमताशब्दोपि बिदादिषु पठ्यते ऊर्वी
दिभ्योण्यः सौवीरेष्विति वकुलग्रहणमिति च निवृत्तं कुरु इत्येवमादिभ्यः शब्देभ्यः अपत्ये
ण्यप्रत्ययो भवति कौरव्यः गार्ग्यः कुर्वादिभ्यो ण्य इति कुरुशब्दात् परो विण्यप्रत्ययो भ
वति अपि समत्ताण्यः क्षत्रियात् ज्ञाजसे तः तस्य वकु पुलका भवति तत्र यन्त्रश्च यतण
व कौरव्याः निकादिषु पाठात् फिञपि भवति कौरव्यायनिः रथशब्दोत्र पठ्यते तस्य जातिवव
ताद्वैवर्गिकेभ्यः किं विहतारथ काम जातिः कारिणस्त्ररथकामड न सहद्वैणाव ण्यः सिद्धः
केशिनीशब्दः पठ्यते तस्य केशिन्ये पुंवद्भावो भवति स्त्रीलिंगनिर्देशसामर्थ्यात् वेनाच्छे
दसीति पठ्यते कथं भाषायां नैणपराजा कांदमण्डपवायं प्रमादात्कविभिः प्रयुक्तः वामरथ
शब्दः पठ्यते तस्य कण्वादिवत्कार्यमिष्यतः स्वरवर्ज्जं यिनाल्लगादिकमस्यातिदिश्यते वकुः।
युवा वामरथ्याः स्त्री वामरथी वामरथ्यायनी युवा वामरथ्यायनः वामरथ्याः छात्राः वामरथ्या
नि संघांकलक्षणानि स्वरस्तु प्रत्ययस्यैव भवति नातिदिश्यते कण्वादुदात्तत्वं कुरु गर्गर

मतेनाम्रगुप्तायनिराम्रगुप्तायनिः ग्रामरक्षायणिः कारषाक्षीवगोत्रात्परत्वादनेनैव भवि
तव्ये नापितायनिः उदीचामिति किं आम्रगुप्तिः वृद्धादिति किं याज्ञदत्तिः अगोत्रादिति किं
औपगविः वाकिनादीनां कुक् च वाकिनइत्येवमादिभ्यः यौद्धेभ्यः अपत्ये फिञ् प्रत्ययो भव
ति तत्सन्नियोगेन चैषां कुगागमः यदि ते वृद्धमगोत्रं वा तद्रूपं तस्यागमार्थमेव ग्रहणं प्र
त्येषामभयार्थं वाकिनायनिः गारेढकायनिः इत्याद्यपवादो योगः उदीचामित्यपि कारा
त्यहेतेपि भवन्ति वाकिनि गारेढि कार्कियकाकायलङ्काचर्मिवर्मिणोर्नलोपश्च पुत्रा
न्तादन्यतरस्याम् उदीचां वृद्धादित्यनुवर्तते पुत्रान्तवृद्धमगोत्रमिति पूर्वेणैव सिद्धः त
स्मिन्ननेन कुगागमोऽन्यतरस्यां विधीयते पुत्रान्तात्प्रातिपदिकाद्यः फिञ्प्रत्ययस्तस्मि
न्परभूते कुगागमोऽन्यतरस्यां भवति पुत्रान्तस्यैतत्त्रैरूप्यं सम्पद्यते गार्गीपुत्रीवत्सीपुत्रा
यणिः वात्सीपुत्रकायणिः वात्सीपुत्रिः प्राचामवृद्धात्फिन् बहुलं अवृद्धाच्छब्दरूपाद
पत्ये फिन् प्रत्ययो भवति प्राचामाचार्याणां मतेन बहुलं ग्लुचुकस्यापत्यं ग्लुचुकायनिः म्र
हिडेवकायनिः प्राचामिति किं म्लौडकिः म्लौचुकिः अवृद्धादिति किं राजदन्तिः उदीचां

का॰
वृ॰
२३५

प्रावांबहुलमन्यतरस्यामितिसर्वएतेविकल्पार्थाः तेषामेकेनैवसिध्यतितत्राचार्यग्रहणं
पूर्वार्थंबहुलग्रहणंवैचित्र्यार्थंमक्किंचिन्नभवत्येवदाक्षिःप्रादिः मनोर्जातावञ्यतौषुक्
मनुष्मशब्दात्जाताविधेयेतौभवतः सुगमदायेनचेत्जातिग्रामपतेमानुषः मानुष्यः जातिशब्दा
वेतौअपत्यार्थोत्रनास्त्येवतथाचमानुषाइतिबहुषुलुक्भवतिअपत्यविवक्षायांतुयथा
वमौवितव्यं मानवीःप्रजापति अपत्येर्थेत्रिमितेमनुष्यमनोरौत्सर्गिकःस्मृतःनकारस्यच
मूर्धन्यस्तेनसिध्यतिमानवः अपत्यंपौत्रप्रभृतिगोत्रं पौत्रप्रभृतियदपत्यंतद्गोत्रसंज्ञंभव
तिसंबंधिवचनादपत्यशब्दस्ययस्यतदपत्यं तदपेक्षयापौत्रप्रभृतेर्गोत्रसंज्ञाविज्ञायते गा
र्ग्यस्यपौत्रात्प्रभृतिगार्ग्यःवात्स्यःवात्स्यःअपत्यंव्यपदेशायसंज्ञिनाः उत्तरत्रपौत्रप्रभृती
तिकिं अनन्तरस्यमाभूत कौंजिःगार्गिःगोत्रप्रदेशाःएकोगोत्रइत्येवमादयः जीव
तितुवंश्येयुवा अभिजनप्रबंधावंशाःतत्रभवोवंश्यःपित्रादिःतस्मिंजीवतिसतिपौत्रप्र
भृतिअपत्यंयुवसंज्ञंभवतिपौत्रप्रभृतिइतिवचनसमानाधिकरणेपनापत्यंविशेष्यतेतिकि
न्तर्हिषष्ठीविपरिणाम्यतेपौत्रप्रभृतेर्यदपत्यमितितेनचतुर्थादारभ्ययुवसंज्ञाविज्ञायते

गार्ग्यायणः वात्स्यायनः तशब्दोवधारणार्थः युवैव न गोत्रमिति भ्रातरि ज्यायसि भ्रातरि
ज्यायसि जीवति कनीयान्भ्राता युवसंज्ञो भवति पौत्रप्रभृतेरपत्यं गार्ग्यस्य द्वौ पुत्रौ तयोः
कनीयान् तस्य पित्रादौ वंश्ये जीवति भ्रातरि युवसंज्ञो भवति अवंश्यार्थोयमारम्भः पू
र्वजाः पित्रादयो वंश्याः न तु भ्राता तेन वंश्याः प्रकरणाबात गार्ग्ये जीवति गार्ग्यायण
णोस्य कनीयान्भ्राता वात्स्यायनः दाक्षायणः वान्यस्मिन्सपिंडे स्थविरतरे जीवति स
मपुरुषावयवस्सपिंडाः स्मर्यन्ते येषामुभयत्र दशाहानि कुलस्यान्नं न भुंजते दानप्रति
ग्रहो होमः स्वाध्यायश्च निवर्तते इत्येवमादिकायां क्रियायामधिकारः भ्रातुरन्यस्मिन्सपि
ण्डे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा भवति प्रकृते जीवति ग्रहणं
सपिंडस्य विशेषणमिदं तत्संज्ञितं न इत्यनिर्देशः उभयोः कर्षणार्थः स्थानेन वयसा स्थान
वयोविशेषः चेत्कृष्टे सपिंडे यस्मात् पितृव्ये पितामहभ्रातरि वा वयसाधिके जीवति गार्ग्यस्या
पत्यं गार्ग्यायणः गार्ग्यो वा वात्स्यायनो वात्स्यो वा दाक्षायणो दाक्षिर्वा स्थविरतरे इति किं
स्थानवयोन्यूने गार्ग्य एव भवति जीवतीति किं मृते मृतो वा गार्ग्य एव भवति वृद्धस्य च

पूजायां अपत्यमन्तरितं वृद्धमिति शास्त्रान्तरे परिभाषा तादृशं वृद्धमित्युच्यते वृद्धस्य युव
संज्ञा भवति पूजायां गम्यमानायां संज्ञासामर्थ्यात्तादृशं युवप्रत्ययेन पुनरुच्यते वृद्धस्येति षष्ठी
निर्देशः विचित्रा सूत्रस्य कृतिरिति तत्र भवान् गार्ग्यायणो गार्ग्यो वा तत्र भवान्वात्स्यायनो
वात्स्यो वा पूजायामिति किं गार्ग्यः वात्स्यः यूनश्च कुत्सायां यूनो युवसंज्ञा भवति निवृत्तो
प्रधानो विकल्पः युवसंज्ञायां प्रतिषिद्धायां पक्षे गोत्रसंज्ञैव भवति प्रतिपत्त्यभावात् गार्ग्यो
जाल्मः गार्ग्यायणो वा वात्स्यो जाल्मः वात्स्यायनो वा कुत्सायामिति किं गार्ग्यायणः ज
नपदशब्दात्क्षत्रियादञ् जानपदशब्दो यः क्षत्रियवाची तस्मादपत्ये अञ् प्रत्ययो भवति
पांचालः ऐक्ष्वाकः वैदेहः जानपदशब्दादिति किं द्रुह्योरपत्यं द्रौह्यवः पौरवः क्षत्रियादिति
किं ब्राह्मणस्य पंचालस्यापत्यं पांचालिः वैदेहिः क्षत्रियसमानशब्दाज्जानपदस्य राज्ञ
स्यापत्यवत् पंचालानां राजा पांचालः वैदेहः मागधः अत्र द्वावपि तद्राजवचनविषयादि
ति वक्ष्यते साल्वेयगान्धारिभ्यां च साल्वेयगान्धारिशब्दाभ्यामपत्ये अञ् प्रत्ययो भ
वति जनपदशब्दाभ्यां क्षत्रियाभिधायिनीभ्यामञपवादे वृद्धादिति ञ्यङि प्राप्ते पुन

र्त्रिपीयते । साल्वेयः गान्धारः । तस्य राजनीत्येव साल्वेयो राजा गान्धारो राजा ॥ द्व्यञ्मगध-
कलिङ्गसूरमसादण् ॥ जानपदशब्दात्क्षत्रियाभिधायिनः द्व्यचः मागधकलिङ्गसूरमस
इत्येतेभ्यश्चापत्येऽण्प्रत्ययो भवति । अञोऽपवादः । आङ्गः वाङ्गः सौह्मः पौण्ड्रः मागधः कालि-
ङ्गः सौरमसः । तस्य राजनीत्येव आङ्गः मागधः कालिङ्गः सौरमसः ॥ वृद्धेत्कोसलाजा-
दाञ्ञ्यङ् ॥ जानपदशब्दात्क्षत्रियादित्येव वृद्धात्प्रातिपदिकादिकारान्ताच्च कोसलाजाद-
भ्यां चापत्ये ञ्यङ्प्रत्ययो भवति । अञोऽपवादः । वृद्धात्तावत् । आम्बष्ठ्यः सौवीर्यः । इका-
रान्तात् । आवन्त्यः कौन्त्यः । कोसलाजादयोरवृद्धार्थं ग्रहणं । कौसल्यः आजाद्यः । तपर-
करणं किं । कुमारीनाम जनपदः समानशब्दः क्षत्रियः तस्यापत्यं कौमारः । पाण्डोर्जनपदश-
ब्दात्क्षत्रियाड्ड्यण्वक्तव्यः । पाण्ड्यः । अन्यस्मादणेव भवति । तस्य राजनीत्येव आम्बष्ठ्यो राजा
आवन्त्यः आजाद्यः ॥ कुरुणादिभ्यो ण्यः ॥ जनपदशब्दात्क्षत्रियादित्येव कुरुशब्दान्नका-
रादिभ्यश्च प्रातिपदिकेभ्योऽपत्ये ण्यप्रत्ययो भवति । अणञोरपवादः । कौरव्यः । नकारादिभ्यः
नैषध्यः नैपथ्यः नैदिक्यः । तस्य राजनीत्येव कौरव्यो राजा ॥ साल्वावयवप्रत्यग्रथकलकू-

का· वृ· २३९

टाश्मकादिञ् जनपदशब्दात्क्षत्रियादित्येव साल्वा क्षत्रियास्तन्नाम्नि तस्यापत्येऽव इति
फक् साल्वेयः अणोऽपवादो ऽयं ते साल्वाः तस्य निवासो जनपदः साल्वः तदवयवाः उदुम्बराद
यस्तेभ्यः क्षत्रियवृत्तिभ्यः इदं प्रत्ययविधानं साल्वावयवेभ्यः कलकूटाश्मकशब्देभ्यश्चा
पत्ये इञ् प्रत्ययो भवति अणोऽपवादः औदुम्बरिः तैलखलिः माद्रकारिः यौगन्धरिः भौलि
ङ्गिः शारदण्डिः प्रात्यग्रथिः कालकूटिः आश्मकिः तस्य राजन्यप्येव औदुम्बरिः राजा औ।
दुम्बरास्तिलखलाः मद्रकाराः युगन्धराः भुलिङ्गाः शारदण्डाश्च साल्वावयवसंज्ञिताः
ते तद्राजाः जनपदशब्दात्क्षत्रियादञित्येवमादयः प्रत्ययाः सर्वे तोनाप्रत्यवक्ष्यन्ते
नतपूर्वं गोत्रयुवसंज्ञाकालेनान्यवहितवान् ते ञ्यादयः तद्राजसंज्ञा भवन्ति तथा चै
वोदाहृतं तद्राजप्रदेशाः तद्राजस्य बहुषु तेनैवास्त्रियामित्येवमादयः कंबोजाल्लुक्
जनपदशब्दात्क्षत्रियादित्येतेन विहितस्य तद्राजस्य लुग्भवति कंबोजात्स्यापत्यमाभव
कंबोजः कंबोजादिभ्यो लुग्वचनं चोलाद्यर्थं कंबजः चोलः केरलः शाकः यवनः तस्य रा
जन्यप्येवं कंबोजो राजा स्त्रियामवन्तिकुन्तिकुरुभ्यश्च अवन्तिकुन्तिकुरुशब्देभ्य उत्पन्न

स्यतद्राजस्यलुग्भवतिस्त्रियामभिधेयायां अवन्तिकुन्तिभ्यांस्य च कुरोरपिस्य अवन्तीकु

न्तीकुरूःस्त्रियामितिकिं आवन्त्यः अतश्च स्त्रियामित्येव अकारप्रत्ययस्यतद्राजस्यस्त्रि

यामभिधेयायांलुग्भवतितत्कारणविसर्गार्थः शूरसेनीमद्रीदरत् अवन्त्यादिभ्योलुग्भव

नान्तदन्तविधिरत्रनास्तितेनेहनभवति अंबष्ठासौवीरी नप्राच्यभर्गादियौधेयादि

भ्यः प्राच्येभ्योभर्गादिभ्यःयौधेयादिभ्यः चोत्पन्नस्यप्रत्ययस्यलुङ्नभवति अतश्चेन

नस्त्रियांलुक्प्राप्तःप्रतिषिध्यतेप्राच्येभ्यःतत्रियेत्तस्तावत् पांचालीवैदर्भी आङ्गीवां

गीमागधी भर्गादिभ्यःभार्गीकारूषीकैकेयीयौधेयादिभ्यःयौधेयीशौभ्रेयीशौक्रे

यीकस्यपुनरकारस्यप्रत्ययस्ययौधेयादिभ्योलुक्प्राप्तःप्रतिषिध्यते पांचालिकस्य

तद्राजस्याञःपार्श्वादियौधेयादिभ्योऽणञावितितस्यकथंपुनस्तस्याभिन्नप्रकरणस्य

स्यातेनलुक्प्राप्नोतियत्तदेवज्ञापयतिपांचालिकस्यापितद्राजस्यातश्चेत्यनेनलुग्भ

वतीतिकिमेतस्यज्ञापनेनप्रयोजनं पार्श्वायणःस्त्रियांलुग्भवतीतिपर्शूः रक्षाः

आसुरीतस्याचोक्तं यौधेयादिभ्यःप्रतिषेधोज्ञापकंलुकरतिभर्गाकरूपकैकेय

का· वृ४
२३०

कश्मीर साल्व स्थल उरकौरव्य भर्गादिः शौकय शौभ्रेय ग्रौतेयस्यावाणेय त्रिगर्त्त
भरत उशीनर यौधेयादि ॥ इति जयादित्यविरचितायां काशिकायां वृत्तौ चतुर्थस्याध्या
यस्य प्रथमः पादः संपूर्णोयं प्रथमपादः तेन रक्तं रागात् शुक्लस्य वर्णान्तरापादनं रं
जनस्यार्थः रज्यतेनेनेति रागः तेनेति तृतीयासमर्थात् रागविशेषवाचिनः शब्दात् रक्तमि
त्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति कषायेन रक्तं वस्त्रं काषायं मञ्जिष्ठया रक्तं
वस्त्रं माञ्जिष्ठं कौङ्कुमम् कौसुम्भं रागादिति किं देवदत्तेन रक्तं वस्त्रं कथं काषायौ गर्द्दभ
स्य कर्णौ हारिद्रौ कुक्कुटस्य पादाविति उपमानात् काषायाविव काषायौ हारिद्राविव
हारिद्रौ द्वैपव्याघ्रादञिति यावत् तृतीयासमर्थविभक्तिरित्यनुवर्त्तते लाक्षारोचनाशाक
लकर्दमाट्ठक् लाक्षादिभ्यः रागवचनेभ्यः तृतीयासमर्थेभ्यः रक्तमित्येतस्मिन्नर्थे
ठक् प्रत्ययो भवति अणोपवादः लाक्षया रक्तं वस्त्रं लाक्षिकं रौचनिकं शाकलिकं का
र्द्दमिकं शाकलकर्दमाभ्यामणपीष्यते शाकलं कार्द्दमं नील्या अन्वक्तव्यः नील्या रक्तं
नीलं वस्त्रं पीतात्कन्वक्तव्यः पीतेन रक्तं पीतकं हरिद्रामहारजनाभ्यामञ्वक्तव्यः हा।

रिट्ठं महाराजाणं नक्षत्रेणयुक्तः कालः तृतीयासमर्थविभक्तिरनुवर्त्तते नेति तृतीयासम
र्थात् नक्षत्रविशेषवाचिनः शब्दात् युक्त इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति योऽसौ
युक्तः कालश्चेत्स भवति कथं पुनर्नक्षत्रेण पुष्यादिना कालो युज्यते पुष्यादिसमीपस्थेन
चंद्रमसा शब्दाः प्रत्ययमुत्पादयन्ति पुष्येण युक्तः कालः पुष्यसमीपस्थेन चंद्रमसा युक्त इ
त्यर्थः पौषी रात्रिः पौषमहः माघी रात्रिः काल इति किं पुष्येण युक्तश्चंद्रमाः लुबविशे
षे पूर्वेण विहितस्य प्रत्ययस्य लुब्भवति अविशेषे न चेन्नक्षत्रयुक्तस्य कालस्य रात्र्यादि
विशेषो विवक्ष्यते यावान् कालो नक्षत्रेण युज्यते अहोरात्रस्तस्याविशेषे लुब्भवति अ
द्य पुष्यः अद्य कृत्तिकाः अविशेष इति किं पौषी रात्रिः पौषमहः संज्ञायां श्रवणाश्वत्था
भ्यां अविशेषे लुग्विहितः पूर्वेण विशेषार्थोयमारंभः श्रवणशब्दादश्वत्थशब्दाच्चोत्प
न्नस्य प्रत्ययस्य लुब्भवति संज्ञायां विषये श्रवणा रात्रिः अश्वत्थो मुहूर्त्तः लुपि युक्तवद्भावः
कस्मान्न भवति निपातनात् विभाषा फाल्गुणी श्रवणा कार्त्तिकीति संज्ञायामिति
किं श्रावणी आश्वत्थी रात्रिः द्वन्द्वाच्छः नक्षत्रद्वन्द्वात्तृतीयासमर्थाद्युक्तेकप्रत्य

का॰
वृप्र
२३८

ष्ठो भवति विशेषवाविशेषेव गाथानुरोधेयाराविः तिष्यपुनर्वसवीयमह्नाः विशाखेश्रवणा
पानुरोधेयं श्रयति तिष्यपुनर्वसनीयं लपपरत्वाद्बाध्यते दृष्टं साम तेनेति तृतीयासमर्थात्
दृष्टमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तद् दृष्टं साम चेद्भवति क्रौंचेन दृष्टं सा
म क्रौंचं साम वासिष्ठं वैश्वामित्रं कलेर्ढक् कलिशब्दात् तृतीयासमर्थात् दृष्टं सामेत्येत
स्मिन्नर्थे ढक् प्रत्ययो भवति अणोपवादः कलिना दृष्टं कालेयं साम सर्वत्राग्निकलिभ्यां
ढग्वक्तव्यः अग्निना दृष्टमाग्नेयं एवमग्नौ भवं अग्नेरागतं अग्नेः स्वमिति सर्वत्र ढगेव
भवति आग्नेयं तथा कालेयमपि प्रतिपत्तव्यं दृष्टं सामनि जातवाडिद्भवतीति वक्तव्यम्
उशनसा दृष्टं साम औशनसं जाते चार्थे योऽन्येन बाधितः पुनरपि विधीयते सवाडिद्भव
तीति वक्तव्यं शातभिषजि जातः प्रावृदीव्यतोः प्राग्भः कालाट्ठञा बाधितः सन्धिवेलाद्य
तत्रत्वे भवद्इति पुनर्विधीयते सेवाडिद्भवति शतभिषजि जातः शातभिषः शातभिषजः
तृतीयाट्टीकक्स्वार्थे वा वक्तव्यः द्वैतीयीकं तार्तीयीकं द्वितीयं तृतीयं न विद्यायाः द्वि
तीयात्तृतीयाद्विद्यागोत्राट्ठकवदिष्यते दृष्टं सामेत्येतस्मिन्नर्थे डौ पगवेन दृष्टं साम डौ

पगवकं कापटवकं गोत्रचरणाद्वुञ्च भवति दृष्टं सामनिजातेव अणोवाडिड्यौ विधीयेते ती
षादीकत्रविधायायोत्राद्रेकवद्विष्यते वामदेवाड्ड्यड्ड्यौ वामदेवशब्दात्तृतीयासमर्थाद्दृष्टं सामे
त्येतस्मिन्नर्थे ड्यत ड्य इत्येतौ प्रत्ययौ भवतः अणोपवादः वामदेवेन दृष्टं वामदेव्यं वामदेव्यं
सामनिज्करणं किमर्थं ययतोश्चानदर्थे इति नञ उत्तरस्यान्तोदात्तत्वं विधीयमाने अनेया
ग्रहणं माभूत अनुबंधकपरिभाषया पकानुबंधपरिभाषया वा नयोर्वृत्तिः क्रियते अवा
मदेव्यं सिद्धं यस्येति लोपे न किर्थं ययतोरितो ग्रहणं मातदर्थे मूत्वामदेव्यस्यान्तस्वरे परि
वृत्तो रथः तेनेति तृतीयासमर्थात्परिवृत्त इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यो
सोपरिवृतः रथश्चेत्स भवति वस्त्रेणपरिवृतः वास्त्रो रथः कांवलः चार्माणः रथ इति किम्
वस्त्रेणपरिवृतः कायः समन्ताद्वेष्टितः परिवृत इत्युच्यते यस्य न किंचिदवयवो वस्त्रादिभि
रवेष्टितः तेनेह न भवति छत्रैः परिवृतो रथ इति पांडुकंवलादिनिः पांडुकंवलशब्दात्तृ
तीयासमर्थात्परिवृतो रथ इत्येतस्मिन्नर्थे इनिप्रत्ययो भवति अणोपवादः पांडुकंवलीपा
डुकंवलिनौ पांडुकंवलिनः पांडुकंवलशब्दो राजास्तरणस्य वर्णकंवलस्य वाचकः।

का॰
वृ॰प्र॰
२३५

म्नार्थे येतत्सिद्धं वचनमाणोत्तरत्वार्थं द्वैपवैयाघ्रादञ् द्वैपिव्याघ्रयोर्विकारस्तेनेवमेणौ द्वैपवै
याघ्रताभ्यां तृतीयासमर्थाभ्यां परिवृतो रथ इत्येतस्मिन्नर्थे अण्प्रत्ययो भवति अणोपवादः स्व
दे विशेषः द्वैपेन परिवृतो रथः द्वैपः वैयाघ्रः कौमारापूर्ववचने कौमार इत्येतदन्तमणप्रत्य
यान्तं निपात्यते अपूर्ववचने पाणिग्रहणस्यापूर्ववचनमुभयतः स्त्रियामपूर्वत्वे निपातन
मेतत् अपूर्वां पतिं कुमारी पतिरुपपन्नः कौमारः पतिः कुमारीशब्दाद् द्वितीयासमर्थात् उपप
रिप्रत्ययः अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या प्रथमान्तादेव स्वार्थे प्रत्ययः अपूर्व
त्वे हि त्वे कौमारापूर्ववचने कौमार्या अपि विधीयते अपूर्वत्वं यदा तस्याः कौमार्या भवतीति वाक्य
नेन प्रत्याख्यायते योगः कुमार्या भवः कौमारः पतिः तस्य स्त्री कौमारी भार्येति सिद्धं तेनोक्त
तममत्रेभ्यः तेनेति समसमीसमर्थात् मत्रवाचिनः शब्दात् उक्तमित्येतस्मिन्नर्थे यथाविहितं
प्रत्ययो भवति भद्रेणोक्तं छन्दस्कृतम् अच्यते यस्मात् व्याहरणमिति प्रसिद्धिः अमत्रभाजनेभ्यो मात्रमत्र अते
शारावेषु कृतः औदनः शारावः नालकः कार्परः अमत्रेभ्य इति किं पाणौ कृतः औदनः सप्तमीस
मर्थविभक्तिः तीरात् कृणिनीयावद् तंते स्थण्डिलाच्छयितरि व्रते स्थण्डिलशब्दात् सप्तमीस

मर्थात् पाचितमर्थाभिधेये यथाविहितं प्रत्ययो भवति समुदायेन चेद्भक्तं तस्येतद्भक्षमिति शास्त्रतो
नियम उच्यते स्थण्डिले शेते देवदत्तः संस्कृतं भक्षाः तेनेति सप्तमीसमर्थात् संस्कृतमिति
तस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तत्संस्कृतं भक्षाश्चेत्ते भवन्ति खरविषदमभ्यवहार्यं भ
क्ष्यमुच्यते सत उत्कर्षाधानं संस्कारः भ्राष्ट्रे संस्कृता भक्षाः भ्राष्ट्राः कैलाशाः भक्षा इति किं
पुष्पपुटे संस्कृतो माल्यागुणः शूलोखाद्यत् शूलशब्दादुखशब्दाच्च सप्तमीसमर्थात्
संस्कृतं भक्षा इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति अणोऽपवादः शूले संस्कृतं शूल्यं मांसं उख्यं दध्न
ष्ठक् दधिशब्दात् सप्तमीसमर्थात् संस्कृतं भक्षा इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति दध्नि सं
स्कृतं दाधिकं ननु च संस्कृतार्थे प्राग्वहतेष्ठक्केवलं स्यादिति तेनैनं तस्मिन्निदं न सिध्यतीति दध्ना संस्कृतं य
स्याद्दाधिकं तमेवोत्कर्षाधानमिह तु दाधिकं केवलमाधारमात्रं तेद्ध्यान्तःशालवणादिना तु सं
स्कारः क्रियते उदश्वितोऽन्यतरस्यां उदश्विच्छब्दात् सप्तमीसमर्थात् संस्कृतं भक्षा इत्येतस्मि
न्नर्थेऽन्यतरस्यां ठक्प्रत्ययो भवति पक्षे यथाप्राप्तमण् एव औदश्वित्कं औदश्वितं क्षीराड्ढक्
क्षीरशब्दात् सप्तमीसमर्थात् संस्कृतं भक्षा इत्येतस्मिन्नर्थे ढञ्प्रत्ययो भवति अणोऽपवा

दःस्त्रीरसंस्कृताद्वैस्योयवाभूः सास्मिन्पौर्णमासीतिसंज्ञायां साइतिप्रथमासमर्था
दस्मिन्नितिसप्तम्यर्थेयथाविहितंप्रत्ययोभवतियत्तत्प्रथमासमर्थंपौर्णमासीचेत्साभ
वतिइतिकरणंततश्चेद्विवक्षासंज्ञायामितिसमुदायोपाधिःप्रत्ययान्तेनचेत्संज्ञागम्यतइ
तिमासार्द्धमाससंवत्सराणामेषांसंज्ञापौषीपौर्णमासीअस्मिन्पौषोमासःपौषोर्द्धमासः
पौषःसंवत्सरः इहनभवतिपौषीपौर्णमासीअस्मिन्दशरात्रइतिभृतकमासेचनभवति
इतिकरणस्यसंज्ञाशब्देनतुल्यमेवफलंप्रयोगानुसरणं यत्रकिमर्थंद्वयमपादीयतेसं
ज्ञाशब्देनतुल्यतामितिकरणस्यज्ञापयितुं नत्वयंलोकेतथाप्रसिद्धिःसंज्ञार्थंचेत्संप्रति
ज्ञाप्यतेयत्रतत्रचेद्गम्यतेइतिकरणात्ततश्चेद्विवक्षेतितदुपपन्नंभवतिपौर्णमासीतिको
र्थःपूर्णमासादण् पौर्णमासीअथवापूर्णोमाःपूर्णमाःपूर्णमासस्येयंपौर्णमासीमा
इतिचेदुच्यते आग्रहायण्यश्वत्थादिक सास्मिन्पौर्णमासीतिसर्वमनुवर्ततेआग्रहा
यणीशब्दादश्वत्थशब्दाच्चप्रथमासमर्थात् पौर्णमास्युपाधिकात् अस्मिन्नितिसप्तम्य
र्थेठक्प्रत्ययोभवतिअपवादःआग्रहायणिकोमासोर्द्धमासःसंवत्सरःएवमाश्वत्थि

न्यिकाः विभाषाफाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः फाल्गुन्यादिभ्यः पौर्णमासीश
ब्दः तेभ्यो विभाषाठक्प्रत्ययो भवति सास्मिन्पौर्णमासीति संज्ञायामित्येतस्मिन्विषयेऽनि
त्यमणि प्राप्ते पक्षे ठग्विधीयते फाल्गुणो मासः संवत्सरः फाल्गुनिकः श्रावणः श्रा
वणिकः कार्तिकः कार्तिकिकः चैत्रः चैत्रिकः सास्य देवता सेति प्रथमसमर्थादस्ये
ति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं देवता चेत्सा भवति यागसंप्र
दानं देवता देवस्य पुरोडाशादेः स्वामिनीति तस्मिन्नभिधेये प्रत्ययः इन्द्रो देवता अस्य ऐन्द्रं ह
विः आदित्यं वार्हस्पत्यं प्राजापत्यं देवतेति किं कन्यादेवदत्तस्य कथमैन्द्रो मन्त्रः मंत्रस्त
स्य न पि देवतेत्युपचरन्ति कथमाग्नेयो वै ब्राह्मणो देवता उपमानाद्भविष्यति महाराज
प्रोष्ठपदाट्ठञिति यावत्सास्य देवतेत्यधिकारः सेति प्रकृते पुनः समर्थविभक्तिनिर्देशः
संज्ञानिवृत्त्यर्थः कस्येत् कशब्दो देवतायाः प्रजापतेर्वाचकः ततः पूर्वेणैवाण्प्रत्ययः
सिद्धः इकारादेशार्थं वचनं कस्य इकारादेशो भवति प्रत्ययसंनियोगेन को देवतास्य
कायं हविः कायमेककपाले निर्वपेत् शुक्राद्घन् शुक्रशब्दात्सास्य देवतेत्यस्मिन्विषये घन्प्रत्य।

शुक्राद्घन्

का॰
वृ ४
२५८

योभवति अणोपवादः शुक्रियंहविः शुक्रियोध्यायः अपोनप्त्रपांनप्तृभ्यांघः अपोनप्तृ अ
पांनप्तृ इत्येताभ्यांघः प्रत्ययोभवति सास्मिन्देवतेत्यस्मिन्विषये अणोपवादः अपोनप्त्रि
यंहविः अपांनप्त्रियंहविः अपोनपात् अपांनपात् इतिदेवतानामधेये एते तयोस्तु प्र
त्ययसन्नियोगेन तृरूपमिदंनिपात्यते छच अपोनप्तृ अपांनप्तृइत्येताभ्यांछःप्रत्ययोभवति सास्य
देवतेत्यस्मिन्विषये अपोनप्त्रीयंहविः अपांनप्त्रीयंहविः योगविभागः संख्यातानुदेश
परिहारार्थः कथं पैङ्गाक्षीपुत्रादिभ्यउपसंख्यानं पैङ्गाक्षीपुत्रीयं तार्णबिन्दवी
यं शतरुद्राद्घश्च शतरुद्रियं शतरुद्रीयं महेन्द्राद्घाणौच महेन्द्रशब्दाद्घाणौप्रत्य
यौभवतः चकाराच्छश्च सास्यदेवतेत्यस्मिन्विषये महेन्द्रोदेवतास्य महेन्द्रियं महेन्द्री
यं माहेन्द्रं सोमाट्ट्यण् सोमशब्दात्ट्यण्प्रत्ययोभवति सास्यदेवतेत्यस्मिन्विषये अ
णोपवादः णकारोवृद्ध्यर्थः टकारोङीबर्थः सोमोदेवतास्य सौम्यंहविः सौम्यंसूक्तं सौमी
ऋक् वाय्वृतुपित्रुषसोयत् वाय्वादिभ्यःशब्देभ्यःयत्प्रत्ययोभवति सास्यदेवतेत्यस्मिन्विषये
अणोपवादः वायुर्देवतास्य वायव्यम् ऋतव्यं पित्र्यं उषस्यम् द्यावापृथिवीशुनासीरम

त्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च द्यावापृथिव्यादिभ्यः शब्देभ्यः छ प्रत्ययो भवति
चकाराद्यच्च सास्यदेवतेत्यस्मिन्विषये अग्राणोस्य ग्रेयोष्टकपालः प्राग्दीव्यतीयेष्वतद्धिता
र्थेपवादः द्यौश्च पृथिवी च द्यावापृथिव्यौ देवता अस्य द्यावापृथिवीयं द्यावापृथिव्यम् ।
शुनश्च सीरश्च शुनासीरौ देवतास्य शुनासीरीयं शुनासीर्यं शुनो वायुः सीर आदित्यः
मरुत्वान्देवतास्य मरुत्वतीयं मरुत्वत्यं अग्नीषोमीयं अग्नीषोम्यं वास्तोष्पतीयं वास्तो
ष्पत्यं गृहमेध्यं गृहमेधीयं अग्नेर्ढक् अग्निशब्दात् ढक्प्रत्ययो भवति सास्य देवतास्मि
न्विषये अग्निर्देवतास्य आग्नेयं आग्नेयोष्टकपालः प्राग्दीव्यतीयेषु तद्धितार्थेषु सर्वत्राग्निभ्यां
ढग्वक्तव्यः कालेभ्यो भववत् कालविशेषवाचिभ्यः शब्देभ्यः भववत्प्रत्ययो भवति सास्य
देवतेत्यस्मिन्विषये कालाट्ठञिति प्रकरणे भवे प्रत्यया विधास्यन्ते सास्य देवतेत्य
स्मिन्नप्यर्थे तथैव भवन्ति तदर्थमिदमुच्यते वत्करणं सर्वसादृश्यपरिग्रहार्थं मासे भवं
मासिकं आर्धमासिकं सांवत्सरिकं वासन्तं प्रावृषेण्यं महाराजप्रोष्ठपदाट्ठञ् म
हाराजशब्दात् प्रोष्ठपदशब्दाच्च ठञ्प्रत्ययो भवति सास्य देवतेत्यस्मिन्विषये महारा

का॰
वृ प्र
२५२

जो देवताप्रसमाहाराजिकं पौष्टशष्टिकं ठक्प्रकरणे तदस्मिन्वर्त्तत इति नवयज्ञादिभ्य
उपसंख्यानं नवयज्ञोस्मिन्वर्त्तते नावयज्ञिकः कालः पाकयज्ञिकः पूर्णमासादण् पू-
र्णमासादण् पूर्णमासोस्यां वर्त्तते पौर्णमासी तिथिः ॥ पितृव्यमातृव्यमातुलमातामह-
पितामहाः ॥ पितृव्यादयः शब्दा निपात्यन्ते समर्थविभक्तिः प्रत्ययः प्रत्ययार्थः अनेनैव
इति सर्वं निपातनाद्विज्ञेयं पितृमातृभ्यां भ्रातरि व्यड्डुलचौ ताभ्यां तु पितरि डाम-
हे मातरि षिच्च पितृमातृभ्यां भ्रातर्यभिधेये व्यत् डुलच इत्येतौ प्रत्ययौ निपात्येते पितुः
भ्राता पितृव्यः मातुर्भ्राता मातुलः ताभ्यामेव पितरि डामहच् पितुः पिता पितामहः मातुः
पिता मातामहः मातरि षिच्च मातामही पितामही ॥ अवेर्दुग्धे सोढदूसमरीसाः प्रत्यया
वक्तव्याः अवेर्दुग्धं अविसोढं अविदूसं अविमरीसं ॥ तिलान्निष्फलात् पिञ्जपेजौ प्रत्ययौ व-
क्तव्यौ निष्फलस्तिलः तिलपिञ्जः तिलपेजः पिञ्जश्छन्दसीति छन्दसि तिलपिञ्जः ॥ तस्य सम-
हः तस्येति षष्ठीसमर्थात् यथाविहितं प्रत्ययो भवतीति किमुदाहरणं चित्तवदायुदात्तं
सगोत्रं यस्य च ता नाम्नः इति पदिकग्रहणं अविनाटकं वस्तीति ग्रनदाग्नादेरास गोत्राद्

ञ प्रतिपदं चकेदाराद्यञिति पृथगादितत्वाविधावेण ग्रोदाहरणं द्रष्टव्यम् काकानां समू
हः काकं भाकं वाकं इति चकर्णं चश्चुन्नितियावत्समूहाधिकारः भिक्षादिभ्योऽण् भिक्षा
दिभ्यः षष्ठेभ्यः अण् प्रत्ययो भवति तस्य समूह इत्यस्मिन्विषये अञ् ग्रहणं बाधकबाध
नार्थं भिक्षाणां समूहः भैक्षं गार्भिणं युवतिशब्दोत्रपठ्यते तस्य ग्रहणसामर्थ्यात्पुंवद्भा
वो न भवति तस्माद्धे तद्धित इति युवतीनां समूहः यौवतं भिक्षा गर्भिणी क्षेत्र करीष
अङ्गार चर्मिन् धर्मिन् सहस्र युवति पदाति पद्धति अथर्वन् दक्षिणा गोत्रोक्षोष्ट्रोर
भ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् गोत्रादिभ्यः वुञ् प्रत्ययो भवति तस्य समूह इ
त्येतस्मिन्विषये अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते अपत्यमात्रं तेन यो प्रभृतिरौप
गवानां समूहः औपगवकं औक्षकं औरभ्रः औरभ्रकं उष्ट्रः औष्ट्रकं राजन् राजकं राजन्यकं
राजपुत्र राजपुत्रकं वत्स वात्सकं मनुष्य मानुष्यकं अज आजकं प्रकृत्या के राजन्यमनु
ष्ययुवानः इति यलोपो न भवति अपत्यस्यत्र तद्धिते नातीति वृद्धाच्चेति वक्तव्यं वृद्धानां
समूहो वार्धकं केदाराद्यञ्च केदारशब्दाद्यञ् प्रत्ययो भवति चकाराद्वुञ् च तस्य समूह

का॰
वृ॰ ४
२४२

इत्येतस्मिन्विषये अचित्तलक्षणस्य ठकोपवादः केदाराणां समूहः कैदार्यं कैदारकं गाणि
क्यायाश्च यञ्वक्तव्यः गणिकानां समूहः गाणिक्यं ठञ्कवचिनश्च कवचिन्शब्दात् ठ
ञ्प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये कवचिनां समूहः कावचिकं चकारः केदा
रादपि स्यान्क[illegible]णार्थः केदाराणां समूहः कैदारिकं ब्राह्मणमाणववाडवाद्यन्
ब्राह्मणादिभ्यः शब्देभ्यः यन्प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये नकारः स्वरार्थः ब्राह्म
णानां समूहः ब्राह्मण्यं माणव्यं वाडव्यं यत्प्रकरणे पृष्ठादुपसंख्यानं पृष्ठ्याः षडहः अह्नः खः
क्रतावहीनो नाम समूहः अहीनः क्रतुः क्रतावितिकिं आह्नं खण्डिकादिषु दर्शनादञ्भवति
पर्श्वाणस्वक्तव्यः पर्शूनां समूहः पार्श्वं ग्रामजनबन्धुसहायेभ्यस्तल् ग्रामादिभ्यः शब्देभ्य
स्तल्प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये ग्रामाणां समूहः ग्रामता जनता बन्धु
ता सहायता गजाच्चेति वक्तव्यं गजानां समूहो गजता अनुदात्तादेरञ् अनुदात्ता
देः शब्दात् अञ्प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये कपोतानां समूहः कापोतं
मायूरं तैत्तिरं खण्डिकादिभ्यश्च खण्डिक इत्येवमादिभ्यः अञ्प्रत्ययो भवति तस्य समू

शब्देभ्यः

इत्यस्मिन्विषये आयुधजीव्यर्थमपि ज्ञार्थं वचनं खेडिकानां समूहः खाण्डिकं । वाडवं त्त्वट्टका

मालवशाखोत्रपद्युते त्वट्टकाश्च मालवकाश्चेति त्तियट्टन्द्वः तत ण्यधेवेण वाजिसिद्धेवच

नेयोत्रयुत्पादनार्थं ननच परमाटज्ञाकुद्माद्दिष्यतेत चयोवमस्रटायायोत्रे वचनटत्त

विधिरस्तीति एवं तत्तित ज्ञापयति युञिपूर्वे प्रवश्रवप्रतिषेधः सतहि के पुवतत्त्वाबि

धीरस्तीति प्रयोजनं दैपगवकंकापटवकं इतिवज्ञभवतिवारहास्तिकं गोधेनक

मिति वतटन्नाविधिः त्वट्टकमालवकादिभावतायोगविभागेन पूर्वविप्रतिषेधः तटा

न्नाविधिश्च ज्ञापितः पुनरस्मैवनियमार्थं मन्यते सेनासंज्ञायामिति त्वट्टकमलयान्मे

नासंज्ञायामेवान्नभवति सौट्टकमालवी सेना सौट्टकमालवकमन्यत अत्रासिद्धिरन्

टान्नटेवाकः त्वट्टकमालवकात गोत्राद्युन्नतवतक्रेधे तटन्नात्र समर्थतः ज्ञापकंस्या

त्तटन्नोवेनथावापिशालेविधिः सेनायां नियमार्थं च यथावाप्यते चोत्र ज्ञाखेडिकावट्या

त्वट्टकमालवकात सेनायामिति त्वक प्रकृतत्वकसन पुनवरडासलवेत्र वरगोभाय

भेवत वरगामश्राक्कटकलापकादयः तेभ्यः षष्ठीसमर्थेभ्यः धर्मवत्नायपामवेतिगोत्र

का. वृ.
२८४

वरणाद्धर्मिनायन्य प्रत्यया वक्ष्यन्ते तत्रेड मखोनेव रणाद्धर्मान्नाययोरिति तेन धर्मे वर्त्तिष्यति दे
शः क्रियते अनिसर्वमात्र सार्थः कठानां धर्मः काठकं कालापकं छान्दोग्यं औक्तिक्यं आथर्वणं
तथा समूहेऽपि काठकं कालापकं छान्दोग्यं औक्तिक्यं आथर्वणं अचित्तहस्तिधेनोष्ठण् अ
चित्तेभ्यः हस्तिधेनुभ्यां च ठण् प्रत्ययो भवति तस्य समूह इत्यस्मिन्विषये अपूपानां स
मूहः आपूपिकं शाष्कुलिकं हास्तिकं धैनुकं धेनोरनञ इति वक्तव्यं अधेनवं केशाश्वाभ्यां
यञ्छावन्यतरस्यां केशाश्वशब्दाभ्यां यञ्छौ प्रत्ययौ भवतः अन्यतरस्यां तस्य स
मूह इत्यस्मिन्विषये केशानां समूहः कैश्यं कैशिकं अश्वानां समूहः आश्वीयं आश्वं पा
शादिभ्यो यः पाशादिभ्यः शब्देभ्यः प्रत्ययो भवति तस्य समूह इत्यस्मिन्विषये पाशानां स
मूहः पाश्या तृण्या पाश तृण धूम वात अंगार मोटलक पिटक शाकट हल नड वन।
खलगोरथात् खलगोरथ इत्येतेभ्यः शब्देभ्यः य प्रत्ययो भवति तस्य समूह इत्यस्मिन्विषये।
खलानां समूहः खल्या गव्या रथ्या पाशादिषु पाठउक्तार्थः इनित्रकट्यचश्च खलगोरथ
शब्देभ्यः यथासंख्यं इनि त्र कट्य च प्रत्यया भवन्ति तस्य समूह इत्येतस्मिन्विषये खलिनी गो

३५

शारथकत्यौ खलादिभ्य इनिर्वक्तव्यः खलिनी डकिनी ऊमदिनी विषयो देशे समर्थ इति नि
वृत्तं षष्ठीसमर्थविभक्तिरनुवर्त्तते तेन तस्येति षष्ठीसमर्थात् विषय इत्येतस्मिन्नर्थे यथाविहितं
प्रत्ययो भवति यो ऽसौ विषयः देशश्चेत्स भवति विषयशब्दो ऽयं बह्वर्थः क्वचिद्ग्रामसमुदाये वर्त्त
ते विषये लब्ध इति क्वचिदिन्द्रियग्राह्ये च वर्त्तते विषये रूपमिति क्वचिदत्यन्तव्कलितेस्ये देव
दत्तस्य विषये ऽनुवाक इति तत्र देशग्रहणं ग्रामसमुदायप्रतिपत्त्यर्थं शिबीनां विषयो देशः
शैवः औष्ट्रः देश इति किं देवदत्तस्य विषयो ऽनुवाक इति राजन्यादिभ्यो वुञ् राजन्यादि
भ्यः षष्ठीभ्यः वुञ्प्रत्ययो भवति विषयो देश इत्यस्मिन्विषये ऽणो ऽपवादः राजन्यानां विष
यो देशः राजन्यकः दैवयानकः आकृतिगणश्चायं मालवानां विषयो देशः मालवकः
नैरान्तकः वैराटकः राजन्य आक्रीड बाभ्रव शालंकायन देवयात जलन्धावयजलान्ध्या
रय आत्मकामेय अम्बरीषपुत्र वसाति बैल्वन शैलूष उदुम्बर बैल्वाल आर्जुनायन सं
प्रिय दाक्षि ऊर्णनाभि भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ भौरिक्यादिभ्यः ऐषुका
र्यादिभ्यः यथासंख्यं विधल् भक्तल् इत्येतौ प्रत्ययौ भवतः विषयो देश इत्यस्मिन्विषये

का·
वृ प्र
२५५

अणोपवादः मौरिकिविधं मौलिकिविधं मषकार्यादिभ्यः षुकारिभक्तं सारस्यायनभक्तं
मैरिकिमैलिकि वैधयतः वैटयत शैकयत काणायवालिकिजा मौरिकादिः षुकार्या
दिः षुकारि सारस्यायन चांद्रायन ग्याल्लायन त्याल्लायन औल्लायन खांडायन सौवी
र दासमित्रायण गोत्रायन शायंड शायंड शौडवैस्समाणव विष्ठायणव तंडदेवयांदि
य सास्यादिरिति कंटसः प्रणाय्येषु सर्वतिसमस्तविभक्तिः अस्येति प्रत्ययार्थः आदिरिति
प्रकृतिविशेषणार्थः इतिकरणाविवक्षार्थः कंटस इति प्रकृतिनिर्देशः प्राणार्थेषिति प्रत्य
यार्थविशेषणं सर्वतिप्रथमासमर्थात्षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति प्रत्ययस्य सामा
समर्थोक्तत्वेन दादित्वं भवति यवटस्येति निर्दिष्टं प्रणाय्येऽत्र न भवति इतिकरणात्मं
द्विवक्षार्थं किरादियं स्पर्णान्तः प्रणाय्यः अन्तस्थः जानतः आदेशिति किं सूतस्य सम
प्रणाय्यस्य प्रणाय्येषिति किं पंक्तिरादियं स्पात्मवाकस्य प्रणाय्य शाह्नः क्रियानिमित्तकः क्व
चिदेवमंत्रैवि शेषवर्त्तनेयत्रदेशिवो प्रणाय्ये तेन न तिस्रः क्रियन्ते सं प्रणाय्य ताप्रकर्षणाना
द्वाप्रणाय्यः इत्युच्यते कंटसः प्रत्ययविधानेन तु समके स्वार्थे उपमंख्यानेविशुभवेद्धुभे

प्रत्वष्टे नागतम् संग्रामे प्रयोजनयोद्धृभ्यः सोऽस्येति समर्थविभक्तिः प्रत्ययार्थश्च
श्चानुवर्त्तते प्रथमासमर्थविशेषणं प्रयोजनयोद्धारः प्रत्ययार्थविशेषणं संग्रामः प्रयोजनवा
चिभ्यः योद्धृवाचिभ्यः शब्देभ्यः प्रथमासमर्थेभ्यः अस्येति षष्ठ्यर्थे संग्रामेऽभिधेये यथावि
हितं प्रत्ययो भवति भद्रः प्रयोजनमस्य भाद्रः संग्रामः सौभद्रः गौरिमित्रः योद्धारः अहि
मालो योद्धारोऽस्य संग्रामस्य आहिमालः स्यादितास्य भारतः संग्राम इति किं सुभद्रा
प्रयोजनमस्य दानस्य प्रयोजनयोद्धृभ्य इति किं सुभद्रा प्रेक्षिकास्य संग्रामस्य तदस्यां
प्रहरणमिति क्रीडायां णः तदिति प्रथमासमर्थात् अस्यामिति सप्तम्यर्थे णप्रत्ययो
भवति यत्तदिति निर्दिष्टं प्रहरणं चेद्भवति यत्तदस्यामिति निर्दिष्टं क्रीडा चेत्सा भवति इ
तिकरणस्ततश्चेत्साविवक्षा दण्डः प्रहरणमस्यां क्रीडायां दाण्डा मौष्टा प्रहरणमिति किं
मालाभूषणमस्यां क्रियायां क्रीडायामिति किं खड्गः प्रहरणमस्यां सेनायां घञः सा
स्यां क्रियेति ञः सेति समर्थविभक्तिः अस्यामिति प्रत्ययार्थः स्त्रीलिङ्गा क्रियेति प्रकृ
त्यर्थविशेषणं घञन्त इति प्रकृतिनिर्देशः इतिकरणो विवक्षार्थः घञन्ताः क्रियावा

का॰
वृ॰
२४९

विनः प्रथमासमर्थात् अप्सामिति सप्तम्यर्थे स्त्रीलिङ्गे ञ प्रत्ययो भवति च ञ इति कृद्ग्रहणं
तत्र गतिकारकपूर्वमिति ग्रहणं तेन श्येनपातो स्यां वर्तते श्येनपाता तैलंपाता च ञ इति किं
श्येने पतनमस्यां वर्तते क्रियेति किं प्रकारोस्यां वर्तते प्रथमासमर्थविभक्ति प्रत्ययार्थश्च
कस्मान्न रूपादीयते यावता द्वयमपि प्रकृतमेव क्रीडायामित्यनेन तत्संबद्धं तद इत्यनुवृत्तौ
क्रीडायामिति रपि संभाव्यते सामान्येन च वेदं विधानं दण्डपातोस्यां तिथौ वर्तते दण्डपाता तिथिः
मौसलपाता भूमिः तदधीते तद्वेद तदिति द्वितीयासमर्थात् अधीते वेदेत्येतयोरर्थयोः य
थाविहितं प्रत्ययो भवति छन्दोधीते छान्दसः नैरुक्तः वैयाकरणः निमित्तानि वेद नैमित्तः
मौहूर्तः औत्पातः द्वित्वं ग्रहणमधीयानविदुषोः पृथग्विधानार्थं क्रतूक्थादिसूत्रान्ताट्
ठक् क्रतुविशेषवाचिभ्यः शब्देभ्यः उक्थादिभ्यश्च सूत्रान्ताश्च ठक् प्रत्ययो भवति तदधीते तद्वे
देत्येतस्मिन् विषये अग्निष्टोममधीते वेद वा आग्निष्टोमिकः वाजपेयिकः राजसूयिकः उक्था
दिभ्यः औक्थिकः लौकायतिकः सूत्रान्तात् वार्त्तसूत्रिकः साङ्ग्रहसूत्रिकः सूत्रान्तात् कल्पादे
रिष्यते कल्पसूत्रमधीते काल्पसूत्रः प्रत्ययो न भवति उक्थशब्दः केषुचिदेव सामसु रूढः य

त्तया त्तीयान्तेरणा यानि गीयन्ते न च तान्यधीयाने श्वन्ययर्ष्यन्ते किं तर्हि सामलक्षणे ठौ क्रियको
वर्त्तमानः उक्थशब्दः प्रत्ययमुत्पादयति उक्थमधीते औक्थिकः औक्थिक्यमधीते त्यर्थः औक्थिकाश
ह्रात्प्रत्ययोत्तमवत्प्रविधानार्थं विद्यालक्षणकल्पसूत्रान्तादिति वक्तव्यं वायसविद्यिकः सा
र्पविद्यिकः सारसविद्यिकः गौलक्षणिकः आश्वलक्षणिकः मातृकल्पिकः पाराशर
कल्पिकः विद्याचानङ्गक्षत्रधर्मसंसर्गत्रिपूर्वात् अङ्गविद्यामधीते आङ्गविद्यः क्षात्रविद्यः
धर्मविद्यः संसर्गविद्यः त्रैविद्यः आख्यानाख्यायिकेतिहासपुराणेभ्यः ठग्वक्तव्यः आख्या
नाख्यायिकयोरर्थग्रहणं इतिहासपुराणयोः स्वरूपग्रहणं यावक्रीतिकः प्रैयङ्गविकः
वासवदत्तिकः सौमनोत्तरिकः ऐतिहासिकः पौराणिकः सर्वसादेर्द्विगोश्च लः सर्ववेदः स
र्वमित्रः सर्वतन्त्रः सादेः सवार्त्तिकः ससंग्रहः द्विगोः द्विवेदः पंचव्याकरणः अनुसूलक्ष
णे अनुसूर्नाम ग्रन्थः तमधीते वेद वा अनुसुः लाक्षिकः लाक्षणिकः इकन्पदोत्तरपदा
त् पूर्वपदिकः उत्तरपदिकः शतषष्टिकर्षयोर्बहुले शातपथिकः शातपथिकी षाष्टिपथिकः ष
ष्टिपथिकी बहुलग्रहणात् शातपथः उक्थः लौकायतः न्यायः न्यासः पुनरुक्तः यज्ञः

का॰
वृ॰
२५७

प्रमेतरः लक्षणाः संहिता पदाक्रमसंघटवृत्ति संग्रहः गणः गुणः आयुर्वेद विद्या लक्षणाक
ल्पसूत्रान्तात् कल्पादेः विद्याचानंगक्षत्रधर्मसंसर्गत्रिपूर्वा आख्यानाख्यायिकेतिहासपु
राणेभ्यश्च द्विपदा वेति वा शतपथः षष्टिपदः अनुपद अनुकल्प शतषष्टेष्टिकर्पथो
बहुलं क्रमादिभ्यो वुन् क्रमः इत्येवमादिभ्यः शब्देभ्यः वुन् प्रत्ययो भवति तदधीते तद्वेद इत्य
स्मिन्विषये अणोपवादः क्रमकः पदकः क्रमदीक्षाः सामन् मीमांसा अनुब्राह्मणादिनिः
अनुब्राह्मणशब्दादिनिः प्रत्ययो भवति तदधीते तद्वेद इत्यस्मिन्विषये अणोपवादः ब्राह्मणसम
दृशो ग्रन्थः अनुब्राह्मणं तदधीते अनुब्राह्मणी अनुब्राह्मणिनौ अनुब्राह्मणिनः वसा
न्तादिभ्यष्ठक् वसन्त इत्येवमादिभ्यः शब्देभ्यः ठक् प्रत्ययो भवति तदधीते तद्वेद इत्यस्मिन्वि
षये अणोपवादः मत्वर्थीयापवादो योगः वसन्तः सहचरितो ग्रन्थः तमधीते वासन्तिकः ग्रै
ष्मिकः वार्षिकः वसन्त ग्रीष्म वर्षा शरत् हेमन्त शिशिर प्रथम गुण चरम अनुगुण अथर्व
न् आथर्वणः प्रोक्ताल्लुक् प्रोक्त सहचरितः प्रत्ययः प्रोक्ताः प्रोक्त प्रत्ययान्तात् अध्येत्वे
दित्रोरुत्पन्नस्य प्रत्ययस्य लुग्भवति पाणिनिना प्रोक्तं पाणिनीयं तदधीते पाणिनीयः अ

पिशलः स्त्रियां स्वरे च विशेषः पाणिनीया ब्राह्मणी सूत्रान्ताच्च कोपधात् सूत्रवाचिनः क
कारोपधात् उत्पन्नस्य प्रत्ययस्य लुग् भवति प्रोक्तार्थ आरंभः पाणिनीयमष्टकं सूत्रं व
दधीते आष्टकाः पाणिनीयाः दशकाः वैयाघ्रपदीयाः त्रिकाः काशकृत्स्नाः संख्याप्रभृतेरि
ति वक्तव्यं इह मा भूत् महावार्त्तिकं सूत्रमधीते माहावार्त्तिकः कालापमधीते काला
पकः कोपधादिति किं चतुष्टयमधीते चातुष्टयः छन्दोब्राह्मणानि च तद्विषयाणि प्रो
क्तः ग्रहणमनुवर्त्तते छन्दांसि च ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाण्येव भवन्ति
अध्येतृवेदितृप्रत्ययविषयाणि अनन्यत्र भावो विषयार्थस्तेन स्वातन्त्र्यमपाक्रियते तयोमो
वाक्यं च वर्त्तते कठेन प्रोक्तमधीते कठाः मौदाः पैप्पलादाः आर्चाभिनः वाजसनेयिनः ब्राह्मणा
नि खल्वपि भाल्लविनः फालविनः शाट्यायीवरः ऐतरेयिनः ब्राह्मणग्रहणं किं यावता।
च्छन्द एव तद्ब्राह्मणविशेषप्रतिपत्त्यर्थं इह तद्विषयता मा भूत् याज्ञवल्केन प्रोक्ता।
नि ब्राह्मणानि याज्ञवल्कानि सौलभानि चकारोनुक्तसमुच्चयार्थः कल्पे काश्यपिनः
कौशिकिनः सूत्रे पाराशरिणो भिक्षवः शैलालिनो नटाः कर्मन्दिनः कृशाश्विनः छन्दोबा।

का°
वृत्र
२५८

ष्टाणानीति किं पाणिनीयं व्याकरणं पैंगीकल्पः तदस्मिन्नस्तीति देशे तन्नाम्नि तदिति सम
र्थविभक्तिः अस्मिन्निति प्रत्ययार्थः अस्तीति प्रकृत्यर्थविशेषणं इतिकरणं विवक्षार्थः देशे
तन्नाम्नीति प्रत्ययार्थविशेषणं तदिति प्रथमासमर्थात् अस्मिन्निति सप्तम्यर्थे यथाविहि
तं प्रत्ययो भवति यत्तत्प्रथमासमर्थमस्ति चेत्तद्भवति यत्तदस्मिन्निति निर्दिष्टं देशश्चेत्स तन्ना
मा भवति प्रत्ययान्तनामेति करणात्तत्रेदं विवक्षा उदुंबरा अस्मिन्देशे सन्ति औदुंबरः वाल्व
जः पार्वतः सत्वशीयाप्यवादो योगः तेन निर्वृत्तः तेनेति तृतीयासमर्थात् निर्वृत्त इत्येतस्मि
न्नर्थे यथाविहितं प्रत्ययो भवति देशनामधेये गम्यमाने देशे तन्नाम्नीति वर्त्तते पियोगो कुशम्ब
येन सहस्रेण निर्वृत्ता साहस्री परिखा कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी हैतौ कल्तीरिचय
था योगं तृतीयासमर्थविभक्तिः तस्य निवासः तस्येति षष्ठीसमर्थात् निवास इत्येतस्मि
न्नर्थे यथाविहितं प्रत्ययो भवति देशे तन्नामधेये गम्यमाने निवसन्त्यस्मिन्निति निवासः ऋज
नावानां निवासो देशः आर्जुनावः शैब्यः अदूरभवश्च पूर्वा समर्थविभक्तिरनुवर्तते तस्येति
षष्ठीसमर्थात् अदूरभव इत्येतस्मिन्नर्थे यथाविहितप्रत्ययो भवति विदिशायाः अदूरभवं न्मा

रंवैदिशाम् व्रिह्मिमनितम् वकारः पूर्वैषां त्रयाणामर्थानां सन्निधानार्थः तेनोत्तरेषु योगेषु चत्वा
रोर्थाः संबध्यन्ते उञ्च वनादर्शाग्रन्तवर्त्तन्ते उवर्णान्तात्प्रातिपदिकात् यथायथं समर्थवि
भक्तियुक्तात् अञ्प्रत्ययो भवति तत्रिवसन्तीत्येवमादिषु चतुर्ष्वर्थेषु अणोपवादः आरत्नवम्
कक्कतकाक्कतवं कर्कटेलकार्कटेलवं नद्यान्तपरत्वान्मतुः भवति इक्षुमती तु मतोश्चापि
काः प्राकत्वात्सूत्रादिभ्योणः मतोश्च बह्वजंगात् बह्वजंगं यस्य प्रसौ बह्वजंगः मतुपु सैध्र
तदन्तात्प्रातिपदिकात् अञ्प्रत्ययो भवति चातुरर्थिकः अणोपवादः ऐकटावत् सैध्रकावत्
बह्वजंगादिति किं आह्निमतं यावमतं अंगग्रहणं बह्वजिति तद्विशेषणं यथा विज्ञायते तन्म
तन्तविशेषणं माविज्ञायते तमालावतां निवासो मालावतं बह्वचः कूपेषु बह्वचः प्रातिप
दिकादञ्प्रत्ययो भवति चातुरर्थिकः कूपेषु अभिधेयेषु अणोपवादः यथासंभवमर्थः संबध्यते
दीर्घवरत्रेण निर्वृत्तः दैर्घवरत्रः कापिलवरत्रः उदक् च विपाशः उपाशा उत्तरे कूले ये कूपास्ते
ष्वभिधेयेषु अञ्प्रत्ययो भवति चातुरर्थिकः अबह्वजर्थं आरंभः दात्तेन निर्वृत्तः दात्तः गौप्तः उ
दगिति किं दक्षिणतो विपाशः कूपेष्वणेव भवति दात्तः गौप्तः स्वरे विशेषः महती सूक्ष्मेक्षिका

का॰
वृ॰
२४५

वर्त्तते संकलादिभ्यश्च कूपेष्विति निवृत्तं संकल इत्येवमादिभ्यः अञ्प्रत्ययो भवति चातुरर्थिकः
अञोपवादः यथासंभवं समर्थविभक्तयः संगतः संकलः संकलेन निर्वृत्तः सांकलं पौष्कलं सं-
कल पुष्कल उत्तम उडुप उत्पुटकुंभनिधान सुदक्ष सुदत्त सुभूत सुनेत्र सुपिंगल
सिकता पूतीक पूलास कूलास पलाश निवेश गवेष गंभीर इतर शर्मन् अहन् लोमन्
वेमन् वरुण बहुल सद्योज अभिषिक्त गोभृत् राजभृत् भल्लमाल स्त्रीषु सौवीरसाल्व-
प्राक्षु देशेन नाम्नो यस्य विशेषणं सौवीरादयः स्त्रीत्वं च ज्याप्प्रातिपदिकात् अञ्प्रत्ययो
भवति चातुरर्थिकः अणोपवादः सौवीरेषु स्त्रीलिंगे देशे वाच्ये साल्वप्राक्षु च सौवीरेषु तावत् दत्त-
मित्रेण निर्वृत्ता दात्तमित्री नगरी साल्वेषु विधूमाग्निना निर्वृत्ता वैधूमाग्नी प्राक्षु बलपिक-
मर्देन निर्वृत्ता काकमर्दी माणिचरी जातूषी सुवास्त्वादिभ्योऽण् सुवास्त्व इत्येवमादिभ्यः
अण्प्रत्ययो भवति अञ् उवर्णान्तलक्षणस्य कपलक्षणस्य चापवादः सुवास्तोरदूरभवं
सौवास्तवं वार्णवं अण्ग्रहणं ङ्यांमतयोर्बाधनार्थं सौवास्तवी नदी सुवास्तु वर्णु भ-
ण्डु खण्डु सेवालिं कर्पूरिं शिखण्डिन् गर्त्त कर्कश शटीकर्ण कृष्ण कर्णकङ्कन्यम

ती गोह अहिमथे तोणी तोणीशब्दाद्दाणप्रत्ययो भवति चातर्थिकः यथासंभवमर्थसंबन्धः
कूपलक्षणस्याणोपवादः तोणीति कार्यनिर्देशः यावता प्रत्ययविधौ पंचमी युक्ता सर्वाव
स्थाप्रतिपन्नार्थमेवमुच्यते तोणीशब्दः सर्वावस्थः प्रत्ययमुत्पादयति केवलस्तदन्तस्य तोणाः
अजकतोणाः हैमकतोणाः कोपधाच्च ककारोपधात्प्रातिपदिकात् अण्प्रत्ययो भवति
चातर्थिकः यथासंभवमर्थसंबन्धः कूपलक्षणस्यावर्णान्तस्यापवादः कार्णच्छिद्रके
न निर्वृत्तः कार्णच्छिद्रकः कूपः कालवेष्टकः कृकवाकेन निर्वृत्तः कार्कवाकके त्रैशंक
वे वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोरीहणकृशाश्वर्श्यकुमुद
काशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः वु
ञादयः सप्तदश प्रत्ययाः अरीहणादयोपि सप्तदशैव प्रातिपदिकगणाः आदिशब्दः प्रत्येक
मभिसंबध्यते तेन यथासंख्यं सप्तदशभ्यः प्रातिपदिकगणेभ्यः सप्तदश प्रत्यया भवन्ति चा
तुरर्थिकाः अणोपवादः यथासंभवमर्थसंबन्धः अरीहणादिभ्यो वुञ्प्रत्ययो भवति आ
रीहणकम् द्रौघणकं अरीहणद्रुघण खदिर भगल उलप संवरायण भास्त्रायण।

का.
वृ ४
२५

सैंद्रायण वैराभीयण गोयस्थास्थाविपथविपाशा उवेङ्कु उदम्वन खेड्डायन खांडवीरणका
शकृत्स्न जांबवत शैलिपा किरण अरिहीय अरीहणादिः कृशाश्वादिभ्यश्छणप्रत्ययोभ
वति काशांश्वीयः अरिष्टीयः कृशाश्व अरिष्ट वेश्मन विशाल रोमक सुरक प्रतर सद
श पुरग सुख धूम अजिन विनत अवनत विकुट्यास अरं अर्यस्माय मौद्गल कृशाश्वा
दिः ऋश्यादिभ्यः कप्रत्ययोभवति ऋश्यकः न्यग्रोधकः ऋश्य न्यग्रोध शर निलीन निवान
निवात निबद्ध विबद्ध परिगूढ उपगूढ रैवत बिल्व वैमतायन सौशायन शाण्डिल्यायन
स्रयत्त शिरीष विधिर मूल बाहु शिंशपा वेदिर शर्करा अनड्वह परिवेश खंड वीरण
ऋश्यादिः कुमुदादिभ्यष्ठच्प्रत्ययोभवति कुमुदिकं शार्करिकं कुमुद शर्कर न्यग्रोध इक्क
ट गर्त्तकूटी अश्वत्थ बल्वज परिवाप शिरीष यवाष कूप विपर्कर कुमुदादिः काशादि
भ्यः इलप्रत्ययोभवति काशिलं पाशिलं काश पाश अश्वत्थ पलाश पीयूक्ष विस तृण
नड वन कर्दम कशूर कर्कट गुहा काशादि तृणादिभ्यः सप्रत्ययोभवति तृणसा नड
सा तृण नड मूल पल वर्ण पर्ण अर्जुन जनवल तृणादिः प्रेक्षादिभ्य इनिप्रत्ययोभ।

भ

वति प्रेक्षी फलकी प्रेक्षा फलका बंधुका ध्रुवका म्रकावुधका क्षिपका न्यग्रोधा इक्कटा सं
कटा सकप्रेक्षादिः अश्मादिभ्यः रप्रत्ययो भवति अश्मरं यूथरं अश्मन् यूथ तृष मीन द
र्भ वृन्दगुरु खंड नखशिखा अश्मादिः सख्यादिभ्यः ढञ्प्रत्ययो भवति साखेयं दान्तेयम्
सखिदत्त वायुदत्त गोफिल भल्ल चक्र चक्रवाक छगल अशोक करवीर सीनक स
रक सरस सर सख्यादिः संकाशादिभ्यो ण्यप्रत्ययो भवति सांकाश्यं कांपील्यं संकाश
कंपील कश्मीर शूरसेन सुपथिन् पत्तच यूप अंश नाग वेश्मन् कुटकूट मालिन तीर्थ
अग्नाति विनत विकर नासिका गोफिल संकान देवगादी वक्र चक्रवाक श्याल अशो
क करवी सूकर मकर सवर्णा सुरस संकाशादिः बलादिभ्यः यप्रत्ययो भवति बल्यं कुल्य
बल वल पुल उल चुल वण कुल वणच बलादि पक्षादिभ्यः फक्प्रत्ययो भवति पा
क्षायणः भौषायणः पक्ष तुष अंड कंबलिका चित्रकर्ण हस्तिवल पक्षादिः कर्णादि
भ्यः फिञ्प्रत्ययो भवति कार्णायनि वासिष्ठायनिः कर्ण वसिष्ठ अर्क शिल द्रुपद आनत
भस्य पांचजन्य स्फिकथा कुलिशा कुंभी जीवदत्त जन्वी ओडीवत्ते कर्णादिः सुतंगमा

का॰
वृ॰
२५२

ठिल्पः इलच् प्रत्ययो भवति मातंगमिः सौतिचित्तिः सुतंगम मुनिचित्त विप्रचित्त महाचित्त
महापुत्र श्वेत गडिक शुक्र विग्र बीजवापिन् अर्जुनश्वन् अजिर सुतंगमादिः प्रगद्या
दिभ्यः ञ्यप्रत्ययो भवति प्रागद्यं मागद्यं प्रगदिन् मगदिन् खडिक कलिव खडिव चू
डार वंजर कोविदार प्रगद्यादिः वराहादिभ्यः कक्प्रत्ययो भवति वाराहकं पालाशकं
वराह पलाश शिरीष विनद्ध स्थूल निनद्ध विदग्ध निमदिकं गोमठिकं कुमुद गोमठ र
थकार दशग्राम अश्वत्थ शाल्मली मुनिस्थल चूलमडकर्णा कुमुदादिः शिरीषशब्दः
कुमुदादिषु अरीहणादिषु वराहादिषु च पठ्यते औत्सर्गिकोपि तत इञ्जिष्यते तस्य वरा
णादिषु दर्शनाल्लुग्भवति तथाचोक्तं शिरीषाणामदूरभवो ग्रामः शिरीषतस्य वनं शिरीष
वनमिति जनपदेलक देशेतन्नाम्नि चातुरर्थिकः प्रत्ययो विहितः तस्य देशविशेषे जन
पदेभिधेये लुग्भवति ग्रामसमुदायो जनपदः पंचालानां वासो जनपदः पांचालाः कुरवः म
त्स्याः अंगाः सुह्माः पौंड्राः इह कस्मान्न भवति उदुंबरा अस्मिन्देशे सन्तीति औदुंबरो जनपदः वै
दिशो जनपद इति तन्नाम्नीति वर्तते न चात्रलवन्नामधेयं भवति वरणादिभ्यश्च वरणा

स्येवमादिभ्य उत्पन्नस्य चातुरर्थिकस्य प्रत्ययलुब्भवति अजनपदार्थ आरंभः वरणानामदूर
भवो ग्रामो नगरं वरणाः शृंगीः शाल्मलयः चकारोनुक्तसमुच्चयार्थः आकृतिगणतामस्य बो
धयति कटुकबदर्या अदूरभवो ग्रामः कटुकबदरी शिरीषा कांजीवरणा शाल्मलयः पूर्वे
गोदौ अपरेगोदौ आलिंगपायनपर्णी साफा जलपदा मथुराउज्जयिनी गया तक्षशि
ला उरसा शर्कराया वा शर्करा शब्दादुत्पन्नस्य चातुरर्थिकस्य प्रत्ययस्य वा लुब्भवति किम
र्थमिदं वाग्रहणं यावता शर्करा शब्दः कुमुदादिषु वराहादिषु च पठ्यते तत्र पाठसामर्थ्यात्प्र
त्ययस्य पक्षे श्रवणं भविष्यति एवं तर्हि एतज्ज्ञापयति शर्करा शब्दादौत्सर्गिकोपि भवति तस्मा
द्विकल्पितो लुब्भवति शर्करा शार्करं गणपाठाच्च श्रवणं उत्तरसूत्रविहितावेव द्वौ प्र
त्ययौ तदेवं षड्रूपाणि भवन्ति शार्करः शार्करं शार्करिकं शार्करिकं शार्करकं शार्करीयमि
ति ठक्च शर्करा शब्दात् ठक् छ इत्येतौ प्रत्ययौ भवतः चातुरर्थिकौ यथा संभवमर्थस
म्बन्धः शार्करिकं शार्करीयं नद्यां मतुप् नद्यामभिधेयायां मतुप् प्रत्ययो भवति चातुरर्थिकः
तन्नाम्नो देशस्य विशेषणं नदी उदंबरा अस्यां सन्ति उदंबरावती मशकावती वेणावती पुष्करा

का·
वृ प्र
२५२

वतीइक्षुमतीद्रुमतीइहकस्मान्नभवतिभागीरथीहैमरथीमन्नवन्तस्यातनामधेयत्वात मधा
दिभ्यश्च मधुइत्येवमादिभ्यःशब्देभ्यःमन्नप्रत्ययोभवतिचातुरर्थिकःअत्रयथार्थंग्रामेभः
मधुमान विसमान मधु विस स्यान्तऋषि इत्येवेन कर्कन्धु शमीकरीर शमीहिमवविस
सरा शविशाणा तमन वाल्मत्तीयावद्दष्टका मसति भक्ति ग्रामटीशाकलावेटा कुमदनडवे
तसेभ्यो न्मन्न कुमदनडवेतस इत्येतेभ्यःत्मन्नप्रत्ययोभवतिचातुरर्थिकःयथासंभवमर्थसं
बंधःकुमद्वान नड्वान वेतस्वान महिषाश्चेतिवक्तव्यं महिष्मान देशः नडशादाड्वलच।
नडशादशाद्वाभ्यांड्वलचप्रत्ययोभवति चातुरर्थिकःयथासंभवमर्थसंबंधःनड्वलाशाद्व
लं शिखायावलच शिखाशब्दाद्वलच्प्रत्ययोभवतिचातुरर्थिकःयथासंभवमर्थसंबं
धःशिखावलंनामनगरं मन्नप्रकरणेपिशिखायावलचंवक्ष्यतितदेशार्थंवचनं उ।
त्करादिभ्यः छः उत्करमित्येवमादिभ्यःछप्रत्ययोभवतिचातुरर्थिकःयथासंभवमर्थसंबंधः
उत्करीयं शफरीयं उत्कर शफल पिप्पलापिप्पली मूलीय अश्मन अर्कपर्ण सुवर्ण।
वेलाजिन अन्तिक कितव आतप अनेक पलाश त्रिवर्ण विमक असत्य काश।

त्वद्‌ भस्त्रा विशाला जन्या अजिन दर्भा उद्गोषवृन्त खदिर सूर्पणाय श्यावनक नितान्त वृक्षा-
तरेद्‌ दृवृत्त श्याव्‌ दृवृत्त नडादीनां कुक्‌ च नड इत्येवमादीनां कुगागमो भवति कश्च प्रत्ययश्चातु-
रर्थिकः यथासंभवमर्थसंबंधः नडकीयं प्लक्षकीयं नड प्लक्ष बिल्व वेणु वेत्र वेतस त्रि इक्षु
काष्ठ कपोत क्रुञ्चा ह्रस्वत्वं च तक्षन्‌ नलोपश्च शेषे शेष इत्यधिकारः या इत ऊर्ध्वं प्रत्य-
यानुक्रमिष्यामः शेषे ते वेदितव्याः उपयुक्तादन्यः शेषः अपत्यादिभ्यः चतुरर्थपर्यन्तेभ्यः
योन्यर्थोः स शेषः तस्येदमित्यस्याविशेषा ह्यपत्यसमूहादयः तेषु जातादयो माभूवन्निति शेषाधिका-
रः क्रियते किंच सर्वेषु जातादिषु घादयो यथा स्युरनन्तरेणैव चार्थादेशनेन सम्बन्धे कृतार्थता
मा विज्ञायीति साकल्यार्थं शेषवचनं तथा च वक्ष्यति राष्ट्रावारपाराद्‌ घखौ राष्ट्रियः अवारपा-
रीणः सोऽयमिति लक्षणं चाधिकारश्च चक्षुषा गृह्यते चाक्षुषं रूपं श्रावणः शब्दः दृषदि पिष्टा
दार्षदाः सक्तवः उलूखले क्षुण्णा औलूखला यावकाः अश्वैरुह्यते आश्वो रथः चतुर्भिरुह्यते
चातुरं शाकटं चतुर्दश्यां दृश्यते चातुर्दशं रक्षः राष्ट्रावारपाराद्‌ घखौ राष्ट्रावारपारशब्दाभ्यां
यथासंख्यं घखौ प्रत्ययौ भवतः राष्ट्रियः अवारपारीणः विगृहीतादपीष्यते अवारीणः पारीणः विपरीता-

का
वृत्र
२५२

स्त्रैपारावारीणः प्रकृतिविशेषोपादानमात्रेण तत्रावत्प्रत्यया विधीयन्ते तेषां जातादयोर्थाः समर्थ
विभक्तयश्च पुरस्तादुच्यन्ते ग्रामाद्यखञौ ग्रामशब्दाद्यखञौ प्रत्ययौ भवतः ग्राम्यः ग्रामीणः
कत्र्यादिभ्य एयकञ् कत्र्ति इत्येवमादिभ्यः एयकञ् प्रत्ययो भवति कात्रेयकः औम्भेयकः कत्रि उम्भि पु
ष्कर पुष्कल मोदन उम्भ कुण्डिन नगरी माहिष्मती धर्मती कुल्यायाय लोपश्च कुलकुक्षिग्री
वाभ्यः श्वास्यलंकारेषु कुलकुक्षिग्रीवाशब्देभ्यः यथासंख्येन श्वासि अलंकार इत्येतादिष्व
र्थेषु एयकञ् प्रत्ययो भवति कौलेयको भवति श्वा चेत् कौलोन्यः कौक्षेयको भवत्यसिश्चेत् कौक्षोन्यः
ग्रैवेयको भवति अलंकारश्चेत् ग्रैवोन्यः नद्यादिभ्य एयण् नदी इत्येवमादिभ्यः एयण् प्रत्ययो भव
ति नादेयं माहेयं पूर्वनगरीशब्दाच्चेयण् ततो पौरनगरेयं केचित्तु पूर्वनगरीति पठन्ति विकल्पं च
प्रत्ययं कुर्वन्ति पौरेयं वारेयं पौरेयमिति तदुभयमपि दर्शनं प्रमाणं नदी मही वाराणसी
श्रावस्ती कौशाम्बी वनकौशाम्बी काशफरी खादिरी पूर्वनगरी पावा मावा शाल्वा दावा से
तकी वडवाया वृषे दक्षिणापश्चात्पुरसस्त्यक् दक्षिणा पश्चात् परं इत्येतेभ्यः त्यक् प्रत्ययो
भवति यौधिकः दाक्षिणाभ्यः पाश्चात्यः पौरस्त्यः कापिश्याः ष्फक् कापिशीशब्दात् ष्फक् प्र

त्ययोभवति शैषिकः फकारोदीर्घार्थः कापिशायनंमधु कापिशायनीद्राक्षा वाह्ल्युर्दिपर्द्दिभ
श्चेतिवक्तव्यं वाह्लायनीऔर्दायनीपार्दायनी रंकोरमनुष्येण्च रंकुशब्दाद्‌णप्रत्ययोभ
वतिचकारात्फक्शैषिकः अमनुष्येभिधेयेरांकवोगौः रांकवायणोगौः अमनुष्यइतिकिं
रांकवोमनुष्यः ननुचरंकुशब्दः कच्छादिषुपठ्यतेतत्रमनुष्यतत्स्थयोर्वुञितिमनुष्यपरता
द्वुञेवभवितव्यं कच्छादिषुपाठादणपिसिद्धः किमिहमनुष्यप्रतिषेधेनाण्ग्रहणेन
च तदुच्यतेनैवायंमनुष्यप्रतिषेधः किन्तर्हिरंक्वित्युक्तन्यायेनमनुष्यसदृशप्राणिनिप्र
तिपत्तिः क्रियतेरांकवः कंबलइतिफक्तु भवतिविशेषविहितेनचफका अणोबाधामा
भूदितिअण्ग्रहणमपिक्रियते द्युप्रागपागुदक्प्रतीचोयत् दिव् प्राच् अपाच् उदच् प्र
तीच् इत्येतेभ्यः यत्प्रत्ययोभवतिशैषिकः दिव्यं प्राच्यं अपाच्यं उदीच्यं प्रतीच्यं अव्यया
त्कालवाचिनःपरतात्युतुलौभवतःप्राक्तने कन्थायाष्ठक् कन्थाशब्दात्ठक्प्रत्ययोभ
वति शैषिकःकान्थिकः वर्णौवुक् कन्थायाइत्येववर्णौयाकन्थातस्यावुक्प्रत्ययोभव
तिठकोपवादः वर्णोलामनदःसोस्यसमीपोदेशोवर्णुः तद्विषयार्थवाचिनःकन्थाशब्दा

का° वृ°
२५५

ठंप्रत्ययः यथाहिजातंहिमवान्मकान्यिकं ग्रवयामप ग्रव्ययाम्प्रत्ययोभवति शैषि
कः ग्रमेहक्वतसित्रेभ्यस्त्यब्विधेयोव्ययात्तस्तः ग्रमात्यः इहत्यः क्वत्यः ततस्त्यः तत्रत्यः यत्रत्यः
परिगणनंकिं औपरिष्टः पारतः वृद्धात्तकोभवति ग्रारातीयस्त्यप्रोप्राद्वेनियतेनित्यंश्च
वं निश्चेगाते निर्गतावर्णाश्रमेभ्यः निष्ट्यः चण्डालादिः ग्राविष्क्ंदसि ग्राविःषात्त्वाक्ंद
मिविषयेत्य प्रत्ययोभवति निष्ट्यः ग्ररण्याण्णोवक्तव्यः ग्रारण्याः सुमनसः दूरादिभ्यः दूरेभ्यः प
थिकः उत्तरादाहञ् औत्तराहः पश्चिमोत्तरः समानात्तरस्था पश्चमंतिम सम इत्येतेभ्यः ग्रन्यत
रस्यां त्यप्रत्ययोभवति शैषिकः पश्चमत्यः पश्चमत्तनं सामन्त्यम् सामत्तनं सामत्तनं सम
त्त्यैवोत्तिद अपिन्दनीयोभवति शौवस्तिकं तीररूप्योत्तरपदादञ्जौ तीरोत्तरपदात रूप्योत्त
रपदाञ्च प्रातिपदिकात यथासंख्यमञ् ञ इत्येतौ प्रत्ययौ भवतः शैषिकः अण्णोपवादः का
कतीरं पाल्वलतीरं रूप्योत्तरपदात वार्करूप्यं वायसरूप्यं तीररूप्यान्तादिति नोक्तं बहु
च्यूत्त्वंभूत्ताद्माभूदिति बाहुतीरं दिक्पूर्वपदादसंज्ञायाञ्जः दिक्पूर्वपदात्प्रातिपदिका
दसंज्ञायां विषये ञ प्रत्ययोभवति असंज्ञायामिति प्रकृतिविशेषणं अणोपवादः पौरस्त्या

लःदाक्षिणशालःअसंज्ञायामितिकिं पूर्वेषुकामशमःअपरेषुकामशमःदिक्संख्येसंज्ञा
यामितिसमासःप्राचांग्रामनगराणामित्युत्तरपदवृद्धिःपदग्रहणंस्वरूपविधिनिरासा
र्थम मद्रेभ्योञ दिक्पूर्वपदादितिवर्त्तते मद्रशब्दादञ्प्रत्ययोभवति शैषिकःपौरमद्रःआप
रमद्रःदिशोमद्राणामितिपर्युदासादवृद्धिः उदीच्यग्रामाच्चबह्वचोन्तोदात्तात दिग्ग्रह
णंनिवृत्तं उदीच्यग्रामवाचिनःप्रातिपदिकात बह्वचःअन्तोदात्तादञ्प्रत्ययोभवतिशैषि
कःअणोपवादःशावपुरं मातनगरं उदीच्यग्रामादितिकिं माथुरं बह्वचइतिकिं धजीधा
जे अन्तोदात्तादितिकिं शार्करीधानंशब्दोलित्स्वरेणाद्युदात्तः प्रस्थोत्तरपदपलद्या
दिकोपधादण प्रस्थोत्तरपदात पलद्यादिभ्यःककारोपधाच्चप्रातिपदिकात अण्प्रत्ययो
भवतिशैषिकः उदीच्यग्रामलक्षणस्याञोपवादःमातकीप्रस्थःमावीप्रस्थःपलद्यादिभ्यः
पालदःपार्षदःककारोपधात नैलीनकःवैयातकःपलद्यादिषुयोवाहीकग्रामःततठञ्ञि
ठयोरप्यपवादःयथागोष्ठीनैकेती गोमतीशब्दःपठ्यते ततोरोपधेतोःप्राचामितिवुञो
पवादः वाहीकशब्दःकोपधोपिचपठ्यतेततःपरंकंवाधितं अणुग्रहणंबाधकबाधनार्थंपल

का॰
वृ॰
२५५

वीपविषत पारिषदः यकृल्लोम पटच्चर वाहीक कलकीट बहुकीट कपालाभिधान गोष्ठी
नैकेती परिखा सूरसेन गोमती उदपान कंठादिभ्यो गोत्रे गोत्र इह प्रत्ययार्थो न च प्रकृतिविशे
षणं किं तर्हि एवं सम्बध्यते कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितः तदन्तेभ्यः तेभ्य एव अण् प्रत्ययो
भवति शैषिकः छस्यापवादः काण्वाश्छात्राः गौकक्षः गोत्र इति किं कण्वो देवता अस्य का
ण्वः तस्येदं काण्वीयं इञश्च गोत्र इत्येव गोत्रे यः इञ् विहितः तदन्तात्प्रातिपदिकादण् प्रत्य
यो भवति शैषिकः छस्यापवादः दाक्षाः प्लाक्षाः माहकाः गोत्र इत्येव सौतंगमेरिदं सौतंग
मीयं न द्व्यचः प्राच्यभरतेषु द्व्यचः प्रातिपदिकात् प्राच्यभरतगोत्रादिञन्तादण् प्रत्ययो
न भवति पूर्वेण प्राप्तः प्रतिषिध्यते चैङ्कीयाः पौष्पीयाः काशीयाः वाशीयाः द्व्यच इति किं
पान्नागारः प्राच्यभरतेष्विति किं दाक्षाः प्लाक्षाः काशीया इति कथमुदाहृतं यावता काश्या
दिभ्यष्ठञ्ञिठौ इति भवितव्यं नैतद्देशवाचिनः काशिशब्दस्य तत्र ग्रहणं वेदिशब्देन साह
चर्यात् गोत्रात् वृद्धाच्छ एव भवति ज्ञापकाद् अण् च भवति प्राच्यगोत्राण्नभवतीति स्वशब्देन भ
रतानामुपादानं कृतं वृद्धाच्छः गोत्र इति नानुवर्तते सामान्यविधानं वृद्धात्प्रातिपदिका

च्छप्रत्ययो भवति शैषिकः गार्गीयः वात्सीयः शालीयः मालीयः अणोपवादः अव्ययती
ररूप्योत्तरपदोदीच्यग्रामकोपधविधीन्तु परत्वाद्बाधते भवतष्ठक्छसौ वृद्धादित्येव भव
च्छब्दात् वृद्धात् ठक् छस् इत्येतौ प्रत्ययौ भवतः शैषिकौ छस्यापवादः सकारः पदत्वा
र्थभवतस्त्यदादित्वाद्वृद्धसंज्ञा भावत्कः भवदीयः अवृद्धात्तु भवतः शत्रन्तादणेव भवति भा
वतः काश्यादिभ्यष्ठञ्ञिठौ काश्यादिभ्य एवमादिभ्यः ठञ् ञिठ इत्येतौ भवतः शैषिकौ इ
कार उच्चारणार्थः ञकार उभयत्र विपर्यादेशानुबंधः स्त्रीप्रत्यये विशेषः काशिकी
काशिका चैदिकी चैदिका वृद्धादित्यत्रानुवर्तते येनवृद्धाः पठ्यन्ते वचनप्रामाण्यान्
भ्यः प्रत्ययविधिः देवदत्तशब्दः पठ्यते तस्य च प्राचां देश इति वृद्धसंज्ञा देवदत्तिका वाही
कग्रामस्य तु नास्ति वृद्धसंज्ञा देवदत्तः कथं भाष्य उदाहृयते वा नामधेयस्य वृद्धसंज्ञा वक्त
व्या देवदत्तीया देवदत्ताः इति यावता वृद्धसंज्ञापक्षे काश्यादिपाठात् ठञ्ञिठाभ्यां भवित
व्यं तत्रैवं वर्णयन्ति वानामधेयस्येति व्यवस्थितविभाषेयं सा छे कर्तव्ये भवति ठञ्ञिठ
यत्नो भवतीति काशि चेदि संज्ञासंवाह अच्युत मोदमान शकुलाद हस्तिकर्षू कुना

का॰
वृ४
२५९

मधिमपाकवर्णगोथायानभौरिकि प्ररिदंम गाथमित्र देवदत्त दासमित्र दाक्षाग्राम था
पायवान युवराज उपराजसिन्धुमित्र देवराज आपदादिः पूर्वपदात्कालान्तात् आ
पत्कालिकी आपत्कालिका और्ध्वकालिकी और्ध्वकालिका वाहीकग्रामेभ्यश्च वृ
द्धादित्येव वाहीकग्रामवाचिभ्यः वृद्धेभ्यः ठञ्ञिठौ प्रत्ययौ भवतः शैषिकौ कस्यापवा।
दैःशाकलिकी शाकलिका पान्थविकी पान्थविका विभाषोशीनरेषु वृद्धादिति।
वर्तते ग्रामेभ्य इति च उशीनरेषु ये ग्रामास्तद्वाचिभ्यः वृद्धेभ्यः प्रातिपदिकेभ्यः विभाषा ठ
ञ्ञिठौ प्रत्ययौ भवतः आह्वजालिकी आह्वजालिका आह्वजालीया सौदर्शिनीकी
सौदर्शिनिका सौदर्शनीया ओर्देशे ठञ् वृद्धादिति नानुवर्तते उत्तरसूत्रेष्वनवृद्धग्रह
णात् उवर्णान्ताद्देशवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः नैषादक
र्षुकः शाबरजंबुकः देश इति किं पटोश्छात्राः पाटवाः ठञ्ञिठयोः प्रकरणे ठञः केवल
स्यानुवृत्तिर्लक्ष्यते इति ठञ्ग्रहणं कृतं वृद्धात्प्राचाम् उरिदेशाद इत्येव उवर्णान्ताद्वृद्धा
त्प्राग्देशवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः शाकजंबुकः नापितवा।

त्वकः पूर्वेणासिद्धेऽत्रनियमार्थं वचनं वृद्धादेव प्राचाम वृद्धान्न भवति मालवस्थी
मालवस्थः ॥ धन्वयोपधाद्वुञ् ॥ वृद्धादिति वर्त्तते देशादिति च धन्ववाचिनः प्रातिपदि
कात् वुञ् प्रत्ययो भवति शैषिकः धन्वशब्दो मरुदेशवचनः पारेधन्वकः ऐरावतकः
योपधात् सांकाश्यकः काम्पील्यकः ॥ प्रस्थपुरवहान्ताच्च ॥ वृद्धादित्येव देशादिति च प्र
त्ययाद्वुः प्रत्येकमभिसंबध्यते प्रस्थपुरवह इत्येवमन्तात् देशवाचिनः वृद्धात्प्रातिपा
दिकाद्वुञ् प्रत्ययो भवति शैषिकः छस्यापवादः मालाप्रस्थकः शोनप्रस्थकः नान्दी
पुरकः कान्तीपुरकः पैलुवहकः फाल्गुनीवहकः पुनरोपधस्ततउत्तरेणैव सिद्धा
प्राग्यर्थमिह ग्रहणम् ॥ रोपधेतोः प्राचाम् ॥ वृद्धादित्येव देशादिति च तद्विशेषणं प्रा
ग्ग्रहणं रेफोपधादीकारान्ताच्च वृद्धात्प्राग्देशवाचिनः वुञ् प्रत्ययो भवयो भ
वति शैषिकः छस्यापवादः पाटलिपुत्रकः ईतः खल्वपि काकन्दीकः कर्दकः
मामर्मकः प्राचामिति किं दात्तामित्रीयः तपरकरणं विस्पष्टार्थं ॥ जनपदतद
वध्योः ॥ वृद्धादित्येव देशादिति च तद्विशेषणं जनपदतदवध्योर्वृद्धाज्जनपदवा

का॰
वृ॰
२५७

विनः तदवधिपर्वाचिनश्च प्रातिपदिकात् वुञ् प्रत्ययो भवति शैषिकः छस्यापवादः
अभिसारकः आदेशनकः जनपदावधेः खल्वपि त्रैगुह्रकः श्यामायनकः तदवधि
ग्रहणं जनपदपर्ववदत्वेनैव ग्रामः किमर्थं तद्ग्रहणं वाधकवाधनार्थं गर्तोत्तरप
दाच्छं वाधित्वा वुञेव जनपदावधे भवति त्रैगर्तकः अवृद्धादपि बहुवचनविषया
त्। जनपदतदवध्योरित्येव अवृद्धाद्वृद्धाच्च जनपदवाचिनः तदवधिवाचिनश्च ब
हुवचनविषयात्प्रातिपदिकाद्वुञ् प्रत्ययो भवति शैषिकः अणकयोरपवादः अवृ
द्धाज्जनपदात्तावत् अङ्गाः वङ्गाः आङ्गकः वाङ्गकः अवृद्धाज्जनपदावधेः अजमीढाः
आजक्रन्दः आजमीढकः आजक्रन्दकः वृद्धाज्जनपदात् दार्वाः कोववाः दार्वकः को
ववकः वृद्धाज्जनपदावधेः कालञ्जनाः वैकुलिशाः कालञ्जनकः वैकुलिशकः
विषयग्रहणमन्यत्राभावार्थं जनपदैकदेशा बहुत्वमाभूत् वर्त्तन्ते अपिग्रहणं किम
र्थं वृद्धात्पूर्वेणैव सिद्धं उक्तौडिन्यत्यायनवाधामावित्तायीति समसूीयते
कच्छादिपाठकर्त्तादूरपदात् देशाद्रूपेवउत्तरपदश्चक्रुः प्रत्येकमभिसंवध्यते का।

५८

कच्छाग्न्याद्युत्तरपदाद्देशवाचिनः वृद्धादवृद्धाच्च प्रातिपदिकाद्वुञ् प्रत्ययो भवति छाणो
रपवादः दारुकच्छकः पैप्पलीकच्छकः काण्डाग्नकः वैभुजाग्नकः सैन्धुवक्रकः बाहु
वर्त्तकः चाक्रवर्त्तकः धूमादिभ्यश्च धूमादिभ्यः देशवाचिभ्यः प्रातिकेभ्यः वुञ् प्रत्ययो
भवति धौमिकः अणादेरपवादः धौमकः षाड्डकः पाडियशाब्दः पठ्यते तस्यायावयता
देववुञि सिद्धे सामर्थ्यादादेशार्थग्रहणं तथा विदेहानन्तशब्दौ याजनपदलक्षणेषु
वुञि सिद्धे आदेशार्थः पाठः विदेहानां क्षत्रियाणां स्वं वैदेहकं आनन्तकं समुद्रशब्दः
पठ्यते तस्य नाविमनुष्ये च वुञिष्यते सामुद्रिका नौः सामुद्रिको मनुष्यः अन्यत्र न भवति
सामुद्रं लवणं सामुद्रं जलमिति धूम षडांडव शशादिर आर्जुनाव वैडायन स्थाली
घोषस्थाली माहकस्थाली राजगृह सत्रासाह भक्षाली समुद्रकूल मद्रकूलद्व्या
हाव त्र्याह्व संस्फीय बर्बर गर्भ विदेह आनन्त पटार पावेय घोष षष्ठ वल्ली आरा
ली धार्त्तराज्ञी अवयातीर्थ कूल सौवीरेषु समुद्र ऊहि सुन्तरूपग्रहणं उज्जयिनी
दक्षिणापथा संकेत नगरात्कुत्सनप्रावीण्ययोः नगरशब्दाद्वुञ् प्रत्ययो भवति कौ

का॰
वृ॰
२५८

षिकः कुत्सने प्रावीण्ये च गम्यमाने प्रत्ययार्थविशेषणं चैतत् कुत्सिते प्रावीण्ये च जातादौ प्र
त्ययार्थ इति कुत्सनम् निन्दनं प्रावीण्यं नैपुण्यं तेनायं मुषितः इह नागरेण मनुष्येण संभाव्यत
एतन्नागरकेण चौरा हि नागरका भवन्ति केनेदं चित्रं लिखितं इह नागरेण मनुष्येण संभा
व्यत एतत् नागरकेन प्रवीणा हि नागरका भवन्ति कुत्सनप्रावीण्ययोरिति किं नागराः
ब्राह्मणाः कर्त्र्यादिषु संज्ञाणात् तस्माच्चर्यान्ते ज्ञात्मार्पयते तस्मिन्नागरे युक इति प्रत्यु
दाहरणं अरण्यान्मनुष्ये अरण्यशब्दाद्वुञ् प्रत्ययो भवति शैषिकः मनुष्येभिधेये उ
पसंख्यानिकस्यापवादः आरण्यको मनुष्यः पथ्यध्यायन्यायमनुष्यहस्तिष्विति वक्त
व्यं आरण्यकः पन्थाः आरण्यकाध्यायः आरण्यको मनुष्यः आरण्यको न्यायः आरण्यको विहा
रः आरण्यको हस्ती वा गोमयेषु आरण्यका गोमयाः एतेष्विति किं आरण्याः पशवः
विभाषा कुरुयुगन्धराभ्यां कुरुयुगन्धरशब्दाभ्यां विभाषा वुञ् प्रत्ययो भवति शैषिकः
कौरवकः कौरवः यौगन्धरकः यौगन्धरः जनपदशब्दावेतौ ताभ्याम् अवृद्धादपीति जनप
दतद्वध्योरिति नित्ये वुञि प्राप्ते विकल्प उच्यते कुरुशब्दः कच्छादिष्वपि पठ्यते तत्र च

नातएणापिभवतिनैषायुगन्धरार्थाविभाषामनुष्यतत्स्थयोस्तुकुरुशब्दान्नित्यंवुञ्भवति
कौरवकोमनुष्यःकौरवकमस्यहसितमिति मद्रवृज्योःकन् मद्रवृजिशब्दाभ्यांकन्प्रत्य
योभवति शैषिकःजनपदवुञोपवादःमद्रेषुजातःमद्रकःवृजिकः कोपधादण् देश
इत्येवककारोपधात् प्रातिपदिकात् अण्प्रत्ययोभवतिशैषिकोजनपदवुञोपवादःअन्य
उपत्यादिसूत्रेणैवकोपधादेसिद्धःऋषिकेषुजातःआर्षिकःमाहिषकःअण्ग्रहणम
वृद्धान्नादपियथास्यात् इक्ष्वाकुषुजातःऐक्ष्वाकः कच्छादिभ्यश्च देशइत्येवकच्छइत्ये
वमादिभ्यःदेशवाचिभ्यःप्रातिपदिकेभ्यःअण्प्रत्ययोभवतिशैषिकःवुञादेरपवादःकच्छे
भवःकाच्छःसैन्धवःवार्णवः कच्छशब्दोनबहुवचनविषयःतस्यमनुष्यतत्स्थयोःवुञर्थः
पाठःविजापकशब्दःपठ्यते तस्यकोपधादित्येवाणिसिद्धे ग्रहणमनुष्यार्थं कच्छसिन्धु
वर्णुगन्धार मधुमत कंवोज कश्मीरः साल्व कुरु अनुषंड द्वीप अनूप आजवाह विजाप
ककुलूनरंकु मनुष्यतत्स्थयोर्वुञ् कच्छादिभ्यइत्येव मनुष्ये मनुष्यस्थेचजातादौप्रत्य
यार्थेकच्छादिभ्यःवुञ्प्रत्ययोभवतिअणोपवादः काच्छकोमनुष्यःकाच्छकमस्यहसितं

का॰
वृ॰
२५५

जल्पितं काच्छका अस्य चूडा सैन्धवको मनुष्यः सैन्धवकमस्य हसितं जल्पितं सैन्धविका
चूडा अमनुष्यतत्स्थयोरिति किं काच्छो गौः सैन्धवः वार्णवः अपदातौ साल्वात् साल्वशब्दः
कच्छादिषु पठ्यते ततः पूर्वेणैव मनुष्यतत्स्थयोः वुञि सिद्धे नियमार्थं वचनं अपदातावेव म
नुष्ये मनुष्यस्थे च साल्वशब्दाद्वुञ् प्रत्ययो भवति साल्वको मनुष्यः साल्वकमस्य हसितं अप
दाताविति किं साल्वः पदातिर्व्रजति गोयवाग्वोश्च गवि यवाग्वां च जातादौ प्रत्ययार्थे साल्वश
ब्दाद्वुञ् प्रत्ययो भवति शैषिकः कच्छाद्यणोऽपवादः साल्वको गौः साल्विका यवागूः साल्वम
न्यत् गर्तोत्तरपदाच्छः गर्तोत्तरपदाद्देशवाचिनः प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः
अणोऽपवादः वाहीकग्रामलक्षणां प्रत्ययं परत्वाद्बाधते वृकगर्तीयं श्वाविद्गर्तीयं उत्तरप
दग्रहणं बहुच्पूर्वनिरासार्थं वाहुगर्तं गहादिभ्यश्च गह इत्येवमादिभ्यः प्रातिपदिकेभ्यः
छः प्रत्ययो भवति शैषिकः अणादेरपवादः गहीयः अन्तस्थीयः देशाधिकारेपि संभवापेक्षं
विशेषणं न सर्वेषां मध्यमध्यमं चरणे इति पठ्यते तस्यायमर्थः मध्यशब्दः प्रत्ययसंनियोगेन
मध्यममापद्यते मध्यमीया चरणेन प्रत्ययार्थे अणा भवति इति तदेतद्विशेषणं पदः सर्यतोऽम्

थिवीमध्यस्य मध्यमभावः चरणसम्बन्धेनेणावामलन्ताणोरणीति चस्य खपार्श्वतसोर्लोपः स
खतीयं पार्श्वतीयं कुग्जनस्य परस्य च जनकीयं परकीयं देवस्य चेति वक्तव्यं देवकीयं वेणु
कादिभ्यश्छण् एवक्तव्यः वैणुकीयं वैत्रकीयं श्वाकृतिराणीयं वैत्रकीयं औत्तरपदीयं प्रास्थीयम
माध्यमिकीयं गहाद्यन्तस्थस्य सम विषम मध्यमं चान्यकरणे उत्तमसङ्ग्रेम मगध पूर्वपक्ष
अपरपक्ष अधशाख उत्तमशाख समानशील एकग्राम एकवृक्ष ईषत्र इषीक अनीक अमस
न्त कामप्रस्थ खडायनि काबेरणि लावेरणि सैसिरि शौंगी आसुरि आहिंस आमित्र
व्याडि भौजि आद्धि आग्निशर्मि देवशर्मि श्रौति वराटकि वाल्मीकि क्षेमवृद्धि उत्तर
अन्तर मुखपार्श्वतसोर्लोपः जनपरयोः कुक् च देवस्य च वेणुकादिभ्यश्छण् प्राचां कटादेः
देशाख्येव तद्विशेषणं प्राग्ग्रहणं प्रागदेशवाचिनः कटादेः प्रातिपदिकात् छप्रत्ययो भव
ति शैषिकः अणोपवादः कटनगरीयं कटघोषीयं कटपल्वलीयं राज्ञः क च असंभवा
द्देशाधिकारो न विशेषणं राज्ञः ककारश्चान्तादेशो भवति छश्च प्रत्ययः शैषिकः राजकी
यं आदेशमात्रमत्र विधेयं प्रत्ययस्तु वृद्धाच्छ इत्येव सिद्धः वृद्धादकेकान्तखोपधात् देश

इत्येव वृद्धाद्देशवाचिनः अकइकइत्येवमन्तात् खकारोपधाच्च प्रातिपदिकात् छप्रत्ययो भ
वति शैषिकः कोपधलक्षणस्याणोपवादः वाहीकग्रामलक्षणस्य प्रत्ययस्य रोपधेतोः प्रा
चामिति वा अकान्तात्तावत् आरीहणकीयम् द्रौघणकीयं इकान्तात् आश्वत्थिकी
यं शाल्मलिकीयं खोपधात् कौटिशिवीयं आयोमखीयं अकेकान्तग्रहणे कोप
धग्रहणं सौमकार्थं सौमकीयं वैंडकीयं कन्थापलदनगरग्रामह्रदोत्तरपदा
त् देशाद् इत्येव वृद्धादिति च कन्थाद्युत्तरपदाद्देशवाचिनः वृद्धात्प्रातिपदिकात् छप्रत्य
यो भवति शैषिकः वाहीकग्रामलक्षणस्य प्रत्ययस्यापवादः दाक्षिकन्थीयं माहिक
कन्थीयं दाक्षिपलदीयं माहकिपलदीयं दाक्षिनगरीयं माहकिनगरीयं दाक्षिग्रा
मीयम् माहकिग्रामीयं दाक्षिह्रदीयम् माहकिह्रदीयम् पर्वताच्च पर्वतशब्दा
च्छप्रत्ययो भवति शैषिकः अणोपवादः पर्वतीयो राजा पर्वतीयो मनुष्यः विभाषा
मनुष्ये अमनुष्येऽभिधेये पर्वतशब्दाद्विभाषा छप्रत्ययो भवति पूर्वेणनित्ये प्राप्ते वि
कल्प उच्यते पर्वतीयानि फलानि पर्वतानि फलानि पर्वतीयमुदकं पर्वतमुदकम्

अप्रमनुष्य इतिकिम पार्वतीयोमनुष्यः कृकणपर्णाद्भारद्वाजे देशाइत्येव भारद्वाजदे
शवचनेनगोत्रशब्दः प्रकृतिविशेषणंचन प्रत्ययार्थः कृकणपर्णशब्दाभ्यांभारद्वाजा
देशवाचिभ्यांछप्रत्ययोभवतिशैषिकः अणोपवादः कृकणीयं पर्णीयंभारद्वाजइति
किंकार्कणंपार्णं ॥ इतिजयादित्यविरचितायांकाशिकायांवृत्तौचतुर्थस्याध्यायस्य
द्वितीयःपादः ॥ युष्मदस्मदोरन्यतरस्यांखञ्च ॥ देशाधिकारोनिर्वृत्तः युष्मदस्मा
दोः खञ्प्रत्ययोभवतिशैषिकः चकाराच्छश्च अन्यतरस्यांग्रहणाद्यथाप्राप्तमण्च तदेते
त्रयः प्रत्ययाभवन्ति तत्रवैषम्याद्यथासंख्येनभवतित्यदादित्वाद्वृद्धसंज्ञयोः युष्मदा
स्मदोः छेप्राप्तेयमनेकप्रत्ययत्रयंभवति यौष्माकीणः आस्माकीनः युष्मदीयः अस्म
दीयः यौष्माकः आस्माकः तस्मिन्नणिचयुष्माकास्माकौ तस्मिन्निति साक्षाद्विहि
तः खञ्निर्दिश्यतेनचकारानुकृष्टश्छः तस्मिन्खञि अणिच युष्मदस्मदोर्यथासंख्यं
युष्माकास्माकइत्येतावादेशौभवतः तस्मिन्नयोरादेशादेशौप्रतियथासंख्यंकस्मान्नभ
वतियोगविभागःक्रियतेतस्मिन्खञियुष्मदस्मदोर्युष्माकास्माकौभवतः अणिच ।

का॰
वृ॰
२५।

तियौष्माकीनः आस्माकीनः यौष्माकः आस्माकः तस्मिन्नणि चेति किं युष्मदीयं अस्म
दीयं ॥ तवकममकावेकवचने ॥ एकवचनपरयोर्युष्मदस्मदोः तवकममकइत्येतावा
देशौ भवतः तस्मिन्नञ्नि अणि च परतः निमित्तयोश्च यथासंख्यम् ॥ पूर्ववदेव न भवा
ति न त्वचनलमृत्तात्तस्मिन्निति प्रत्ययलक्षणाणप्रतिषेधादेकवचनपरता युष्मदोन्नसंभ
वति वचनात्प्रत्ययलक्षणेन भविष्यति अथवा नैवेदं प्रत्ययग्रहणं किन्तर्ह्यर्थग्रहणं
एकवचने युष्मदस्मदी एकस्यार्थस्य वाचके तेन तवकममकावेवादेशौ प्रतिपद्यते इति
सूत्रार्थः तावकीनः मामकीनः तावकः मामकः तस्मिन्नणि चेत्येतेन त्वदीयः मदीयः
अर्धाद्यत् ॥ अर्धशब्दाद्यत्प्रत्ययो भवति शैषिकः अणोपवादः अर्ध्यं ॥ सपूर्वाट्ठञ्च ॥
वालेयार्धिकं गौतमार्धिकं ॥ परावराधमोत्तमपूर्वाच्च ॥ पर अवर अधम उत्तम इत्येवं
पूर्वादर्धशब्दाद्यत्प्रत्ययो भवति शैषिकः परार्ध्यं अवरार्ध्यं अधमार्ध्यम् उत्तमार्ध्यं पूर्व
ग्रहणं किं नयपरावराधमोत्तमेभ्य इत्येवोच्यते अर्धादित्यनुवर्तते तेन तस्य तत्पूर्वता विज्ञा
स्यते परावराधमोत्तमादि क्रमाद्यापिक्षः परमावमवरमावमिति तवकमार्थंनान दिक्॥

रूपत्वे परेण ठञ्यतौ स्याताम् अस्मात् पूर्वग्रहणात् यत्प्रत्ययएवभवति परार्ध्यं अवरार्ध्यं
दिक्पूर्वपदाट्ठञ्च दिक्पूर्वपदादर्धान्तात् प्रातिपदिकात् ठञ्प्रत्ययोभवतिचकाराद्यश्च
शैषिकः अणोपवादः पूर्वार्ध्यं पौर्वार्धिकं दक्षिणार्ध्यं दाक्षिणार्धिकं पदग्रहणं स्वरूप
विधिनिरासार्थं ग्रामजनपदैकदेशादञ्ठञौ दिक्पूर्वादित्येव ग्रामैकदेशवाचिनः ज
नपदैकदेशवाचिनश्च दिक्पूर्वपदादर्धान्तात्प्रातिपदिकात् अञ्ठञ् इत्येतौ प्रत्ययौ भ
वतः शैषिकौ यतोपवादौ इमे खल्वस्माकं ग्रामस्य जनपदस्य वा पौर्वार्धाः पौर्वार्धिकाः
दाक्षिणार्धाः दाक्षिणार्धिकाः मध्यान्मः मध्यशब्दात् मः प्रत्ययो भवन्ति शैषिकः अणोप
वादः मध्यमः आदेश्चेति वक्तव्यं आदिमे अवोधसोलोपश्च अवमं अधमम् अ सांप्रतिके
अकारः प्रत्ययो भवति मध्यशब्दात् सांप्रतिके जातादौ प्रत्ययार्थे मस्यापवादः सांप्रति
कं साम्प्रतं युक्तमुचितं समम् उच्यते नातिदीर्घं नातिह्रस्वं मध्यं काष्ठं नात्युत्कृष्टो नात्यप
कृष्टो मध्यो वैयाकरणः मध्या स्त्री द्वीपादनुसमुद्रं यञ् समुद्रसमीपे यो द्वीपः तद्विषया
त् द्वीपशब्दाद् यञ् प्रत्ययो भवति शैषिकः कच्छादिषु पाठादणो मनुष्यवुञोश्चापवादः

का॰
वृप्र॰
२६२

हैमं हैमाभवन्तोनवरतिचकं अनुसमद इतिकिं हैमपमन्यत् कालाट्ठण् कालेविशेष
वाचिनः प्रातिपदिकात् ठण् प्रत्ययो भवति शैषिकः अणोपवादः ठस्येकादेशकपरनाद्यायते
मासिकं आर्धमासिकं सांवत्सरिकं यथाकथंचिद्गुणवृत्त्याकालेवर्त्तमानात्प्रत्ययइष्यते
कादम्बपुष्पिकं व्रैहिपलाशिकं तत्रजातइतिप्रागतः अधिकारः प्रावृट्शरदम् शार
त्वक्त्राद् ठण् प्रत्ययो भवति प्रावृडभिधेये शैषिकः अणोपवादः प्रावृड् इति कर्मटल्ल
ते न प्रावृड्वान्वृष्यः अनभिधानात् शारदिकं प्रावृट्शारदमन्यत् विभाषारोगातपयोः
शारद इत्येव रोगे आतपे वाभिधेये शारद्क्त्र्याद्विभाषा ठण् प्रत्ययो भवति शैषिकः अणो
पवादः शारदिको रोगः शारदः शारदिक आतपः शारदः रोगातपयोरिति किं शारदं
दधि निशाप्रदोषाभ्यां च निशाप्रदोषशब्दाभ्यां ठण् प्रत्ययो भवति शैषिकः कालादिति
नित्ये प्राप्ते विकल्प उच्यते नैशं नैशिकम् प्रादोषम् प्रादोषिकं श्वसस्तुट् च विभा
षेत्यनुवर्त्तते श्वस्शब्दाद्विभाषा ठण् प्रत्ययो भवति तस्य च तुडागमः त्यप्रत्ययोप्यत्र विहितः
पक्षे त्यप् सामान्यतः अस्मादिति पत्ताभ्यामनेकेषु युलावपि भवतः शौवस्तिकम् श्वस्त्य

ष्यतनं संधिवेलाद्यृतुनक्षत्रेभ्योऽण् ॥ कालादित्येवं संधिवेलादिभ्यः ऋतुनक्षत्रेभ्यश्च
अण्प्रत्ययो भवति शैषिकः ठञोऽपवादः। ऋतुग्रहणं वृद्धाच्छस्य बाधनार्थं संधिवेलादि
भ्यस्तावत् सान्धिवेलं सान्ध्यं ऋतुभ्यः ग्रैष्मम् शैशिरम् नक्षत्रेभ्यः तैषम् पौषम् संधि
वेला संध्या अमावास्या त्रयोदशी चतुर्दशी पौर्णमासी प्रतिपत् संवत्सरात् फलपर्वणोः
प्रावृष एण्यः प्रावृष्शब्दाद् एण्यप्रत्ययो भवति शैषिकः ऋत्वणोरपवादः वार्षिकं वासः
वार्षिकमनुलेपनम् छन्दसि ठञ् वर्षाशब्दात् छन्दसि विषये ठञ् प्रत्ययो भवति शैषि-
कः ठकोऽपवादः स्वरविशेषः नभश्च नभस्यश्च वार्षिकावृतू हेमन्ताच्च छन्दसीत्येव हे-
मन्तशब्दाच्छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः ऋत्वणोरपवादः सहश्च सहस्यश्च
हैमन्तिकावृतू योगविभाग उत्तरार्थः वसन्ताच्च वसन्तशब्दाच्छन्दसि विषये ठञ् प्र-
त्ययो भवति शैषिकः ऋत्वणोरपवादः मधुश्च माधवश्च वासन्तिकावृतू सर्वत्राण् च त-
लोपश्च हेमन्तशब्दाद् अण् प्रत्ययो भवति तत्संनियोगेन चास्य तकारलोपः हैमनं वासः
हैमनमनुलेपनम् सर्वत्रग्रहणं शैषिकाधिकारनिवृत्त्यर्थम् छन्दसि भाषायां च सर्वत्रै

का॰
वृ॰ प्र॰
२५२

तत्रवतितनवकं टसीतितानवर्तिष्यते सैवानन्तवृत्तिः शार्ङ्गेनाणा बाध्यते अन्यापि केवलपू
र्वसूत्रेणैवयार्थं हेमन्तकमितिहि भाषायामहन्तस्मरन्ति अथाणा चेति चकारः किमर्थः
अणावयथाप्राप्तं चञ्चतणितिकः पुनरनयोरणोविशेषः अतणितकारलोपोनास्ति
हैमन्तीपंक्तिरितितदेवं त्रीणिरूपाणिभवन्ति हैमन्तिकम् हैमन्तम् हैमनमिति ।
सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौतुट्च कार्यादित्येवसायमादिभ्यः शब्देभ्यः अव्यये
भ्यश्चकालवाचिभ्यः ट्युट्युलौप्रत्ययौभवतः तयोश्चापिष्टयोस्तुडागमोभवति सायन्त
नं चिरन्तनम् प्राह्णेतनम् प्रगेतनम् अव्ययेभ्यः दोषातनम् दिवातनम् प्रातस्तनम्
सायमितिमकारान्तमव्ययं ततोव्ययत्वादेवसिद्धः प्रत्ययः यत्तस्यतेनतत्कर्मणोश्च
त्रिसायंशब्दस्य सेटमकारान्तत्वं प्रत्ययसन्नियोगेन निपात्यते दिवसावसाने सायः
चिरशब्दस्यापिमकारान्तत्वं निपात्यते प्राह्णेप्रगेइत्येकारान्तत्वं चिरपरुत्परारिभ्यस्त
वक्तव्यः चिरत्नम् परुत्नम् परारित्नम् प्रगस्य छन्दसि गलोपश्च प्रत्नं अग्रपश्चाड्डिमम् म
र्वे अग्रिमम् पश्चिमम् अन्ताच्चेतिवक्तव्यं अन्तिमम् विभाषापूर्वाह्णापराह्णाभ्याम्

पूर्वाह्णापराह्णाभ्यां विभाषा ट्युट्युलौ प्रत्ययौ भवतः तुंच तयोरागमः कालाट्ठञि प्रा
प्ते वचनं पक्षे सोपि भवति पूर्वाह्णेतनं अपराह्णेतनम पौर्वाह्णिकम आपराह्णिकम
घकालतनेषु कालनाम्न इति सप्तम्या अलुक यदा तु सप्तमी समर्थविभक्तिः पूर्वा
ह्णः सोढोस्येति तदा पूर्वाह्णतन इति भवितव्यम तत्र जातः अणादयो घादयश्च
प्रत्ययाः प्रकृतास्तेषामितः प्रभृत्यर्थाः समर्थविभक्तयश्च निर्दिश्यन्ते तत्रेति सप्तमी
समर्थात जात इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति स्रुघ्ने जातः स्रौघ्नः औत्सः औ
दपानः राष्ट्रियः अवारपारीणः शाकलिकः पांसविकः कात्रेयः डौम्रेयकः प्रावृषष्ठ
प् प्रावृट्छब्दात्सप्तमीसमर्थाज्जात इत्येतस्मिन्नर्थे ठप्प्रत्ययो भवति एण्यस्यापवादः
पकारः स्वरार्थः प्रावृषि जातः प्रावृषिकः संज्ञायां शरदो वुञ तत्र जात इत्यनुवर्त्त
ते शरच्छब्दात्तत्र जात इत्यस्मिन्नर्थे संज्ञायां विषये वुञ प्रत्ययो भवति ऋत्वणोपवादः
समुदायेन चेत्संज्ञा गम्यते शारदका दर्भाः शारदकाः मुद्गाः दर्भविशेषस्य कस्यचि
न्मुद्गविशेषस्य कस्यचिदियं संज्ञा संज्ञायामिति किम शारदम सस्यं संज्ञाधिकारे

केचित्कृतलब्धक्रीतकुशला इति यावदनुवर्त्तयंति पूर्वाह्णापराह्णार्द्रामूलप्रदोष
वस्कराद्वुन् पूर्वाह्णादिभ्यः शब्देभ्यः वुन् प्रत्ययो भवति तत्र जात इत्यस्मिन्विषये संज्ञा
यां गम्यमानायां पूर्वाह्णकः अपराह्णकः विभाषा पूर्वाह्णापराह्णाभ्यामित्यस्याप
वादः आर्द्रकः मूलकः नक्षत्राणामपवादः प्रदोषकः निशाप्रदोषाभ्यां चेत्यस्यापवा
दः अवस्करकः औत्सर्गिकस्याणोपवादः असंज्ञायां तु यथाप्राप्तमाद्यन्तादयः एव भव
न्ति पथः पन्थ च पथिशब्दाद्वुन्प्रत्ययो भवति तत्र जात इत्यस्मिन्नर्थे अणोपवादः प्रत्य
यसन्नियोगेन च पथः पंथ इत्ययमादेशो भवति पथि जातः पन्थकः अमावास्याया
वा अमावास्याशब्दाद्वुन्प्रत्ययो भवति तत्र जात इत्यस्मिन्विषये सन्धिवेलादिषु पाठा
दणोपवादः अमावास्यकः आमावास्यः एकदेशविकृतस्यानन्यत्वादमावस्याशब्दादस्या
पि भवति अमावस्यकम् अमावस्यम् अ च अकारश्च प्रत्ययो भवति अमावास्यायाः
तत्र जात इत्यस्मिन्विषये पूर्वेण वुन्नणोः प्राप्तयोरयं तृतीयः प्रत्ययो विधीयते अमाव
स्यः अमावास्यकः सिन्ध्वपकराभ्यां कन् सिन्धुशब्दादपकरशब्दाच्च कन्प्रत्ययो भव

ति तत्रजातइत्यस्मिन्विषये सिन्धुशब्दः कच्छादिः ततोऽणि मनुष्यतत्स्थयोर्वुञि प्राप्ते व
चनं अपकरशब्दादौत्सर्गिकेऽणि सिन्धुकः अपकरकः अणञौ च सिन्ध्वपकर
शब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः तत्रजातइत्यस्मिन्विषये सर्वेणका
णि प्राप्ते वचनं सैन्धवः आपकरः श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसु
हस्तविशाखाषाढाबहुलाल्लुक् श्रविष्ठादिभ्यः नक्षत्रेभ्य आगतस्य जाताथ
र्थे लुग्भवति तस्मिन्कृते स्त्रीप्रत्ययस्यापि लुक्तद्धितलुकीति लुग्भवतीति श्रविष्ठा
सु जातः श्रविष्ठः फल्गुनः अनुराधः स्वातिः तिष्यः पुनर्वसुः हस्तः विशाखः अ
षाढः बहुलः लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम् चित्रा
यां जाता चित्रा रेवती रोहिणी स्त्रीप्रत्ययस्य लुकि कृते गौरादिपाठाद्ङीष् फल्गुन्य
षाढाभ्यां टानौ वक्तव्यौ फल्गुनी अषाढा श्रविष्ठाषाढाभ्यां छण् वक्तव्यः
श्राविष्ठीयः आषाढीयः स्थानान्तगोशालखरशालाच्च स्थानान्तात्प्रातिप
दिकात् गोशालाशब्दात्खरशालाशब्दाच्च जातार्थे लुग्भवति प्रत्ययस्य गोस्था

ते जातः। गोस्थानः। अश्वस्थानः। गोशालः। खरशालः। वत्सशालाभिजिदश्वयुक्छ
तभिषजो वा। वत्सशालादिभ्यः परस्य जातार्थे प्रत्ययस्य लुग्भवति वा। वत्सशा
लायां जातः वत्सशालः। अभिजित्। अभिजितः। अश्वयुक्। आश्वयुजः। शतभिष
क्। शातभिषजः। बहुलग्रहणस्यायं प्रपंचः। नक्षत्रेभ्यो बहुलं। नक्षत्रशब्देभ्यः उ
त्तरस्य जातार्थे प्रत्ययस्य बहुलं लुग्भवति। रोहिणः। रौहिणः। मृगशिराः। मार्गशीर्षः।
कृतलब्धक्रीतकुशलाः। तत्रेति सप्तमीसमर्थात् कृतादिष्वर्थेषु यथाविहितं प्रत्य
यो भवति। स्रुघ्ने कृतो लब्धो वा क्रीतो वा कुशलो वा स्रौघ्नः। माथुरः। राष्ट्रियः। ननु च
यत्र यत्कृतं जातमपि तत्र तद्भवति यत्र च क्रीतं लब्धमपि तत्र तद्भवति किमर्थं भेदेनो
पादानं क्रियते। शब्दार्थस्याभिन्नत्वात्। वस्तुमात्रेण लब्धं क्रीतं भवति शब्दार्थस्त्वभि
न्न एव। प्रायभवः। तत्रेत्येव सप्तमीसमर्थात् ङ्याप्प्रातिपदिकात् प्रायभव इत्ये
तस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। प्रायशब्दः साकल्यस्य किंचिन्न्यूनतामाह। स्रु
घ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः। माथुरः। राष्ट्रियः। प्रायभवग्रहणमनर्थकं तत्र

भवेनेनकृतत्वात् अनित्यभावः प्रायभवइतिचेन्मुक्तसंघायेनतत्वं उपजान्वुपकर्णो
पनिवेष्ठक् उपजान्वादिभ्यः सप्तमीसमर्थेभ्यः प्रायभवइत्यस्मिन्नर्थेठक् प्रत्ययोभ
वतिअणोपवादः औपजानुकः औपकर्णिकः औपनीविकः संभूते तत्रेत्येवसप्तमी
समर्थात् कलवाचिनः प्रातिपदिकात् संभूतइत्यस्मिन्नर्थेयथाविहितंप्रत्ययोभ
वतिअवकृप्तिः प्रमाणानतिरेकश्चसंभवत्यर्थेइहगृह्यते नोत्पत्तिः सत्तावाजात
भवाभ्यांगतत्वात् स्रुघ्नेसंभवतिस्रौघ्नः माथुरः राष्ट्रियः कोशाड्ढञ् कोशशब्दात्
ढञ्प्रत्ययोभवतितत्रसंभूतइत्यस्मिन्विषयेअणोपवादः कोशेसंभूतंकौशेयंवस्त्रं
कृमिविशेषान्तेनोत्पन्नेनभवति खड्गाकोशाद्वा कालात्साधुपुष्प्यत्पच्यमानेषु त
त्रेत्येवकालविशेषवाचिनः सप्तमीसमर्थेभ्यः साध्वादिष्वर्थेषुयथाविहितंप्रत्ययो
भवति हेमन्तेसाधुः हैमनः प्रावारः शैशिरमनुलेपनम् वसन्तेपुष्प्यन्तिवासन्त्यः
कुन्दलताः ग्रैष्म्याः पाटलाः शारदिपच्यन्तेशारदाः शालयः ग्रैष्मायवाः उप्तेच त
त्रेत्येवकालादितिचसप्तमीसमर्थात्कालवाचिनः प्रातिपदिकात् उप्तेर्थेयथावि

हितंप्रत्ययोभवति हेमन्तेउप्तन्तेहैमन्ताःयवाःग्रैष्माःशालयःयोगविभागउत्तरार्थः
आश्वयुज्यावुञ् आश्वयुजीशब्दाद्वुञ्प्रत्ययोभवति उप्तेर्थेठञोपवादःआश्वयुज्या
मुप्ताःआश्वयुजकाःमाषाअश्विनीभिर्युक्तापौर्णमासीआश्वयुजी ग्रीष्मवसा
न्तादन्यतरस्याम् ग्रीष्मवसन्तशब्दाभ्यामन्यतरस्यांवुञ्प्रत्ययोभवतिउप्तेर्थेऋत
ण्वोपवादःग्रैष्मम् सस्यम् ग्रैष्मकम् वासन्तम् वासन्तकं देयमृणे तत्रेत्येवका
लादितिच सप्तमीसमर्थात् कालवाचिनःप्रातिपदिकात् देयमित्येतस्मिन्नर्थेयथा
विहितंप्रत्ययोभवतियत्तद्देयमृणंचेत्तद्भवति मासेनदेयमृणंमासिकं आर्धमासि
कं सांवत्सरिकम् ऋणइतिकिम् मासेदेयाभिक्षा कलाप्यश्वत्थयवबुसाद्वुन्
कालादित्येव कलाप्यश्वत्थयवबुसशब्देभ्यःकालवाचिभ्यःसप्तमीसमर्थेभ्यःदेय
मित्येतस्मिन्नर्थेवुन्प्रत्ययोभवतिकलाप्यादयःशब्दाःसाहचर्यात्कालेवर्त्तन्तेयस्मि
न्कालेमयूराःकलापिनोभवन्तिसकलापीयस्मिन्नश्वत्थाःफलन्तिसोश्वत्थायस्मि
न्यवबुसमुत्पद्यतेसयवबुसशब्देनोच्यतेकलापिनिकालेदेयमृणंकलापकं अ

सन्त्यकम् यवुसकम् ग्रीष्मावरसमाद्वुञ् ग्रीष्मावरसमशब्दाभ्यां वुञ् प्रत्ययो भव
ति देयमृणमित्यस्मिन्नर्थे ञ्य एवञोरपवादः ग्रैष्मे देयमृणं ग्रैष्मकम् आवरसमकम्
प्रत्ययार्थं वकारग्रहणं वृद्ध्यर्थं संवत्सराग्रहायणीभ्यां ठञ् च संवत्सराग्रहायणीशब्दा
भ्यां ठञ् प्रत्ययो भवति चकाराद्वुञ् च देयमृणमित्यस्मिन्नर्थे संवत्सरे देयमृणं सांव
त्सरिकम् सांवत्सरकम् आग्रहायणिकम् आग्रहायकम् वतिवक्ष्यति ठञ् अग्र
हणं मन्येवेलादिषु संवत्सरात् फलपर्वणोरिति पठ्यते तत्र ऋणे ऋणे वेन विवक्षि
ते ग्रहणं बाधिनात् ठञेव यथा स्यादिति व्याहरति मृगः तत्रैत्यैव कालादिति च समर्था
सो समर्थात् कालवाचिनः प्रातिपदिकात् व्याहरति मृग इत्यस्मिन्नर्थे यथाविहितं प्र
त्ययो भवति निशायां नैशः नैशः नैशिकः प्रादोषः प्रादोषिकः मृग इति किं निशा
यां व्याहरति उलूकः तदस्य सोढम् कालादित्येव तदिति प्रथमासमर्थात् कालवा
चिनः प्रातिपदिकादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत् प्रथमासमर्थं सो
ढं चेत्तद्भवति सोढं जितमभ्यस्तमित्यर्थः निशासहचरितमध्ययनं निशा नैशः सोढम्

का॰
तृ॰ ३
२६७

सायङ्कालस्य नैशः नैशिकः प्रादोषः प्रादोषिकः तत्र भवः कालादिति निवृत्तम् तत्रेति स
प्तमीसमर्थात् नाम्नः प्रातिपदिकात् भव इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति सत्ता
भवत्यर्थे स्त्रे तेन जन्म तत्र जात इति गतत्वात् स्रुघ्ने भवः स्रौघ्नः माथुरः राष्ट्रियः दिगा
दिभ्यो यत् दिगादिभ्यः यत्प्रत्ययो भवति तत्र भव इत्यस्मिन्विषये अण एकस्य चापवा
दः दिशि भवं दिश्यं वर्ग्यं मुखजघनशब्दयोः शरीरावयवार्थः इह पाठः सेनायामेवं
सेनायां जघनमिति दिक वर्ग पूग गण पक्ष धाय्या मित्र मेध अन्तर रहस अली
क उखा साक्षिन् आदि अन्त मुख जघन मेघ यूथ उदकात्संज्ञायाम् न्याय वंश अ
नुवंश देश काल आकाश शरीरावयवाच्च शरीरावयववाचिनः प्रातिपदिकात्
यत्प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये अणोऽपवादः दन्तेषु भवं दन्त्यं ओष्ठ्यम् कण्ठ्यम्
इति दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् दृत्यादिभ्यः ढञ्प्रत्ययो भवति तत्र भव इत्यस्मिन्विष
ये दृतौ भवं दार्तेयम् कौक्षेयम् कालशेयम् वास्तेयम् आहेयम् जनेविषयम् अस्ति
शब्दः प्रातिपदिकोऽनतिरूढः ग्रीवाभ्योऽण् च ग्रीवाशब्दात् अण्प्रत्ययो भवति चका

yatsyeva tatrabhava ityasminviṣaye śarīrāvayavadyato'pavādaḥ grīvāsubhavam graivam graiveyam grīvā
śabdo dhamanīvacanaḥ tāsāṃ bahutvād bahuvacanam gambhīrāñ ñyaḥ gambhīraśabdāt ñyapratyayo bhava
ti tatrabhava ity etasminviṣaye 'ṇo'pavādaḥ gambhīre bhavaṃ gāmbhīryam bahirdevapañcajanebhyaśce
ti vaktavyaṃ bāhyam daivyam pāñcajanyam avyayībhāvāc ca avyayībhāvasaṃjñakāt parimukhā
dikāt ñyapratyayo bhavati tatrabhava ity etasminviṣaye 'ṇo'pavādaḥ na ca sarvasmād avyayībhā
vād bhavati kiṃ tarhi parimukhādeḥ parimukhādīnāṃ gaṇapāṭhasyaitad eva prayojanam teṣāṃ viśe
ṣaṇam avyayībhāvagrahaṇam parimukhe bhavaṃ pārimukhyaṃ pārihanavyaṃ parimukhāder anyatra na bhava
ti aupakūlam aupamūlam parimukha parihanu paryoṣṭha paryulūkhala parisīra anusīra u
pakūla upakalāpa anupatha anupada anugaṅgā anutila anusītā anusāya a
nuyava anuyūpa anuvaṃśa antaḥpūrvapadāṭ ṭhañ avyayībhāvād ity eva antaḥśabdo vibha
ktyarthe samasyate tena antaḥpūrvapadāt avyayībhāvāt ṭhañ pratyayo bhavati tatrabhava ity etasminviṣa
ye 'ṇo'pavādaḥ antargehikaṃ antaragārikam samānaśabdāṭ ṭhañ vaktavyaḥ samāne bhavaṃ sā

का॰
वृ॰
२९८

मानिकं तदादेश्च समानग्रामिकं समानदेशिकम् अध्यात्मादिभ्यश्च अध्यात्मिकम् आ
धिदैविकं आधिभौतिकं अध्यात्मादिराकृतिगणः ऊर्ध्वदमाट्ठञ्वक्तव्यः और्ध्वंदमिकः
ऊर्ध्वशब्देन समानार्थः ऊर्ध्वशब्दः ऊर्ध्वदेहाच्च और्ध्वदेहिकम् लोकान्तरपदाच्च ऐहलौ
किकम् पारलौकिकम् मुखपार्श्वाभ्यां तसन्ताभ्यामीयप्रत्ययो भवति मुखतीयम् पार्श्व
तीयम् कुग्जनस्य परस्य च जनकीयम् परकीयम् मध्यशब्दादीयः मध्यीयः मण्मीयौ च
वक्तव्यौ मध्यमम् मध्यमीयम् मंमीयौ वक्तव्यौ माध्यमम् मध्यमीयम् मध्यान्दिनण्चा
स्मात् मध्ये भवं माध्यन्दिनम् स्थाम्नो लुग्वक्तव्यः अश्वत्थामा अजिनान्ताच्च वृकाजिनः
समानस्य तदादेश्च अध्यात्मादिषु चेष्यते ऊर्ध्वंदमाच्च देहाच्च लोकोत्तरपदस्य च मुख
पार्श्वतसोरीयः कुग्जनस्य परस्य च ईयः कार्योथ मध्यस्य मंमीयौ प्रत्ययौ तथा मध्यमा
ध्यंदिनेवास्मात्स्थाम्नो लुगजिनात्तथा ग्रामात्पर्यनुपूर्वात् अव्ययीभावादित्येव परि
अनु एवंपूर्वात् ग्रामशब्दाट्ठञ्प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये पारिग्रामिकः
आनुग्रामिकः जिह्वामूलाङ्गुलेश्छः जिह्वामूलशब्दाच्छप्रत्ययो भवति तत्र भवः

मध्य

इत्येतस्मिन्विषये यतोपवादः जिम्लीयम अंगुलीयम वर्गान्ताश्च वर्गशब्दा-
न्ताश्च प्रातिकात छप्रत्ययो भवति तत्रभव इत्येतस्मिन्विषये कवर्गीयम चवर्गीयं
पवर्गीयम अशब्दे यत्खावन्यतरस्याम वर्गान्तादित्येव शब्दादन्यस्मिन्प्रत्ययार्थे व-
र्गान्तात प्रातिकात अन्यतरस्यां यत्खौ प्रत्ययौ भवतः तत्रभव इत्यस्मिन्विषये छप्रा-
प्ते वचने पक्षे सोपि भवति वासुदेववर्ग्यः वासुदेववर्गीणः वासुदेववर्गीयः अर्जु-
नवर्ग्यः अर्जुनवर्गीणः अर्जुनवर्गीयः युधिष्ठिरवर्ग्यः युधिष्ठिरवर्गीणः युधि-
ष्ठिरवर्गीयः अशब्द इति कवर्गीयो वर्णः कर्णललाटात्कनलंकारे कर्णल-
लाटशब्दाभ्यां कन्प्रत्ययो भवति तत्रभव इत्यस्मिन्विषये अलंकारेभिधेये जातो-
पवादः कर्णिका ललाटिका अलंकार इति किम कर्ण्यंललाट्यम तस्या-
व्याख्यान इति च व्याख्यातव्यनाम्नः व्याख्यायते अनेनेति व्याख्यानम व्याख्या-
तव्यस्य नाम व्याख्यातव्यनाम अस्येति षष्ठीसमर्थात व्याख्यातव्यनाम्नः प्राति-
पदिकात व्याख्यानेभिधेये यथाविहितं प्रत्ययो भवति तत्रभव इत्यस्मिन्विष

का॰
वृ॰
२६५

येवाक्यार्थसमीपेचकारःश्रूयमानःवाक्यार्थमेतंसमुच्चिनोतीतितत्रभवइतिचश्च
पोव्याख्यानेसौपोग्रथःतेजाःकान्तःसक्षभवंसौपम तैउम कान्तम व्याख्या
नव्यानामइतिकिंपाटलिपुत्रस्यव्याख्यानीसकोमलापाटलिपुत्रंव्याख्यायते
सकोसलयापवंमत्रिवेशंपाटलिपुत्रेमितितन्नपाटलिपुत्रशाह्वोव्याख्यानतव्ये
नामभवत्पनयोर्गुणपदर्थिकारोपवादविधानार्थःकृतनिर्देशोहितो बहूवेनो
दात्तोदन्न बहूवोव्याख्यानव्यनाम्नःप्रातिपदिकात अन्तोदात्तात भवव्या
ख्यानयोरर्थयोःदन्त्रस्यायाभवतिप्रोणपवादःस्थानलजिम नतानतिकम स
मासस्वेरगान्तोदात्ताःप्रकृतयःबहूवइतिकिम द्यवरूकंवद्यतिपकाशप्र
स्त्रदाद्रियते सौपम तैउम अन्तोदात्तादितिकिम संहितायांभवंसांहितम
संहितायाष्ट्रोहिगतिस्वेरणायुदात्तः कतयन्तेभवः कतभ्यःयन्तेभवः भवव्या
ख्यानयोरर्थयोःदन्त्रस्यायाभवतिप्रोणपवादःकतर्यः अग्निष्टोमस्यव्याख्याने
तत्रभवोवाअग्निष्टोमिकःध्वाजपेवसिद्धयनयहणममेसामयागोमोपिपयद्यासा

पांचोदनिकः पानौदनिकः वह्वचचरणविधिपितिनामार्थे ऋष्यण्वेष्ववर्षेः ऋषि
शाखाः स्वरनामधेयानि तेभ्यः ऋषिशाखेभ्यः भवव्याख्यानयोरनादिस्वरसन्ववर्त्ततेन
त्रसाहचर्यात् ऋषिशाखेभ्य एव अन्नेवसिष्ठस्य व्याख्यानस्तत्रभवो वा वासिष्ठकाध्यायः वैश्वा
मित्रकः अध्याय इति किं वासिष्ठी ऋक् वैश्वामित्री पौरोडाशपुरोडाशात् इन् पौ
रोडाशाभ्यां तत् पुरोडाशाश्चाभवव्याख्यानेयोरर्थयोः इन्प्रत्ययो भवति पु
रोडाशाः पिष्टपिंडः तेषां संस्कारोमंत्रः पौरोडाशाः तस्यव्याख्यानः तत्रभवो वा पौरोडा
शिकः पुरोडाशिकाः पौरोडाशिकी छन्दसो यदणौ छन्दः शब्दाद्व्याख्यानयोरर्थयो यदणौ
प्रत्ययौ भवतः अवयवुत्तिवत्प्राप्ते एव वचनम् छन्दस्यः छान्दसः ह्यचः ब्राह्मणक
यमाधरपुरश्चरणनामाख्यातादिन् ह्यजादिभ्यः प्रातिपदिकेभ्यः व्याख्यान
यनामभ्यः भवव्याख्यानयोरर्थयोः इन् प्रत्ययो भवति अणादेरपवादः ह्यच
स्तावत् पैष्टिकः पाष्टकः ऋकारान्तात् वात्र होत्रकः पौतहोत्रकः ब्राह्मण
ब्राह्मणिकः ऋक आर्चिकः प्रथमः प्राथमिकः अध्वर आध्वरिकः पुरश्चरण

का॰
वृ॰
२७

पौरश्चरणिकः नामाख्यातग्रहणं संघातविगृहीतार्थम् नामिकः आख्यातिकः नामा
ख्यातिकः ॥ अणृगयनादिभ्यः ॥ ऋगयन इत्येवमादिभ्यः प्रातिपदिकेभ्यः भवाख्या
नयोरर्थयोरण् प्रत्ययो भवति ठञादेरपवादः आगायनः पादव्याख्यायनः अणृग्रह
णं बाधकबाधनार्थं वास्तुविद्यः ॥ ऋगयन पदव्याख्यान छंदोव्याख्यान छंदभा
षा छंदोविचिति छंदोविजिति न्याय निभक्त पुनरुक्त व्याकरण निगम वास्तु
विद्य अंगविद्या क्षत्रविद्या विद्या उत्पात उत्पाद संवत्सर मुहूर्त निमित्त उपनि
षद् शिक्षा ॥ तत आगतः ॥ तत इति पंचमीसमर्थादागत इत्यस्मिन्नर्थे यथाविहितं प्र
त्ययो भवति स्रुघ्नादागतः स्रौघ्नः माथुरः राष्ट्रियः तत इति स्वाध्यमपादाने विवक्षि
ते यत इत्येतन्नान्तरीयकं स्रुघ्नादागच्छति देवदत्तमूलादागत इति ॥ ठगायस्थानेभ्यः ॥
आय इति स्वाम्यग्राह्यो भागः उच्यते सर्वस्मिन्नुत्पद्यते तदायस्थानम् आयस्थानवाचिभ्यः
शब्देभ्यः ठक्प्रत्ययो भवति तत आगत इत्यस्मिन्नर्थे अणोऽपवादः कर्तेपरद्वाद्वापते
शुल्कशालाया आगतम् शौल्कशालिकम् शौल्कशालि आकरिकम् आपणिकं

२१

बहुवचनेस्वरूपविधिनिरासार्थं शुंडिकादिभ्योण् शुंडिकइत्येवमादिभ्यः आ
ण्प्रत्ययोभवतिभवति ततआगतइत्यस्मिन्विषयेआयस्थानठकोपवादः शौंडि
कादागतः शौंडिकः कार्कणः ऋणग्रहणंबाधकबाधनार्थं औदपानः शुंडादि
राकृतिगणः शुंडिक कृकण स्थंडिल उदपान उपल तीर्थ भूमितृण पर्ण।
विद्यायोनिसंबंधेभ्योवुञ् विद्यायोनिकृतः संबंधो येषां ते विद्यायोनिसंबंधाः त
द्वाचिभ्यः शब्देभ्यः वुञ्प्रत्ययोभवति ततआगतइत्यस्मिन्विषये अणोपवादः औ
त्तरसूत्रद्वयेनविद्यासंबंधेभ्यस्तावत् उपाध्यायादागतम् औपाध्यायकम् शैष्य
कं आचार्यकम् योनिसंबंधेभ्यः पैतामहकं मातामहकम् मातुलकम् ऋतष्ठ
ञ् विद्यायोनिसंबंधेभ्यः इत्येवऋकारान्तेभ्यः प्रातिपदिकेभ्यः विद्यायोनिसंबंध
भ्यः ठञ्प्रत्ययोभवति ततआगतइत्येतस्मिन्विषये वुञोपवादः विद्यासंबंधवाचि
भ्यः होतुरागतम् हौतृकम् पौतृकम् योनिसंबंधवाचिभ्यः भ्रातृकम् मातृ
कं स्वासृकम् तकारोमुखसुखार्थः पितुर्यच्च पितृशब्दाद्यत्प्रत्ययोभवतिच

का॰
वृ॰
२२१

कारात् ठञ् च तत आगत इत्यस्मिन्विषयेपि अम् पैत्रकम् गोत्रादङ्कवत् अपत्याधि-
कारादन्यत्र लौकिकं गोत्रम् अपत्यमात्रं गृह्यते गोत्रप्रत्ययान्तात् प्रातिपदिकादङ्कव-
दस्य विधिः भवति तत आगत इत्यस्मिन्विषये अङ्कग्रहणेन तस्येदमर्थं सामान्य-
लक्ष्यते तस्मात् तु अस्येति दिश्यते तेनाणेन वुञ् अपि सामान्येति औपगवानामङ्कः
औपगवकः कापटवकः औपगवः कापटवः नाडायनकः चारायणकः एवमेभ्यो
गोत्रेभ्य आगतं औपगवकं कापटवकम् नाडायनकम् चारायणकम् हेतुमनुष्ये-
भ्योन्यतरस्यां रूप्यः हेतुभ्यः मनुष्येभ्यश्च अन्यतरस्यां रूप्यप्रत्ययो भवति तत आ-
गत इत्यस्मिन्विषये मनुष्यग्रहणम् अहेत्वर्थं हेतुः कारणम् हेतुभ्यस्तावत् समा-
दागतं समरूप्यम् विषमरूप्यम् समीयम् विषमीयम् गहादित्वाच्छः देवदत्तरू-
प्यम् यज्ञदत्तरूप्यम् देवदत्तम् यज्ञदत्तम् बहुवचनस्वरूपविधिनिरासार्थम् ।
मयट् च हेतुभ्यः मनुष्येभ्यश्च मयट् प्रत्ययो भवति तत आगत इत्यस्मिन्विषये हे-
तुभ्यः सममयम् विषममयं मनुष्येभ्यः देवदत्तमयं यज्ञदत्तमयम् टकारो ङीब-

र्थः समर्थी विषमर्थी योगविभागो यथासंख्यनिरासार्थः प्रभवति तत इत्येव पं
चमीसमर्थात् ङ्याप्प्रातिपदिकात् प्रभवतीत्यस्मिन्विषये यथाविहितं प्रत्ययो भ
वति प्रभवती प्रकाशते प्रथममुपलभ्यते इत्यर्थः हिमवतः प्रभवति हैमवती गङ्गा
दारदी सिन्धुः विदूराञ्ञ्यः विदूरशब्दात् ञ्यप्रत्ययो भवति ततः प्रभवतीत्यस्मिन्वि
षये अणोपवादः विदूरात्प्रभवति वैदूर्यो मणिः ननु च वालवायादसौ प्रभव
ति न विदूरात् तत्र तु संस्क्रियते एवं तर्हि वालवायो विदूरं च प्रकृत्यन्तरमेव वा नवेति
तेवेति वैदूर्याजित्वरीवदुपाचरेत् तद्गच्छति पथिदूतयोः तदिति द्वितीयासमर्था
त् गच्छतीत्यस्मिन्विषये यथाविहितं प्रत्ययो भवति योऽसौ गच्छति पन्था चेत्स
भवति दूतो वा स्रुघ्नं गच्छति स्रौघ्नः पन्थाः स्रौघ्नो दूतः माथुरः राक्षितयः तत्स्थेषु
गच्छत्सु पन्थानं गच्छतीत्युच्यते अथवा स्रुघ्नप्राप्तिः पथोपचारमत् पथिदूतयोरि
ति किं स्रुघ्नं गच्छति पान्थः अभिनिष्क्रामति द्वारम् तदित्येव द्वितीयासमर्थाद
भिनिष्क्रामतीत्यस्मिन्विषये यथाविहितं प्रत्ययो भवति यत्तदभिनिष्क्रामति द्वारं चेत्

का॰
वृ॰ प्र
२२२

द्भवति आभिमुख्येन निष्क्रामति अभिनिष्क्रामति स्रुघ्नमभिनिष्क्रामति कान्यकु
ब्जस्य द्वारम स्रौघ्नम माथुरम राष्ट्रियम द्वारमभिनिष्क्रामणक्रियायाकरणं
प्रसिद्धं तदिह स्वातन्त्र्येण विवक्ष्यते यथा साध्वसिश्छिनत्तीति द्वारमितिकिम स्रुघ्न
मभिनिष्क्रामति पुरुषः अधिकृत्य कृते ग्रन्थे अधिकृत्येतदपेक्षा द्वितीया अ
धिकृत्य प्रवृत्तस्य ग्रन्थेयमर्थः तदितिद्वितीयासमर्थादधिकृत्य कृते ग्रन्थेस्मिन्नर्थे
यथाविहितं प्रत्ययो भवति यत्तत्कृतं ग्रन्थश्चेत्तद्भवति सुभद्रामधिकृत्य कृतो ग्रन्थः
सौभद्रः गौरिमित्रः याथातः ग्रन्थ इति किं सुभद्रामधिकृत्य कृतः प्रासादः लवाख्या
यिकार्थेभ्य प्रत्ययस्य वा लुक् वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता सु
मनोत्तरा उर्वशी न च भवति भैमरथीम शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः
तदित्येव अधिकृत्य कृते ग्रन्थे इति च तदिति द्वितीयासमर्थेभ्यः शिशुक्रन्दादिभ्यः छ
प्रत्ययो भवति अधिकृत्य कृते ग्रन्थे इत्यस्मिन्विषये प्रागणापवादः शिशूनां क्रन्दनं शि
शुक्रन्दः तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः यमसभीयमसभम यदमभीय

ह्न्हात् अग्निकाश्मपीयम् श्येनकपोतीयम् शाब्दार्थसंबंधीयम् प्रकरणे वाक्यप
दीयं इंद्रजननादिभ्यः इंद्रजननीयम् प्रद्युम्नागमनीयं सीतान्वेषणीयम् इंद्रज
ननादिराकृतिगणः प्रयोगोनुसर्त्तव्यः प्रातिपदिकेषु वर्त्तमानेभ्यो द्वन्द्वे देवासुरा
दिभ्यः प्रतिषेधो वक्तव्यः देवासुरम् रक्षोसुरम् गौणमुख्ये इंद्रजननादेराकृ
तिगणत्वात् शिशुक्रन्दादयोपि तेनैव द्रष्टव्याः प्रपंचार्थमेषां ग्रहणं एवं च मा
ति देवासुरादिष्वपि प्रतिषेधो न कर्त्तव्यः छप्रत्ययस्याप्रदर्शनात् सोस्य निवा
सः सइति प्रथमासमर्थात् अस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमा
समर्थं निवासश्चेत्स भवति निवसन्त्यस्मिन्निति निवासो देश उच्यते स्रुघ्नो निवासो
स्य स्रौघ्नः माथुरः राष्ट्रियः अभिजनश्च इत्येव प्रथमासमर्थात् अस्येति षष्ठ्यर्थे य
थाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थमभिजनश्चेत्स भवति अभिजनाः पू
र्वबान्धवाः तत्संबंधाद्देशोप्यभिजन इत्युच्यते यस्मिन्पूर्वैर्बान्धवैरुषितं तस्मादिह
देशवाचिनः प्रत्ययः न तु पूर्वबान्धवनिवासप्रतिपत्तेः स्रुघ्नोभिजनोस्य स्रौघ्नः माथुरः

का॰
वृ॰
२२१

ताक्षिप्यः अथ निवासाभिजनयोः को विशेषः यत्र सं प्रत्युष्यते स निवासः यत्र पूर्वैरुषितं सो
भिजनः योगविभाग उत्तरार्थः आयुधजीविभ्यश्छः पर्वते सोऽस्याभिजन इति प्रवर्त्तते
आयुधजीविभ्य इति इति तादर्थ्ये चतुर्थी पर्वत इति प्रकृतिविशेषणं पर्वतवाचिनः
प्रथमासमर्थात् अभिजनात् समेति षष्ठ्यर्थे छ प्रत्ययो भवति आयुधजीविभ्यः आयु
धजीव्यर्थम् आयुधजीविनोऽभिधातुं प्रत्ययो भवतीत्यर्थः हृद्गोलः पर्वतोऽभिज
नः एषाम् आयुधजीविनां हृद्गोलीयाः अन्धकवर्त्तीयाः रोहितगिरीयाः आयुधजीवि
भ्य इति किं ऋक्षोदः पर्वतोऽभिजन एषां ब्राह्मणानाम् आर्क्षोदाः पर्वत इति किम् सा
ङ्काश्यकाः आयुधजीविनः शंडिकादिभ्यो ञ्यः शंडिक इत्येवमादिभ्यः प्रातिप
दिकेभ्यः ञ्य प्रत्ययो भवति सोऽस्याभिजन इत्यस्मिन् विषये अणोऽपवादः शांडिक्यः ।
सार्वसेन्यः शंडिका सर्वसेन सर्वकेश शालक शाप् शटरक शंख बोध सिन्धुतक्षशि
लादिभ्योऽणञौ आदिशब्दः प्रत्येकम् अभिसम्बध्यते सिन्ध्वादिभ्यः तक्षशिलादिभ्यश्च
यथासंख्यम् अणञौ प्रत्ययौ भवतः सोऽस्याभिजन इत्यस्मिन् विषये सैन्धवः वालवः

सिन्धुवर्णु गान्धारि मधुमत् कंबोज कश्मीर साल्व किष्किन्धा गब्दिका उरसा दर
त् यत्र कच्छादिषु पठ्यते सिन्धुवक्त्र प्रभृतयस्तेभ्यस्तत एवाणि सिद्धे मनुष्यवुञो
बाधनार्थं वचनं तक्षशिलादिभ्यस्तावत् तक्षशिलः वात्सोद्धरणः तक्षशिला
वात्सोद्धरणा कैममोर काण्डवने ग्राममणी कंस गलक किन्नर संकुचित सिंहको
ष्ठ कर्णकोष्ठ बर्बर अवसान तूदीसलातुरवर्म्मतीकूचवाराड्ढक्छण्ढञ्य
कः तूदादिभ्यः चतुर्भ्यः शब्देभ्यः यथासंख्येन एव ढक् छण् ढञ् यक इत्ये
ते प्रत्यया भवन्ति सोस्याभिजन इत्यस्मिन्विषये अणोपवादः तौदेयः सालातुरी
यः वार्मतेयः कौचवार्यः भक्तिः समर्थविभक्तिः प्रत्ययार्थश्चानुवर्तते अभिजन
इति निवृत्तम् समर्थ इति प्रथमासमर्थात् अस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भव
ति यत्तत्प्रथमासमर्थं भक्तिश्चेत्तद्भवति भज्यते सेव्यत इति भक्तिः स्रुघ्नो भक्तिरस्य
स्रौघ्नः माथुरः राष्ट्रियः अचित्तादेशकालाट्ठक् देशकालव्यतिरिक्तादचित्त
वाचिनः प्रातिपदिकात् ठक् प्रत्ययो भवति सोस्य भक्तिरित्यस्मिन्विषये अणोपवा

का॰
वृ॰
२२४

दः वृद्धाच्छं परत्वाद्बाधते अपूपा भक्तिरस्य आपूपिकः शाष्कुलिकः पायसिकः अ
चित्तादिति किम् देवदत्तः अदेशादिति किं स्रौघ्नः अकालादिति किम् ग्रैष्मः ॥
महाराजाट्ठञ् महाराजशब्दाट्ठञ्प्रत्ययो भवति सोस्य भक्तिरित्यस्मिन्विषये अणो
पवादः महाराजो भक्तिरस्य माहाराजिकः प्रत्ययान्तरकरणं स्वरार्थम् वासुदे
वार्जुनाभ्यां वुन् वासुदेवार्जुनाभ्यां वुन्प्रत्ययो भवति सोस्य भक्तिरित्यस्मिन्वि
षये छाणोरपवादः वासुदेवो भक्तिरस्य वासुदेवकः अर्जुनकः ननु च वासुदेव
शब्दात् गोत्रक्षत्रियाख्येभ्यः इति वुञस्त्येव न चास्य वुनो विशेषो विद्यते तदि
ह वासुदेवग्रहणं संज्ञैषा देवताविशेषस्य न क्षत्रियाख्या अज्ञायन्तमल्पाच्तर
मिति वा अर्जुनशब्दस्य पूर्वनिपातम् अकुर्वन् ज्ञापयति अभ्यर्हितं पूर्वं निपततीति गो
त्रक्षत्रियाख्येभ्यो बहुलं वुञ् गोत्राख्येभ्यः क्षत्रियाख्येभ्यश्च प्रातिपदिकेभ्यो बहु
लं वुञ्प्रत्ययो भवति सोस्य भक्तिरित्यस्मिन्विषये अणोपवादः वृद्धाच्छं परत्वा-
द्बाधते ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः कापटवकः क्षत्रियाख्येभ्यः नाकु

८५

लः माह्रदेवकः सौवकः ग्रामग्रहणं प्रसिद्धक्षत्रियपरिग्रहार्थं यथाकथंचित्त्रिपद्
त्रिभ्यो मा भूत् बहुलग्रहणात् क्वचिदन्यदपि भवति पाणिनिः भक्तिरस्य पाणिनीयः पौर
वीयः ‖ जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ‖ जनपदिनो
ये बहुवचने जनपदेन समानशब्दाः तेषां जनपदवत्सर्वं भवति प्रत्ययः प्रकृतिश्च सोऽस्य
भक्तिरित्यस्मिन्विषये जनपदतदवध्योश्चेत्यस्य च प्रकरणे ये प्रत्यया विहितास्ते जनपदि
भ्यः सोऽस्य भक्तिरित्यस्मिन्नर्थेऽतिदिश्यन्ते जनपदिनो जनपदस्वामिनः क्षत्रियाः अङ्गा
जनपदिनो भक्तिरस्य आङ्गकः वाङ्गकः सौह्मकः पौण्ड्रकः तद्वत् अङ्गाः क्षत्रियो
भक्तिरस्य आङ्गकः वाङ्गकः सौह्मकः पौण्ड्रकः जनपदानामिति किम् पाञ्चालानां
ब्राह्मणानां भक्तिरस्य पाञ्चालाः सर्वग्रहणं प्रकृत्यतिदेशार्थं मद्रवृज्ययोरतिदि
शः प्रयोजयति वृद्धिनिमित्तेषु च वृद्धादिषु विशेषो नास्तीति मद्रवृज्योः कन्निति विशे
षः मद्रस्यापत्यं द्व्यञ्मगधकलिङ्गसूरमसादण् माद्रः वृजिशब्दादपि वृद्धेत्कोसला
जादाञ्ञ्यङ् वार्ज्यः स भक्तिरस्येति प्रकृतिनिर्हासे कृते मद्रकः वृजिकः जनपदेन समा

तच्छब्दानामितिकिम् अन्यस्मिंजनपदे पौरवोराजातस्यभक्तिरस्यपौरवीयः बहुवचनग्रह
णंसमानशब्दानांविषयोपलक्षणार्थम् अन्यथाहियत्रैवसमानशब्दतातत्रैवातिदेशः
स्यात् एकवचनद्विवचनस्यात् वाङ्गोवाङ्गौवाभक्तिरस्येतिबहुवचनेनसमानशब्दाना
मेकवचनद्विवचनयोःसत्यपिशब्दभेदेतिदेशोभवतिवाङ्गोवाङ्गौवाभक्तिरस्यवाङ्गकः
तेनप्रोक्तम् तेनेतितृतीयासमर्थात् प्रोक्तमित्येतस्मिन्नर्थेयथाविहितंप्रत्ययोभव
तिप्रकर्षेणोक्तंप्रोक्तमित्युच्यतेनतुकृतं कृतेग्रन्थइत्यनेनगतत्वात् अनेनकृतामा
थुरेणप्रोक्तामाथुरीवृत्तिः पाणिनीयम् आपिशलम् काशकृत्स्नम् तित्तिरिवरत
न्तुखण्डिकोखाच्छण् तित्तिर्यादिभ्यःशब्देभ्यःछण्प्रत्ययोभवतितेनप्रोक्तमित्येतस्मि
न्विषयेऽणोपवादः तित्तिरिणाप्रोक्तमधीयतेतैत्तिरीयाः वारतन्तवीयाः खाण्डिकीयाः
औखीयाः छंदसिचायमिष्यते तेनतित्तिरिणाप्रोक्ताःश्लोकाइत्यत्रनभवति शौणकादि
भ्यश्छंदसीत्यत्रछंदसनवर्त्तिनव्यमित्याहुः काश्यपकौशिकाभ्यामृषिभ्यांणिनिः का
श्यपकौशिकशब्दाभ्यामृषिवाचिभ्यांणिनिःप्रत्ययोभवतितेनप्रोक्तमित्येतस्मिन्विष

येकर्म्मापवादः णकारउच्चारणार्थः कलापिनाप्रोक्तं इतिसर्व्वत्र तेनस्यापिचन्दो
द्विषयताभवत्येवशौनकादिभ्यश्छंदसीतितत्रज्ञानवृत्तेः क्वेदोपिकारविहितानां
वत्तद्विषयतेष्यतेऽदानीतनेनगोत्रकाश्यपेनप्रोक्तं काश्यपीयम कलापिवैशंपा
यनान्तेवासिभ्यश्च कलापिनोन्तेवासिनांवैशंपायनान्तेवासिनांचयेशाखावाचिका
स्तेभ्योणिनिप्रत्ययोभवतितेनप्रोक्तमित्यस्मिन्नर्थे ग्रणोपवादः छेदपवादा
यतेतत्रकलापान्तेवासिनश्चत्वारः हरिद्रु छगल तुंबुरु उलपइतिवैशंपायना
न्तेवासिनोनव आलंबि पलंग कमल ऋचाभ आरुणि ताण्ड्य श्यामायनः कठः
कामकलापीतिप्रत्ययस्वरुकारिणोराद्यन्ते नत्वव्यवहिताःशिष्यशिष्याः ऊनः
कलापिखेडायनग्रहणात तथाहिवैशंपायनान्तेवासीकलापीतदन्तेवासि
नोवैशंपायनान्तेवासीकलापीतदन्तेवासिनोवैशंपायनान्तेवासिभवंतीतिकिं
कलापिग्रहणेनतथाहिवैशंपायनान्तेवासीकठः तदन्तेवासीखेडायनः तस्यापि
शौनकादिषुपाठेनतेनतस्यप्रत्ययस्वरुकारिग्रहणालिंगाम कलापन्तेवासिभ्यस्ता

का॰
वृ॰
२२५

वत् हरिद्रुणा प्रोक्तमधीते हारिद्रविणः तौम्बुरविनः औलपिनः छागलिनो छग
केवस्यति वैशम्पायनान्तेवासिभ्यः आलंबिनः पालिंगिनः कामलिनः आर्चाभि
नः आरुणिनः ताण्डिनः श्यामायनिनः कठाच्छुकं वक्ष्यति कलापिनस्त्वाणम् हा
रिद्रवीयः प्रथमः तत्र छगलात् उम्बरुद् उलपेन चतुर्थेन कलापक मिष्यते आलं
बिश्चरकः प्राचां पलिंगकमलावुभौ ऋचाभारुणिताण्ड्याश्च मध्यमीयास्त्रयोऽपरे
श्यामायन उदीच्येषु उक्तः कठकलापिनोः चरक इति वैशम्पायनस्याख्या तत्संबन्धे
न सर्वे तदन्तेवासिनः चरका इत्युच्यन्ते पुराणप्रोक्तेषु ब्राह्मणकल्पेषु प्रत्ययार्थवि
शेषणमेतत् तृतीयासमर्थात् प्रोक्ते णिनिप्रत्ययो भवति यत्तत्प्रोक्तं पुराणप्रो
क्तं चेद् ब्राह्मणकल्पास्ते भवन्ति पुराणेन चिरन्तनेन ऋषिणा प्रोक्ताः पुराणप्रोक्ताः
ब्राह्मणेषु तावत् भाल्लविनः शाट्यायनिनः ऐतरेयिनः कल्पेषु पैंगी कल्पः आ
रुणपराजी कल्पः पुराणेषु वार्त्तिकम् याज्ञवल्क्यादिभ्यः तद्विषयता कस्मान्न
भवति प्रतिपदं ब्राह्मणेषु यः प्रत्ययः तस्मिन्नेतस्मिन् छिषयताविधीयते अणेनया

तवल्कसशब्दस्य कंठादिपाठादणा नचायं योगश्छन्दोधिकारमनुवर्त्तते तेन कल्पेष्वपि
न भवति शौनकादिभ्यश्छन्दसि शौनक इत्येवमादिभ्यश्छन्दसि विषये णिनिः प्रत्य
यो भवति तेन प्रोक्तमित्यस्मिन्नर्थे छणोऽपवादः शौनकिनः वाजसनेयिनः छन्दसीति।
किं शौनकीया शिक्षा कलाशाखेत्यत्र प्रयुते तत्संगतार्थवचनं केवलाद्धि लकंव
त्यति कठशाखाभ्यां प्रोक्तमधीते कठशाखिनः शौनकवाजसनेय शार्ङ्गरवशापेयशा
पेयखाडायन स्कन्द स्तंभदेवदर्शी रज्जुभार रज्जुकण्ठ कठ शाठ कषाय तलवकार
पुरुषकार कठचरकाल्लुक् कठचरकशब्दाभ्यां परस्य प्रोक्तप्रत्ययस्य लुग्भवति कठश
ब्दाद्वैशंपायनान्तेवासिभ्यश्चेति णिनिः चरकशब्दादप्यणः कठेन प्रोक्तमधीयते कठाः
चरकाः चरकेत्येव चारकाः श्लोकाः कलापिनोऽण् कलापिशब्दादण् प्रत्ययो भ
वति तेन प्रोक्तमित्यस्मिन्विषये वैशंपायनान्तेवासित्वादिनेरपवादः कलापिना प्रोक्तमधी
यते कालापाः इनण्यनपत्य इति प्रकृतिभावे प्राप्ते नान्तस्य टिलोपे सब्रह्मचारिपीठ
सर्पिकलापिकुथुमितैतिलिजाजलिलांगलिशिलालिशिखंडि सूकर सद्मसु

का॰
वृ॰
२२

पर्वेणाणुपसंख्यानमिति टिलोपः अणनुग्रहणं किमार्थम् न यथाप्राप्तमित्येवं सिद्धम् अ
पिकविधानार्थम् तेन माथुरी वृत्तिः सौलभानि ब्राह्मणानीत्येवं सिद्धं भवति छगलिनो
ढिनुक् छगलिनः शब्दात् ढिनुक् प्रत्ययो भवति तेन प्रोक्तमित्यस्मिन् विषये कलाप्यन्तेवा
सिनामित्यनेनाणोऽपवादः छगलिना प्रोक्तमधीयते छागलेयिनः पाराशर्यशिलालिभ्यां
भिक्षुनटसूत्रयोः णिनिरनुवर्त्तते न ढिनुक् पाराशर्यशिलालिशब्दाभ्यां णिनिः प्रत्य
यो भवति तेन प्रोक्तमित्यस्मिन् विषये भिक्षुनटसूत्रयोरिति यथासंख्यं प्रत्ययार्थविशेष
णम् सूत्रशब्दः प्रत्येकमभिसंबध्यते तद्विषयता चात्रेष्यते तदर्थं केचिद्ग्रहणमनुव
र्त्यं गुणकल्पनया भिक्षुनटसूत्रयोश्छन्दस्त्वं पाराशर्येण प्रोक्तमधीयते पाराशरिणो
भिक्षवः शैलालिनो नटाः भिक्षुनटसूत्रयोरिति किम् पाराशरम् शैलालम् कर्मन्द
कृशाश्वादिनिः भिक्षुनटसूत्रयोरित्येव कर्मन्दकृशाश्वशब्दाभ्यामिनिः प्रत्ययो भवति
तेन प्रोक्तमित्यस्मिन् विषये अणोऽपवादः यथासंख्यं भिक्षुनटसूत्रयोरभिधेययोः अत्रापि
तद्विषयतार्थं केचिद्ग्रहणमनुवर्त्यं कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः कृशा

स्थितोनदाःभित्त्वनदस्मृत्रयोरित्येवकार्मन्दमकार्षीत्सम तेनैकदिक तेनेतितृती।
यासमर्थात् एकदिगित्यस्मिन्नर्थे यथाविहितंप्रत्ययोभवति एकदिक तुल्यदिक
समानदिगित्यर्थः सुदाम्नाएकदिक सौदामनीविद्युत हैमवतीत्रैककुदीपैलुमू।
लीतितेनेतिप्रकृतेपुनःसमर्थविभक्तिग्रहणंकंदीपिकारतिह्मर्थं पूर्वसूत्रेककुदो
पिकारात्द्विषयतामापद्यते तसिच्च तसिःप्रत्ययोभवतितेनैकदिगित्यस्मिन्नर्थेपृ
वैणाद्यादिषेणादिषुवचनात्एषयमपरःप्रत्ययोविधीयतेस्वरादिपाठादव्ययत्वम् सु
दामतःहिमवन्तःत्रैककुदतःपीलुमूलतः उरसोयच्च उरःशब्दाद्यत्प्रत्ययोभवति।
चकारात्तसिच्च तेनैकदिगित्येतस्मिन्विषयेअणोपवादःउरसाएकादिक उरस्यःउ
रस्तः उपज्ञाते तेनेत्येवतृतीयासमर्थादुपज्ञातेत्यस्मिन्नर्थेयथाविहितंप्रत्ययो
भवतिविनोपदेशेनज्ञातमुपज्ञातम् स्वयमभिसंबद्धमित्यर्थःपाणिनिनोपज्ञातं
पाणिनीयं अकालकंव्याकरणम् काशकृत्स्नंगुरुलाघवम् आपिशलं दुष्क
रणम् कृतेग्रन्थे तेनेतितृतीयासमर्थात् कृतइत्यस्मिन्नर्थेयथाविहितंप्रत्ययो

का·
वृ·प्र·
२२८

भवति यत्नकृते ग्रन्थेऽन्यत्र भवति वररुचिना कृता वाररुचाः श्लोकाः । तैः कृतारो ग्रन्थः
जालूकः ग्रन्थ इति किं तक्ष्णा कृतः प्रासादः उत्पादिते कृतम् विद्यमानमेव ज्ञातम्
उपज्ञातमित्यनयोः विशेषः संज्ञायाम् तृतीयासमर्थात् यथाविहितं प्रत्ययो भव
ति कृते ग्रन्थ इत्यस्मिन्विषये समुदायेन चेत्संज्ञा गम्यते मक्षिकाभिः कृतं माक्षि
कं गार्म्भकम् पौत्तिकम् मधुरः संज्ञा एताः कुलालादिभ्यो वुञ् तेन कृते संज्ञाया
मिति च सर्वमनुवर्त्तते कुलालादिभ्यः प्रातिपदिकेभ्यः वुञ् प्रत्ययो भवति तेन कृत
मित्यस्मिन्विषये संज्ञायां गम्यमानायां कौलालकम् वारुटकम् कुलाल वरु
ट निषाद चंडाल कर्मार सेना सिरिन्ध्रि देवराज परिषत् वधू रुरु ब्रह्मन् अनडु
ह् कुंभकार श्वपाक क्षुद्राभ्रमरवटरपादपादञ् तेन कृते संज्ञायामिति च सर्व
मनुवर्त्तते क्षुद्रादिभ्यः प्रातिपदिकेभ्यः अञ् प्रत्ययो भवति तेन कृतमित्यस्मिन्विषये
संज्ञायां गम्यमानायामणोऽपवादः क्षुद्राभिः कृतो क्षौद्रम् भ्रामरम् वाटरम् पात
पम् तस्येदम् तस्येति षष्ठीसमर्थादिदमित्यस्मिन्विषये यथाविहितं प्रत्ययो भव

तिप्रागादयः पंचमहोत्सर्गाः चादयश्च प्रत्यया विधीयन्ते प्रकृतिप्रत्ययार्थयोः सहार्थ
मात्रे तत्संख्यामात्रे च विवक्षिते यदपरं लिंगसंख्याप्रत्ययपरो हादिकं तत्सर्वं प्रत्ययता
दिषु तदभिधानान्न भवति देवदत्तस्यानन्तरमिति वक्ष्यत्येवेति इत्यच संबोधः स्वम् सोवक्ष्यते
सिद्धयप्रवाचाणां इत्यर्थमुपसंख्यानम् अग्नीधशरणोर्भच अग्नीध्रम् समिधामादाने
षेण्यलक्षणः सामिधेनीत्यक रथाद्यत् रथशब्दाद्यत्प्रत्ययो भवति तस्येदम् इत्यस्मि
न्विषये अणोपवादः रथस्येदं रथ्यम् चक्रं युगं वा रथांगानि एव वा प्रतीतेनात्रत्र अनभिधानात्।
रथसीताहलेभ्यो यद्विधाविति तदन्तविधिरुपसंख्यायते परमरथ्यं उत्तमरथ्यम् पत्रपू
र्वादञ् पतन्ति तेनेति पत्रं वाहनम् अश्वादिकमुच्यते तत्पूर्वाद्रथादञ् प्रत्ययो भवति
तस्येदमित्यस्मिन्विषये पूर्वस्य यतोपवादः आश्वरथम् चक्रम् औष्ट्ररथम् गार्दभरथम्
पत्राध्वर्युपरिषदश्च पत्रं वाहनं तद्भावितः प्रातिपदिकात् अध्वर्युपरिषद्भ्यां च अञ्
प्रत्ययो भवति तस्येदमित्यस्मिन्विषये अणोपवादः पत्राद्वाह्ये अस्येदं वाहनीयम्
आश्वम् औष्ट्रम् गार्दभम् आध्वर्यवम् पारिषदम् हलसीराट्ठक् हलसीरशब्दाभ्यां

का·
वृत्ति
२२५

ठक्प्रत्ययो भवति तस्येदमित्यस्मिन्विषये अणोऽपवादः हलस्येदं हालिकम् सैरिकम्
द्वन्द्वाद्वुन्वैरमैथुनयोः द्वन्द्वसंज्ञात्प्रातिपदिकात् वुन्प्रत्ययो भवति तस्येदमित्यस्मिन्वि
षये वैरमैथुनिकयोः प्रत्ययार्थविशेषणयोः अणोऽपवादः छं तु परत्वाद्बाधते वैरे तावत्
बाभ्रवशालङ्कायनिका काकोलूकिका विवहनं मैथुनिका अत्रिभारद्वाजिका
कुत्सकुशिकिका विवहनं मैथुनिका वैरे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः देवासुरं
राक्षोसुरम् गोत्रचरणाद्वुञ् गोत्रवाचिभ्यः चरणवाचिभ्यश्च प्रातिपदिकेभ्यः वुञ्प्रत्य
यो भवति तस्येदमित्यस्मिन्विषये अणोऽपवादः छं तु परत्वाद्बाधते गोत्रे तावत् ग्लौचुकायन
कम् औपगवकं कापटवकम् चरणाद्धर्माम्नाययोरिष्यते काठकम् कालापकम् मौदकं
पैप्पलादकं संघाङ्कलक्षणेष्वञ्यञिञामण् संघादिषु प्रत्ययार्थविशेषणेषु अञन्तात्
यञन्तात् इञन्तात्प्रातिपदिकात् अण्प्रत्ययो भवति तस्येदमित्यस्मिन्विषये पूर्वस्य वुञो
ऽपवादः घोषग्रहणमप्यत्र कर्त्तव्यम् तेनैषां यथासंख्येन भवति अञन्तात्तावत्
बैदः संघः बैदोऽङ्कः बैदं लक्षणम् बैदो घोषः यञन्तात् गार्गः संघः गार्गोऽङ्कः गार्गं लक्षणम्

गार्गीयोघोषः इञन्तात् दाक्षसंघः दाक्षीकः दाक्षलक्षणं दाक्षोघोषः अंकलक्षणयोः को
विशेषः लक्षणं लक्ष्यस्यैव चिह्नभूतं स्वम् यथा विद्याविदानां अंकलक्षणं वादिसोपवि
दानां स्वम् भवति ऋक्कारगौधीवयेषु वञ्जाव प्रतिषेधार्थं वैदी विद्या अस्य वैदीविद्या
शाकलाद्वा शाकलशब्दात् संघादिषु प्रत्ययार्थविशेषणेषु वा अण्प्रत्ययो भवति
नसेदमित्यस्मिन्विषये वुञोपवादः शाकलेन प्रोक्तमधीयते शाकलाः तेषां संघः
शाकलः शाकलं लक्षणम् शाकलं शाकलीकः शाकलकः शाकलो घोषः शाकलकः
कंठे गौधिक याज्ञिक बहुवचनदाप्यः संघादयो निर्दृष्टाः सामान्येन विधानम् वृद्धा
द्धर्मीम्नाययोः तस्मात् वर्यान्नट शब्दात् धर्मीम्नाययोरेव भवति कंठोगानां धर्मः आ॥
कंठोगादिभ्यः शब्देभ्यः ञ्य प्रत्ययो भवति नसेदमित्यस्मिन्विषये वुञणोपवादः ॥
म्नायो वा कांठोगधर्मम् औक्थिक्यं याज्ञिक्यम् बह्वृच्यम् नाट्यम्. नदंडमाणवान्तेवासि
षु दंडप्रमाणाः माणवाः दंडमाणवाः अन्तेवासिनः शिष्याः तेष्वभिधेयेषु वुञ् प्रत्ययो न
भवति गोत्र शब्दाणां मिहानवर्त्तते तेन वुञः प्रतिषेधो विज्ञायते गौकक्षाः दंडमाणवाः

का·
वृ·प्र·
२८

अन्तेवासिनो वा हालाः आवाः माहका रैवतिकादिभ्यष्ठकः रैवतिकइत्यादिभ्यः प्राति
पदिकेभ्यः ठक्प्रत्ययो भवति तस्येदमित्यस्मिन्विषये योवृप्रत्ययान्तापवादः तेन ततः सुवैणो वा
वुञि प्राप्ते वचनम् ठकविधानम् रैवतीयः स्वापिशीयः रैवतिकः स्वापिशिः क्षेमवृद्धियो
रयीवि ऊटमेधि वैजवापि कौपिञ्जलहास्तिपदादण् कौपिञ्जलहास्तिपदशब्दा
भ्याम् अण्प्रत्ययो भवति तस्येदमित्यस्मिन्विषये योवुञोपवादः गोत्राधिकारात् कौपि
ञ्जलः हास्तिपदः आथर्वणिकस्येकलोपश्च आथर्वणिकशब्दात् अण्प्र
त्ययो भवति तत्सन्नियोगेन टदइकलोपः तस्येदमित्यस्मिन्विषये चरणाद्वुञोपवादः आ
थर्वणिकस्यायम् आथर्वणः धर्मः आम्नायो वा चरणाद्धर्मान्नाययोः तस्य विकारः
तस्येति षष्ठीसमर्थात् विकारइत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवतिः प्रकृतेरवस्था
न्तरं विकारः किमिहोदाहरणम् अशाण्यायुदात्तनमवाह्नं यस्मनान्मन्नितिपदग्रहण
अश्मनो विकारः आश्मः आश्मनः अश्मनो विकारइति टिलोपः पाठितः भास्मनः
मार्त्तिकः प्राण्योषधिवृक्षेभ्योयुदात्तापवेतेन सपकरणोपनवैवनं शैषिक निवृत्यर्थम् विका

गावयवोः याद्योवभवन्तिहालःसेरः अवयवेचप्राण्योषधिवृक्षेभ्यः प्राण्योषधि
वृक्षवाचिभ्यःषष्ठीसमर्थेभ्यः अवयवेयथाविहितंप्रत्ययोभवतिचकाराद्विकारेच
तत्रप्राणिभ्यः अजेवद्यतिडोषधिभ्यः मौर्वकाण्डम मौर्वंभस्मवृक्षेभ्यःकारीरंकाण्ड
कारीरंभस्म हुत्तउत्तरेप्रत्ययाः प्राण्योषधिवृक्षेभ्यः विकारावयवयोर्भवन्तिअ
न्येभ्यस्तुविकारमात्रे कस्मादुच्यमपि हिकेवलात्तस्यविकारः अवयवेचप्राण्योषधिवृक्षे
भ्यइतिविकारावयवयोर्युगपदधिकारोऽपवादविधानार्थः कृतनिर्देशोहितो ॥
बिल्वादिभ्योण बिल्वइत्येवमादिभ्यःप्रातिपदिकेभ्यःअण्प्रत्ययोभवतिविकारा
वयवयोरर्थयोः मयटवृणोरपवादः बिल्वस्यविकारोवयवोवावैल्वाः ब्रैहः गावेधु
कामासोवपद्मतेततः कोपधत्वादेवसिद्धेमयडबाधनार्थं वचनम बिल्वव्रीहिकाण्ड
मुद्गमसूर गोधूम इक्षु वेणु गवेधुका कर्पासी पाटली कर्कन्धु कुटीर कोपधा
च्च कोपधात्प्रातिपदिकात अण्प्रत्ययोभवतियथायोगंविकारावयवयो
रर्थयोः अञोऽपवादः तर्कुनाकवम तैत्तिरीकम मारट्टकम दार्दुरकम मान्धूक

का॰
वृ॰
२८

त्रपुजतुनोः षुक त्रपुजतुशब्दाभ्यामण्प्रत्ययो भवति तत्सन्नियोगेन च तयोः षुगा
गमः अणोपवादः त्रपुणो विकारः त्रापुषम जातुषम अश्रणपादिताद्यावयवे ओर
ञ उवर्णान्तात्प्रातिपदिकादञ्प्रत्ययो भवति विकारावयवयोरर्थयोः अणोपवा
दः अनुदात्तादेर्यदित्येवोदाहरणम दैवदारवम भाद्रदारवम अनुदात्तादेश्च ।
अनुदात्तादेः प्रातिपदिकात अञ्प्रत्ययो भवति विकारावयवयोरर्थयोरणोप
वादः दधित्थ दाधित्थम माहित्थम कापित्थम पलाशादिभ्यो वा पलाशादिभ्यः
प्रातिपदिकेभ्यः वा अञ्प्रत्ययो भवति विकारावयवयोरर्थयोः पालाशम खादि
रम खादिर उभयत्रविभाषेयम पलाश खदिर शिंशपा स्पन्दना मूलासक
री शिरीष यवाश विकंकत शम्याष्ट्लञ शमीशब्दात ट्लञ्प्रत्ययो भवति वि
कारावयवयोरर्थयोः अणोपवादः शामीलं भस्म शामीलं भस्म शामीली स्रुक
मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः प्रकृतिमात्राद्वा मयट्प्रत्ययो भवति भक्ष्या
च्छादनवर्जितयोर्विकारावयवयोरर्थयोः भाषायां विषये यथायथं प्रत्यये प्रा

मेष्वश्ममयम् आश्मनम् दूर्वामयम् दौर्वं भाषायामितिकिम् बैल्वः खादिरो वा
यूपः स्यात् अभक्ष्याच्छादनयोरितिकिम् मौद्गः सूपः कार्पासमाच्छादनम् एतयोरि
तिकिम् अनेन यावता विकारावयवौ प्रकृतावेव ये विशेषप्रत्ययाः प्राणिरजता
दिभ्योञित्येवमादयः तद्विषयेपि यथा स्यात् कपोतमयम् कापोतमयम् लोह
मयम् लौहमिति नित्यं वृद्धशरादिभ्यः भाषायामभक्ष्याच्छादनयोरित्येव वृ
द्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्च अभक्ष्याच्छादनवर्जितयोर्विकारावयवयोरर्थयोः
नित्यं मयट् प्रत्ययो भवति वृद्धेभ्यः तावत् आम्रमयम् शालमयम् शाकमयम् श
रादिभ्यः शरमयम् दर्भमयम् मृण्मयम् नित्यग्रहणं किम् यावताऽऽरम्भसाम
र्थ्याद्वा नित्यं भविष्यति एकाचो नित्यं मयटमिच्छन्ति नदत्तेन क्रियते त्वङ्मयम्
स्रुङ्मयम् वाङ्मयमिति शरदर्भमृत् कुटीतृणसोमबल्वज गोश्च पुरीषे गोश्श
ब्दात् पुरीषेभिधेये मयट् प्रत्ययो भवति अणोपवादः गोमयम् पुरीष इतिकिम् गव्यं
पयः पुरीषं न विकारो नावयवस्तस्मादविषये विधानम् विकारावयवयोस्तु गोः पय

का॰
वृ ४
२८२

सोयंतेवसति पिष्टाच्च पिष्टशब्दान्मयट्प्रत्ययो भवति तस्य विकार इत्यस्मिन्विषा
येऽणोपवादः पिष्टमयंभस्म संज्ञायांकन् संज्ञायांविषये पिष्टशब्दात्कन् प्रत्ययो
भवति विकारे मयटोपवादः पिष्टिका व्रीहेः पुरोडाशे व्रीहिशब्दान्मयट्प्रत्ययो
भवति पुरोडाशे विकारे बिल्वाद्यणोपवादः व्रीहिमयः पुरोडाशः व्रैहमन्यत् अ
संज्ञायांतिलयवाभ्याम् तिलयवशब्दाभ्यामसंज्ञायांविषये मयट्प्रत्ययो भव
ति विकारावयवयोरर्थयोः तिलमयम् यवमयम् असंज्ञायामिति किं तैलम्
यावकम् यवादिभ्यः कन् द्व्यचश्छन्दसि द्व्यचः प्रातिपदिकाच्छन्दसि विषये म
यट्प्रत्ययो भवति विकारावयवयोरर्थयोः भाषायां मयड्वैतयोः कृतत्वात्प्राप्ते विधी
यते यस्य पर्णमयी जुहूर्भवति दर्भमयं वासो भवति शरमयं बर्हिर्भवति नोत्व
द्वर्ध्रबिल्वात् उत्वतः प्रातिपदिकात् वर्ध्रबिल्वशब्दाभ्यां मयट्प्रत्ययो भवति द्व्यच
श्छन्दसि विषये प्रतिषिध्यते मौंजम् शिक्यम् कार्मतश्चरुः वार्ध्री वालप्रग्रथिता
भवति बैल्वो ब्रह्मवर्चसकामेन कार्यः तपरकरणात्कालायसम् ध्रुममयान्यथा

णमतः निर्देशः तदन्तविधिनिरासार्थः इहैव स्यात् वैणवी यष्टिरिति तालादिभ्योऽण् ता
लादिप्रातिपदिकेभ्यः अण् प्रत्ययो भवति विकारावयवयोरर्थयोः मयडादीनामप
वादः तालं धनुः बार्हिणम् ऐन्द्रालिशम् तालं वनमपि तालं बर्हिणः इन्द्रालिश इ
न्द्रायुधश्यामाकः पीयुक्षा जातरूपेभ्यः परिमाणे जातरूपं सुवर्णं बहुवचननिर्दे
शात् तद्वाचिनः सर्वे गृह्यन्ते जातरूपवाचिभ्यः प्रातिपदिकेभ्यः प्रातिपदिकेभ्यः अण् प्र
त्ययो भवति परिमाणे विकारे मयडादीनामपवादः हाटको निष्कः हाटकम् कार्षा
पणम् जातरूपम् तापनीयम् परिमाण इति किं यष्टिर्वा हाटकमयी प्राणिरज
तादिभ्योऽञ् प्राणिवाचिभ्यः प्रातिपदिकेभ्यः रजतादिभ्यश्च अञ् प्रत्ययो भवति विका
रावयवयोरर्थयोः अणादीनामपवादः अनुदात्तादेरञ्मिति सिद्धे तत्रपरिशिष्टमिहो
दाहरणम् प्राणिभ्यस्तावत् कापोतम् मायूरम् तैत्तिरम् रजतादिभ्यः राजतम् सैसं
लौहम् रजतादिषु येऽनुदात्तादयः पठ्यन्ते रजतकण्टकारप्रभृतयस्तेभ्यो ञित्सिद्ध
मयड्बाधनार्थम् रजत सीस लोह उदुंवर निचुदारु रोहीतक विभीतक पीतदारु

का
वृष
२८२

तिव कक कंटकार तिनश्चतत्सप्तम्यार्थे अग्निरेवनदितिविकारावयवयोःत्रिभो
विकारावयवःप्रत्ययःतदन्तप्रातिपदिकात अत्रप्रत्ययाभवन्तिविकारावयवयोरेव
मयटोपवादःऽोरञ शम्याष्ठ्र प्राणिरजतादिभ्योञ् उष्ट्राद्वुञ एण्याढञ कंसी
यपरशव्ययोयञञाविति पतेप्रत्ययाष्टस्यन्ते दैवदारवमस्यविकारोवयववो।
दैवदारवम दाधित्मस्यदाधित् पालाशं शामीलम कापोतस्यकापोतम औष्ट्र
कस्यऔष्ट्रकम ऐणेयस्यऐणेयम कांस्यस्यकांस्यम पारशवस्यपारशवम त्रि
नइतिकिम वैल्वमयम तस्यप्रत्ययादितिकिम वैटमयम क्रीतवत्परिमाणात
प्राग्वहतेष्ठगित्यारभ्यक्रीतार्थेयेप्रत्ययाविहितास्तेपरिमाणाद्विकारेतिदिश्य
न्तेपरिमाणात्क्रीतवत्प्रत्ययाभवन्तितस्यविकारइत्यस्मिन्विषयेग्रणादीनामप
वादःसंख्यापरिमाणाद्ग्रहणेनवदत्यातेतेननूष्कपरिमाणमेव निष्केनक्रीतम नैष्कि
के एवंनिष्कस्यविकारःनैष्किकःशतेनक्रीतम शत्यम शतिकम शतस्यविका
रःशत्यःशतिकःसाहस्रःसाहस्रिकःवृत्तिविधानसामर्थ्यात्अर्थःग्रण्यर्थप्रसर्वोहिगो

लेतिलेवमादिकमप्यतिदिश्यते हिमरुहस्यः हिमारुहस्यः हैनिकः हैतेक्किकः उष्ट्रा
दुञ् उष्ट्रशब्दाद्वुञ्प्रत्ययोभवतिविकारावयवयोरर्थयोः प्राण्यत्रोपवादः उष्ट्रस्य
विकारोवयवोवा औष्ट्रकः उमोर्णयोर्वा उमाशब्दात् ऊर्णाशब्दाच्च वा वुञ्प्रत्ययो
भवतिविकारावयवयोरर्थयोः औमम् औमकम् और्णम् और्णकम् एण्या ढञ् ॥
एणीशब्दात् ढञ्प्रत्ययोभवति विकारावयवयोरर्थयोः प्राण्यञोपवादः ऐणेयं मां
सम् पुंसस्त्वणेवभवति ऐणस्य मांसम् ऐणम् गोपयसोर्यत् गोपयःशब्दाभ्यां य
त्प्रत्ययोभवति विकारावयवयोरर्थयो गव्यम् पयस्यम् सर्वत्र गोरजादिप्रसंगे यत्
स एव मयड्विषयेपि विधीयते द्रोश्च द्रुशब्दाद्यत्प्रत्ययोभवति विकारावयवयोरर्थ
योः औञोपवादः द्रव्यम् माने वयः द्रुशब्दात् माने विकारे वयप्रत्ययोभवति द्रुवय
मानम् फले लुक् विकारावयवाद्युत्पन्नस्य फले तद्धितप्रोषविवक्षिते लुग्भवति आ
मलक्याः फलम् आमलकम् कुवलम् बदरम् फलितस्य वृक्षस्य फलम् अवय
वो भवति विकारश्च पल्लवितस्य पल्लवः प्लक्षादिभ्यो फल इत्येव प्लक्षादिभ्यः प्राति

का॰
वृ प
२८४

पदिकेभ्यः फले विकारावयवत्वानविवक्षितेऽणप्रत्ययो भवति अञोपवादः विधानसा
मर्थ्यान लुङ्भवति प्लाक्षम नैयग्रोधम प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिग्रु रुरु कर्कन्धु बृह
ती जम्ब्वा वा फल इत्येव जम्बूशब्दात्फलेऽभिधेये वा अणप्रत्ययो भवति ओरञोपवादः
तस्यापि विधानसामर्थ्यान्न लुङ्भवति अन्यत्र भवत्येव जाम्बवानि फलानि जम्बूनि वा
लुप्च वेत्येव जम्ब्वाः फलप्रत्ययस्य वा लुब्भवति युक्तवद्भावे विशेषः जम्बूः फलम् जं
बुफलम् जाम्बवमिति वा लुप्प्रकरणे फलपाकशुषामुपसंख्यानम् व्रीहयः यवाः मु
द्गाः माषाः पुष्पमूलेषु बहुलम पुष्पमल्लिकाः मल्लिकाः नवमालिका जातिः विदा
रीमूलम विदारी अंशुमती बृहती न च भवति पाटलानि पुष्पाणि साल्वानि मूला
नि बहुलग्रहणात्क्वचिदन्यदपि भवति केवलपुष्पम अशोकम् करवीरं वैणवानि
फलानीति वा हरीतक्यादिभ्यश्च हरीतकी इत्येवमादिभ्यः शब्देभ्यः फलप्रत्ययस्य
लुब्भवति लुकि शब्दे लुपो विधाने युक्तवद्भावे स्त्रीप्रत्ययश्रवणञ्च विशेषः हरीतक्याः
फलम् हरीतकी कोशातकी नखरजनी अत्र च व्यक्तिर्युक्तवद्भावेन भवति वचनन्त्वभि

भिधेयवदेव भवति हरीतक्याः फलानि हरीतकी कोषातकी नखरजनी शुष्कंडी दं
डी दोडी श्वेतपाकी अर्जुनपाकी कालाद्राक्षा ध्वांक्षा गर्गरिका कंटकारिका शे
फालिका येषां च फलपाकनिमित्तः शोषः पुष्पमूलेषु बहुलम् कंसीयपरश
व्ययोर्यञञौ लुक् च प्राक्क्रीताच्छः कंसीयः उगवादिभ्यो यत् परशव्यः कंसीय
परशव्याभ्यां यथासंख्यं यञञौ प्रत्ययौ भवतः तस्य विकार इत्यस्मिन्विषये तत्स
न्नियोगेन च कंसीयपरशव्ययोर्लुग्भवति कंसीयस्य विकारः कांस्यः परशव्य
स्य विकारः पारशवः प्रातिपदिकाद्विकारागतप्रत्ययस्य लुग्भवति परश
व्यशब्दाद्यदन्तादिञादेवाभिनिसिद्धे लुगर्थं वचनम् तत्र च यस्येति लोपे कृते
हलस्तद्धितस्येति यलोपो भविष्यति नैतदस्ति ईतीति वर्त्तते ॥ इति जयादित्य
विरचितायां काशिकायां वृत्तौ चतुर्थस्याध्यायस्य तृतीयः पादः ॥ प्राग्वहतेष्ठ
क् तद्वहति रथयुगप्रासंगमिति वक्ष्यति प्राग एतस्माद्वहतिसंशब्दनाद्या
नर्थाननुक्रमिष्यामः ठक्प्रत्ययस्तेष्वधिकृतो वेदितव्याः वक्ष्यति प्राग एतस्माद्

का॰
वृ॰
२८५

इति संज्ञानाद्यानयोनबन्धैमिष्यामः इकण् तस्येत्यनुवर्त्तते
न दीव्यति खनति जयति जितम् अक्षैर्दीव्यति आक्षिकः शालाकिकः इकण् करणे
माषाद्यादिभ्य उपसंख्यानम् माषशब्दः इत्याह माषशब्दिकः कार्यशब्दिकः वैषशब्दि-
कः शब्दादिभ्यस्तु आयत्तविधानम् प्राहो प्रभृतादिभ्यः प्रभृतमाह प्राभृतिकः पा-
रीप्सिकः क्रियाविशेषणात्प्रत्ययः पृच्छतौ सुस्नातादिभ्यः सुस्नातं पृच्छति सौस्ना-
तिकः सौखरात्रिकः सौखशायिकः गच्छतौ परदारादिभ्यः परदारान् गच्छति पार-
दारिकः गौरुतल्पिकः तेन दीव्यति खनति जयति जितम् तेनेति तृतीयासमर्था-
त् दीव्यति खनति जयति जितम् इत्येतेष्वर्थेषु इकण् प्रत्ययो भवति अक्षैर्दीव्यति आक्षि-
कः शालाकिकः अभ्र्या खनति आभ्रिकः कौद्दालिकः अक्षैर्जयति आक्षिकः
शालाकिकः अक्षैर्जितम् आक्षिकं शालाकिकं सर्वत्र करणे तृतीयासमर्थ-
विभक्तिः देवदत्तेन जितमिति न भवति अन्यथा संख्याकालयोरविवक्षायामभा-
वानेवाख्यातस्य तद्धितः स्वभावात्साधनप्रधानः संस्कृतम् तेनेति तृतीयास-

मर्थात् संस्कृतमित्येतस्मिन्नर्थे ठक्प्रत्ययो भवति सूत्रउक्तमीथानेमस्कारःदध्नासं
स्कृतम् दाधिकम् शांगवेरिकम् मारिचिकम् यांगाविभागाउत्तरार्थम् कुलत्
कोपधादण् कुलत्थशब्दात् ककारोपधाच्च प्रातिपदिकात् अण्प्रत्ययो भव
ति संस्कृतमित्येतस्मिन्नर्थे ठकोपवादः कुलत्थैः संस्कृतम् कौलत्थम् ककारोप
धात् तैत्तिरीकम् वादे रूपकं तरति तरतिन्तीयासमर्थात् तरतीत्येतस्मिन्नर्थे
ठक्प्रत्ययोभवतितरतिप्लवतेऽत्यर्थःकांडप्लवेनतरतिकःयुडूपिकःघाप्रस्रा
विकः औडुपिकः गोपुच्छाट्ठञ् गोपुच्छशब्दात् ठञ्प्रत्ययोभवतितरतीत्ये
स्मिन्नर्थे ठकोपवादः स्वरे विशेषः गोपुच्छेन तरति गौपुच्छिकः नौद्व्यचष्ठन् ।
नौशब्दात् द्व्यचश्च प्रातिपदिकात् ठन्प्रत्ययो भवति तरतीत्येतस्मिन्नर्थे ठकोपवा
दः नावा तरतीति नाविकः द्व्यचः खल्वपि घटिकः प्लविकः बाहुकः षकारः संहि
तिकोनात्वंयः बाहुका स्त्री आकर्षपर्पादिभस्त्रादिभ्यः कुसीदसूत्राच्च आ
वसथात्किसरादेःषइतेठगधिकारेविधिवाक्यापेक्षंषकारवंप्रत्ययान्तसम

का.
वृत्र
२०९

चरति तेनेतिसमर्थात् चरतीत्यस्मिन्नर्थेठक्प्रत्ययोभवति चरतिर्भक्षणेगतौच वर्त्तते दध्नाचरतिदाधिकः शांगाविकः हास्तिकः शाकटिकः आकर्षात्ष्ठल् आकर्षशब्दात्ष्ठल्प्रत्ययोभवतिचरतीत्यस्मिन्नर्थेठकोपवादः लकारः स्वरार्थः षकारोङीषर्थः आकर्षेणचरतिआकर्षिकः आकर्षिकी आकर्षइतिसुवर्णपरीक्षार्थोनिकषोपलउच्यते पर्पादिभ्यःष्ठन् पर्पइत्येवमादिभ्यःशब्देभ्यःष्ठन्प्रत्ययोभवतिचरतीत्यस्मिन्नर्थेठकोपवादः नकारः स्वरार्थः षकारःङीषर्थः पर्पिकः पर्पिकी अश्विकः अश्विकी सर्पअश्व अश्वत्थरथ जाल व्यास व्यालपादपञ्च । श्वगणाट्ठञ्च श्वगणशब्दाट्ठञ्प्रत्ययोभवतिचकारात्ष्ठन्च चरतीत्यस्मिन्नर्थेठकोपवादः श्वगणेनचरतिश्वागणिकः श्वागणिकी ष्ठन् श्वगणिकः श्वगणिकी श्वादेरिञीत्यत्रवक्ष्यतिइकारादिग्रहणं श्वागणिकाद्यर्थमिति तेनठञिष्ठनि कार्यंनभवति वेतनादिभ्योजीवति तेनेतितृतीयासमर्थात् वेतनादिभ्यःशब्देभ्यः जीवतीत्यस्मिन्नर्थेठक्प्रत्ययोभवति वेतनेनजीवतिवैतनिकः कर्मकरः आ

र्थंवाहीकः धनुर्दंडग्रहणमसंज्ञातविग्रहीतार्थं धानुर्दंडिकः धानुष्कः दंडिकः वे
तन वाह अर्धवाह धनुर्दंड जाल वेश उपवेश प्रेषण उपस्थि सुख शय्या शक्ति उ
पनिषत् उपवेश स्फिक पाद उपस्थान वस्नक्रयविक्रयाट्ठन् वस्नक्रयविक्रय
शब्देभ्यस्तृतीयासमर्थेभ्यष्ठन्प्रत्ययो भवति जीवतीत्यस्मिन्नर्थे वस्नेन जीवति व
स्निकः क्रयग्रहणं संज्ञातविग्रहीतार्थम् क्रयविक्रयिकः क्रयिकः विक्रयिकः ।
आयुधाच्छ च आयुधशब्दात् छ प्रत्ययो भवति चकाराट्ठञ् तेन जीवतीत्यस्मिन्न
र्थे आयुधेन जीवति आयुधीयः आयुधिकः हरत्युत्संगादिभ्यः तेनेत्येव उत्संगा
दिभ्यः तेनेति तृतीयासमर्थेभ्यः हरतीत्यस्मिन्नर्थे ठक् प्रत्ययो भवति उत्संगेन हर
ति औत्संगिकः औडुपिकः उत्संग उडुप उत्कम उत्पुत पिटक पिटाकः भस्त्रादिभ्य
ष्ठन् भस्त्रेत्येवमादिभ्यः तृतीयासमर्थेभ्यः हरतीत्यस्मिन्नर्थे ष्ठन् प्रत्ययो भवति भ
स्त्रया हरति भस्त्रिकः भस्त्रिकी भरटिकः भरटिकी भस्त्र भरट भरण शीर्षभार
शीर्षेभार अंसभार अंसेभार विभाषा विवधवीवधात् हरतीत्येव विवधवीवधा

का॰
वृ॰
२८७

शाब्दाभ्यां तेनेति तृतीयासमर्थाभ्यां हरतीत्येतस्मिन्नर्थे विभाषा ष्ठन्प्रत्ययो भवति ते
न मुक्ते पक्षे ठगपि भवति विवधेन हरति विवधिकाः विवधिकी ठक खल्वपि वैव
धिकः वैवधिकी विवधवीवधशब्दौ समानार्थौ पथि पर्याहारे च वर्त्तेते अण् कुटि
लिकायाः हरतीत्येव कुटिलिकाशब्दात् तृतीयासमर्थादण्प्रत्ययो भवति हर
तीत्येतस्मिन्नर्थे कुटिलिकया हरति मृगान् व्याधः कौटिलिकः कुटिलिकया
हरत्यङ्गारान् कौटिलिकः कर्मारः निर्वृत्तेक्षद्यूतादिभ्यः तेनेत्येव अक्षद्यूतादिभ्यः
तृतीयासमर्थेभ्यः निर्वृत्त इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति अक्षद्यूतेन निर्वृत्तम् आ
क्षद्यूतिकम् वैरम् जङ्घाप्रहृतिकम् अक्षद्यूत जङ्घाप्रहृत पादस्वेदन कण्टकमर्द
न गतागत यातोपयात अनुगत क्त्रेर्म्मं नित्यम् निर्वृत्त इत्येव ड्वितः क्त्रिः त्रिमपन्त
शब्दोऽस्त्येते तेन संख्यावाचीयन्तान्नित्यं मप्प्रत्ययो भवति तेन निर्वृत्तः ड्वित्रिमिन्विषये
डुपचष् पक्त्रिमम् डुवप् उप्त्रिमम् डुकृञ् कृत्रिमम् नित्यग्रहणं स्वातन्त्र्येण निवृत्त्य
र्थम् तेनान्यत्र नित्यं मप्प्रत्ययान्तमेव भवति विग्रहान्तरेण प्रत्ययोऽन्यथा मित्रि भाव

खं

प्रत्ययान्तादिमवक्त्र्यः पाकेन निर्वृत्तं पाकिमम् त्यागिमम् रागिमम् सेकिमम् कु
ट्टिमम् अपमित्ययाचिताभ्यां कक्कनौ निर्वृत्त इत्यपमित्ययाचितशब्दाभ्यां यथा
संख्यं कक् कन् इत्येतौ प्रत्ययौ भवतः निर्वृत्त इत्येतस्मिन्नर्थे आपमित्यकम् याचितकं
संसृष्टे तेनेत्येव वर्त्तते तृतीयासमर्थात् प्रातिपदिकात् संसृष्ट इत्येतस्मिन्नर्थे ठक्प्रत्य
यो भवति संसृष्टमेकीभूतमसंभवमित्यर्थः दध्ना संसृष्टं दाधिकम् शार्ङ्गवेरिकम्
मारिचिकम् पैप्पलिकम् चूर्णादिनिः चूर्णशब्दादिनिः प्रत्ययो भवति संसृष्टे ठको
पवादः चूर्णिनः संसृष्टाः चूर्णिनोऽपूपाः चूर्णिनो धानाः लवणाल्लुक् संसृष्टे उत्प
न्नस्य ठकः लवणशब्दाल्लुग्भवति लवणेन संसृष्टो लवणः सूपः लवणं
शाकम् लवणा यवागूः द्रव्यवाची लवणशब्दो लिङ्गं प्रयोजयति न गुणवाची
मुद्गादण् मुद्गशब्दादण्प्रत्ययो भवति तेन संसृष्टमित्यस्मिन्विषये ठकोऽपवादः
मौद्ग ओदनः मौद्गी यवागूः व्यञ्जनैरुपसिक्ते तेनेत्येव व्यञ्जनविशेषवाचिभ्यः
शब्देभ्यः तृतीयासमर्थेभ्यः उपसिक्त इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति दध्ना उप।

का॰
वृ॰
२८८

सिक्तमोदनम् दाधिकं सौपिकम् काटविकम् व्यंजनैरुपसिक्ते ३ ओदनः ३ ओजः
सहोम्भसा वर्त्तते ३ ओजः सहः अम्भः एभ्यः तृतीयासमर्थेभ्यः वर्त्तत इत्येतस्मिन्नर्थे
ठक्प्रत्ययो भवति ओजसा वर्त्तते ओजसिकः शूरः साहसिकः चोरः आम्भसिकः म
त्स्यः ३ तत्प्रत्यनुपूर्वमीपलोमकूलम् ३ तदिति द्वितीयासमर्थविभक्तिः प्रति
अनु इत्येवं पूर्वेभ्यः ईप लोम कूल शब्देभ्यः द्वितीयासमर्थेभ्यः वर्त्तत इत्येतस्मिन्नर्थे
ठक्प्रत्ययो भवति ननु च वृत्तिरकर्मकः तस्य कथं कर्मणा संबन्धः क्रियाविशेषणा
म् कर्म्म अकर्मकाणामपि कर्म्म भवति प्रतीपं वर्त्तते प्रातीपिकः आन्वीपिकः प्रातिलोमि
कः आनुलोमिकः प्रातिकूलिकः आनुकूलिकः परिमुखं च ३ परिमुखशब्दात्
तदिति द्वितीयासमर्थात् वर्त्तत इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति परिमुखं वर्त्त
ते पारिमुखिकः सेवकः चकारात् ऊसमग्रयात्माः पारिपार्श्विकः ३ प्रयच्छति ग
र्ह्यम् ३ तदिति द्वितीयासमर्थात् प्रयच्छतीत्यस्मिन्नर्थे ठक्प्रत्ययो भवति यत्तद्द्विती
यासमर्थं गर्ह्यं चेद्भवति द्विगुणार्थं द्विगुणं यत्तत्प्रयच्छति द्वैगुणिकः त्रैगुणिकः

वृद्धेर्वृद्धुषीभावः वार्द्धुषिकः प्रकृत्यन्तरं वा वृद्धुषीशब्दो वृद्धिपर्यायः गर्ह्यमिति किं
द्विगुणं प्रयच्छत्यधमर्णः कुसीददशैकादशात् ष्ठन्ष्ठचौ प्रयच्छति गर्ह्यमित्येव
कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदम् एकादशकः दशा दशैकादशा शब्देनोच्यते कु
सीददशैकादशशब्दाभ्यां यथासंख्यम् ष्ठन्ष्ठचौ इत्येतौ प्रत्ययौ भवतः प्रयच्छ
ति गर्ह्यमित्येतस्मिन् विषये ठकोऽपवादः कुसीदं प्रयच्छति कुसीदिकः कुसीदि
की दशैकादशिकः दशैकादशिकी उञ्छति तदिति द्वितीयासमर्थात् उ
ञ्छतीत्यस्मिन्नर्थे ठक् प्रत्ययो भवति बदराण्युञ्छति बादरिकः श्यामाकिकः ॥
रक्षति तदिति द्वितीयासमर्थात् रक्षतीत्यस्मिन्नर्थे ठक् प्रत्ययो भवति समाजं रक्ष
ति सामाजिकः सान्निवेशिकः शब्ददर्दुरं करोति तदिति द्वितीयासमर्थाभ्यां
शब्ददर्दुरशब्दाभ्यां करोतीत्यस्मिन्नर्थे ठक् प्रत्ययो भवति शब्दं करोति शाब्दिकः
वैयाकरणः दार्दुरिकः कुम्भकारः पक्षिमत्स्यमृगान् हन्ति तदित्येव पक्ष्यादि
भ्यः द्वितीयासमर्थेभ्यः हन्तीत्यस्मिन्नर्थे ठक् प्रत्ययो भवति स्वरूपस्य पर्यायाणां

द्विशेषणानांच ग्रहणान्मित्स्यपोपक्षिणोहन्तिपाक्षिकः शाकुनिकः मायूरिकः
तैत्तिरिकः मत्स्य मात्स्यिकः मैनिकः शाफरिकः शाकुलिकः म्राप मार्गिकः हा
रिणिकः सारंगिकः शाकविकः परिपन्थंचतिष्ठति परिपन्थशब्दात् तदि
तिद्वितीयासमर्थात् तिष्ठतीत्यस्मिन्नर्थेठक्प्रत्ययोभवतिपरिपन्थंतिष्ठतिपारि
पन्थिकः चौरः चकारोभिन्नक्रमः प्रत्ययार्थंसमुच्चिनोतिपरिपन्थंहन्तिपारिपन्थि
कः समर्थविभक्तिप्रकरणेपुनर्द्वितीयोच्चारणमलौकिकवाक्यदर्शनार्थम परिप
न्थपर्यायः परिपन्थशब्दोस्तीति ज्ञापयतिमविषयान्तरेपिप्रयोक्तव्यः पाथोत्तरपदप
दव्यनुपदंधावति पाथोत्तरपदात्प्रातिपदिकात्पदवीअनुपदइत्येताभ्यांधावती
त्येतस्मिन्नर्थेठक्प्रत्ययोभवति दंडपथंधावतिदंडपाथिकः शौल्कपाथिकः पद
वीपादविकः अनुपदआनुपदिकः पाथशब्दः पथिपर्यायः आक्रन्दाट्ठञ्च आक्रन्द
त्यस्मिन्नित्याक्रन्दः देशः अथवाआक्रंदयतइत्याक्रन्दायनउच्यतेविशेषाभावात् ह्यस्मा
पिग्रहणे आक्रन्दशब्दात्तदितिद्वितीयासमर्थात् धावतीत्यस्मिन्नर्थेठक्प्रत्ययोभ

वकाराट्ठञ्स्वरे विशेषः आक्रन्दं धावति आक्रन्दिकः पदोत्तरपदं गृह्णाति पदशब्द उ
त्तरपदं यस्मात् तस्मात् पदोत्तरपदात् तदिति द्वितीयासमर्थात् गृह्णातीत्यस्मिन्नर्थे ठक्प्र
त्ययो भवति पूर्वपदं गृह्णाति पौर्वपदिकः औत्तरपदिकम् पदान्तादिति किम् ब
हुपूर्वादिति मा भूदिति प्रतिकण्ठार्थललामं च प्रतिकण्ठार्थललामशब्देभ्यः ता
दिति द्वितीयासमर्थेभ्यः गृह्णातीत्यस्मिन्नर्थे ठक्प्रत्ययो भवति प्रतिकण्ठं गृह्णाति।
प्रातिकण्ठिकः आर्थिकः धर्मं चरति धर्मशब्दात् तदिति द्वितीयासमर्थात् चरती
त्यस्मिन्नर्थे ठक्प्रत्ययो भवति चरतिरासेवायां नानुष्ठानमात्रे धर्मं चरति धार्मिकः अ
धर्माच्चेति वक्तव्यम् आधार्मिकः प्रतिपथमेति ठंश्च प्रतिपथशब्दात् तदिति द्वि
तीयासमर्थात् एतीत्यस्मिन्नर्थे ठक्प्रत्ययो भवति चकारात् ठञ्च प्रतिपथमेति प्रतिप
थिकः प्रातिपथिकः समवायान् समवैति समवायिवाचिशब्देभ्यः तदिति द्विती
यासमर्थेभ्यः समवैतीत्यस्मिन्नर्थे ठक्प्रत्ययो भवति समवायः समूह इह गृह्यते तेन
संप्रदायेण बहुवचने स्वरूपविधिनिरासार्थम् समवैत्याख्यातः तदेकदेशो भवती

का॰ वृ॰

त्यर्थः समवायान्समवैति सामवायिकः सामाजिकः सामूहिकः सान्निवेशिकः परि
षदो ण्यः परिषच्छब्दात् ण्यप्रत्ययो भवति समवायान्समवैतीत्यस्मिन्नर्थे ठको
पवादः परिषदं समवैति पारिषद्यः सेनाया वा सेनाशब्दाद्वा ण्यप्रत्ययो भवति
समवायान्समवैतीत्यस्मिन्नर्थे ठकोपवादः पक्षे सोपि भवति सेनां समवैति सै
निकः संज्ञायां ललाटकुक्कुट्यौ पश्यति ललाटकुक्कुटीशब्दाभ्यां द्विती
यासमर्थाभ्यां पश्यतीत्यस्मिन्विषये ठक्प्रत्ययो भवति संज्ञायां विषये संज्ञाग्र
हणमभिधेयनियमार्थं न तु प्रत्ययार्थम् ललाटं पश्यति लालाटिकः सेवकः कौ
क्कुटिको भिक्षुः सर्वो वा यो भृत्यो ललाटं दूरे स्थ पश्यति तेन ललाटदर्शनेन सेवक
स्य स्वामिने प्रयोजनकार्येष्वनुपस्थायित्वं लक्ष्यते लालाटिकः सेवकः स्वामिनः
कार्येषु नोपतिष्ठत इत्यर्थः कुक्कुटीपातेन लक्ष्यते देशस्याल्पता यो भिक्षुरविक्षि
प्तदृष्टिः पादविक्षेपदेशे बद्धः सन् गच्छति स उच्यते कौक्कुटिकः इति तदयम
भिधेयनियमः संज्ञाग्रहणेन क्रियते तस्य धर्म्यं तस्येति षष्ठीसमर्थात् धर्म्यमित्ये

तस्मिन्नर्थे ठक्प्रत्ययो भवति धर्म्यं न्याय्यमाचारयुक्तमित्यर्थः शुल्कशालायाधर्म्यं शौ
ल्कशालिकम् आकरिकं आपणिकम् गौल्मिकं अण्महिष्यादिभ्यः महि
षीत्येवमादिभ्यः शब्देभ्यः अण्प्रत्ययो भवति तस्य धर्म्यमित्येतस्मिन्नर्थे ठकोऽपवा
दः महिष्या धर्म्यं माहिषम् प्राजावतम् महिषी प्रजावती प्रलेपिका विलेपिका अ
नुलेपिका पुरोहित मणिपाली अनुचारक होतृ यजमान् ऋतोञ् ऋकारान्ता
त्प्रातिपदिकात् अञ्प्रत्ययो भवति तस्य धर्म्यमित्यस्मिन्विषये अणोऽपवादः पोतु
धर्म्यं पौत्रम् औद्गात्रं नुः नराच्चेति वक्तव्यम् नरस्य धर्म्या नारी विशसितुरिट्लोप
श्च विशसितुः धर्म्यं वैशस्त्रम् विभाजयितुः णिलोपश्च विभाजयितुर्धर्म्यम्
वैभाजित्रम् अवक्रयः तस्येत्येव षष्ठीसमर्थात् अवक्रये तस्मिन्नर्थे ठक्प्रत्य
यो भवति अवक्रीयते अनेन अवक्रयः पिण्डक उच्यते शुल्कशालायाः अवक्रयः
शौल्कशालिकः आकरिकः आपणिकः गौल्मिकः न त्वक्रयोऽपि धर्म्य एव तेन
दक्षिलाकर्षीडा धर्मीति क्रमेणापि चावक्रयो भवति तदस्य पण्यम् तदिति प्र

थमासमर्थात् अस्येति षष्ठ्यर्थे ठण् प्रत्ययो भवति यत्तत्प्रथमासमर्थं पण्यं चेद्भवति
अपूपाः पण्यमस्य आपूपिकः शाष्कुलिकः मोदकिकः पण्यमिति विशेषणात्
द्वित्वबन्नावन्नभं तस्मिन्निति पण्यशब्देन प्रयुज्यते लवणाट्ठञ् लवणशब्दात् ठ
ञ् प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन्विषये ठकोऽपवादः स्वरे विशेषः लवणं
पण्यमस्य लावणिकः किसरादिभ्यः ष्ठन् किसर इत्येवमादिभ्यः ष्ठन् प्रत्ययो भ
वति तदस्य पण्यमित्येतस्मिन्विषये ठकोऽपवादः किसरादयो गन्धविशेषवचनाः
किसरिकः किसरिकी नलदिकः नलदिकी किसर नलद नलद स्थगर तगर गु
ग्गुलु उशीर हरिद्रा हरिद्रुपर्णी शलालुनोऽन्यतरस्याम् शलालुशब्दात् प्रत्य
तरस्यां ष्ठन् प्रत्ययो भवति तदस्य पण्यमित्यस्मिन्विषये ठकोऽपवादः पक्षे सोऽपि भवति
शलालुशब्दः गन्धविशेषवचनः शलालु पण्यमस्य शलालुकः शलालुकी शा
लालुकः शालालुकः शिल्पम् तदिति प्रथमासमर्थाद्विभक्तिः अस्येति च प्रत्यया
यौ नवर्तते प्रथमासमर्थात् अस्येति षष्ठ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं शि

स्यं वेद्भवति शिल्पं कौशलम् मृदंगवादनं शिल्पमस्य मार्दंगिकाः पाणविकः वैणिकः
मृदंगवादेन वर्तमानः मृदंगशब्दः प्रत्ययमुत्पादयति शिल्पे तद्धितन्तुल्यावन्तं भवति
मड्डुकजर्जराद णन्यतरस्याम् मड्डुकजर्जरशब्दाभ्यामण्प्रत्ययो भवति अन्यतरस्यां
तदस्य शिल्पमित्यस्मिन्विषये ठकोपवादः पक्षे सोपि भवति मड्डुकवादनं शिल्पम
स्य माड्डुकः जार्जरः माड्डुकिकः जार्जरिकः प्रहरणम् तदस्येत्येव तदिति प्रथ
मासमर्थादस्येति षष्ठ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्रहरणं चेद्भवति
असिः प्रहरणमस्य आसिकः प्रासिकः वार्थिकः धानुष्कः परिश्वधाट्ठञ्च परिश्व
धशब्दात्ठञ्प्रत्ययो भवति तदस्य प्रहरणमित्येतस्मिन्विषये चकाराट्ठक्च स्वरे
विशेषः परिश्वधः प्रहरणमस्य पारिश्वधिकः पारिश्वधिकः शक्तियष्ट्योरीकक् ।
शक्तियष्टिशब्दाभ्यामीकक्प्रत्ययो भवति तदस्य प्रहरणमित्येतस्मिन्विषये ठकोप
वादः शक्तिः प्रहरणमस्य शाक्तीकः याष्टीकः अस्तिनास्तिदिष्टं मतिः तदस्येत्येव
तदिति प्रथमासमर्थेभ्यः अस्तिनास्तिदिष्टशब्देभ्यः अस्येति षष्ठ्यर्थे ठक्प्रत्ययो भव

का० वृ०
२९२

यत्तत्प्रथमासमर्थं मतिश्चेत्सा भवति अस्तिमतिरस्य आस्तिकः नास्तिकः दैष्टिकः न
च मतिसत्तामात्रे प्रत्यय इष्यते किन्तर्हि परलोकोस्तीति यस्य मतिः स आस्तिकः
तद्विपरीतो नास्तिकः प्रमाणानुपातिनी यस्य मतिः स दैष्टिकः तदेतदभिधान
शक्तिस्वाभाव्याल्लभ्यते अस्तिनास्तिशब्दौ निपातौ वचनसामर्थ्याद्वा अस्त्यादेष्ठ
क्प्रत्ययः शीलम् तदस्येत्येव तदिति प्रथमासमर्थात् अस्येति षष्ठ्यर्थे ठक्प्र
त्ययो भवति यत्तत्प्रथमासमर्थं शीलं चेत्तद्भवति शीलं स्वभावः अपूपभक्षणं शीलम
स्य आपूपिकः शाष्कुलिकः मौदकिकः भक्षणं क्रिया तद्विषयं वा तद्धितवृत्तावन्तर्भ
वति छत्त्रादिभ्यो णः छत्त्र इत्येवमादिभ्यः प्रातिपदिकेभ्यः णप्रत्ययो भवति तद
स्य शीलमित्येतस्मिन्विषये ठकोपवादः छादनादावरणाच्छत्त्रं गुरुकार्येषु वहितस्त
च्छिद्रावरणप्रवृत्तः छत्त्रशीलः शिष्यः छात्त्रः स्थाशब्दोत्र पठ्यते स उपसर्गपूर्वो गृह्य
ते आस्था संस्था अवस्थेति कर्म शिक्षा बुभुक्षा पुरोहस्था चुरा उपस्थान ऋ
षि कर्मन् विश्वधा तपस् सत्य अनृत शिबिका कर्माध्ययने वृत्तम् तदस्येत्येव तदि

ति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं कर्म चेद्वृत्तम
ध्ययनविषये तद्भवति एकमन्यदध्ययने कर्म वृत्तमस्य ऐकान्यिकः द्वैयन्यिकः त्रै
यन्यिकः एकमन्यदिति विग्रहस्तद्धितार्थ इति समासः तत्र ठक्प्रत्ययः अध्ययने क
र्म वृत्तमित्येतत्सर्वं तद्धितवृत्तावन्तर्भवति यस्याध्ययने नियुक्तस्य परीक्षाकाल
पाठतः स्खलितमपपाठरूपमेकं जातं स उच्यते ऐकान्यिकः इति एवं द्वैयन्यिकः
त्रैयन्यिकः बह्वच्पूर्वपदाट्ठच् बह्वच्पूर्वपदं यस्य तस्माद्बह्वच्पूर्वपदात्प्रातिपदि
कात्ठच्प्रत्ययो भवति तदस्य कर्माध्ययने वृत्तमित्येतस्मिन्विषये ठकोऽपवादः द्वा
दशान्यानि कर्माणि अध्ययने वृत्तान्यस्य द्वादशान्यिकः त्रयोदशान्यिकः चतुर्दशा
न्यिकः इति चतुर्दशाप्यपपाठा अस्य जाता इत्यर्थः उदाहरणे तु अयं यः कर्माणि
स उच्यते अन्यत्र कर्माणीति हितं भक्षाः तदस्मै एवं तदिति प्रथमासमर्थादस्मैति
षष्ठ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं हितं चेद्भवति तच्चेत् भक्षाः नन्वहित
योगे चतुर्थी भवति तत्कथं षष्ठ्यर्थे प्रत्ययो विधीयते एवं तर्हि सामर्थ्यादिह भक्षि

का०
वृ०
२५७

विपरिणाममभविष्यति अपूपाभक्षणं हितमस्मै आपूपिकः शाष्कुलिकः मोद-
किकः हितार्थः क्रियावृत्ते हितशब्दावत्तो भवति तदस्मै दीयते नियुक्तम् तदि-
ति प्रथमासमर्थात् अस्मै इति चतुर्थ्यर्थे इकण् प्रत्ययो भवति यत्तत्प्रथमासमर्थं तच्चे-
द्दीयते नियुक्तम् नियोगेनाव्यभिचारेण दीयत इत्यर्थः अग्रभिक्षा नियोगः अ-
ग्रभोजनमस्मै दीयते नियुक्तम् आग्रभोजनिकः आपूपिकः शाष्कुलिकः मोदकिका
केचिन्नियुक्तमनियमाकुः अपूपा नित्यमस्मै दीयन्ते आपूपिकः श्राणामांसौ-
दनाद्टिठन् श्राणामांसौदनशब्दाभ्यां टिठन् प्रत्ययो भवति तदस्मै दीयते नि-
युक्तमस्मिन्विषये ठकोपवादः इकार उच्चारणार्थः टकारो ङीवर्थः श्राणानि-
युक्तमस्मै दीयते श्राणिकः श्राणिकी मांसौदनिकः मांसौदनिकी टनवका-
साद्राक्कः नत्वयटजिप्तिवनोवाविशेषेण मांसौदनतयदणसंज्ञानविग्रहीता
र्थे केचिदिच्छन्ति नत्वस्य भावविशेषाः डौदनिकः डौदनिकी भक्तादण्वा-
न्यतरस्याम् भक्तशब्दादण्प्रत्ययो भवति अन्यतरस्यां तदस्मै दीयते नियुक्तमित्य-

स्मिन्विषये ठकोपवादः पठेमोपि भवति भक्तमस्मै नियुक्तं दीयते भाक्तः भाक्तिकः
तत्र नियुक्तः तत्रेति सप्तमीसमर्थात्‌ नियुक्त इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति नियु
क्तोधिकृतः व्यापारितः इत्यर्थः शुल्कशालायां नियुक्तः शौल्कशालिकः आपति
कः आपणिकः गौल्मिकः दौवारिकः अगारान्ताट्ठन्‌ अगारशब्दान्तात्प्रातिपदि
कात्‌ ठन्प्रत्ययो भवति तत्र नियुक्त इत्यस्मिन्विषये ठकोपवादः देवागारे नियुक्तः
देवागारिकः कोष्ठागारिकः भाण्डागारिकः अध्यायिन्यदेशकालात्‌ तत्रेत्येव स
प्तमीसमर्थाद्देशकालवाचिनः अकालवाचिनश्च प्रातिपदिकात्‌ अध्यायिन्य
भिधेये ठक्प्रत्ययो भवति अध्ययनस्य यौ देशकालौ शास्त्रेण प्रसिद्धौ तावदेशका।
लौ ताभ्यामनेन तद्देशप्रत्ययविधानम्‌ श्मशाने अधीते श्माशानिकः चातुष्पथिकः
अकालात्‌ चतुर्दश्याममधीते चातुर्दशिकः आमावास्यिकः अदेशकालादिति किं
स्रुघ्ने अधीते सर्वाह्णेधीते कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति तत्रेत्येव कठिना।
न्तशब्दान्तात्प्रातिपदिकात्‌ सप्तमीसमर्थात्‌ प्रस्तारसंस्थानशब्दाभ्यां ठक्प्रत्ययो भव

काश
वृ
२८५

ति व्यवहरतीत्यस्मिन्नर्थे व्यवहारः क्रियातत्त्वं यथा लौकिको व्यवहारः इति वंशक
ठिने व्यवहरति वांशकठिनिकः वार्ध्रकठिनिकः प्रास्तारिकः सांस्थानिकः
निकटे वसति निकटशब्दात् सप्तमीसमर्थात् वसतीत्यस्मिन्नर्थे ठक् प्रत्ययो भवति ।
यद्यशास्त्रतो निकटे वासस् तत्रायं विधिः आरण्यकेन भिक्षुणा ग्रामात् क्रोशे वस्तव्यम्
इति शास्त्रं निकटे वसति नैकटिको भिक्षुः आवसथात् ष्ठल् तस्मादावसथशब्दात् सप्तमीसम
र्थात् आवसथशब्दात् वसतीत्यस्मिन्नर्थे ष्ठल् प्रत्ययो भवति लकारः स्वरार्थः षकारो
ङीषर्थः आवसथे वसति आवसथिकः आवसथिकी ठकः पूर्णो विधिः अतः परमन्यः
प्रत्ययोऽधिक्रियते प्राग्घिताद्यत् तस्मै हितमिति वक्ष्यति प्राक् हितसंशब्दना
द्यानित ऊर्ध्वमनुक्रमिष्यामः यत्प्रत्ययस्तेष्वधिकृतो वेदितव्यः वक्ष्यति तद्वहति
रथयुगप्रासङ्गम् रथं वहति रथ्यः युग्यः प्रासङ्ग्यः तद्वहति रथयुगप्रासङ्गम् ।
तदिति द्वितीयासमर्थेभ्यः रथयुगप्रासङ्गशब्देभ्यः वहतीत्यस्मिन्नर्थे यत् प्रत्ययो
भवति रथं वहति रथ्यः युग्यः प्रासङ्ग्यः धुरो यड्ढकौ धुरः इत्येतस्माद्द्वितीयास

मर्थात् वहतीत्यस्मिन्नर्थे यत्ढक् प्रत्ययौ भवतः धुरं वहति धुर्यः धौरेयः खः स
र्वधुरात् तद्वहतीत्येव सर्वधुरशब्दात् द्वितीयासमर्थात् वहतीत्यस्मिन्नर्थे खप्रत्य
यो भवति सर्वधुरं वहति सार्वधुरीणः स्त्रीलिंगेन्याये सर्वधुरादिति प्रातिपदिक
मात्रापेक्षो निर्देशः खः इति योगविभागः कर्त्तव्यः इष्टसंग्रहार्थः उत्तरधुरीणः दक्षि
णधुरीणः एकधुराल्लुक् तद्वहतीत्येव एकधुरशब्दात् द्वितीयासमर्थात् व
हतीत्यस्मिन्नर्थे खप्रत्ययो भवति तस्य च लुग्भवति वचनसामर्थ्यात्पक्षे ल्लवि
ज्ञायते एकधुरं वहति एकधुरीणः एकधुरः शकटादण् तद्वहतीत्येव शकट
शब्दात् द्वितीयासमर्थात् वहतीत्येतस्मिन्नर्थे अण्प्रत्ययो भवति शकटं वहति
शाकटो गौः हलसीराट्ठक् तद्वहतीत्येव हलसीरशब्दाभ्यां द्वितीयासमर्था
भ्यां वहतीत्यस्मिन्नर्थे ठक्प्रत्ययो भवति हलं वहति हालिकः सैरिकः संज्ञायां
जन्याः तद्वहतीत्येव जनीशब्दात् द्वितीयासमर्थात् वहतीत्येतस्मिन्नर्थे यत्प्रत्य
यो भवति समुदायेन चेत्संज्ञा गम्यते जनीं वहन्ति जन्याः जामातुर्वयस्याः जनीव

का॰
वृ॰
२५५

पूर्वस्मिन्सूत्रे विपन्नापन्नेषा तदिति द्वितीयासमर्थात् विपन्नीत्यस्मिन्नर्थे यत्प्रत्ययो
भवति न वहतः करणं भवति पादो विपन्नीत्यपथ्याः शर्कराः कस्याः कण्टकाः अथ
न वेधतीति किं पदं विपन्नीत्यपन्नेषाननुयामसमर्थनादभिधानाश्चात्र प्रत्ययो भवति विप
न्नीति हि पन्नेषापघट्टसूत्रे विवक्षितोऽर्थः प्रतीयते न एवं तर्हि पन्नासूत्रे विधेयेन प्रयत्ना
क्रियाविशेषणेन यस्यापन्नः करणे न सम्भावना तद्दितीनेह न भवति वाो शे विपन्नीति पा
द्वे विपन्नीति देवदत्त इति पन्नगाललक्षा तदिति द्वितीयासमर्थाभ्यां पन्नगाणा शब्दाभ्यां
लक्षत्यस्मिन्नर्थे यत्प्रत्ययो भवति पल्लक्षापन्नः गाणः लक्षेति तन्नेन द्वितीयास
मर्थो विभक्तिर्युज्यते अत्राणः तदिति द्वितीयासमर्थात् अत्र शब्दात् लक्षेत्य
स्मिन्नर्थे णप्रत्ययो भवति अत्र लक्ष आत्रः वंशागतः वंशशब्दात् द्वितीयासम
र्थात् गतन्त्येतस्मिन्नर्थे यत्प्रत्ययो भवति वंशागतः वंश्यः कामशाभौ विपेयटा
त्यर्थः पदस्मिन्दृश्यम् निर्देशादेव प्रथमसमर्थविभक्तिः पदशब्दात्प्रथमा
समर्थात् दृश्यपेतोपाधिकात् दस्मिन्निति समम्पर्थे यत्प्रत्ययो भवति पदे दृश्यपमस्मि

मयः कर्दमः पयाः पांसवः शाकार्थे कृत्पः शाकान्ते यत्र पदं दृष्टं प्रतिसंख्यातात्तेन मयः
कर्दमः कर्दममावस्यो व्यतेनाति द्रवोनाति शुष्कः मूलमस्यावर्हि मूलशब्दात्
यमासमर्थात् आवर्हीत्येवमपाधिकादस्मात्तिषष्ठ्यर्थे यत्प्रत्ययो भवति मूलमेषा
मावर्हि मूल्याः मुद्गाः मूल्याः माषाः वृहू उ यमेयेषां मूलमाव्रहृयते उत्पाद्यन्ते तेन
ल्याः न समूलनिषन्नाः मूलात्पाटनेन तन्याकान्ते उत्पद्यः सत्तायां धेनुष्या धेनुष्येति
निपात्यते सत्तायां विषये संज्ञाग्रहणमभिधेयनियमार्थं न तन्त्रूपार्थं धेनोर्युगागमो
मो भवति यश्च प्रत्ययः यन्तोदात्तो निपात्यते या गोलक्षणमाणि श्राक्रणप्रथानादीरा
दीयते साधेनुष्याः पीतदुग्धेति यस्याः प्रसिद्धिः धेनुष्यां भवते ददामि गृहपति
नासंयुक्ते ञ्यः निर्देशादेवतृतीयासमर्थविभक्तिः गृहपतिशब्दात्तृतीयासमर्थात्
संयुक्त इत्येतस्मिन्नर्थे ञ्यप्रत्ययो भवति गृहपतिना संयुक्तः गार्हपत्योग्निः यत्रस्था
पि गृहपतिना संयोगो स्तिन तसंज्ञाधिकारात् अतिप्रसंगानिवृत्तिः नौवयोध
मेविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु

नावादिभ्यः प्रष्ठाभ्यः शब्देभ्यः प्रष्ठासेव तार्यादिष्वर्थेषु यथासंख्यं यत्प्रत्ययो भवति प्र
त्ययार्थद्वारेण तृतीया समर्थविभक्तिर्लभ्यते नावा तार्यं नाव्यम् उदकम् नाव्या
नदी पादुः षष्ठ्यर्थे न्नः वयसा तुल्यः वयस्यः सं इत्यपिकारोभिधेयविषयमात्रार्थः तेन वयसा
तुल्ये पाशे न भवति धर्मेण प्राप्यः धर्म्यः ननु च धर्मादनपेत इति वक्ष्यमाणेनैव सि
द्धं नैतदस्ति धर्मे यदनुवर्तते तद्धर्मादनपेतमित्युच्यते फलेन धर्मादपेतेपि कार्यवि
रोधिनाद्भयमस्य विषेण वध्यः विष्यः विषेण वधमर्हतीत्यर्थः मूलेनानाम्यं मूल्यम् ।
मूलेनानाम्यमभिभवनीयम् पटादीनामुत्पत्तिकारणं मूलम् तेन तदभिभूयते शोधी
क्रियते मूल्येन हि मूलं शुद्धं करोति परोडुपपादिति यतिशासे ख्यातामपमिति निपातना
णत्वम् मूलेन समो मूल्यः पटः उपादानेन समानफल इत्यर्थः सीतया समितम् सीत्यं
क्षेत्रं समितं संगतमित्यर्थः सीता लाङ्गलेनोपरिहितो इति तदन्तविधिरपीष्यते परम
सीत्यम् उत्तमसीत्यम् द्विसीत्यम् तुलया संमितं तुल्यम् संमितं समानम् सदृश
मित्यर्थः यथा तुला परिच्छिनत्ति परमेवं तदपीति धर्मपथ्यर्थन्यायादनपेते निर्देशा

देवपंचमीसमर्थविभक्तिः धर्मादिभ्यः पंचमीसमर्थेभ्यः अनपेतइत्यस्मिन्नर्थे यत्प्र
त्ययो भवति धर्मादनपेतम् धर्म्यं पथ्यम् अर्थ्यं न्याय्यम् संज्ञाधिकारादभिधेय
नियमः केटोनिमित्ते प्रत्ययार्थसामर्थ्यालभ्यासमर्थविभक्तिः केटः शाब्दा
न्नतीसमर्थात् निमित्तइत्यस्मिन्नर्थे यत्प्रत्ययो भवति निमित्तः उत्पादितः केट
सानिमित्तः केटस्यः इक्ष्वकुयाकृतइत्यर्थः इक्ष्वाकुपर्यायश्च केटः शाब्दैरिहदर्शि
ते उरसोण्व उरःशाब्दात् तृतीयासमर्थान्निमित्तइत्यस्मिन्नर्थे अण्प्रत्ययो भवति
वकारागमश्च उरस्यानिमित्तः औरसः पुत्रः औरस्यः पुत्रः संज्ञाधिकारादभिधेयनि
यमः हृदयस्यप्रियः निर्देशादेवसमर्थविभक्तिः हृदयशाब्दात षष्ठीसमर्था
त् प्रियइत्येतस्मिन्नर्थे यत्प्रत्ययो भवति हृदयस्यप्रियो हृद्यो देशः हृद्यं वनम्
संज्ञाधिकारादभिधेयनियमः तेनेहन भवति हृदयस्यपुत्रः प्रियइति बंधनेच
षौ हृदयस्येत्येवं बंधनइतिप्रत्ययार्थः तद्विशेषणं इत्यविग्रहणं बध्यतेयेनतत्
बंधनम् हृदयशाब्दात् षष्ठीसमर्थात् बंधनरूपाच्च अभिधेये यत्प्रत्ययो भवति

का॰
वृ॰
२९०

क्षीविर्वैद्योरस्यतेस्यहृदयस्मात्वेयनः हृद्यः परस्यहृदयंयेनवध्यतेवशीक्रियतेसवशी
करणमेत्रोहृद्यउच्यते ॥ सप्तमीनहल्लातकरणजल्पकेषु ॥ सप्तमीशौण्डादिभिः ॥
शौण्डेभ्यः ऽशिवकरणादिभिर्येषु यथासंख्यं तत्पुरुषो भवति सप्तम्यार्थसामर्थ्ये ल
भ्यां षष्ठीसमर्थविभक्तिः सप्तं ज्ञातं तत्स्यकरणं सप्तम ॥ भावसाधनेवा ॥ जनस्य ज
ल्पः जल्पः हृत्तस्याकर्षः हत्वाद्विहृल्पः विहृल्पः कर्षणाकर्षः भावः साधनेवा ॥ न
३ साधुः ॥ नेतिसप्तमीसमर्थात साधुरित्येतस्मिन्नर्थे यत्तत्पुरुषो भवति सामसु सा
धुः सामसु कर्मणा प्रवीणः साधुरित्यर्थः वीणायां पात्रोवा गस्यतेतेनोपकारकः त
त्र परत्वात्र्यैहितमित्येन न विधिना भवितव्यम् ॥ प्रतिजनादिभ्यः खञ् ॥ प्रति
जनादिभ्यः शाखेभ्यः खञ् प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये यतोऽपवादः
प्रतिजने साधुः प्रातिजनीनः जने जने साधुरित्यर्थः ऐदंयुगीनः सांयुगीनः प्रा
तिजन इदंयुग संयुग समयुग परयुग परकुल परस्यकुल अमुष्यकुल स
र्वजन विश्वजन पंचजन महाजन हितार्थमेव साधुर्थः न भवव नाम्ना क्रीतीयो वाप्नत्ते

भक्ताणः भक्तशब्दात्णप्रत्ययोभवतितत्रसाधुरित्येतस्मिन्विषयेयतोपवादः भक्ते
साधुःशालिभक्तः भक्ताः तंडुला परिषदोण्यः परिषच्छब्दात्ण्यप्रत्ययोभव
तितत्रसाधुरित्यस्मिन्विषयेयतोपवादः परिषदिसाधुः परिषद्यः णप्रत्ययोपीष्य
ते तदर्थं योगविभागः क्रियते परिषदोणोभवतिपरिषदिसाधुः पारिषदः क
थादिभ्यष्ठक कथादिभ्यः शब्देभ्यः तत्रसाधुरित्यस्मिन्विषयेठक्प्रत्ययोभवति
यतोपवादः कथासुसाधुः काथिकः कथा विकथा विश्वकथा वितंडा कुष्टिवित् ।
जनवाद जनेवाद जनोवाद वृत्तिसंग्रह गुणगण आयुर्वेद गुडादिभ्यष्ठञ् गु
डादिभ्यः शब्देभ्यः ठञ्प्रत्ययोभवति तत्रसाधुरित्येतस्मिन्विषये यतोपवादः गुडे
साधुः गौडिकः इक्षुः कौल्मासिकः यव गुड कुल्मास सक्तु सूप मांसोदन इक्षु
वेणु संग्राम संघात प्रवास निवास उपवास पथ्यतिथिवसतिस्वपतेर्ढञ् पथि
न् इत्येवमादिभ्यः शब्देभ्यः ढञ्प्रत्ययोभवतितत्रसाधुरित्यस्मिन्विषयेयतोपवा
दः पथिसाधुः पाथेयम् आतिथेयम् वासतेयम् स्वापतेयम् सभायायः सभा

का॰
वृ ५
२५८

षाद्भात् तद्धितसप्तमीसमर्थात् यत्प्रत्ययो भवति तत्र साधुरित्यस्मिन्विषये यतोपवा
दः स्वरविशेषः सभायां साधुः सभ्यः ढश्छन्दसि सभाशब्दात् ढप्रत्ययो भवति छंद
सि तत्र साधुरित्यस्मिन्विषये यस्यापवादः साभेयोप्युवायजमानस्यवीरोजायतां
समानतीर्थेवासी साधुरिति निवृत्तम् वासीति प्रत्ययार्थः समानतीर्थशब्दात् तद्धे
तिसप्तमीसमर्थात् वासीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति समानतीर्थे वासी सतीर्थ्यः स
समानोपाध्याय इत्यर्थः तीर्थशब्देन गुरुरुच्यते समानस्य सभावः तीर्थे य इति ॥
समानोदरे शयित ओ चोदात्तः समानोदरशब्दात् सप्तमीसमर्थात् शयित इत्य
स्मिन्नर्थे यत्प्रत्ययो भवति ओकारश्चोदात्तः शयितः स्थित इत्यर्थः समानोदर्यो भ्राता
सोदराद्यः सोदरशब्दात्सप्तमीसमर्थात् शयित इत्येतस्मिन्नर्थे यप्रत्ययो भवति वि
भाषोदरे इति यकारादौ प्रत्यये विवक्षिते प्रागेव समानस्य सभावः समानोदरे श
यितः सोदर्यो भ्राता ओ चोदात्त इति नानुवर्तते इत्ययमाद्युदात्तः भवे छन्दसि तेभ्ये
वसप्तमीसमर्थात् भव इत्यस्मिन्नेव छन्दसि विषये यत्प्रत्ययो भवति अणादीनां बाधे

नोचापवादः सतिदर्शितेतेपिभवन्ति सर्वविधीनां छंदसिव्यभिचारात् मेध्यायच
नमः विद्युत्यायचनमः आपाटपरिममाभेः छंदोधिकारः भावार्थिकारः समुद्रा
भ्राद्घइतियावत् पाथोनदीभ्यां ड्यण् पाथः शब्दात् नदीशब्दाच्च ड्यण्प्रत्ययोभ
वति तत्रभवइत्यस्मिन्विषये यतोपवादः पथिभवः पाथ्योवृषाः नाद्योगिरोमश्र
यक्कति पाथ्योतिचिह्नम् वेशान्तहिमवद्भ्यामण् वेशान्तशब्दात् हिमवच्छ
ब्दाच्च अण्प्रत्ययोभवति तत्रभवइत्येतस्मिन्नर्थे यतोपवादः वैशान्तोभवः स्वाहा हैम
वतो भवः स्वाहा स्रोतसोविभाषाड्यड्ड्यौ स्रोतःशब्दात् विभाषया तत् ड्यड्ड्यौ प्र
त्ययौ भवतः तत्रभवइत्येतस्मिन्विषये यतोपवादः पक्षेसोपिभवति स्रोतस्यः स्रो
त्यः स्रोतसः स्रोतस्योः स्वरेविशेषः सगर्भसयूथसनुताद्यन् सगर्भसयूथसनुत
शब्देभ्यः यन्प्रत्ययोभवति तत्रभवइत्यस्मिन्विषये यतोपवादः स्वरेविशेषः अनुभ्रा
ता सगर्भ्यः अनुसखा सयूथ्यः योनः सनुत्यः सर्वत्रसमानम् छंदसीति स्वभावः
तुग्राद्घन् तुग्रशब्दात् घन्प्रत्ययोभवति तत्रभवइत्यस्मिन्विषये यतोपवादः तुग्रिय

का
वृ
२५५

वृषभः क्षत्रियाणाम् अन्त्राकाषायजवविष्ठेषु अत्र षष्ठी प्रयुज्यते अग्रायण अ
ग्रशब्दात् यस्मात् प्रत्ययो भवति तत्र भवत् तस्मिन् विषये अग्रे भवम् अग्रम् किमर्थम् इ
दम् यावता सामान्येन यदिहितं तदेव चक्रे वेति बहुपाति नाभ्यां वा या माभूदि
ति पुनर्विधीयते चक्रेव अग्रशब्दात् यकोऽप्रत्ययो भवतः तत्र भवत् तस्मिन्वि
षये अग्रियम् अग्रीयम् अग्रे चकारस्य व्यावृत्त इत्यस्य तोनकर्षणार्थः अग्रि
यः सूर्यविशेषः समदाद्यान्तः समदशब्दात् प्रथमशब्दाच्च यत्प्रत्ययो भवति तत्र
भवत् तस्मिन् विषये यतोपवादः समद्रिया नौ नदी नाम प्रथियस्य चायः अस्य
शब्दस्याद्र्वेति पातः तस्य लक्षणव्याभिचारिज्ञात् बर्हिषि दत्ते बर्हिःशब्दात्
सप्तमीसमर्थात् दत्तमित्येतस्मिन् विषये यत्प्रत्ययो भवति बर्हिष्येष्वतिविष
त्रियेषु हृतस्य भागकर्मणी निर्देशादेव समर्थविभक्तिः हृतशब्दात् षष्ठीसम
र्थात् भागकर्मणी चाभिधेये यत्प्रत्ययो भवति भागो यः कर्म क्रिया यचेत्प्रत्य
हृत्यम् हृतभागः हृतकर्म वा रन्तो यानं नावनवी निर्देशादेव षष्ठीसमर्थाद्वि

५

भक्तिः स्वलः शाब्दाश्रयात शाब्दाश्च षष्ठीसमर्थात् हननीयोस्मिन्नर्थे यत्प्रत्ययो भवति
हन्यतेनेनेति हननीयाते अग्रेग्रस्तमाननः स्वस्ता हननीयातत्थायातन्तो हन्नन्तीः
बहुवचनेस्त्यतिवैशिष्ट्यज्ञापनार्थम् बहूनां स्वस्तां हननेनेतत्रः स्त्यतेति रेवतीज
गतीहविष्याभ्यः प्रशंसे रेवत्यादिभ्यः शाब्देभ्यः षष्ठीसमर्थेभ्यः प्रशंसैवाच्येय
प्रत्ययो भवति प्रशंसने प्रशंसम् भावे कृत्प्रत्ययो भवति यद्वा रेवती रेवत्यम्
यद्वा जगती जगत्यम् यद्वा हविष्या हविष्यम् हविष्येहिता हविष्या हविष्यम् ह
विष्ये हिताः हविष्याः तासां हि प्रशंसने हविष्यम् यस्येति लोप कृते हल्लोयमा
पमीति लोपः अश्वरस्य सम् अश्वरशाब्दात् षष्ठीसमर्थात् स्वमित्यस्मिन्नि
षेयत्प्रत्ययो भवति अणोपवादः अश्वस्य पंचापत्नताः येयश्च कुहनेकुलालानां
मायायामण् आसरशाब्दात् षष्ठीसमर्थात मायायां स्वविषये अण्प्रत्ययो भव
ति पूर्वस्य यतोपवादः आसुरी या माया स्वविषया कृतास्ति तद्वानामासामपत्यानेन
स्वरतीष्टकाम्मलक्षमतोः तद्धान्तितिनिर्देशात् समर्थविभक्तिः मत्वन्तात्स्याति

का॰
वृ॰
२८८

पदिकात प्रथमासमर्थात आसामिति षष्ठ्यर्थे यत्प्रत्ययो भवति यत्तत्प्रथमासमा
र्थं उपधानो मंत्रश्चेत्स भवति यत्तदासामिति निर्दिष्टम इष्टकाश्चेत्ता भवन्ति लु
क् मतोरिति प्रकृतिनिर्ह्रासः इति कारणात्तत्तश्चेद्दिवत्वात ह्रानितस्वयवेनसम
दायोपपदिश्यते वचः शब्दो यस्मिन्मंत्रे त्तिस वर्च्चस्वान उपधानो मंत्र आसामि
ष्टकानामिति विग्रहस्य यानि विहितेमनपोलुकि कृते वर्च्चस्या उपधानिर्वर्च्चस्या
तेजस्याः पयस्याः वयस्याः ऋतव्याः तन्हानितिकिम मंत्रादेव समुदायान्माभूत
उपधान इति किम वर्च्चस्वान पंथानो मंत्र आसामित्यत्र माभूत मंत्र इति किम
अंगुलिमान उपधानो हस्त आसामित्यत्र माभूत इष्टकास्विति किम वर्च्चस्वान उपधानो
मंत्र उपधाकपालानामित्यत्र माभूत इति कारणात्त्रियमार्थादनेकपदं समभेवापि
कं नाविदेव पदेन तद्वान्मंत्रो गृह्यते नेन सर्वैरा ग्रश्विमानन्य आश्विन शब्दो यस्मि
न्मंत्रेस्ति मां श्विमान ग्रश्विमत्क्वनादाणेन यो भवति पूर्वस्य यतो पवादः ग्रश्वि
मान उपधानो मंत्र आसामिष्टकानामिति विग्रहस्य आश्विनि कृते मतः लुकि च तद्वनाण

श्री॰

नपत्येइति प्रकृतिभावः अश्विनीरूपदधाति वयस्यात्वमूर्ध्नो मतुम् वयस्यात्वपथा
नोमंत्रो यामात्तां वयस्याः तामश्विपेयाम् मूर्ध्नः मत्वप्रत्ययो भवति पूर्वस्य यतोपवा
दः यस्मिंशाब्दे वयः शब्दो मूर्धशब्दश्च विद्यते तत्र वयस्यात्वपि भवति यथा मूर्धा वयः प्र
जापतिश्छन्दः इति तत्र वयस्वच्छब्दादि वमूर्धशब्दात् पिप्यति शब्दे मत्वः विधीयते।
मूर्धन्वतीरूपदधाति वयस्याश्च ताः मूर्धन्वाश्च वयस्यास्वितिकिम यत्र मूर्धशब्दप
व केवलो न वयः शब्दः स्तत्ना माभूत मूर्धन्वत इति वक्तव्ये मूर्धन्वतेः ग्रतपोलक्षणे भा
विनिर्दिष्टत्वा मत्वर्थे मासतन्वोः यस्मिन्नर्थे मत्वः विहितः तस्मिंश्छन्दसि विषये य
त्प्रत्ययो भवति मासतन्वोः अनयार्थविशेषणयोः अथ मासमर्थात् स्वपार्थिका
त् मत्वर्थे समस्यार्थे च यत्प्रत्ययो भवति मत्वर्थीयानाम् अपवादः तमोभिविद्यत्नेया
स्मिन्मासे न भस्यो मासः सहस्यः मध्यवाः तपस्यः तमः शब्दाच्छन्दसि प्रवर्तते न नाऽल
पि तेजस्यो विद्यते तस्मात् नः स्वस्या मासतन्वोरिति किं मधुमताप्रावेन चरा
न्ति मासतन्वोरन्तरार्थे वा मध्यमि त्रो मत्म मध्यस्मित्र न्तरामित्तिवा मयपद्यो मासः स्वा

का: वृ:

पिकारेकारेवाश्रवणंस्यात्‌॥ लक्ष्मावत्‌ तपस्वतपस्वतमस्वतमस्स्व महस्वमहस्य
स्व नपुंसकलिङ्गात्कोदमतादेकारः ईषोमामः ऊर्जोमामः रकारः श्रुविमोमः येफः
श्लेष्मोमामः मधोर्वेव मधुमाद्यान्मत्वर्थेमामतन्वोः स्वप्रत्ययोभवतिवकारान्त्य
स्त्रउपसंख्यानाल्लुक्‌ मायवः मयव्यः मधुः तन्वावेलापि मायवामयव्यामधुः तन्वः
ऊर्जसोहन्निस्मयौवा मत्वर्थे इस्मैवऊर्जशब्दात्‌ मत्वर्थेयन्लवइन्नितोप्रत्ययोभवतः
ऊर्जस्वी ऊर्जस्वलः ऊर्जस्वीनम वैणायश्चादेर्भणायल्ल मत्वर्थेइन्नवे
णायशशसीश्चादीयमप्रातिपदिकस्यतस्मादेशायशश्चादेर्भणान्नात्‌ मत्वर्थेय
ल्प्रत्ययोभवतिलकारः स्वरार्थः वैणोभणोस्याविद्यतेसवैणोभगणः यशोभगणः
वेणाइतिवत्लमथतेश्रीकामप्रयत्नमाहात्म्यवीर्ययशःसांभगाश्च वैणाश्रोभगाः
श्रीसम्भृतिवैणाभगः त्वच वैणायशश्चादेर्भणान्नात्प्रातिपदिकात्‌ मत्वर्थेवे
प्रत्ययोभवतिवैणाभगीनः यशोभगीनः पाणविभागोयथासंख्यनिराधार्थं उ
नरार्थस्व एवैः कृतमितिदीव मत्वर्थे इतिनिवृत्तम्‌ निर्देशादेवसमर्थविभक्तिः

पूर्वशब्दात् तृतीयासमर्थात् कृतमित्येतस्मिन्नर्थे इनिय इत्येतौ प्रत्ययौ भवतः
चकाराद्यश्च पथिभिः पूर्विणैः पूर्व्यैः पूर्वीणैः इति वा पूर्वैरिति बहुवचना
न्तेन पूर्वैः पुरुषैरुच्यन्ते तत्कृताः पन्थानः प्रशस्ता इति पश्चात्प्रयोगाः अद्भि
संस्कृतम् निर्देशादेव समर्थविभक्तिः सहस्रशब्दात् तृतीयासमर्थात् सम्मि
तमित्येतस्मिन्नर्थे च प्रत्ययो भवति सम्मितः सदृशः तुल्य इत्यर्थः ऽयमग्निः स
हस्रियः सहस्रेण तुल्य इत्यर्थः केचित्तु सम्मितानीति पठन्ति तत्रापि सम्मिता
सम्मितमेव लक्षयितव्यः तत्रैकदेशप्रयोगदर्शनार्थं मतौ च मत्वर्थे च स
हस्रशब्दात् घप्रत्ययो भवति सहस्रमस्य विद्यते सहस्रियः तुपः सहस्रमस्मि
विनीतो मन्त्रिणस्यापवादः सोममर्हति यः निर्देशादेव समर्थविभक्तिः सोम
शब्दाद्द्वितीयासमर्थात् अर्हतीत्येतस्मिन्नर्थे यः प्रत्ययो भवति सोममर्हन्ति सोम्याः
ब्राह्मणाः यज्ञार्हा इत्यर्थः यति प्रकृते यग्रहणं स्वरविशेषार्थम् मये च ॥
सोमग्रहणं यग्रहणं चानुवर्तते मय इति मयडर्थो लक्ष्यते सोमशब्दात् मयडर्थे

का॰
वृप
३.२

यः प्रत्ययो भवति प्रागतविकारावयवप्रकृतानामयडर्थाः हेतुमनुष्येभ्योऽन्य
तरस्यां रूप्यः मयट् च मयट्चैतयोर्भाषायामभक्ष्याच्छादनयोः तत्प्रकृतवचने
मयडिति तत्र यथायोगं च समर्थविभक्तिः भोमोमअपूपविवन्निसोमयमयमित्यर्थः
मधोः यञान्वानिवृत्तः मधुशब्दात् मयडर्थे यत्प्रत्ययो भवति मधव्याः स्तोकाः
मधुमया इत्यर्थः बभ्रोः सम्नृदेव मधुशब्दात् सम्नृदेवाच्चयत्प्रत्ययो भवति वि
कारान्मयडर्थे च यथायोगं समर्थविभक्तिः बभ्रव्यः सम्नृः मयडर्थे वाग्रहणम्
म्नृदेवार्थे कंदस उपसंख्यानं तं श्रावयति चतुरन्तरम श्रुत्त्रौपडिति वदन्तर
तरमेषेतज्जामरूइतिपंचान्तरम यजेति द्व्यन्तरम द्व्यक्षरो वषट्कारः एष वैस
मादशान्तरक्कंदसः प्रजापतियज्ञामवविहितः समादशान्तरानेतनक्कंदसन
र्थः कंदः शब्दादन्तरमम्नृदेवनेमाना त्स्वार्थे यप्रत्ययः वसुशब्दादपि यद्दन्त्यः
हलौ स्यगुणवद्वृभिः वसव्यैः वसुभिरित्यर्थः अग्निरीशे वसव्यस्य वसुन इत्यर्थः
नक्षत्राद्घः नक्षत्रशब्दात्स्वार्थे घप्रत्ययो भवति सम्नृद्धेतिनानवर्तते नत्रि

येभ्यः स्वाहा सर्वदेवात्तातिल् सर्वदेवशब्दाभ्यां तातिल् प्रत्ययो भवति छंदसि विष
ये स्वार्थिकः सर्वतातिः देवतातिः शिवशमरिष्टस्य करे करोतीति करः प्रत्ययार्थः
तस्मिन् समर्थलभ्या षष्ठीसमर्थविभक्तिः शिवादिभ्यः षष्ठीसमर्थेभ्यः कर इत्येतस्मिन्न
र्थे तातिल् प्रत्ययो भवति शिवं करोति शिवतातिः शन्तातिः अरिष्टतातिः भावे च भा
वे चार्थे छंदसि विषये शिवादिभ्यः तातिल् प्रत्ययो भवति शिवस्य भावः शिवतातिः
शन्तातिः अरिष्टतातिः यतः प्राग्विधिः अतः परमन्यः प्रत्ययो विधीयते ॥ इति
श्रीजयादित्यविरचितायां काशिकायां वृत्तौ चतुर्थस्याध्यायस्य चतुर्थः पादः ॥
ॐ प्राक्क्रीताच्छः तेन क्रीतमिति वक्ष्यति प्रागेतस्मात् क्रीतसंशब्दनात् यानित ऊर्ध्व
मनुक्रमिष्यामः छः प्रत्ययस्तेष्वधिकृतो वेदितव्यः वक्ष्यति तस्मै हितम् वत्सेभ्यो हि
तः गोधुक् वत्सीयः करभीयः अर्थो वधिवित्यह हीतेन प्रत्ययः तेन प्राक्क्रीतछ इति ना
म उगवादिभ्यो यत् प्राक्क्रीतादित्येव उवर्णान्तात् प्रातिपदिकात् गवादिभ्यश्च
यत् प्रत्ययो भवति प्राक्क्रीतादर्थेषु छस्यापवादः शंकव्यं दारु पिचव्यः कार्पासः गवादि

का.
वृ
३.२

भ्यः खल्वपि हव्यम् हविष्यम् मनेऊनीमवर्मविकारः नयः परत्वात्प्रमितोत्सिन्येषवि
धिः प्राप्नोति तथा चरुर्नाम हविः स तत्र विकारः अपूपादिषु चान्नविकारात्प्रत्ययते
ततो विभाषा हविरपूपादिभ्य इति प्राप्नोति तत्पूर्वविप्रतिषेधेन तत्प्रत्ययएवेष्यते
मनेगवंचर्मण्याल्लेङ्कलाः सक्तुधानाः इति नाभि नभं चेति पठ्यते नाभिशब्दोयत
मत्यारप्रत्यये नभंवाप्यते नाभये हितो नाभ्योक्षः नभ्यमंजनम् यस्तु शारीरावयवो ना
भिस्ततः शारीरावयवाद्यतिकृतेनाभये हितम् नाभ्यमिति भवितव्यम् गवादिषु ना
मत्त्रिगुक्तोन नभभावोत्र न भवति गोहविम् अपूपकाः वर्हि युग मेधा स्रुच् नभिनभं
शुनः संप्रसारणं वा च दीर्घत्वं तत्सन्नियोगेन चान्तोदात्तता शुन्यम् शून्यम् ऊधसो
नङ्ऊधन्यः खल र हविनास्कलविषा कंबलाच्च संज्ञायाम् कंबल्यशब्दः प्राक्री
तादर्थ्येषु यत्प्रत्ययो भवति संज्ञायां विषये कंबल्यमूर्णापलशतम् संज्ञायामि
ति किम् कंबलीयाऊर्णा विभाषा हविरपूपादिभ्यः हविर्विशेषवाचिभ्यः शब्देभ्यः
अपूपादिभ्यश्च प्राक्रीतादर्थेषु यत्प्रत्ययो भवति आमिक्ष्येदधि आमिक्षीयम् पुरोडा

यथा तण्डुला घृतेनाभीयाः हविष्यां ह्वान्नादिपाठाद्विकल्पमेव भवति अपूपादिभ्यः

अपूप्यम् अपूपीयम् तण्डुल्यम् तण्डुलीयम् अपूप तण्डुल पृथुक अभ्योष अ-

वोष किल्व मुसल कटक कर्णवेष्टक अर्गल स्थूल यूप सूपदीप प्रदीप अध्व

पुत्र अन्नविकाराश्च तस्मै हितम् तस्मै इति चतुर्थीसमर्थात् हितमित्यस्मिन्नर्थे

यथाविहितं प्रत्ययो भवति वत्सेभ्यो हितो गोधुक् वत्सीयः करभीयः यटव्यम्।

स्टव्यम् गव्यम् हविष्यम् शरीरावयवाद्यत् शरीरं प्राणिकायः शरीरावयववावि-

नः प्रातिपदिकात् यत्प्रत्ययो भवति तस्मै हितमित्यस्मिन्नर्थे छस्यापवादः दन्तेभ्यो

हितं दन्त्यम् कण्ठ्यम् ओष्ठ्यम् खलयवतिलमाषवृषब्रह्मणश्च खलादिभ्यः शा-

ब्देभ्यः यत्प्रत्ययो भवति तस्मै हितमित्यस्मिन्नर्थे छस्यापवादः खलाय हितम्।

खल्यम् यव्यम् माष्यम् तिल्यम् वृष्यम् ब्रह्मण्यम् वृषेभ्यो हितम् ब्राह्मणेभ्यो हित-

मिति वाक्यमेव भवति कः प्रत्ययोपि न भवत्यनभिधानात् चकारोनुक्तसमुच्च-

यार्थः रथाय हिता रथ्या अजाविभ्यां थ्यन् अजाविकाशब्दाभ्यां थ्यन् प्रत्य-

का॰
वृप
३४

योभवतितस्मैहितमित्यस्मिन्विषयेछस्यापवादः अन्नाथ्याप्रतिः अविथ्या आत्म
न्विश्वजनभोगोत्तरपदात्खः आत्मन् विश्वजन इत्येताभ्यां भोगोत्तरपदाच्च प्राति
पदिकात् खप्रत्ययोभवति तस्मैहितमित्यस्मिन्विषये छस्यापवादः आत्मन्निति
नलोपो न कृतः प्रकृतिभावसंज्ञापनार्थं तेनोत्तरपदग्रहणम् भोगशब्दो
नैवंसंबध्यते तेन तत्प्रत्येकम् आत्मने हितम् आत्मनीनम् आत्माध्वानौ खे इति प्र
कृतिभावः विश्वजनेभ्यो हितम् विश्वजनीनम् कर्मधारयादिष्यते षष्ठीसमासा
द्बहुव्रीहेश्च छ एव भवति विश्वजनाय हितम् विश्वजनीयम् पञ्चजनादुपसंख्या
ने पञ्चजनीनम् अत्रापि कर्मधारयादेव पञ्चजनीयमन्यत् सर्वजनाट्ठञ्खश्च
सार्वजनिकम् सर्वजनिकम् सर्वजनीनम् अत्रापि कर्मधारयादेव सर्वजनी
यमन्यत् महाजनान्नित्यं ठञ् वक्तव्यः महाजनाय हितम् माहाजनिकम् तत्पुरु
षादेव बहुव्रीहेश्छ एव भवति महाजनीयम् महाजनानन्यपि मातृभो
गीणम् भोगशब्दः शरीरवाची केवलेभ्यो मात्रादिभ्यश्छ एव भवति मात्रीयम्

पित्रीयम् राजाचार्याभ्यां तु नित्यं भोगोत्तरपदाभ्यामेव प्रत्यय इष्यते तेन केवलाभ्यां
राजभोगीनम् आचार्यभोगीनम् आचार्यादणत्वं च केवलाभ्यां वाक्यमेव भवा
ति राज्ञे हितम् आचार्याय हितम् सर्वपुरुषाभ्यां णढञौ सर्वपुरुषशब्दाभ्यां
यथासंख्यं णढञौ प्रत्ययौ भवतः तस्मै हितमित्यस्मिन्विषये छस्यापवादः सर्व
स्मै हितं सार्वं पौरुषेयम् सर्वाण्णस्य वावचनम् सर्वस्मै हितम् सार्वं सर्वीयम् पु
रुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम् वधे पौरुषेयो वधः विकारे पौरु
षेयो विकारः समूहे पौरुषेयं समाजातम् कृते पौरुषेयो ग्रन्थः माणवचरकाभ्यां
खञ् माणवचरकशब्दाभ्यां खञ् प्रत्ययो भवति तस्मै हितमित्यस्मिन्विषये छ
स्यापवादः माणवाय हितम् माणवीनम् तदर्थं विकृतेः प्रकृतौ प्रकृतिरु
पादानकारणम् तस्यैवोत्तरमवस्थान्तरम् विकृतिः विकृतिवाचिनः प्रातिप
दिकात् प्रकृतावभिधेयायाम् यथाविहितम् प्रत्ययो भवति तदर्थमिति प्रत्य
यार्थविशेषणम् तदिति सर्वनाम्ना प्रकृतिः प्रत्यवमृश्यते विकृत्यर्थायां प्रकृतौ

का
वृ ४
४५

प्रत्ययः तदर्थग्रहणात्प्रकृतेरनन्यताख्यायते तेन प्रकृतिविकारसंभवमात्रे किन्तर्हि
प्रकृतेरनन्यार्थत्वे विवक्षिते प्रत्ययस्तादर्थ्ये सति सामर्थ्यं लभ्यते चतुर्थीसमर्थ
विभक्तिः केचित्तु तस्मादित्यनुवर्तयन्ति अंगारेभ्य एतानि अंगारीयाणि काष्ठानि
प्राकारीया इष्टकाः शंकव्यं दारु पिचव्यः कार्पासः तदर्थमिति किम् यवानां धानाः
धानानां सक्तवः प्रकृतावित्यनिवृत्तेरविवक्षितानन्यतादर्थ्यम् धानानां सक्तवः
नलाभानामिति विकृतेरिति किम् उदकार्थः कूपः विकृतिग्रहणाच्च क्रियमाणे
याकाचित्प्रकृतिः स्यात्तेनापादानकारणमेव भवति न कूप उदकस्य प्रकृति
स्तत्रोत्पादाभावात् उदकं तस्य विकृतिः अन्यत्वभेदात् प्रकृताविति किम् असेरर्थो
कोशी असिरयसो विकृतेर्न तु कोशी तस्य प्रकृतिः द्वयोरपि प्रकृतिविकृत्योर्ग्रहणा
त्क्रियमाणे विवक्षितः प्रकृतिविकारभावो लभ्यते॥ छदिरुपधिबलेर्ढञ्॥ छ
दिरादिभ्यः शब्देभ्यः ढञ् प्रत्ययो भवति तदर्थे विकृतेः प्रकृतावित्यस्मिन् विषये छ
स्यापवादः छादिषेयाणि तृणानि औपधेयं दारु बालेयास्तण्डुलाः उपधिशब्दा

त्वार्थे प्रत्यय उपधीयत इत्युपधिः रथाङ्गं ॥ औपधेयमपि तदेव तदारु ॥ वृषभोपानहो
र्ञ्यः ॥ वृषभ उपानह् इत्येताभ्यां ञ्यप्रत्ययो भवति तदर्थे विकृतेः प्रकृतावित्यस्मि
न्विषये छस्यापवादः ॥ आर्षभ्यो वत्सः ॥ औपानह्यो मुञ्जः ॥ चर्मण्यपि प्रकृतित्वेन विव
क्षिते पूर्वविप्रतिषेधात् ञ्यमेवेच्छन्ति औपानह्यं चर्म ॥ चर्मणोऽञ् ॥ चर्मण इति षष्ठी च
र्मणो या विकृतिस्तद्वाचिनः प्रातिपदिकात् अञ्प्रत्ययो भवति तदर्थे विकृतेः प्र
कृतावित्यस्मिन्विषये छस्यापवादः ॥ वार्ध्रं चर्म ॥ वारत्रं चर्म ॥ तदस्य तदस्मिन्स्यादिति ॥ त
दिति प्रथमासमर्थाद्विभक्तिः ॥ अस्येति प्रत्ययार्थः ॥ स्यादिति प्रकृतिविशेषणम् ॥ इति
करणो विवक्षार्थः ॥ एवं द्वितीयेन वाक्येन सप्तम्यर्थे प्रत्ययः इत्येतावान्विशेषः ॥ तदि
ति प्रथमासमर्थात् षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययो भवति यत्तत्प्रथमास
मर्थं स्याच्चेत्तद्भवतीति इतिकरणस्ततश्चेद्विवक्षा ॥ प्राकार आसामिष्टकानां स्यात् प्रा
कारीया इष्टकाः ॥ प्रासादीयो दारु ॥ सप्तम्यर्थे खल्वपि प्राकारोऽस्मिन्देशे स्यात् प्राका
रीयो देशः ॥ प्रासादीया भूमिः ॥ स्यादिति संभावने लिङ् इष्टकानां बहुत्वेन संभाव्यते प

डों·
का·प्र·
३९

तत्र प्राकारस्त्रासोस्यादिति देशस्यैवगुणेन संभाव्यते प्राकारोस्मिन्स्यादिति प्रकृ-
तिविकारभावस्तादर्थ्ये चेह न विवक्षिते किंतर्हि योग्यतामात्रे तेन पूर्वस्यायम-
विषयः हिस्तकृहणंन्यायस्य प्रदर्शनार्थं अनेकस्मिन्प्रत्ययार्थे प्रत्येकं समर्थो वि-
भक्तिः संबन्धनीयेति इह कस्मान्न भवति प्रासादो देवदत्तस्य स्याद्गुणवानयं संभा-
व्यते प्रासादलाभोस्येति इतिकरणाविवक्षार्थं इत्युक्तं परिखायाढञ् परिखाश-
ब्दाट्ठञ्प्रत्ययो भवति तदस्यतदस्मिन्स्यादित्यस्मिन्विषये छस्यापवादः पारिखेयी
भूमिः छयतोः प्राग्विते: अतः परमन्यः प्रत्ययो विधीयते प्राग्वतेष्ठञ् तेनतु-
ल्यंक्रियाचेद्वतिरिति वक्ष्यति प्रागेतस्माद्वतिसंशब्दनाद्यानित ऊर्ध्वं प्रत्ययाननुक्र-
मिष्यामः ठञ्प्रत्ययस्तेष्वधिकृतो वेदितव्यः वक्ष्यति पारायणतुरायणचान्द्राय-
णं वर्तयति पारायणिकः तौरायणिकः चान्द्रायणिकः आर्हादगोपुच्छसंख्यापरि-
माणाट्ठक् तदर्हतीति वक्ष्यति प्रागेतस्मादर्हसंशब्दनाद्यानित ऊर्ध्वं प्रत्ययाननु-
क्रमिष्यामः ठक्प्रत्ययस्तेष्वधिकृतो वेदितव्यः गोपुच्छादीन्वर्जयित्वा अभिविधौ

वायमाकारः अर्हत्यर्थेपि ठञ्भवति ठञधिकारमध्येतदपवादष्ठग्विधीयते
वत्यनिकेनक्रीतं निष्केनक्रीतंनैष्किकं पाणिकं अगोपुच्छसंख्यापरिमाणादि
तिकिं गोपुच्छेनक्रीतंगोपुच्छिकं संख्यासाप्ततिकं आशीतिकं परिमाणप्रास्थि
कं कौडविकं ठञ्प्रत्ययदाह्रियते संख्यापरिमाणयोः कोविशेषः भेदगणनंसं
ख्यायकादिः गुरुत्वमानमुन्मानंपलादिआयाममानंप्रमाणंवितस्त्यादि आरो
हपरिणाहमानंपरिमाणंप्रस्थादि ऊर्ध्वमानंकिलोमाणंपरिमाणंतुसर्वतः आ
यामस्तुप्रमाणंस्यात्संख्याबाह्यातुसर्वतः असमासेनिष्कादिभ्यः आर्हादित्येवनिष्का
दिभ्यःशब्देभ्यः समासेठक्प्रत्ययोभवति आर्हीयेष्वर्थेषुठञोपवादः नैष्किकं पा
णिकं पादिकं असमासेइतिकिं पारमनिष्किकं उत्तमनिष्किकं ठञेवभवति
अथकिमर्थंअसमासइत्युक्तंयावताग्रहणंभवति। प्रातिपदिकेनतदंतविधिः प्र
तिषिध्यते निष्कादिषुसमासग्रहणंज्ञापकं पूर्वत्रतदंताप्रतिषेधस्यउयवादिभ्यो
पन गवे अगवे अनिगवे विभाषाहविरपूपादिभ्यः अपूप्यं अपीपीयं यवाप्

श्री·
काशि
३०२

ण्येयवापूर्वीयं शारीरावयवाद्यत् दंत्यं कल्यं रानदंत्यामित्येवमादिसिद्धं भवति
इत उत्तरं च संख्यापूर्वपदानां तदंतविधिरिष्यते पारायणतुरायणचांद्रायणं वर्त्त
यति पारायणिकः द्वैपारायणिकः त्रैपारायणिकः लुगंतायास्तु प्रकृतेर्नेष्यते
द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं द्विशूर्पेण क्रीतमिति तदंतविधेरभावात् शूर्पादञन्य
तरस्यामित्यञ्न भवति सामान्यविहितष्ठञेव भवति द्विशौर्पिकं त्रिशौर्पिकं त
थाचोक्तं प्राग्वतेः संख्यापूर्वपदानां तदंतग्रहणमलुकीति निष्कपणपादमाष
वाहद्रोणषष्टि शताच्च ठन्यतावशते आर्हादित्येव शतशब्दात् ठन् यत् इत्येतौ
प्रत्ययौ भवतः अशते अभिधेये आर्हीयेष्वर्थेषु कनोपवादः शतेन क्रीतं शत्यं शति
कं अशत इति किं शतं परिमाणमस्य शतकं निदानं निदानो नाम ग्रन्थविशेषः प्र
त्ययार्थोत्र संघः शतमेव वस्तुतः प्रकृत्यर्थोत्राभिधीयते इह तु प्रतिषेधो न भवति शतेन
क्रीतं शत्यं शाटकशतिकं शाटकशतं वाक्येन त्वत्र प्रत्ययार्थस्य शतत्वं गम्यते
न तु वृत्त्या तथा चोक्तं शतप्रतिषेधेन्यशतत्वे प्रतिषेधप इति वकारो समासग्रहणस्यात्॥

कथं णार्थः द्वौ च शतं च द्विशतं द्विशतेन क्रीतं द्विशतकं त्रिशतकं प्रागवतेः सं-
ख्यापूर्वपदानां तदंतग्रहणमलुकीत्यनयेष्टा असमासादपि प्राप्नोति संख्याया अ-
तिशदंतायाः कन् आर्हादिति एव संख्याया अत्यंताया अशदंतायाश्च कन्प्रत्ययो भ-
वति आर्हीयेष्वर्थेषु ठञोपवादः पंचभिः क्रीतः पंचकः षट्कः बहुकः गणकः अति-
शदंतायाः इति किं साप्ततिकः चात्वारिंशत्कः अर्थवतस्तिशब्दस्य ग्रहणाद्वुतेः प-
र्युदासो न भवति कतिकः वतोरिड्वा वदंतस्य संख्यावाचकस्य कन्प्रत्ययवतस्य वे-
तेन इडागमो विधीयते वतोः परस्य किं नो वा इडागमो भवति तावतिकः ताव-
त्कः यावतिकः यावत्कः विंशतित्रिंशद्भ्यां ड्वुन् असंज्ञायां विंशतित्रिंशद्भ्यां
ड्वुन्प्रत्ययो भवति असंज्ञायां विषये आर्हीयेष्वर्थेषु विंशकः त्रिंशकः असंज्ञाया-
मिति किं विंशतिकः त्रिंशत्कः कथं पुनरत्र कन् यावता अतिशदंतायाः इति प-
र्युदासेन भवितव्यं योगविभागः करिष्यते विंशतित्रिंशद्भ्यां कन् भवति ततो
ड्वुन् असंज्ञायामिति कंसाट्टिठन् कंसशब्दाट्टिठन्प्रत्ययो भवति आर्हीयेष्वर्थे-

अं·
काप्र
३८

षु ठञोपवादः ठकारो वृध्यर्थः इकार उच्चारणार्थः नकारः स्वरार्थः कंसिकः
कंसिकी अर्धाच्चेति वक्तव्यं अर्धिकः अर्धिकी कार्षापणाद्टिठन्वक्तव्यः प्रतिश
ब्दश्चास्यादेशो वा वक्तव्यः कार्षापणिकः कार्षापणिकी प्रतिकः प्रतिकी शूर्पाद
ञन्यतरस्यां शूर्पशब्दादञ्प्रत्ययो भवति अन्यतरस्यामात्मीयेष्वर्थेषु ठञोप
वादः पक्षे सोपि भवति शूर्पेण क्रीतं शौर्पं शौर्पिकं शतमानविंशतिकसहस्र
वसनादण् शतमानादिभ्यः शब्देभ्यः अण्प्रत्ययो भवति आर्हीयेष्वर्थेषु ठ
ञोपवादः शतमानेन क्रीतं शातमानं वैंशतिकं साहस्रं वासनं अध्यर्ध
पूर्वद्विगोर्लुगसंज्ञायां आर्हादित्येव अध्यर्धः पूर्वो यस्मिंस्तस्मादध्यर्धपूर्वात्प्राति
पदिकाद्द्विगोः च परस्यार्हीयस्य प्रत्ययस्य लुग्भवति असंज्ञायां विषये अध्यर्धकं
सं द्विकंसं अध्यर्धशूर्पं द्विशूर्पं त्रिशूर्पं असंज्ञायामिति किं पांचलौहितिकं पांच
कलापिकं प्रत्ययान्तस्य विशेषणेसंज्ञाग्रहणं न चेत्प्रत्ययान्तः संज्ञेति अध्यर्ध
शब्दः संख्यैव तत्किमर्थं भेदेनोपादीयते ज्ञापकार्थं क्वचिदस्य संख्याकार्यं न भवति

साख्यायाः क्रियाभ्यावृत्तिगणने इति विभाषा कार्षापणसहस्राभ्यां अध्यर्धपूर्व
द्विगोः कार्षापणसहस्रान्तात्परस्य प्राग्वतीयस्य प्रत्ययस्य विभाषा लुग्भवति पक्षे प्रति
त्यः शमो विकल्प्यते अध्यर्धकार्षापणं अध्यर्धकार्षापणिकं द्विकार्षापणं द्विका
र्षापणिकं उपसंख्यानिकस्य टिठनो लुक् अल्कादेशः प्रतिरादेशो विकल्पितः अ
ध्यर्धप्रतिकं द्विप्रतिकं त्रिप्रतिकं सहस्रान्तात अध्यर्धसाहस्रं अध्यर्धसहस्रं द्वि
साहस्रं द्विसहस्रं सुवर्णशतमानयोरुपसंख्यानं अध्यर्धसौवर्णिकं अध्यर्धसुवर्णं
द्विसौवर्णिकं द्विसुवर्णं अध्यर्धशातमानं अध्यर्धशतमानं द्विशातमानं द्विशत
मानं द्वित्रिपूर्वान्निष्कात द्वित्रिपूर्वाद्द्विगोर्निष्कशब्दान्तादार्हीयस्य प्रत्ययस्य लुग्वि
भाषा भवति द्विनिष्कं द्विनिष्किकं त्रिनिष्कं त्रिनिष्किकं बहुपूर्वाच्चेति वक्तव्यं बहु
निष्कं बहुनैष्किकं बिस्ताच्च द्वित्रिपूर्वादिति चकारेणानुकृष्यते द्वित्रिपूर्वात् बि
स्तान्तात् द्विगोरार्हीयस्य प्रत्ययस्य विभाषा लुग्भवति द्विबिस्तं द्वैबिस्तिकं त्रिबिस्तं
त्रैबिस्तिकं बहुपूर्वाच्च बहुबिस्तं बहुबैस्तिकं विंशतिकात्खः अध्यर्धपूर्वद्विगो

ॐ
काश्र
३.५

रित्येव अध्यर्धपूर्वात्प्रातिपदिकाद्द्विगोश्च विंशतिकशब्दान्तादाहीयेष्वर्थेषु खप्रत्ययो
भवति अध्यर्धविंशतिकीनं द्विविंशतिकीनं त्रिविंशतिकीनं विधानसामर्थ्यादस्य
लुङ्न भवति खार्या ईकन् अध्यर्धपूर्वद्विगोरित्येव अध्यर्धपूर्वाद्द्विगोश्च खारीशब्दान्त
दाहीयेष्वर्थेष्वीकन्प्रत्ययो भवति अध्यर्धखारीकं द्विखारीकं त्रिखारीकं केवला
याश्चेति वक्तव्यं खारीकं काकिण्याश्चोपसंख्यानं अध्यर्धकाकिणीकं द्विकाकिणीकं
त्रिकाकिणीकं केवलायाश्च काकिणीकं पणपादमाषशताद्यत् अध्यर्धपूर्वा
द्विगोरित्येव अध्यर्धपूर्वात्प्रातिपदिकाद्द्विगोश्च पणपादमाषशब्दान्तादाहीयेष्वर्थेषु
यत्प्रत्ययो भवति अध्यर्धपण्यं द्विपण्यं त्रिपण्यं अध्यर्धपाद्यं द्विपाद्यं त्रिपाद्यं प
द्भावो न भवति प्राण्यंगस्य पादस्य ग्रहणात् इदं तु परिमाणं अध्यर्धमाष्यं द्विमाष्यं
त्रिमाष्यं अध्यर्धशत्यं द्विशत्यं त्रिशत्यं शाणाद्वा अध्यर्धपूर्वद्विगोरित्येव शाणशब्दा
न्तादध्यर्धपूर्वाद्द्विगोराहीयेष्वर्थेषु वा यत्प्रत्ययो भवति ठञोपवादः पक्षे सोपि भवति
तस्य च लुक् अध्यर्धशाण्यं अध्यर्धशाणं द्विशाण्यं द्विशाणं त्रिशाण्यं त्रिशाणं शाणा।

श्चेतिवक्तव्ये अध्यर्धशात्यं अध्यर्धशातं द्विशात्यं द्विशातं त्रिशात्यं त्रिशातं द्वित्रिपूर्वा
दण्च शाणादित्येव द्वित्रिपूर्वाच्छाणान्नान्यान्निपदिकाद्वाद्दीयेध्यर्धपूर्वाद्वाप्रत्ययो
भवति वकारग्रहणं वा तेन वैकल्पिकोऽयं द्विशाण्यं द्विशाणं द्वैशाणं त्रिशाण्यं
त्रिशाणं त्रैशाणं परिमाणान्तस्यासंज्ञाशाणयोरिति पदवृद्धावादाद्वृद्धिरेव भवति
तेनक्रीतं ठञादयस्त्रयोदश प्रत्ययाः प्रकृतास्तेषामितः प्रभृति समर्थविभक्तयः
प्रत्ययार्थाश्च निर्दिश्यन्ते तेनेति तृतीयासमर्थात्क्रीतमित्यस्मिन्नर्थे यथाविहितं प्र
त्ययो भवति सप्तत्या क्रीतं साप्ततिकं आशीतिकं नैष्किकं पाणिकं शातिकं शतेन द्वि
कं त्रिकं तेनेति मूल्यं करणं तृतीयासमर्थविभक्तिः मल्यत्वानभिधानान्न भवति देव
दत्तेन क्रीतं पाणिना क्रीतं इति द्विवचनबहुवचनान्तात्प्रत्ययो न भवति प्रस्था
भ्यां क्रीतं प्रस्थैः क्रीतमिति अनभिधानादेव यत्र तु प्रकृत्यर्थस्य संख्याभेदावगतिः प्र
माणमस्ति तत्र द्विवचनबहुवचनान्तादपि प्रत्ययो भवत्येव द्वाभ्यां क्रीतं द्विकं त्रि
कं पञ्चकं इति तथा मुद्गैः क्रीतं मौद्गिकं माषिकं नत्वेकेन मुद्गेन क्रयः सम्भवति

ॐ·
काश्·
३१८

तस्यनिमित्तंसंयोगोत्पातौ तस्येतिषष्ठीसमर्थान्निमित्तमित्येतस्मिन्नर्थेयथाविहितं
प्रत्ययोभवति यत्तन्निमित्तंसंयोगश्चेत्सभवत्युत्पातोवासंयोगः संबन्धः प्राणिनांशुभा
शुभसूचकोमहाभूतविपरिणामउत्पातः शतस्यनिमित्तंदक्षिणादिसंदत्तंशत्यम्
शतिकं साहस्रं तस्यनिमित्तप्रकरणेवातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसं
ख्यानं वातस्यशमनंकोपनंवावातिकं पैत्तिकं श्लैष्मिकं सन्निपाताच्चेतिवक्तव्यं सा
न्निपातिकं गोद्व्यचोसंख्यापरिमाणाश्वादेर्यत् गोशब्दाद्व्यचश्चप्रातिपदिकात्संख्या
परिमाणाश्वादिवर्जितात्यत्प्रत्ययोभवति तस्यनिमित्तं संयोगोत्पातावित्यस्मिन्विषये
ठञादीनामपवादः गोनिमित्तं संयोगोत्पातोवागव्यः द्व्यचः खल्वपि धनस्यनिमि
त्तंसंयोगउत्पातोवाधन्यः स्वर्ग्यः आयुष्यः यशस्यः असंख्यापरिमाणाश्वादेरितिकिं।
पंचानांनिमित्तंपंचकः अष्टकः परिमाणात् प्रास्थिकः खारीकः अश्वादेः आश्विकः ब्र
ह्मवर्चसाउपसंख्यानं ब्रह्मवर्चसस्यनिमित्तंगुरूणांसंयोगः ब्रह्मवर्चस्यः अश्वअश्म
न् गणऊर्णाउमाभंगावर्षावसु पुत्राच्छच पुत्रशब्दाच्छप्रत्ययोभवति चकाराद्य।

१९

यश्च तस्य निमित्तं संयोगोत्पातावित्यस्मिन्विषये द्वावइति षष्ठिप्रमेव वचनं पुत्रस्य
निमित्तं संयोग उत्पातो वा पुत्रीयः पुत्र्यः सर्वभूमिपृथिवीभ्यामणञौ सर्वभूमिशब्दा
त्पृथिवीशब्दात्पृथिवीशब्दाच्च यथासंख्यमणञौ प्रत्ययौ भवतः तस्य निमित्तं संयोगो
त्पातावित्यस्मिन्विषये ठकोपवादः सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः पा
र्थिवः सर्वभूमेरनुशतिकादिपाठादुभयपदवृद्धिः तस्येश्वरः तस्येति षष्ठीसमर्था
भ्यां सर्वभूमिपृथिवीशब्दाभ्यामीश्वर इत्येतस्मिन्नर्थे यथासंख्यमणञौ प्रत्ययौ भवतः
सर्वभूमेरीश्वरः सार्वभौमः पार्थिवः षष्ठीप्रकरणे पुनः समर्थविभक्तिनिर्देशः प्राग्वत
यार्थस्य निवृत्त्ये अथ यथा हि संयोगोत्पातावनीश्वरोऽपि प्रत्ययार्थस्य निमित्तस्य विशेषणं
संभाव्येत तत्र विदित इति च तत्रेति सप्तमीसमर्थाभ्यां सर्वभूमिपृथिवीशब्दाभ्यां वि
दित इत्येतस्मिन्नर्थे चकारादीश्वरे च यथासंख्यमणञौ प्रत्ययौ भवतः विदितो ज्ञातः प्र
काशित इत्यर्थः सर्वभूमौ विदित ईश्वरो वा सार्वभौमः पार्थिवः लोकसर्वलोकाट्ठञ्
लोकसर्वलोकशब्दाभ्यां सप्तमीसमर्थाभ्यां विदित इत्यस्मिन्नर्थे ठञ्प्रत्ययो भवति लोके

उं· काश· ३१

विदितो लौकिकः सार्वलौकिकः अनुशतिकादीनां चेत्युभयपदवृद्धिः तस्य वापः त
स्येति षष्ठीसमर्थाद्वाप इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति उप्यतेऽस्मिन्निति वापः क्षे
त्रमुच्यते प्रस्थस्य वापः क्षेत्रं प्रास्थिकं द्रौणिकं खारीकं पात्रात्ष्ठन् पात्रशब्दात्ष्ठन्प्रत्ययो
भवति तस्य वाप इत्यस्मिन्नर्थे ठञोपवादः नकारः स्वरार्थः षकारो ङीषर्थः पात्रशब्दः परि
माणवाची पात्रस्य वापः क्षेत्रं पात्रिकं पात्रिकी भक्तिः तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते
तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमसमर्थं वृद्ध्या
दि चेत्तद्दीयते दीयत इति एकवचनं तेन वृद्ध्यादिभिः प्रत्येकमभिसंबध्यते तत्राधमर्णेनो
त्तमर्णाय मूलधनातिरिक्तं देयं वृद्धिः ग्रामादिषु स्वामिग्राह्यो भागः आयः पटादीनामुपादानमू
ल्यातिरिक्तं द्रव्यं लाभः रक्षानिर्वेशो राजभागः शुल्कः उत्कोच उपदा पंचास्मिन्वृद्धिर्वा आयो
वा लाभो वा शुल्को वा उपदा वा दीयते पंचकः सप्तकः शतिकः शत्यः साहस्रः चतुर्थ्यर्थे उ
पसंख्यानं पंचास्मिन्वृद्धिरायो वा दीयते पंचको देवदत्तः सिद्धं त्वधिकरणेन विवक्षितत्वा
त् संप्रदानस्येति यथा पूरणार्धाट्ठन् पूरणवाचिनः शब्दादर्धाच्च ठन्प्रत्ययो भ

वति तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयत इत्यस्मिन्विषये यथाक्रमं ठक्टिठनो
ऽपवादः द्वितीयो वृद्ध्यादिरस्मिन्दीयते द्वितीयकः पंचमिकः सप्तमिकः शतिकः शत
शब्दो रूपकादिस्वरूपः भागाद्यच्च भागशब्दाद्यत्प्रत्ययो भवति चकाराट्ठंश्च तदस्
मिन्वृद्ध्यायलाभशुल्कोपदादीयत इत्यस्मिन्विषये ठकोऽपवादः भागो वृद्ध्यादिरस्मिन्दी
यते भाग्यं शतं भागिकं भाग्या विंशतिः भागिका विंशतिः भागशब्दोपि रूपकार्ध
स्य वाचकः तद्धरति वहत्यावहति भाराद्वंशादिभ्यः तदिति द्वितीयासमर्थाद्धरत्या
दिष्वर्थेषु यथाविहितं प्रत्ययो भवति प्रकृतिविशेषणं भाराद्वंशादिभ्य इति वंशादिभ्य
परो भारशब्दस्तदन्तादुत्पत्तिरिति वंशभारं हरति वहत्यावहति वा वांशभारिकः
कौटभारिकः बाल्वभारिकः भारादिति किं वंशं हरति वंशादिभ्य इति किं व्रीहिभा
रं हरति अपरवृत्तिः भाराद्वंशादिभ्य इति भारभूतेभ्यो वंशादिभ्य इत्यर्थः भारशब्दोऽर्थ
द्वारेण वंशादीनां विशेषणं भारभूतान्वंशान्हरति वांशिकः कौटिकः भारादिति किं
वंशं हरति वंशादिभ्य इति किं भारभूतान्व्रीहीन्हरति सूत्रार्थद्वयमपि प्रमाणं एवं

ॐ
काप्र
३२२

माचार्येणशिष्याः प्रतिपादिताः तदुभयमपिप्राप्तंभवति हरतिदेशांतरंप्रापय
ति वहत्युत्क्षिपतिआवहत्युत्पादयतीत्यर्थः वंशकुटजबल्वजमूलस्थूणाक्षअश्म
इक्षुखट्वा वंशादिभ्योठन्कनौ वंशशब्दादिभ्यःशब्देभ्यःद्वितीयासमर्थाहरत्यादि
ष्वर्थेषु यथासंख्यंठन्कनौप्रत्ययौभवतः वंशंहरतिवहत्यावहतिवांशिकः एवं
इत्याकः संभवत्यवहरतिपचति तदितिसमर्थविभक्तिरनुवर्तते तदितिद्विती
यासमर्थात्संभवत्यादिष्वर्थेषुयथाविहितंप्रत्ययोभवति तत्राधेयस्यप्रमाणान
तिरेकःसंभवः उपसंहरणमवहारः विक्लेदनंपाकः प्रस्थंसंभवत्यवहरतिपच
तिवाप्रास्थिकः कौडविकः खारीकः ननुचपाकेसंभवोविद्यतेनास्यतुनियोगः
प्रस्थंपचतिब्राह्मणीप्रास्थिकीतत्पचतीतिद्रोणादाचद्रोणंपचतिद्रोणीद्रोणि
की आढकाचितपात्रात्खोन्यतरस्यां आढकाचितपात्रशब्देभ्योद्वितीयासमर्थे
भ्यः संभवत्यादिष्वर्थेषुअन्यतरस्यांखप्रत्ययोभवति ठञोपवादः पक्षेसोपि
भवति आढकंसंभवत्यवहरतिवाआढकीना आढकिकी आचितीना आचिति

कौपात्रीणा पात्रिकी द्विगोः ष्ठंश्च आढकाचितपात्रादित्येव आढकाचितपा
त्रांतात् द्विगोः संभवनादिष्वर्थेषु ष्ठन्प्रत्ययो भवति षकारानुबन्धान्नरस्त्रयां
नत्वविधानसामर्थ्यादनयोर्लुङ् भवति ठञस्तत्पदेष्वनुवर्तनस्यार्थपूर्वे।
द्विगोरित्तिलुग्भवत्ये नकारः स्वरार्थः षकारः ङीषर्थः द्व्याढकिकी द्व्याढकी ना
द्व्याढकी द्व्याचितिकी द्व्याचिती नाद्व्याचिती द्विपात्रिकी द्विपात्री कुलिजाल्लुक्
खौ च द्विगोरित्येव कुलिजशब्दांतात् द्विगोः संभवनादिष्वर्थेषु लुक्खौ भवतः ॥
चकारात् ष्ठंश्च प्रत्ययस्य ग्रहणाल्लुगपि विकल्प्यते ठञः पक्षे श्रवणं भवति ते
न चास्य ख्णसंपद्यते द्वे कुलजे संभवत्यवहरति पचति वा द्विकुलिजिकी द्विकुलि
जी वा द्विकुलिजिकी द्वैकुलिजिकी परिमाणान्तस्यासंज्ञाशाणयोरित्युत्तरकुलिज
ग्रहणासमीपीक्षते तेनोत्तरपदवृद्धिर्न भवति सोऽस्यांशवस्नभृतयः सङ्गतिप्रथमा
समर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थमंशादि
चेत्तद्भवति अंशो भागः वस्नं मूल्यं भृतिर्वेतनं पंचांशोऽस्य पंचको वस्नो वास्य भृतिर्वास्य

श्री·
का·प्र·
३१३

पंचकः सप्तकः अष्टकः तदस्य परिमाणम् तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे
यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं परिमाणं चेत्तद्भवति प्रस्थः परिमाणम्
अस्य प्रास्थिको राशिः द्रौणिकः खारीकः खारीशतिकः खारीसाहस्रिकः वर्षशतं जीवि
तपरिमाणमस्य प्रास्थिको राशिः षाष्टिकः साप्ततिकः समर्थविभक्तिः प्रत्ययार्थश्च
पूर्वस्मादेवानुवर्तिष्यते किमर्थं तयोरुपादाने पुनर्विधानार्थम् द्विषष्टिः परिमाण
मस्य द्विषाष्टिकः द्विसाप्ततिकः पुनर्विधानसामर्थ्यादध्यर्धपूर्वद्विगोरिति न लु
ग्भवति संख्यायाः संज्ञासंघसूत्राध्ययनेषु तदस्य परिमाणमित्यनुवर्तते संख्या
वाचिनः परिमाणोपाधिकात्प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भ
वति संज्ञासंघसूत्राध्ययनेष्विति प्रत्ययार्थविशेषणम् तत्र संज्ञायां स्वार्थे प्रत्ययो वा
च्यः पंचैव पंचकाः शकुनयः त्रिकाः शालंकायनाः संघे पंच परिमाणमस्य संघस्य
पंचकः सप्तकः अष्टकः सूत्रे अष्टावध्यायाः परिमाणमस्य सूत्रस्याष्टकं पाणिनी
यम् दशकं वैयाघ्रपदीयम् त्रिकं काशकृत्स्नम् नन्वध्यायसमूहः सूत्रं संघ

वभवति नैतद्दक्षिणाशाणितोम मूर्द्धेमं चशाह्नोऽस्तुफः अध्ययनेपंचकोधीतः सम-
कोहकः अधीतिरध्ययनेनसमंसंख्यापरिमाणं पंचकृत्वयपंचवाराः पंचरूपा
णस्याध्ययनस्यपंचकमध्ययनं स्तोमेडविधिः पंचदशाद्यर्थः पंचदशमंत्राप
रिमाणमस्यस्तोमस्यपंचदशः स्तोमः सप्तदशः एकविंशः शन्शतोर्डिनिश्छन्द
सिवक्तव्यः पंचदशिनोमासाः त्रिंशिनोमासाः विंशतेश्चेतिवक्तव्यम् विंशिनोऽङ्गि
रसः पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं ॥ तदस्य
परिमाणमनुवर्तते पंक्त्यादयःशब्दानिपात्यन्ते यदिहलक्षणेनानुपपन्नंतन्निपात
नात्सिद्धं पंचानां टिलोपस्तिश्चप्रत्ययः पंचपदानिपरिमाणमस्य पंक्तिश्छंदः द्वयो
र्दशतोर्विंशभावस्तिश्चप्रत्ययः द्वौदशतौपरिमाणमस्यसंघस्य विंशतिः त्रयाणांत्रिं
भावः शच्चप्रत्ययः त्रयोदशतःपरिमाणमस्यत्रिंशत् चतुर्णांचत्वारिंभावः शच्च
प्रत्ययः चत्वारोदशतःपरिमाणमस्यचत्वारिंशत् पंचानांमाकारः शच्चप्रत्ययः
पंचदशतः परिमाणमस्यपंचाशत् षण्णांतिप्रत्ययः अपदनेचषड्दशतः परिमा

ॐ
काप्र·
३१८

णमस्यषष्टिः सप्तानोतिप्रत्ययः सप्तदशतः परिमाणमस्य सप्ततिः अष्टानामा-
शीतिभावः तिश्च प्रत्ययः अष्टौदशतः परिमाणमस्याशीतिः नवानोतिप्रत्ययः
नवदशतः परिमाणमस्य नवतिः दशानोशभावः तश्च प्रत्ययः दशदशतः
परिमाणमस्य शतं विंशत्यादयो गुणशब्दास्तु यथाकथंचित् व्युत्पाद्यन्ते ना-
भिनिवेष्टव्यम् तथा दिपंक्तिरिति क्रमसन्निवेशेपि वर्त्तते ब्राह्मणपंक्तिः पि-
पीलिकापंक्तिरिति न चात्रत्ववयवार्थः कश्चिदस्ति यादेशाविषयः भेदेन गुणमा-
त्रे गुणानिवृत्तिः सलिंगसंख्यान्वविधानं च तदपि सर्वं स्वाभाविकमेव महत्त्वा-
दयोप्येवंजातीयास्तद्वदेव द्रष्टव्याः उदाहरणमात्रमेतदिति पंचद्दशतौवर्गे
वा पंचत् दशत् इत्येतौ शब्दौ निपात्येते वर्गेभिधेये तदस्य परिमाणमित्यस्या
डतिकनिशाभेवतिर्निपात्यते वाग्रहणात्पक्षेसोपि भवति पंचपरिमाणमस्य
वर्गस्य पंचद्वर्गः पंचकः दशद्वर्गः दशकः सप्तनोञ्छन्दसि वर्गे इत्येव तदस्य
स्यपरिमाणमित्येव सप्तन् शब्दात् छन्दसि विषयेञ्प्रत्ययो भवति वर्गेभिधेये सा-

ण्समासान्तमुच्यते त्रिंशच्चत्वारिंशतोः ब्राह्मणे संज्ञायां डुण् तदस्य परिमाण
मित्यनुवर्तते वर्गे इति निवृत्तं त्रिंशच्चत्वारिंशद्भ्यां डुण्प्रत्ययो भवति संज्ञा
यां तदस्य परिमाणमित्येतस्मिन्विषये ब्राह्मणेभिधेये ग्रभिधानसमम्येषान विष
यसमसी त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि ब्राह्मणानि चत्वारिं
शानि कानिचिदेव ब्राह्मणान्युच्यन्ते तदर्हति तदिति द्वितीयासमर्थादर्हती
त्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति श्वेतच्छत्रमर्हतीति श्वैतच्छत्रिकः वास्त्रिकः
शातिकः शात्यः साहस्रः छेदादिभ्यो नित्यम् नित्यग्रहणं प्रत्ययार्थविशेषण
म् छेदादिभ्यो द्वितीयासमर्थेभ्यो नित्यमर्हतीत्यस्मिन्विषये यथाविहितं प्र
त्ययो भवति छेदं नित्यमर्हतीति छैदिकः भैदिकः छेद भेद द्रोह दोह वर्तकर्ष सं
प्रयोगः विप्रयोग विप्रकर्ष प्रेषण संप्रश्न विराग विरंग च शीर्षच्छेदाद्यच्च नि
त्यमित्यनुवर्तते शीर्षच्छेदशब्दाद्द्वितीयासमर्थान्नित्यमर्हतीत्यस्मिन्नर्थे प्रत्य
यो भवति चकाराट्ठक् शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः शैर्षच्छेदिकः प्रत्यय

ॐ· काश· २७५

न्नियोगेनविरमः शीर्षभावो निपात्यते दंडादिभ्यः नित्यमितिनिवृत्तम् दं
डादिभ्यो द्वितीयासमर्थेभ्यो ऽर्हतीत्यस्मिन्नर्थे यत्प्रत्ययो भवति ठकोपवादः दं
डमर्हतीति दंड्यः मुसल्यः दंड मुसल मधुपर्क कशा अर्थ मेधा मेध उदक
वध युग गुहा इभ छन्दसि प्रातिपदिकमात्राच्छन्दसि विषये तदर्हतीत्यस्मि-
न्नर्थे यत्प्रत्ययो भवति ठञादीनामपवादः तदस्ताहन्तः सधूप्यः पल्याशाः
मर्थ्यो देवः पात्राद्घंश्च पात्रशब्दात्तदर्हतीत्यस्मिन्नर्थे घन्प्रत्ययो भवति चका
राद्यश्च ठञ्ञोरपवादः पात्रे परिमाणमस्य परिमाणमपि पात्रमर्हतीति पा-
त्र्यः पात्रियः कडंगरदक्षिणाच्छ च कडंगरदक्षिणाशब्दाभ्यां छः प्रत्ययो भव
ति चकाराद्यश्च तदर्हतीत्यस्मिन्नर्थे ठकोपवादः कडंगरमर्हति कडंगरीयो
गौः कडंगर्यः दक्षिणामर्हति मर्हतीयो ब्राह्मणः दक्षिण्यः अस्मादस्मादपू
देनिपातेन लक्षणाद्यभिचारचिह्नं यथासंख्याभावं सूचयति स्थालीबिला
त् स्थालीबिलशब्दात्तदर्हतीत्यस्मिन्नर्थे छयतौ प्रत्ययौ भवतः ठकोपवादः

स्थालीबिलमर्हन्ति स्थालीबिलीयास्तंडुलाः स्थालीबिल्याः पाकयोग्या इ-
त्यर्थः यज्ञर्त्विग्भ्यां घखञौ यज्ञशब्दादृत्विक्शब्दाच्च यथासंख्यं घखञौ प्रत्ययौ
भवतः तदर्हतीत्यस्मिन्नर्थे ठकोपवादः यज्ञियो ब्राह्मणः आर्त्विजीनो ब्राह्म-
णः यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् यज्ञकर्मार्हतीति यज्ञियो देशः ऋ-
त्विक्कर्मार्हत्यार्त्विजीनं ब्राह्मणकुलम् आर्हीयान्तं ठगादीनां पूर्णोवधिरत
ऊर्ध्वं प्राग्वतीयेषु ठञेव भवति पारायणतुरायणचान्द्रायणं वर्तयति सम-
र्थविभक्तिरत्र वर्तते अर्हतीति निवृत्तम् पारायणादिभ्यो द्वितीयसमर्थेभ्यो
वर्तयतीत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति पारायणं वर्तयति पारायणि-
कश्छात्रः तुरायणं वर्तयति तौरायणिको यजमानः चान्द्रायणं वर्तय-
ति चान्द्रायणिकस्तपस्वी संशयमापन्नः संशयशब्दात् द्वितीयासमर्था-
दापन्न इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति संशयमापन्नः सांशयिकः ॥
योजनं गच्छति योजनशब्दात् द्वितीयासमर्थाद्गच्छतीत्यस्मिन्नर्थे ठञ् प्र-

ॐ.
काप्र.
३२५

योभवति योजनं गच्छति योजनिकोश्वः क्रोशशतयोजनशतयोरुपसंख्या-
नं क्रोशशतं गच्छति क्रोशशतिकः काकः योजनशतिको हंसः ततोभिगम-
मर्हतीति क्रोशशतयोजनशतयोरुपसंख्यानेन क्रोशशतादभिगमनम-
र्हति क्रोशशतिको विप्रः योजनशतिकः पथः ष्कन् पथिशब्दात् द्वितीयास-
मर्थात् गच्छतीत्यस्मिन्नर्थे ष्कन् प्रत्ययो भवति नकारः स्वरार्थः षकारो ङीषर्थः पन्था-
नं गच्छति पथिकः पथिकी पंथो ण नित्यम् नित्यग्रहणं प्रत्ययार्थविशेषणा-
र्थम् पथः पंथ इत्ययमादेशो भवति णश्च प्रत्ययो नित्यं गच्छतीत्यस्मिन्नर्थे पन्थानं
नित्यं गच्छति पान्थः पान्थो भिक्षां याचते नित्यमिति किम् पथिकः उत्तरपथेना-
हृतं च निर्देशादेव समर्थविभक्तिः उत्तरपथशब्दात् तृतीयासमर्थादाहृतमि-
त्यस्मिन्नर्थे ठञ् प्रत्ययो भवति चकारः प्रत्ययार्थसमर्थसमुच्चये गच्छतीति च आ-
आपि तृतीयैव समर्थविभक्तिः उत्तरपथेनाहृतमौत्तरपथिकम् उत्तरपथेनाह
गच्छत्यौत्तरपथिकः आहृतप्रकरणे वारिजंगलस्थलकान्तारपूर्वपदादुपसंख्या-

नम् वारिपथेनाहृतं वारिपथिकम् वारिपथेन गच्छति वारिपथिकः जंग-
लपथेनाहृतं जांगलपथिकम् जांगलपथेन गच्छति जांगलपथिकः स्थ-
लपथेनाहृतं स्थालपथिकम् स्थलपथेन गच्छति स्थालपथिकः कांतरपथे-
नाहृतं कांतारपथिकम् कांतरपथेन गच्छति कान्तारपथिकः अजशंकुपथा-
भ्यां चोपसंख्यानं अजपथेनाहृतं आजपथिकम् अजपथेन गच्छति आजपथिक
शंकुपथेनाहृतं शांकुपथिकम् शंकुपथेन गच्छति शांकुपथिकः मधुकम-
रिचयोः स्थलात् स्थलपथेनाहृतं स्थालपथे मधुकम् स्थालपथम् मरिचम्
कालात् कालादित्यधिकारः यदित ऊर्ध्वमनुक्रमिष्यामः कालादित्येवं तद्वे-
दितव्यं वक्ष्यति तेन निर्वृत्तः मासेन निर्वृत्तं मासिकम् अर्धमासिकम् काला-
दित्यधिकारो व्युष्टादिभ्योणिति यावत् तेन निर्वृत्तः तेनेति तृतीयासमर्थात्
कालवाचिनः प्रातिपदिकान्निर्वृत्त इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति अह्ना नि-
र्वृत्तम् आह्निकम् मासिकम् आर्धमासिकं सांवत्सरिकम् तमधीष्टो भृतो भूतो

ग्रं.
काप्र.
३१०

भावी तमिति द्वितीयासमर्थात्कालवाचिनः शब्दादधीष्टो भृतो भूतो भावी
इत्येतेष्वर्थेषु ठञ्प्रत्ययो भवति अधीष्टः सत्कृत्य व्यापारितः भृतो वेतनेन क्री-
तः भूतः स्वसत्तया व्याप्तः कालः भावी तादृश एवानागतः कालः अधीष्टभृतयोरसं-
योग इति द्वितीया मासमधीष्टो मासिकोऽध्यापकः मासं भृतो मासिकः कर्म-
करः मासं भूतो मासिको व्याधिः मासं भावी मासिक उत्सवः ननु चाधीष्टभ-
रणं च मुहूर्तं क्रियते तेन कथं मासो व्याप्यत इत्युच्यते अध्येषणाभरणक्रिया
यैतत्फलभूतया क्रियया मासो व्याप्यमानस्ताभ्यामेव व्याप्त इत्युच्यते मासा-
द्वयसि यत्खञौ मासशब्दाद्वयस्यभिधेये यत्खञौ प्रत्ययौ भवतः ठञोऽपवा-
दौ अधीष्टादीनां चतुर्णामधिकारेऽपि सामर्थ्याद्भूते विनिवेशेन तद्वाभिसं-
बध्यते मासं भूतो मासाभावो मास्यम् मासीनम् वयसीति किम् मासिकः
द्विगोर्यप् मासाद्वयसीति वर्तते मासान्ताद्द्विगोर्यप्प्रत्ययो भवति वयस्यभि-
धेये द्वौ मासौ भूतो भावी वा द्विमास्यः त्रिमास्यः षण्मासाण्ण्यच्च वयसीत्येव ष

ण्मासशब्दाद्वयस्यभिधेये ण्यप्रत्ययो भवति चकारेणाधिकारिकाः समस्त्रैतत्वाः
तैरित्यनेनाश्वानन्तरोऽनुवर्त्तितं तेन ठञ्च भवति षाण्मास्यः षाण्मास्यः षाण्मा
सिकः अवयसि ठञ्च षाण्मासशब्दाद्वयस्यभिधेये ठञ्प्रत्ययो भवति चकारो
नेनयस्यणयतः समर्थयापोः ठञोऽपवादः षाण्मासिको रोगः षाण्मास्यः सम
ायाः खः अर्थार्हादयः वत्सरोणीश्चानुवर्त्तन्ते समाशब्दात् द्वितीयासमर्थादृयो
ष्टोऽभ्रत्तो भृतो भावी वा समीनः केचित्तु तेन निर्वृत्तमित्यस्मादनुवर्तयन्ति
समाया निर्वृत्तः समीनः द्विगोर्वा समयाश्चेत्येव समाशब्दान्त द्विगोर्निर्वृत्तादि
ष्वर्थेषु खप्रत्ययो भवति पूर्वेणानित्यः प्राप्तो विकल्प्यते प्राप्ते तस्मात्या
पूर्वपदानां तदन्तग्रहणमलुकीति प्राप्तिः तेन मुक्ते पक्षे ठञ्च भवति द्विसमीनः
द्वैसमिकः त्रिसमीनः त्रैसमीनः रात्र्यहः संवत्सराच्च द्विगोरित्येव रात्र्यहन्
संवत्सर इत्येवमन्तात् द्विगोर्निर्वृत्तादिष्वर्थेषु खप्रत्ययो भवति तेन मुक्ते
ठञ्च भवति द्विरात्रीणो द्वैरात्रिकः त्रिरात्रीणः त्रैरात्रिकः द्व्यहीनो द्वैयह्निकः आ

ग्रं·
काश·
३१८

हीनः त्रैयह्निकः द्विसंवत्सरीणः द्विसांवत्सरिकः त्रिसंवत्सरीणः त्रिसांवत्सरिकः
संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः वर्षाल्लुक्च द्विगोरित्येव वर्षशब्दान्ता
त् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खप्रत्ययो भवति पक्षे ठञ् चकारात्तयोश्च वा लुग्भवति न
देवश्रीणितृपाणिमध्यघन्ते द्विवर्षीणो व्याधिः द्विवार्षिकः द्विवर्षः त्रिवर्षीणः त्रि
वार्षिकः त्रिवर्षः वर्षस्याभविष्यतीत्युत्तरपदवृद्धिः भाविनि तु द्वैवर्षिकः चित्तव
तिनित्यम् चित्तवति प्रत्ययार्थेऽभिधेये वर्षशब्दान्तात् पूर्वेण विकल्पे प्राप्ते वचना·
द्विवर्षो दारकः त्रिवर्षः चित्तवतीति किं द्विवर्षीणो व्याधिः षष्टिकाः षष्टिरात्रे
ण पच्यन्ते षष्टिकशब्दो निपात्यते बहुवचनमतन्त्रम् षष्टिरात्रिशब्दात्तृतीयास
मर्थात्पच्यन्त इत्येतस्मिन्नर्थे कन्प्रत्ययो निपात्यते रात्रिशब्दस्य च लोपः षष्टिरात्रे·
ण पच्यन्ते षष्टिकाः संज्ञैषा धान्यविशेषस्य तेन मुद्गादिषु निप्रसंगो न भवति ॥
वत्सरान्ताच्छश्छन्दसि वत्सरशब्दान्तात्प्रातिपदिकान्निर्वृत्तादिष्वर्थेषु छन्दसि वि
षये छः प्रत्ययो भवति ठञोऽपवादः इद्वत्सरीयः इदावत्सरीयः संपरिपूर्वान्वत्स

मेपरिपूर्वोस्य प्रातिपदिकाच्छन्दसिविषयेनिर्वृत्तादिष्वर्थेषु खप्रत्ययो भवति चका
राच्छश्च संवत्सरीणः परिवत्सरीणः संवत्सरीयः परिवत्सरीयः तेनपरिजय्यलभ्य
कार्यसुकरम् तेनेतितृतीयासमर्थात्कालवाचिनः शब्दात्परिजय्यादिष्वर्थेषु ठञ्प्र
त्ययो भवति मासेनपरिजय्यः शक्यतेपरिजेतुं मासिको व्याधिः सांवत्सरिकः मासे
नलभ्यो मासिकः पटः मासेनकार्यं मासिकं चान्द्रायणम् मासेनसुकरो मासिकः
प्रासादः तदस्यब्रह्मचर्यम् तदितिद्वितीयासमर्थविभक्तिः अस्येतिसंयोगेह्यस्ये
तिप्रत्ययार्थः ब्रह्मचर्यं ह्याभ्यामपिसम्बध्यते कालस्य व्यापके प्रत्ययार्थस्य वस्तम्
तदितिद्वितीयासमर्थात्कालवाचिनः शब्दादस्येतिषष्ठ्यर्थे ठञ्प्रत्ययो भवति ब्रह्म
चर्यं चेद्गम्यते मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी आर्धमासिकः सांवत्सरिकः अ
यमाहूतिः तदितिप्रथमासमर्थादस्येतिषष्ठ्यर्थे ठञ्प्रत्ययः यत्तदस्येतिनिर्दिष्टं ब्रह्म
चर्यं चेत्तद्भवति मासोस्य ब्रह्मचर्यस्य मासिकम् ब्रह्मचर्यम् अर्धमासिकम् सांवत्सरि
कम् एवं च ब्रह्मचारी प्रत्ययार्थः उत्तरत्र ब्रह्मचर्यमेव द्वयमपि प्रमाणमुभयथास्तु

ॐ.
काशि.
३३५

प्रयोजनार्थे महानाम्न्यादिभ्यष्षष्ठीसमर्थेभ्य उपसंख्यानम् महानाम्न्यादिभ्यष्षष्ठी
समर्थेभ्य उपसंख्यानम् महानाम्नीनां ब्रह्मचर्यं माहानाम्निकम् आदित्यव्रतिकम्
गौदानिकम् तच्चरतीति महानाम्न्यादिभ्य उपसंख्यानम् महानाम्न्यो नाम ऋचः
तत्सहचरितं व्रतं तच्छब्देनोच्यते महानाम्नीश्चरति माहानाम्निकः आदित्यव्रतिकः
गौदानिकः अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः अवान्तरदीक्षां चरत्यवान्तरदीक्षी
तिलव्रती देवव्रती अष्टाचत्वारिंशतो ड्वुंश्च डिनिश्च वक्तव्यः अष्टाचत्वारिंशतं वा
र्षाणि व्रतं चरति अष्टाचत्वारिंशकः अष्टाचत्वारिंशी चातुर्मास्यानां यलोपः तद्धि
तौ च प्रत्ययो वक्तव्यो चातुर्मास्यानि चरति चातुर्मासिकः चातुर्मासी चातुर्मासाण्ण्यो
यज्ञे तत्र भवे वक्तव्यः चतुर्षु मासेषु भवा पौर्णमासी चातुर्मासी आषाढी कार्त्तिकी
फाल्गुनी च तस्य दक्षिणा यज्ञाख्येभ्यः तस्येति षष्ठीसमर्थेभ्यो यज्ञाख्येभ्यः प्रातिपदिके
भ्यः दक्षिणायामर्थे ठञ् प्रत्ययो भवति अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी वाजपे
यिकी राजसूयिकी आख्याग्रहणमकालादपि यज्ञवाचिनो यथा स्यात् इतरथा हि

३३५

कालाधिकारादेकाहद्वाहत्र्याहप्रभृतयएवग्रहणमर्हन्तेरन् प्रागवतेः संख्यापूर्वप
दानांतदन्तग्रहणमलुकीतिकालाधिकारेपिद्वादशाहादिष्वस्तिप्रसंगः तत्रच
दीयतेकार्यंभवत् तदस्मिन्नधीसमर्थात्कालवाचिनः प्रातिपदिकाद्दीयतेकार्
यमित्येतयोरर्थयोः भवत्यन्यथाभवन्ति यथामासेभवंमासिकम् आर्धमासिक
म् सांवत्सरिकं एवंमासेदीयतेकार्यंवामासिकम् आर्धमासिकम् सांवत्सरि
कम् प्रावृषेण्यम् वासन्तम् हैमन्तम् शारदम् वतिःसर्वसामर्थ्यार्थः योगवि
भागश्चात्रकर्तव्यः तत्रचदीयते यज्ञाख्येभ्यःइतिआग्निष्टोमेदीयतेआग्निष्टोमिकं
भक्तम् राजसूयिकम् वाजपेयिकम् कालाधिकारस्यप्रयोगोवापरत्वः परेसा
मान्येनप्रत्ययः व्युष्टादिभ्योण् तत्रैव सप्तमीसमर्थेभ्योव्युष्टादिभ्यः दीयतेका
र्यमित्येतयोरर्थयोरण्प्रत्ययोभवति व्युष्टेदीयतेकार्यंवावैयुष्टम् नैत्यम् अण्प्र
करणेग्निपदादिभ्यउपसंख्यानमितिनवक्तव्यमत्रैवतेपठितव्याः व्युष्ट नित्य नि
क्रमण उपसंक्रमण प्रवेशन तीर्थ संग्राम संघात अग्निपद पीलुमूल तेनया।

ॐ
काप्र
३२८

ध्याकथ्याचदकृताभ्यांतायसौ दीयतेकार्यमितिनिवर्तते तेनेतितृतीयासमर्थाभ्यां
यथाकथ्याचहृताभ्यांतायनौभवतः दीयतेकार्यमित्येनयोरर्थयोः प्रत्येकमर्थ।
सम्बन्धः यथासंख्यमेष्यते यथाकथाचशब्दोव्ययसमुदायोनादेशनेति तृतीया
र्थमात्रेचात्रसंभवति नतत्तृतीयैवसमर्था विभक्तिः यथायथाचदीयतेकार्यंवा।
यथाकथाचम् हृत्सेदीयतेकार्यंवाहास्यम् सम्यादिति तेनेत्येवतृतीयासम।
र्थात्सेपादिमर्थेठञ्प्रत्ययोभवति गुणोत्कर्षःसंपन्निः आवश्यकेणिनिः कार्णवे
ष्टाभ्यांसेपादिकार्णवेष्टिकेम्ष्टवम् वाससुगिकम् वसपुगेनविशेषणः शोभत
इत्यर्थः कर्मवेषाद्यत् कर्मवेषाशाह्ाभ्यांयत्प्रत्ययोभवति तेनसेपादितीत्या
ऽभिनिष्पन्नेठञोपवादः कर्मणासंपद्यते कार्मण्यंशौयेम् वेषेनसंपद्यतेवैषण्यो
दः तस्मैप्रभवतिसंतापादिभ्यः तस्मैइतिचतुर्थीसमर्थेभ्यःसंतापादिभ्यःप्रभव
तीत्यस्मिन्नर्थेठञ्प्रत्ययोसमर्थःशक्तःप्रभवतीत्युच्यते प्रलमर्थं चतुर्थीसन्तापा।
यप्रभवतिसान्तापिकः सान्नादिकः सन्तापसन्नाह संग्रामसंयोगसंपराय समेष।

निष्पेष निर्घोष विर्वेष निसर्ग विसर्ग उपसर्ग प्रवास उपवास संघात सम्मोदन
सक्तुमांसौदनाद्विगृहीतादपि योगाद्यच्च योगशब्दाद्यत्प्रत्ययोभवति चकाराट्ठ
ञ्चः तस्मैप्रभवतीत्यस्मिन्विषये योगायप्रभवतियोग्यः यौगिकः कर्मणउकञ्
कर्मणशब्दाच्चतुर्थीसमर्थात्प्रभवतीत्यस्मिन्विषयेउकञ्प्रत्ययोभवति कर्मणेप्र
भवतिकार्मुकंधनुः समयस्तदस्यप्राप्तम् समयशब्दात्तदितिप्रथमासमर्थाद
स्येतिषष्ठ्यर्थेठञ्प्रत्ययोभवति यत्तत्प्रथमासमर्थंप्राप्तंचेत्तद्भवति समयःप्राप्तो
ऽस्यसामयिकंकार्यम् उपनतकालमित्यर्थः समर्थविभक्तिनिर्देशउत्तरार्थः ऋतो
रण् तदस्यप्राप्तमित्यनुवर्तते ऋतुशब्दात्तदितिप्रथमासमर्थात्प्राप्तोपाधिका
दस्येतिषष्ठ्यर्थेऽण्प्रत्ययोभवति ऋतुःप्राप्तोऽस्यार्तवम् पुष्पफलम् आर्तवमस्या
म् उपवस्त्रादिभ्यउपसंख्यानम् उपवस्त्राप्राप्तोऽस्यौपवस्त्रम् प्राशिताप्राप्तोऽस्या
प्राशित्रम् छन्दसिघस् ऋतुशब्दाच्छन्दसिविषयेघस्प्रत्ययोभवति तदस्यप्रा
प्तमित्यस्मिन्विषये अणोऽपवादः अयंतेयोनिरृत्वियोयज्ञोवैरृत्वियः कालाद्यत्

ॐ काप्र ३२७

कालशब्दाद्यत्प्रत्ययो भवति तदस्य प्राप्तमित्यस्मिन्नर्थे कालः प्राप्तोस्य काल्यस्तापः
काल्यं शीतम् प्रकृष्टे ठञ् कालादित्येव तदस्य प्राप्तमिति निवृत्तम् प्रकृष्टेन प्रकर्षे-
ण कालो विशेष्यते प्रकृष्टे प्रकर्षवति वर्त्तमानात्कालशब्दात्प्रथमासमर्थादस्येति षष्ठ्य-
र्थे ठञ्प्रत्ययो भवति प्रकृष्टो दीर्घकालोस्य कालिकमृणम् कालिकं वैरम् ऋणग्र-
हणं विस्पष्टार्थम् प्रयोजनम् तदस्येत्येव तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे
ठञ्प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्रयोजनं चेत्तद्भवति इन्द्रमहः प्रयोजनमस्ये-
येन्द्रमहिकम् गाङ्गमहिकम् विशाखाषाढादण्मन्थदण्डयोः विशाखाषाढा-
भ्यामण्प्रत्ययो भवति यथासंख्यं मन्थदण्डयोरभिधेययोः तदस्य प्रयोजनमित्येत-
स्मिन्नर्थे विशाखा प्रयोजनमस्य वैशाखो मन्थः आषाढो दण्डः चूडादिभ्य उपसंख्यान-
म् चूडा प्रयोजनमस्य चौडः श्रद्धा प्रयोजनमस्य श्राद्धम् अनुप्रवचनादिभ्यश्छः ॥
अनुप्रवचनादिभ्यः प्रातिपदिकेभ्यश्छप्रत्ययो भवति तदस्य प्रयोजनमित्यस्मिन्विषये
ठञोपवादः अनुप्रवचनं प्रयोजनमस्यानुप्रवचनीयम् उत्थापनीयम् विशि

पूरिपदिरुहिप्रकृतेरनात्सपूर्वपदादुपसंख्याने गृहप्रवेशनम्प्रयोजनमस्य गृ
हप्रवेशनीयम् प्रपापूरणीयम् अश्वप्रपदनीयम् प्रासादारोहणीयम् स्वर्गादि
भ्यो यद्वक्तव्यः स्वर्गप्रयोजनमस्य स्वर्ग्यम् यश्यम् यशस्यम् आयुष्यम् काम्यम् पु
ण्याहवाचनादिभ्यो लुग्वक्तव्यः पुण्याहवाचनं प्रयोजनमस्य पुण्याहवाचनम् स्व
स्तिवाचनम् शान्तिवाचनम् अनुप्रवचन उत्थापन उपस्थापन संवेशन अनुप्र
वेशन अनुवाचन अनुवादन अनुवासन अन्वारोहण प्ररोहण आरंभण आरोह
ण अवरोहण समापनात्सपूर्वपदात् समापनशब्दाद्विद्यमानपूर्वपदात्प्राति
पदिकाच्छप्रत्ययो भवति तदस्य प्रयोजनमित्यस्मिन्विषये ठञोपवादः छन्दःस
मापनं प्रयोजनमस्य छन्दःसमापनीयं व्याकरणसमापनीयं पदग्रहणंवक्ष्यपू
र्वनियमार्थम् ऐकागारिकट्चौरे ऐकागारिकट् इति निपात्यते चौरेभिधेये एक
गारं प्रयोजनमस्य ऐकागारिकः चौरः ऐकागारिकी किमर्थं निपातनम् यावता
प्रयोजनमित्येव ठञ्सिद्धः चौरे नियमार्थम् इह मा भूत् एकागारं प्रयोजनमस्य

ॐ

कात्र.

३२२

भिदोरिति इकारः कार्यावधारणार्थः । इकैवं भवति न जित्वरः । अपरे इकञ्प्रत्यये
वृद्धिं निपातयन्ति । आकालिकडाद्यन्तवचने निपातनादस्मादाकालिकेति आ
कारान्तो न सिद्ध्यतीति तदर्थं वक्तव्यमयमुक्तः । आकालिकडिति निपात्यते । आद्यन्तौ च
विशेषणम् । इकञ्प्रत्ययो निपात्यते । समानकालावाद्यन्तौ अस्याकालिकः स्तन
यित्नुः आकालिकी विद्युत् । जन्मनान्तस्य कालविनाशादन्यादानन्तरविनाशिनीत्य
र्थः । आकालाद्भवमव्ययञ्च आकालिका आकालिकी विद्युत् । ठञः पूर्णो विधिः । तेनेन
ल्यक्रियावचनात्तेः । तेनेति तृतीयासमर्थात् तुल्यमित्येतस्मिन्नर्थे वत्प्रत्ययो भवति य
त्तत्तुल्यक्रिया चेत्सा भवति । ब्राह्मणेन तुल्यं वर्त्तते ब्राह्मणवत् क्षत्रियवत् । राजव
त् । क्रियाग्रहणं किम् । गुणद्रव्यतुल्ये माभूत् । पुत्रेण तुल्यः स्थूलः । पुत्रेण तुल्यः पिङ्ग
लः । पुत्रेण तुल्यो गोमान् । तत्र तस्येव । तत्रेति तस्येति सप्तमीसमर्थात्षष्ठीसमर्थाच्च
इवार्थे वत्प्रत्ययो भवति । मथुरायामिव मथुरावत् । स्रुघ्ने प्राकाराः पाटलिपुत्रस्ये
व पाटलिपुत्रवत् साकेते परिखा षष्ठीसमर्थात् । देवदत्तस्येव देवदत्तवत् । यज्ञदत्त

११३

दत्तस्य गावः देवदत्तवद्यज्ञदत्तस्य वत्साः तदर्हे तदिति द्वितीयासमर्थादर्हमित्ये
तस्मिन्नर्थे वतिप्रत्ययो भवति राजानमर्हति राजवद्वृत्तम् ब्राह्मणवत् क्षत्रियवत्
उपसर्गाच्छन्दसि धात्वर्थे उपसर्गात्समर्थाद्धात्वर्थे वर्तमानात्स्वार्थे वतिप्रत्ययो भ
वति छन्दसि विषये नोनिवतोयानिवाप्नवत् उद्वतानिनिवतानिच तस्य भावस्त्व
तलौ तस्येति षष्ठीसमर्थाद्भाव इत्येतस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः भवतोऽस्मादभि
धानप्रत्ययाविति भावः शब्दप्रवृत्तिनिमित्तं भावशब्देनोच्यते अश्वस्य भावोऽश्वत्वम्
अश्वता गोत्वम् गोता आचत्वात् ब्रह्मणस्त्व इति वक्ष्यति आ एतस्मात्त्वसंशब्दनाद्यानि
तदूर्ध्वमनुक्रमिष्यामस्तत्र त्वतलौ प्रत्ययौ तत्रापि कृतौ वेदितव्यौ वक्ष्यति पृथ्व्यादिभ्य
इमनिज्वा पृथिमा पार्थवम् पृथुत्वम् पृथुता म्रदिमा मार्दवम् मृदुत्वम् मृदुता
अपवादैः सह समावेशार्थं वचनम् कर्मणि च विधानार्थम् गुणवचनब्राह्मणादिभ्य
कर्मणि चेति चकारो नञ्स्नञ्भ्यामपि समावेशार्थः स्त्रियाभावः स्त्रैणम् स्त्रीत्वम् स्त्रीता
पौंस्नम् पुंस्त्वम् पुंस्ता नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्य ॥

ॐ
का.प्र.
३३३

इतउत्तरेप्रत्ययपावाञ्पूर्वोक्तपुरुषान्नभवेति चतुरादीवर्जयित्वावक्ष्यति पत्येतपु
रोहितादित्वेयथापि अपतिते अपतितता अपटुत्वम् अपटुता अरमणीयत्वम्
अरमणीयता तत्पूर्वादितिकिम् प्राजापत्यम् बार्हस्पत्यम् तत्पुरुषादितिकि
म् नास्यपटवःसन्त्यपटुः तस्यभावआपटवम् आलसत्वम् अचतुरादिभ्यइ
तिकिम् आचतुर्यम् आसंगत्यं आलवाण्यम् आवटेयम् आवश्यम् आकृत्यम्
आरम्यम् आलस्यम् पृथ्वादिभ्यइमनिज्वा पृथुइत्येवमादिभ्यःप्रातिपदिकेभ्यः
वाइमनिच्प्रत्ययोभवति तस्यभावइत्यस्मिन्विषयेवावचनमाणादिसमावेशा
र्थं पृथोर्भावः प्रथिमापार्थवं म्रदिमामार्दवं ततस्त्वतलौ तस्यभावइत्यनेनैवपृथु
त्वम् पृथुता मृदुत्वम् मृदुता पृथुमृदुमहिमहत पटुतनु लघुबहुसाधु ॥
आशुतनुगुरुदेरु बहुलाखिंड खंडभ्रकिंचनवालहोडपाकवत्समंदस्वादुह्रस्वद
स्वदीर्घवृत्तिप्रवक्षिप्रिय वर्णदृढादिभ्यःष्यञ्च वर्णविशेषवाचिभ्यःप्रातिपदिकेभ्यः
दृढादिभ्यः ष्यञ्प्रत्ययोभवति चकारादिमनिश्च तस्यभावइत्यस्मिन्विषये शुक्ल

११८

त्वभावः शौक्ल्यम् शुक्लिमा शुक्लत्वम् शुक्लता कार्ष्ण्यम् कृष्णिमा कृष्णत्वम्
कृष्णता दृढादिभ्यः ष्वल्लपि दार्ढ्यम् द्रढिमा दृढत्वम् दृढता षकारो ङीषर्थः
ङौचिनीयार्थाकामी दृढवृढपरिवृढभृशकृशवक्र श्रेष्ठलवणकृशताम्र
वेर्यातलातमतिमनःशारदानाम् समो मतिमनसोः शीत उष्ण जड बधिर मूक
मूर्ख मूल पण्डित मधुर गुणवचनब्राह्मणादिभ्यः कर्मणि च गुणमुक्तवन्तो गु
णवचनाः गुणवचनेभ्यः शब्देभ्यो ब्राह्मणादिभ्यश्च तस्येति षष्ठीसमर्थेभ्यः कर्म
ण्यभिधेये ष्यञ्प्रत्ययो भवति चकाराद्भावे च कर्मशब्दः क्रियावचनः जडस्य कर्म भा
वो वा जाड्यम् मौढ्यम् ब्राह्मणादिभ्यः ष्वल्लपि ब्राह्मण्यम् माणव्यम् आपादप
रिसमाप्तेर्भावकर्माधिकारात् ब्राह्मणादिराकृतिगणः आदिशब्दः प्रकारे चातु
र्वण्यादीनां स्वार्थे उपसंख्याने चत्वार एव वर्णाः चातुर्वर्ण्यम् चातुराश्रम्यम् त्रै
लोक्यम् ब्राह्मण माणव वाडव अर्हतो नुम् च अर्हतो भावः आर्हन्त्यम् आर्हन्ती
चौर धूर्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अ

ॐ· काश्र·
२२५

सभाव स्वेतेजन संवादिन संवेशिन संभाषिन बहुभाषिन शीर्षघातिन समस्थ
परस्थ परमस्थमध्यमस्थविषमस्थ अनीश्वर चपल कुशलनिपुणपिशुनवालिसा
अलस दुष्पुरुषकापुरुषगणपतिगडुलदायादविशस्तिविषाय निगम वि
घातनिघात सर्ववेदादिभ्यः स्वार्थे चतुर्वेदस्योभयपदवृद्धिः स्तेनाद्यन्नलोपश्च ॥
स्तेनशब्दात्षष्ठीसमर्थाद्भावकर्मणोरर्थयोः यत्प्रत्ययो भवति नशब्दस्य च लोपः
स्तेनस्य भावः कर्म वा स्तेयम केचिद्योगविभागमेव कुर्वन्ति स्तेनाद्यन्भवति स्तेन
म ततो यन्नलोपश्च स्तेयमिति सख्युर्यः सखिशब्दाद्यप्रत्ययो भवति भावकर्मणो
रर्थयोः सख्युर्भावः कर्म वा सख्यम दूतवणिग्भ्यां चेति वक्तव्यम दूत्यम वाणिज्या ॥
कपिज्ञात्योर्ढक कपिज्ञातिशब्दाभ्यां ढक्प्रत्ययो भवति भावकर्मणोरर्थयोः कपे
र्भावः कर्म वा कापेयम ज्ञातेयम यथासंख्यमर्थयोः सर्वत्रैवात्र प्रकरणे नेष्यते ॥
पत्यन्तपुरोहितादिभ्यो यक पत्यन्तात्प्रातिपदिकात्पुरोहितादिभ्यश्च यक्प्रत्ययो भव
ति भावकर्मणोरर्थयोः सेनापतेर्भावः कर्म वा सैनापत्यम प्राजापत्यं पुरोहितादि

भ्यः खल्वपि पौरोहित्यं राज्यम् पुरोहितराजन्नेसमासेनभवति ग्रामिकावेरि
कदंडिकवर्मिकधर्मिकशिलिकसूतिकशंजलिकछत्रिकपर्षिकप्रतिकसा
रथिसांजलिकग्रामजालिकसारस्त सूचक प्राणभृज्जातिवयो वचनोद्गात्रादिभ्य
श्चाञ्प्रत्ययोभवति भावकर्मणोरर्थयोः अश्वस्यभावः कर्मवा आश्वम् औष्ट्रम् व
योवचनेभ्यः कौमारम् कैशोरम् उद्गात्रादिभ्यः औद्गात्रम् औन्नेत्रम् उद्गातृउन्नेतृ
प्रतिहर्तृप्रशास्तृहोतृभर्तृरथगणकपत्तिगणकसुष्टुदुष्टुअध्वर्युवधूसुभगमंत्रे ॥
हायनान्तयुवादिभ्योऽण् हायनान्तेभ्यः प्रातिपदिकेभ्यः युवादिभ्यश्चाण्प्रत्ययोभव
ति भावकर्मणोरर्थयोः द्विहायनस्यभावः कर्मवा द्वैहायनम् त्रैहायणम् युवा
दिभ्यः खल्वपि यौवनम् स्थाविरम् श्रोत्रियस्ययलोपश्चाण्वक्तव्यः श्रोत्रियस्यभा
वः कर्मवा श्रौत्रम् युवन् स्थविरहोतृयजमानःपुरुषासिभ्रातृकुतककर्मकश्रव
ण कमंडलुकुस्त्रीसुस्त्रीदुस्त्रीहृदयसुहृदयदुर्हृदयसुभ्रातृदुर्भ्रातृवृषलपरिव्रा
जकसब्रह्मचारिन् अनृशंस हृदयासेचपलकुशलनिपुणपिशुनकुतूहलक्षेत्रज्ञ

ॐ· काश्रि·
३२५

इगंताञ्चलघुपूर्वात् इगंतात्प्रातिपदिकाल्लघुपूर्वादण्प्रत्ययो भवति भावकर्म्म-
णोरर्थयोः लघुपूर्वग्रहणेन प्रातिपदिकासमुदायो विशेष्यते लघुः पूर्वोवयवो
स्येति कृत्वा पुनरसौ पूर्वः सन्निधानादिक इति विज्ञायते लघुः पूर्वो यस्मादिकस्त
दन्तात्प्रातिपदिकादिति अयमर्थो विवक्षितः अपरे तु सकलं वर्णयन्ति इका
मावन्तः इगन्तः लघुपूर्वग्रहणेन च समुदाय एव विशेष्यते पश्चात्तेन प्रातिपदिका-
स्य तदन्तविधिरिति अस्मिन्व्याख्याने तद्ग्रहणमतिरिच्यते लघुपूर्वादिकश्चे
ता वक्तव्यं स्यात् शुचेर्भावः कर्म्म वा शौचम् मौनम् नावरजनं हारीतकम् ॥
पाटवम् लाघवम् इगन्तादिति किम् पटत्वम् घटत्वम् लघुपूर्वादिति किम्
कडुत्वं पोडुत्वम् कथकाव्यम् ब्राह्मणादिषु कविशब्दो द्रष्टव्यः योपधाद्गुरू-
पोत्तमाद्वुञ् द्विप्रभृतीनामन्त्यात्पूर्वमुपोत्तमम् गुरुरुपोत्तमं यस्य तस्माद्गुरूपो-
त्तमम् यकारोपधात्प्रातिपदिकाद्गुरूपोत्तमाद्वुञ्प्रत्ययो भवति भावकर्म्मणो-
रर्थयोः रमणीयस्य भावः कर्म्म वा रामणीयकम् वामनीयकम् योपधादिति

किम् विमानकम् गुरूपोत्तमादिति किम् क्षत्रियत्वम् सहायाच्चेति वक्तव्यम्
साहाय्यम् साहायकम् द्वन्द्वमनोज्ञादिभ्यश्च द्वन्द्वसंज्ञकेभ्यो मनोज्ञादिभ्यश्च
प्रातिपदिकेभ्यो वुञ्प्रत्ययो भवति भावकर्मणोरर्थयोः गोपालपशुपालानां
भावकर्म वा गोपालपशुपालिका शैष्योपाध्यायिका कौत्सकुशिका मनोज्ञा
दिभ्यः खल्वपि मनोज्ञकम् प्रैयरूपकम् मनोज्ञ प्रियरूप कल्याण मेधाविन्
आढ्यकुलपुत्र छान्दस छात्र श्रोत्रिय चोर रूप वैश्वदेव युवन् ग्रामपुत्र ग्रामषं
ड ग्रामकुमार अमनुष्यपुत्र अमनुष्य कुलपानपुत्र गोत्रचरणाच्छ्लाघात्याकारत
दवेतेषु गोत्रवाचिनः चरणवाचिनश्च प्रातिपदिकाद्वुञ्प्रत्ययो भवति प्रत्येकं
भावकर्मणोरर्थयोः श्लाघादिषु विषयभूतेषु तत्र श्लाघा विकत्थनम् अत्या
कारः पराभिभवः तदवेतस्तत्प्राप्तस्तज्ज्ञो वा तदिति गोत्रचरणयोर्भावकर्मणी
प्रतिनिर्दिश्येते तेषामभावनवाप्ततदवेत इत्युच्यते श्लाघायां तावत् गार्गिक
या श्लाघते काठिकया श्लाघते गार्ग्यत्वेन कठत्वेन च विकत्थत इत्यर्थः अत्याका

ॐ॰ योगार्गिकयात्याकुरुते काठिकयात्याकुरुते गार्ग्यत्वेन कठत्वेन च परानधि॰

काप्र॰ क्षिपतीत्यर्थः तदवेते गार्गिकामवेतः काठिकामवेतः गार्ग्यत्वं कठत्वं चा

२२९ प्राप्त इत्यर्थः तदवगतवानित्यर्थः श्लाघादिष्विति किम् गार्ग्यत्वम् कठत्वम्

होत्राभ्यश्छः होत्राशब्दः ऋत्विग्वाचकः होत्राभ्यः प्रतिविशेषवाचिभ्यश्छः प्रत्य

यो भवति भावकर्मणोरर्थयोः अच्छावाकस्य भावः कर्म वा अच्छावाकीयम्॥

मैत्रावरुणीयम् ब्राह्मणाच्छंसीयम् बहुवचनं स्वरूपविधिनिरासार्थम् ब्रह्म

णस्त्वः होत्रेभ्यनुवर्त्तते ब्रह्मशब्दाद्धोत्रावाचिनो भावकर्मणोरर्थयोस्त्वप्रत्ययो

भवति छस्यापवादः ब्राह्मणो भावः कर्म वा ब्रह्मत्वम् नेति वक्तव्ये त्वं वचनं

तलो बाधनार्थम् यस्तु जातिशब्दो ब्राह्मणपर्यायो ब्रह्मशब्दस्ततस्त्वतलौ भवत

एव ब्रह्मत्वम् ब्रह्मता भवनावधिकयोर्नञ्स्नञोरधिकारः समाप्तः इति जयन्त

काशिकायां वृत्तौ पंचमस्याध्यायस्य प्रथमः पादः समाप्तः॥ श्रीसरस्वतीरूपाय

गुरवे नमः धान्यानां भवने क्षेत्रे खञ्॥ निर्देशादेव षष्ठीसमर्थविभक्तिः धान्य

विशेषवाचिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्यः भवनेऽभिधेये खञ्प्रत्ययो भवति तच्चेद्भ
वनं क्षेत्रं भवति भवन्त्यस्मिन्निति भवनम् मुद्गानां भवनं क्षेत्रम् मौद्गीनम्
कौलत्थीनम् कौद्रवीणम् धान्यानामिति किम् तृणानां भवनं क्षेत्रं पविविपनिरा
साधेम् व्रीहिशाल्योर्ढक् व्रीहिशालिशब्दाभ्यां ढक्प्रत्ययो भवति भवने क्षेत्रेऽभि
धेये खञोऽपवादः व्रीहीणां भवनं क्षेत्रम् व्रैहेयम् शालेयम् यवयवकषष्टिका
द्यत् यवादिभ्यः शब्देभ्यो यत्प्रत्ययो भवति भवने क्षेत्रेऽभिधेये खञोऽपवादः यवानां भ
वनं क्षेत्रम् यव्यम् यवक्यम् षष्टिक्यम् विभाषा तिलमाषोमाभङ्गाणुभ्यः तिला
दिभ्यः शब्देभ्यो विभाषा यत्प्रत्ययो भवति भवने क्षेत्रेऽभिधेये खञि प्राप्ते वचनम्
सोऽपि भवति उमाभङ्गयोरपि धान्यत्वमाश्रित्यैव तिलानां भवनं क्षेत्रम् ति
ल्यम् तैलीनम् माष्यम् माषीणम् उम्यम् औमीनम् भङ्ग्यम् भाङ्गीनम् अण्
व्यम् आणवीनम् सर्वचर्मणः कृतः खखञौ सर्वचर्मशब्दात् तृतीयासमर्थात्
कृत इत्यस्मिन्नर्थे खखञौ प्रत्ययौ भवतः सर्वशब्दश्चात्र प्रत्ययार्थेन कृतेन संबध्य

ॐ.
काप्र.
३२२

ते नवर्म्माणात्तत्रायमसमर्थसमासो वेदितव्यः सर्वे धर्म्माणान्तः कृतस्यास्मिन्वाक्यार्थे
वृत्तिः सर्ववर्म्माणः सार्ववर्म्माणः यथामत्वं समत्वं समत्वस्यदर्शनः त्वः यथामत्वं समु
त्वशाद्वाद्दर्शनस्यास्मिन्नर्थे व्ययप्रत्ययो भवति ईषपत्तेस्मिन्निदर्शनः आदर्शादिप्रति
विवाद्यव्ययउच्यते निपातनात्तस्मादीषेपव्ययीभावः यथामत्वंदर्शनः यथामुत्वीनः
समं मृत्वं समृत्वं समृत्वस्यदर्शनः संमुत्वीनः उन्नवो देपृष्ठयोगाकर्मपञ्चपाञ्चव्याप्नो
ति तदिति द्वितीयसमर्थविभक्तिः व्याप्नोतीति प्रत्ययार्थः परिशिष्टं प्रकृतिविशे
षणं सर्वादेः प्रातिपदिकात्पथ्यंगाकर्मपञ्चपाञ्चेतान्नदिति द्वितीयासमर्थाद्व्याप्नो
तीत्यस्मिन्नर्थे व्ययप्रत्ययो भवति सर्वपथ्यान्व्याप्नोतीति सर्वपथीनो रथः सर्वांगीन
स्तापः सर्वकर्म्मीणः पुरुषः सर्वपत्रीणः सारथिः सर्वपात्रीणस्तोदनः आप्रपदं प्राप्नो
ति प्रपदमिति पादस्याग्रमुच्यते आमर्यादायाम् ततोव्ययीभावः आप्रपदस्माद्धो
तदिति द्वितीयासमर्थात्व्याप्नोत्यस्मिन्नर्थे ख प्रत्ययो भवति आप्रपदं प्राप्नोति आप्र
पदीनः पटः पारिशेषणां संबन्धस्यापि प्रमाणं तास्यशाख्यायते अन्नपदसर्वाद्यपानत्य

वद्धाभक्षयतिनेयेषु अनुपदादिभ्यः शब्देभ्यः द्वितीयासमर्थेभ्यो यथासंख्यं वद्धाभ
क्षयतिनेय इत्येतेष्वर्थेषु खप्रत्ययो भवति अन्वायामेसादृश्येवा अनुपदं वद्धा अ
पदीना उपानत् पादप्रमाणेत्यर्थः सर्वान्नानि भक्षयति सार्वान्नीनो भिक्षुः अयः प्रद
क्षिणम् अनयः प्रसव्यम् प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन्परैः पदानामसमा
वेशः सोयानयः अयानयं नेयः अयानयीनः शारः खलकशिरसि स्थित इत्य
र्थः परोवरपरंपरपुत्रपौत्रमनुभवति परोवरपरंपरपुत्रपौत्र इत्येतेभ्यः शब्देभ्यः
तदिति द्वितीयासमर्थेभ्योनुभवतीत्यस्मिन्नर्थे खप्रत्ययो भवति परोवरेति परस्यो
त्ववचनम् परांश्चावरांश्चानुभवतीति परोवरीणः परपरतराणां परंपरभावः
परांश्चपरतरांश्चानुभवतीति परंपरीणः पुत्रांश्च पौत्रांश्चानुभवतीति पुत्रपौत्रीणः
परोपरशब्दोपि विनापि प्रत्ययेनाइष्यन्तेमेचिपरंपरामेवं भिनत्तीति नच्छब्दोन्तरमेवा
दृष्टव्यम् अवारपारात्यन्तानुकामं गामी अवारपारअत्यन्तअनुकाम इत्येतेभ्यो
द्वितीयासमर्थेभ्यो गामीत्यस्मिन्नर्थे खप्रत्ययो भवति गमिष्यतीति गामी भवि

ॐ
काप्र·
१३२८

ष्यतिगम्यादयः अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रतिषेधः अवारपारेभ्य
अवारपारीणः विगृहीतादपि भवति अवारीणः पारीणः विपरीताच्चपारावा
रीणः अत्यन्तंगामी अत्यन्तीनः भृशंगन्तेत्यर्थः अनुकामंगामी अनुकामीनो यथे
ष्टंगन्तेत्यर्थः समांसमांविजायते समांसमामिति वीप्सा भवति समुदाय
प्रकृतिः विजायत इति प्रत्ययार्थः गर्भधारणेन समां व्याप्नुत इति अस्मिन्नर्थे
योगे ह्नीयः समांसमांविजायते समांसमीना गौः गर्भं धारयतीत्यर्थः समां
समीना वडवा पूर्वपदे यलोपश्चवक्तव्यः केचित्तु समायां समायांविजायत इति
विगृह्णन्ति गर्भविमोचने च विजनिर्वर्त्तत इत्याहुः तेषां पूर्वपदे यलोपमात्रं
भवति परिशिष्टस्याल्लग्वक्तव्यः अनुपसर्जनत्वात्पदस्यचवायलोपो वक्तव्यः
समांसमांविजायते समायां समायांविजायत इति वा श्री अद्यश्वीनावडवा विजा
यत इति वर्त्तते अद्यश्वीनेतिनिपात्यते विजननेऽश्वासन्ने प्रसवे आविह्वये हि गर्भ
मोचविधीयते अवाप्तालमवनाविहृये येनेति अद्यवाश्वोविजायते अद्यश्वीना गौः ॥

अष्ठीनावष्ठ्वाके विभक्तिविलोपन इति नैवानुवर्त्तयन्ति अथवा ष्ठमात्रे निपातना-
न्मित्याहुः अष्ठीनं मरणम् अष्ठीनो वियोग इति आगवीनः आगवीन इ-
ति निपात्यते गोराप्रतिदानात्तस्य गोः प्रतिदानात्कर्मकारिणि खप्रत्ययो निपात्य-
ते आगवीनः कर्मकरः यो गवामर्पणतः कर्म करोति आ तस्य गोः प्रत्यर्पणात् ॥
अनुग्वलंगामी गोः पश्चादनुभव अनुगुशब्दादलंगामीत्यस्मिन्नर्थे खप्रत्ययो भ-
वति अनुगुं दामं गच्छत्यनुगवीनो गोपालकः अध्वनो यत्खौ तदिति द्वितीया-
समर्थाद्विभक्तिरनुवर्त्तते अलंगामीति च प्रत्ययार्थः अध्वशब्दात्तदिति द्वितीया-
समर्थादलंगामीत्यस्मिन्नर्थे यत्खौ प्रत्ययौ भवतः अध्वानमलं गच्छत्यध्वन्यो अध्वा-
नीनः येचाभावकर्मणोरित्यात्माध्वनोः खे इति प्रकृतिभावः अभ्यमित्राच्छ च अभ्य-
मित्रशब्दात्तदिति द्वितीयासमर्थादलंगामीत्यस्मिन्नर्थे छः प्रत्ययो भवति चका-
राद्यत्खौ च अभ्यमित्रमलंगच्छत्यभ्यमित्रीयो ऽभ्यमित्र्यो ऽभ्यमित्रीणः अमित्राभिमुखे
सम्यग्गच्छतीत्यर्थः गोष्ठात्खञ्भूतपूर्वे गावो ऽस्मिन्सन्त्यासन्निति विग्रहः गोष्ठशब्देन

ॐ
का॰प्र॰
३२५

सन्निहितो गोसमूहो गोष्ठ उच्यते भूतपूर्वग्रहणं तस्यैव विशेषणं गोष्ठशब्दाद्भू-
तपूर्वे इत्येतस्मिन्नर्थे खञ्प्रत्ययो भवति गोष्ठो भूतपूर्वो गौष्ठीनो देशः भूतपू-
र्व इति किम् गोष्ठो वर्त्तते अश्वस्यैकाहगमः निर्देशादेव षष्ठीसमर्थविभक्तिः अ-
श्वशब्दात्षष्ठीसमर्थादेकाहगम इत्यस्मिन्नर्थे खञ्प्रत्ययो भवति एकाहेन ग-
म्यते इत्येकाहगमः अश्वस्यैकाहगम आश्वीनोध्वा आश्वीनानि शतानि पतति ॥ शा-
लीनकौपीने अधृष्टाकार्ययोः शालीनकौपीनशब्दौ निपात्येते यथासङ्ख्य-
मधृष्टे कार्ये चाभिधेये अधृष्टो अप्रगल्भः अकार्यमकरणार्हम् विरूपम् शालीन
कौपीनशब्दावधृष्टाकार्ययोः पर्यायौ कथं व्युत्पाद्येते शालाप्रवेशमर्ह-
ति कूपावतरणमर्हतीति खञ्प्रत्ययो भवति उत्तरपदलोपश्च निपात्यते शा-
लीनो जडः कौपीनं पापम् व्रातेन जीवति निर्देशादेव समर्थविभक्तिः व्रात-
शब्दात्तृतीयासमर्थाज्जीवतीत्यस्मिन्नर्थे खञ्प्रत्ययो भवति नानाजातीया अनि-
यतवृत्तय उत्सेधजीविनः संघा व्राताः उत्सेधः शरीरम् तदायास्य ये जीवन्ति त-

उत्सेपजीविनः तेषांकर्मव्रातंतेनजीवतिव्रातीनः तेषामेवव्रातानामन्यतमः
उच्यते यत्त्वनन्यदीयेनकर्मणाजीवतितत्रनेष्यते साप्तपदीनंसख्यम् साप्तप
दीनमितिनिपात्यते सख्यंचेत्तद्भवति सप्तभिः पदैरवाप्यतेसाप्तपदीनंसख्यम्
सख्येजनाःसाप्तपदीनमाहुः कथंसाप्तपदीनः सखा साप्तपदीनमित्ययमित्रगुण
प्रधानःसाप्तपदीनशब्दः साहचर्यभावेनकर्मणावर्तते तदापुरुषेणसमानाधिक
रणोभवति हैयंगवीनंसंज्ञायाम् हैयंगवीनमितिनिपात्यते संज्ञायांविषे
येह्योगोदोहस्यहियंगवादेशः तस्यविकारेखञ्प्रत्ययोभवति ह्योगोदोहस्यवि
कारः हैयंगवीनंघृतम् घृतस्येदंसंज्ञा इहनभवति ह्योगोदोहस्यविकारउदश्वि
दिति तस्यपाकमूलेपील्वादिकर्णादिभ्यःकुणब्जाहचौ तस्येतिषष्ठीसमर्था
त्पील्वादिभ्यःकर्णादिभ्यश्चकुणप्जाहचू इत्येतौप्रत्ययौभवतः यथासंख्येनपा
कमूलयोरभिधेययोः पीलूनांपाकःपीलुकुणः कर्कन्धुकुणः कर्णादिभ्यःक
र्णस्यमूलंकर्णजाहम् अक्षिजाहम् पीलुकर्कन्धुशमीकरीरकुवलबदरअश्व

ग्रं॰
काप्र॰
३५

स्यावादिरपील्वादिकर्णादिगणाविनावमावकेशपादगुल्फभ्रूशृंगाउष्ठपृष्ठ पक्षा
त्तिः ॥ तस्येत्येव पक्षशब्दात्षष्ठीसमर्थान्मूलेभिधेये तिशब्दः प्रत्ययो भवति मूला
ग्रहणमनुवर्तते न पाकग्रहणम् एकयोगनिर्दिष्टानामप्येकदेशानुवृत्ति
र्भवति पक्षस्य मूलं पक्षतिः तेन वित्तश्चुञ्चुप्चणपौ तेन इति तृतीयासम
र्थाद्वित्त इत्येतस्मिन्नर्थे चुञ्चुप् चणप् इत्येतौ प्रत्ययौ भवतः वित्तः तेन प्रतीतो
ज्ञात इत्यर्थः विद्यया वित्तो विद्याचुञ्चुः विद्याचणः केशचुञ्चुः केशचणः विन
ञ्भ्यो नानाञौ न सह विनञ् इत्येताभ्यां यथासंख्यं नानाञौ प्रत्ययौ भवतः वि
ना नाना वेः शालच्छङ्कटचौ विशब्दात् शालच् शङ्कटच् इत्येतौ प्रत्ययौ
भवतः समासायनक्रियावचनादुपसर्गात्स्वार्थे प्रत्ययः विगते शृङ्गे विशाले विशं
कटे तेन गोश्चाङ्गेऽपि विशालो विशङ्कट उच्यते परमार्थतस्तु गणपाठाद्यातेया
घाकर्थं विज्ञुस्या घन्ते नात्र प्रकृतिप्रत्ययार्थयोरभिनिवेष्टव्यम् सम्प्रोदश्च क
टच् सम प्र उत् इत्येतेभ्यः कटच् प्रत्ययो भवति चकारादेशेस्य संकटम् प्रक।

टम् उत्कटम् विकटम् अलाबूतिलोमाभंगाभ्यो रजस्युपसंख्यानम् अलाबूनां
रजोलाबूकटम् तिलकटम् उमाकटम् भंगाकटम् गोष्ठजादयः स्थानादिषु
पशुनामादिभ्यः गवां स्थानम् गोगोष्ठम् महिषीगोष्ठम् संघाते कटच् अवी
नां संघातो विकटः विस्तारे पटच् अविपटः द्वित्वे गोयुगच् उष्ट्रगोयुगम् अश्व
गोयुगम् अश्वयषट्त्वे षड्गवम् हस्तिषड्गवम् विकारस्नेहे तैलच् इंगुदी
तैलम् तिलतैलम् भवने क्षेत्रे शाकटशाकिनौ मूलकशाकटम् इक्षुशाक
टम् मूलशाकिनम् इक्षुशाकिनम् अवात् कुटारच्च अवशब्दात् कुटारः प्रत्य
यो भवति चकारात्कटच्च अवकुटारः अवकटः नते नासिकायाः संज्ञायां टी
टंनाटज्भ्रटचः ॥ अवादित्येव नमनं नतम् नासिकासंबन्धि नते वाच्ये अवशा
ब्दात् टीटच् नाटच् भ्रटच् इत्येते प्रत्यया भवन्ति संज्ञायां विषये नासिकाया न
तम् अवटीटम् अवनाटम् अवभ्रटम् तद्योगान्नासिकापि पुरुषोपि उच्यते
अवटीटः अवनाटः अवभ्रटः इति नेर्बिडज्बिरीसचौ नते नासिकायाः संज्ञायां

ॐ· काप्र· ३३७

मित्यनुवर्त्तते विशाखानाम्निकायान्तनेभिधेयेविट्च विशीसच इत्येतौ प्रत्ययौ
भवतः निविट्च निविशीसच तद्योगात्निविट्नाम्निकानिविशीसाति इदः
पिटश्चकविच नेतिपेवतते नाम्निकायाइतिच विशाखानाम्निकायान्तनेभि
धेयेइनन पिटच इत्येतौ प्रत्ययौ भवतः तत्सन्नियोगेन च निशाखस्य यथासं
ख्यं विकारे इत्येतावादेशौ भवतः विकितः विपटः ककारः प्रत्ययो वक्तव्यः
विक्तृ प्रक्षयादेशः विक्तः तथावोक्तं इनः पिटः कारिक विविक पुवक्तव्या
इति क्लिन्नस्य चिल्लिपिल्लश्चास्य चक्षुषी क्लिन्नस्य चिल्लपिल्ल इत्येतावादेशौ भव
तः लः च प्रत्ययः अस्य चक्षुषी इत्यस्मिन्नर्थे क्लिन्ने अस्य चक्षुषी दिल्लः पिल्लः चु
लादेशो वक्तव्यः चुल्लः अस्येत्यनेनार्थः चक्षुषोरेवाभिधाने प्रत्ययइष्यते क्लि
न्ने चक्षुषी चिल्ले पिल्ले चुल्ले तद्योगात् तपुरुषस्तथावद्भूते उपाधिभ्यां त्यकन्ना
सन्नारूढयोः ॥ उपाधि इत्येताभ्यां यथासंख्यमासन्नारूढयोरर्थयोः वर्त्तमाना
भ्यां स्वार्थे त्यकन्प्रत्ययो भवति मत्ताधिकारात्स्वार्थिपि यन्तु विषयमासन्नारूढं दक्षयेते

पर्वतस्यास्यन्ते उपमकान्तस्यैवानुक्रम अपि तत्कापत्रयस्याकादिति चेदुच्य-
मत्र न भवति संज्ञापिकाग्रहणादेव कर्मणि यद्धोटच् निर्द्देशादेव समर्थविभ-
क्तिः कर्मण्युपपदात्समर्थात् कृदन्तात्स्मिन्नर्थे ण्वुल् प्रत्ययो भवति यदन्त इति
यदः कर्मणि यद्धटने कर्मटः पुरुषः तदस्य संजातं तारकादिभ्य इतच् तदिति प्र-
थमासमर्थात्तारकादिभ्योऽस्येतिषष्ठ्यर्थे इतच् प्रत्ययो भवति संजातग्रहणं
प्रकृतिविशेषणं तारकाः संजाता अस्य तारकितं नभः पुष्पितो वृक्षः तारा-
कादि संज्ञाना पुष्प कण्टक ऋजीक मूत्र निष्क्रम पुरीष उच्चार विचार प्रचार कुड्म-
ल मुकुल स्मल कुसुम स्तवक किसलय वेग निद्रा तंद्रा बुभुक्षा पिपासा श्र-
द्धा अभ्र रोग अंगार वर्णक मूत्र द्रोह हर्ष उत्कण्ठा गल भर व्याधि पत्र गर्भ-
दर्पादि प्रमाणे द्वयसज्दघ्नञ्मात्रचः तदस्येत्यनुवर्त्तते तदिति प्रथमासमर्था-
दस्येति षष्ठ्यर्थे द्वयसच् दघ्नच् मात्रच् इत्येते प्रत्यया भवन्ति यत्तत्प्रथमासम-
र्थं प्रमाणं चेत्तद्भवति ऊरुप्रमाणमस्य ऊरुद्वयसम् ऊरुदघ्नम् ऊरुमात्रम् जा-

ॐ
काश्·
३३२

ऊरुद्वयसम् जानुदघ्नम् जानुमात्रम् प्रथमश्च द्वितीयश्चोर्ध्वमाने मतौ मम र्थेक
द्वयसमुदकम् ऊरुदघ्नमुदकम् मात्रः पुनरविशेषेण प्रस्थमात्रमित्यपि भवति
प्रमाणे लक्षः प्रमाणशास्त्रीय प्रसिद्धास्तेभ्यः प्रत्ययस्सल्लभ्यभवति शमः प्रमाण
मस्य शमः द्विशमः वितस्तिः द्विगोत्रिलम् होयाशे प्रमाणमस्य द्विशमः त्रिश
मः द्विवितस्तिः त्रिवितस्तिः वितस्यग्रहणे किम् मघायेश्रविणवस्यति तत्रा
पि द्विगोर्लुगेव यथा स्यात् डट्स्तोमे वक्तव्यः पंचदशः स्तोमः सप्तदशः पंचदा
मीराविः शन्शतोर्डिनिर्वक्तव्यः त्रिंशिनो मासाः पंचदशिनोर्द्धमासाः विंशतेर
श्चेति वक्तव्यम् विंशिनोऽङ्गिरसः प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मा
त्रच् वक्तव्यः शमात्रम् दिष्टिमात्रम् प्रस्थमात्रम् ऊरुवमात्रम् पंचमात्राः दश
त्राः वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम् तावदेव तावः स्वयसम् यावदेव यावः
स्वयसम् यावन्मात्रम् पुरुषहस्तिभ्यामण्च तदस्येत्यनुवर्तते प्रमाण इति च
पुरुषहस्तिशब्दाभ्यां प्रथमासमर्थाभ्यां प्रमाणोपाधिकाभ्यामस्येति प्रत्यये पुरु

त्ययो भवति वकाराद्द्वयसज्जादयश्च पुरुषः प्रमाणमस्य पौरुषम् पुरुषद्व-
यसम् पुरुषदघ्नम् पुरुषमात्रम् हास्तिनम् हस्तिद्वयसम् हस्तिदघ्नम्
हस्तिमात्रम् द्विगोर्नित्यं लुक् द्विपुरुषमुदकम् त्रिपुरुषम् द्विहस्ति।
त्रिहस्ति द्विपुरुषी गंगा त्रिपुरुषी द्विहस्तिनी त्रिहस्तिनी यत्तदेतेभ्यः परि-
माणे वतुप् तदस्येत्येव यत्तदेतेभ्यः प्रथमासमर्थेभ्यः परिमाणोपाधिके-
भ्यः अस्येति षष्ठ्यर्थे वतुप्प्रत्ययो भवति यत्परिमाणमस्य यावत् तावा-
न् एतावान् प्रमाणे इति वर्त्तमाने पुनः परिमाणग्रहणं प्रमाणपरिमाणयो-
र्भेदार्थं डावतावर्थवैशेष्यान्निर्देशः पृथग्कृते मात्राद्यप्रतिघाताय भाव-
सिद्धश्च डावतोः वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्
न त्वावानन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते त्वावतः पुरूवसो यज्ञं वि-
प्रस्य मावतः किमिदंभ्यां वो घः किमिदंभ्यां तत्प्रत्ययवतुपो वकारस्य घ-
कारादेशो भवति कियान् इयान् एतदेव वादेशो विधानेनाप्येके किमिदं

ॐ· ण्यो वर्त्तते प्रत्ययो भवति इति योगविभागेन वा वतुपं विधाय घो विधीयते ॥
काश· किमः संख्यापरिमाणे डति च संख्यायाः परिमाणं संख्यापरिमाणं संख्यापरि
३३३ च्छेद इत्यर्थः संख्यापरिच्छेदे वर्त्तमानात् किमः प्रथमसमर्थादस्येति षष्ठ्यर्थे ड
तिः प्रत्ययो भवति चकाराद्वतुप्च तस्य च वकारस्य घकारः पृच्छ्यमानसंख्याप
रिच्छेदोपाधिकायां संख्यायां वर्त्तमानात् किमः प्रत्ययो विधीयते का संख्या
एषां ब्राह्मणानां कति ब्राह्मणाः कियन्तः ब्राह्मणाः अथवा संख्याया एव परि
माणात्मिका परिच्छेदोपाधिका गृह्यते का संख्या परिमाणमेषां ब्राह्मणा
नामिति ननु च संख्या परिमाणात्मिकैकपरिच्छेदस्वभावा सा किं परिमाण
ग्रहणेन विशेष्यते यत्र परिच्छेदकत्वेन विवक्ष्यते तत्र माभूत् हेयपरि
च्छेदो नास्ति कथमेषां संख्या दशानामिति संख्याया अवयवे तयप् तद
स्मिन्नेव संख्याया अवयवे वर्त्तमानाया अस्येति षष्ठ्यर्थे तयप् प्रत्ययो भवति
अवयवा अवयविनः संबन्धिन इति सामर्थ्यादवयवी अन्यपदार्थो गृह्यते पं

वयवतयवाश्चस्यपंचतम् दशातयम् तत्तदयीश्चः द्वित्रिभ्यांतयस्यायज्वा पूर्वे
णविहितस्तेयप् तस्माद्द्वित्रिभ्यांपरस्यवाअयजादेशोभवति द्वयम् त्रयम् द्वि
तयम् त्रितयम् तयःग्रहणंस्थानिनिर्देशार्थम् अन्यथाप्रत्ययान्तरमतिस्यम्
यन्विज्ञायेते चकारःस्वरार्थः उभादुदात्तोनित्यम् उभशब्दात्परस्यतयपोनि
त्यमयजादेशोभवति सचोदात्तःवचनसामर्थ्यादेवउदात्तत्वंविज्ञायते उभ
शब्दोयदिलौकिकोभवेत्ततःपूर्वेणविहितस्यतयपआदेशविधानम् अथ
तस्मात्ततोयोगविभागेनतयपंविधायतस्यनित्यमयजादेशोविधीयते उ
भयोमणिः उभयदेवमनुष्याः तदस्मिन्नधिकमितिदशान्ताड्डः तदितिप्रथ
मासमर्थात्दशान्तात्प्रातिपदिकादस्मिन्नितिसप्तम्यर्थेडप्रत्ययोभवति यत्तत्प्र
थमासमर्थमधिकंचेत्तद्भवति इतिकरणस्ततश्चेद्विवक्षाएकादशअधि
कास्मिन्शतेएकादशंशतम् एकादशंसहस्रम् द्वादशम् त्रयोदशम् दशा
न्तादितिकिम् पंचअधिकाअस्मिन्शते अन्तग्रहणंकिम् दशअधिकाअस्मि

ॐ· काप्र· २३५

शतेषु प्रत्ययार्थेन समानजातीयेषु क्रमस्थितेषु प्रत्ययद्वयाने एकादशकार्षाप-
णाश्रयिकाश्रमिन्कार्षापणशते एकादशंकार्षापणशतमिति शतसहस्रयो-
स्त्वध्याने दृष्टन्तनभवति एकादशश्रयिकाश्रंस्यात्रिंशतीति इतिकारणेविवक्षा-
याः ततइदं सर्वं लभ्यते कथमेकादशंशतसहस्रमिति शतानां सहस्रं सह-
स्राणांवाशतमिति शतसहस्रमित्युच्यते तत्र शतसहस्रयोरित्येवसिद्धम्॥
श्रयिके समानजातीविशेषशतसहस्रयोः यस्य संख्यातदाधिकेऽक्रान्तेव्योम-
तोसम शतेतत्विंशतेश्च तदस्मिन्नधिकमितिवर्तते इत्येतिवशदन्तान्याति
शतिपदिकादिंशतिशब्दाच्च उत्पन्नयोभवति तदस्मिन्नधिकमित्यस्मिन्नर्थे
त्रिंशदधिकाश्रस्मिन्शते त्रिंशंशतम् चत्वारिंशंशतम् विंशंशतम् सङ्ख्या-
ड्गिंलगुहंणाश्रयग्रहणीयुक्तास्मान्नदादिदंर्ष्यधिकार्थम् एकत्रिंशंशतम् एक
चत्वारिंशंशतम् संख्याग्रहणाच्चकर्तव्यमिदमाभूत् गोत्रिंशदधिकाश्रस्मि
तोशतेइतित्रिंशतेशतदंनादयोनिवर्त्तत्वाम् एकविंशतिशतम् संख्याग्रह-

ण्यं कर्त्तव्यमिह मा भूत्‌ गोविंशतिर्गोयिकाग्रस्मि नो विंशतेरिति संख्यायाग्
ुणस्य निमाने मयट्‌ तदस्येत्यनुवर्त्तते वर्त्तते तदस्य संजातमित्यादितिश्रष्ठय
समर्थात्संख्यावाचिनः प्रातिपदिकात्स्येतिषष्ठीसमर्थान्मयट्प्रत्ययो भवति य
त्तत्षष्ठीसमर्थं गुणस्य चेत्तन्निमाने वर्त्तते गुणो भागः निमानं मूल्यं गुणे
येन निमूल्यते मूल्यभूतेन सोपि सामर्थ्याद्भाग एव विज्ञायते यवानां द्वौ भा
गौ निमानमस्य उदश्विद्भागस्य द्विमयमुदश्विद्यवानां त्रिमयम् चतुर्मय
म् भागेपि तु विधीयमानः प्रत्ययः प्राधान्येन भागवन्तमाचष्टे तेन सामानाधि
करण्यं भवति द्विमयमुदश्विदिति गुणस्यैकत्वं विवक्षितम् तेनेह न भवा
ति द्वौ यवानां त्रय उदश्वित इति भूयसः संख्यावाचिकायाः संख्यायाः प्रत्यय इष्यते
इह न भवति एको भागो निमानमस्येति भूयस इति च प्रकृत्यर्थविशेषणमुपादीय
मानं विवक्षितं बहुत्वमतन्त्रम् तेनार्द्धशब्दादपि भवति गुणशब्दः समवा
यवचनस्तेनेह न भवति द्वौ यवानां मध्याव उदश्वित इति निमेये चापि दृश्यते

ॐ
काप्र.
३३५

निमेये वर्त्तमानायाः संख्याया निमाने प्रत्ययो दृश्यते उदश्वितो द्वौ भागौ निमे
यमस्य यवभागस्याद्विमयाः यवाः उदश्वितस्त्रिमयाः यवमेयाः गुणस्येति किम्
द्वौ व्रीहियवौ निमानमस्योदश्वितः निमान इति किम् द्वौ गुणौ व्रीहीरस्य एकस्ते
लस्य द्विगुणेन तैलं पश्यते व्रीहिणा मा भूत् तस्य पूरणे डट् तस्येति षष्ठी
समर्थात् संख्यावाचिनः प्रातिपदिकात् पूरणे इत्यस्मिन्नर्थे डट् प्रत्ययो भवति पू
र्यते तेन इति पूरणः येन संख्या संख्याने पूर्यते संपद्यते स तस्य पूरणः एकाद
शानां पूरणः एकादशः द्वादशः यस्मिन्नुपजाते संख्या संपद्यते स प्रत्यया
र्थः इह न भवति पंचानामुष्ट्रिकाणां पूरणो घटः इति नान्तादसंख्यादेर्मट्
तदित्यनुवर्तते नकारान्तान्नान्तादसंख्यादेः संख्यावाचिनः प्रातिपदिकात्तस्य
डटो मडागमो भवति नान्तादिति पंचमी डटस्त्वागमसंबन्धे षष्ठीं प्रकल्पयति
पंचानां पूरणः पंचमः सप्तमः अष्टमः नान्तादिति किम् विंशतेः पूरणः विंशः
असंख्यादेरिति किम् एकादशानां पूरणः एकादशः षट्वक्षन्तसि नान्ना

दमेख्यादेः परस्य डटस्यान्तस्मिन्विषये मडागमो भवति चकारान्मडपि पदे
भवन्तायेने पंचमयानि पंचथानि भवन्ति सप्तथः सप्तमःपि पंचममिदि
यस्यापाक्रामत षट्कतिकतिपयचतुरां थुक् इति निवर्तते नदितिसम
स्यादि परिणामस्येति षट् कतिकतिपयचतुर् इत्येतेषां डटि परतः थुगागमो
भवति कतिपयशब्दोन संख्यानस्मात्पादेव तापकात् डट्प्रत्ययो भवति
षण्णां पूरणः षष्ठः कतिथः कतिपयथः चतुर्थः चतुरश्छयतावाद्यक्षरलोप
श्च तुरीयः तुर्यः तुरीयः बहुपूगगणसंघस्य तिथुक् बहुपूगगण
संघानां डटि परतस्तिथुगागमो भवति पूगसंघशब्दयोरसंख्यावाचित्वादिदमेव
ज्ञापकं डटो भावस्य बहूनां पूरणो बहुतिथः पूगतिथः संघतिथः गणतिथः
वतोरिथुक् इति वतोः डटि परत इथुगागमो भवति वत्वन्तस्य संख्या
त्वाद्वैवातिदिष्टितत्वात्स्मिन्नयमागमो विधीयते यावतः पूरणो यावतिथः
तावतिथः द्वेस्तीयः द्विशब्दात्तीयप्रत्ययो भवति तस्य पूरणेऽस्मिन्विषये ।

ॐ· काप्र·

ये डटोपवादः द्वयोः पूरणः द्वितीयः त्रेः संप्रसारणंच त्रिशब्दात्तीयप्रत्ययो भ
वति तस्यपूरणइत्यस्मिन्विषये डटोपवादः तत्सन्नियोगेनत्रेः संप्रसारणंभवति
त्रयाणांपूरणः तृतीयः हलइति संप्रसारणदीर्घो[न]भवति अणइति तत्रवर्त्तते
पूर्वेणानकोगणावग्रहणाम् विंशत्यादिभ्यस्तमडन्यतरस्याम् विंशत्यादिभ्यः प
रस्यडटोन्यतरस्यांतमडागमोभवति पूरणाधिकाराद्डट्प्रत्ययआगमीवि
ज्ञायते विंशतेः पूरणः विंशतितमः विंशः एकविंशतितमः एकविंशः त्रिंशत्त
मः त्रिंशः एकत्रिंशत्तमः एकत्रिंशः विंशत्यादयोलौकिकाः संख्याशब्दागृह्यन्ते
नपंक्त्यादिसूत्रसन्निविष्टाः तद्ग्रहणेह्येकविंशतिप्रभृतिभ्योनस्यात् ग्रहण
वताप्रातिपदिकेनतदन्तविधिप्रतिषेधात् एवंचषष्ट्यादेश्चासंख्यादेरिति
पर्युदासोयुज्यते नित्यंशतादिमासार्धमाससंवत्सराच्च शतादयः संख्याश
ब्दास्तेभ्यःशतादिभ्यः मासार्धमाससंवत्सरेभ्यश्च परस्यडटोनित्यंतमडागमोभ
वति मासादयः संख्याशब्दानभवन्ति तेभ्योस्मादेवज्ञापकात् डट्प्रत्ययोविधी

यः शतस्य पूरणः शततमः सहस्रतमः लक्षतमः मासस्य पूरणो मासतमः अर्धमा
सतमः एवं संवत्सरतमः षष्ट्यादेरिति वक्ष्यमाणेन सिद्धे शतादिग्रहणमसंख्याद्य
र्थम् एकशततमः एकसहस्रतम इति ॥ षष्ट्यादेश्चासंख्यादेः ॥ षष्ट्यादेः संख्याश
ब्दादेः परस्य डटो नित्यं तमडागमो भवति विंशत्यादिभ्य इति विकल्पे प्राप्ते नित्यार्थं
वचनम् संख्यादेस्तु विकल्प एव भवति षष्टेः पूरणः षष्टितमः सप्ततितमः अशी
तितमः नवतितमः असंख्यादेरिति किम् एकषष्टः एकषष्टितमः एकसप्ततः ए
कसप्ततितमः मतौ छः सूक्तसाम्नोः मताविति मत्वर्थे प्रत्ययेन समर्थविभक्ति
प्रकृतिविशेषणं प्रत्ययार्थश्चेति सर्वमाक्षिप्यते अच्छावाकशब्दोऽस्मिन्नस्त्यच्छावा
कीयं सूक्तम् मैत्रावरुणीयम् यज्ञायज्ञीयं साम वारवन्तीयम् अनुकरणशब्दाः
स्वरूपमात्रप्रधानाः प्रत्ययमुत्पादयन्ति तेनानेकपदादपि सिद्धम् अस्यवामी
यम् कयाशुभीयम् अध्यायानुवाकयोर्लुक् मतावित्येव मत्वर्थे उत्पन्नस्य छ
प्रत्ययस्य लुग्भवत्यध्यायानुवाकयोरभिधेययोः कथं पुनरध्यायानुवाकयोः प्रत

ॐ॰
काप्र॰
३३

यः इदमेवलक्षवचनेनापकेन द्विप्राणमय्यविकल्पेन वा परिलगिष्यते गर्दभाण्डशब्दो-
स्मिन्नस्ति गर्दभाण्डः अध्यायोनुवाको वा गर्दभाण्डीयः दीर्घजीवितः दीर्घजीविती-
यः पलितस्तम्भः पलितस्तम्भीयः विमुक्तादिभ्योण् मतावित्येव अध्यायानुवा-
कयोरित्येव विमुक्तादिभ्यः प्रातिपदिकेभ्यः मत्वर्थेण्प्रत्ययो भवति अध्यायानु-
वाकयोरभिधेययोः विमुक्तशब्दोस्मिन्नस्तीति वैमुक्तः अध्यायोनुवाको वा दैवासुरः
राक्षोसुरः विमुक्त देवासुर रक्षोसुर उपसद वासव मरुत्पत्नीवन्त् वसुमन्त् दशा-
र्हवयस् हविर्धान महित्री सोमापूषन् इडा अग्नाविष्णु वृत्रहन्ति गोषदादिभ्यो वु-
न् मतावित्येव अध्यायानुवाकयोरित्येव गोषदादिभ्यः प्रातिपदिकेभ्यः मत्वर्थे
वुन्प्रत्ययो भवति अध्यायानुवाकयोरभिधेययोः गोषदशब्दोस्मिन्नस्ति गोषदकः
अध्यायोनुवाको वा इषेत्वकः मातरिश्वकः गोषद इषेत्वा मातरिश्वन् देवस्यत्वा देवी-
रापः कृष्णोस्याखरेष्ठो देवीर्धियं रक्षोहणा युञ्जान प्रभूत प्रतूर्त कृशानु तत्र कुशलः पथः
वुनित्येव तत्रेति सप्तमीसमर्थात्पथिशब्दात्कुशल इत्येतस्मिन्नर्थे वुन्प्रत्ययो भव-

ति पथि कुशलः पथकः आकर्षादिभ्यः कन् तेनेत्येव कुशल इत्येव आकर्षा-
दिभ्यः सप्तमीसमर्थेभ्यः कुशल इत्यस्मिन्नर्थे कन्प्रत्ययो भवति आकर्षकः त्स-
रुकः आकर्षत्सरुपिशाचपिचंड अशनि अश्मन् निचयजयअयनयपादह्ला
दह्लादगशकुनि धनहिरण्यात्कामे तेनेत्येव कन्नित्येव धनहिरण्यशब्दाभ्यां स-
प्तमीसमर्थाभ्यां काम इत्यस्मिन्नर्थे कन्प्रत्ययो भवति कामः इच्छा अभिलाषः धने
कामः धनको देवदत्तस्य हिरण्यको देवदत्तस्य स्वाङ्गेभ्यः प्रसिते तेनेत्येव कन्निति
व स्वाङ्गवाचिभ्यः शब्देभ्यस्तेनेति सप्तमीसमर्थेभ्यः प्रसित इत्यस्मिन्नर्थे कन्प्रत्ययो भ-
वति प्रसितः प्रसक्तस्तत्पर इत्यर्थः केशेषु प्रसितः केशकः दन्तकः केशरचनायां प्र-
सक्त उच्यते बहुवचनं स्वाङ्गसमुदायादपि यथा स्यात् दन्तोष्ठकः केशनायकः ॥
उदराट्ठगाद्यूने तेनेत्येव प्रसित इत्येव उदरशब्दात्सप्तमीसमर्थात्प्रसित इत्यस्मिन्न-
र्थे ठक्प्रत्ययो भवति आद्यून इति प्रत्ययार्थविशेषणम् आद्यूनः अविजिगीषुः उदरे वि-
शनीभावेन यो बुभुक्षयात्यर्थं पीड्यते उदरे प्रसितः आद्यूनः औदरिकः आद्यून इति ।

किम उदरकः सस्येनपरिजातः कन्प्रत्यय इष्यते सस्यशब्दान्निर्देशादेवतृती
यासमर्थात्परिजातइत्येतस्मिन्नर्थेकन्प्रत्ययोभवति सस्यशब्दोयंगुणवाचीपरितः
सर्वतोभावेनयोगुणैः संबद्धोजायते किंचिदपिवैगुण्यंयस्यनास्तितस्यदमभि
धानम सस्येनपरिजातः सस्यकोवत्सः सस्यकः शालिः सस्यकः साधुः सस्यको
मणिः आकारशुद्धइत्यर्थः अंशंहारी अंशशब्दान्निर्देशादेवद्वितीयासमर्था
द्धारीत्येतस्मिन्नर्थेकन्प्रत्ययोभवति अंशंहारीअंशकोदायादः अंशकः पुत्रः हा
रीत्यावश्यकेणिनिः नचात्रनिषष्ठीप्रतिषेधात्कर्मणिद्वितीयैवभवति तन्त्रादचि
रापहृते तन्त्रशब्दात्पञ्चमीसमर्थादचिरापहृतइत्येतस्मिन्नर्थेकन्प्रत्ययोभवति
अचिरापहृतः श्लोककाव्यापनीतइत्यर्थः तन्त्रादचिरापहृतस्तन्त्रकः पटः तन्त्रा
कः प्रावारः प्रत्यग्रोनवउच्यते ब्राह्मणकोष्णिकेसंज्ञायाम ब्राह्मणकउष्णिको
शब्दौकन्प्रत्ययान्तौनिपात्येते संज्ञायांविषये ब्राह्मणकोदेशः उष्णिकायवागूः
यत्रायुधजीविनोब्राह्मणास्सब्राह्मणकइत्यंसंज्ञाअल्पान्नावयवागूरुष्णि

केनचिद्येति शीतोष्णाभ्यां कारिणि शीतोष्णशब्दाभ्यां कारिण्यभिधेये कन्प्रत्ययो
भवति क्रियाविशेषणाद्द्वितीयासमर्थादयं प्रत्ययः शीतं करोति शीतकः अलसो
ऽन्य इत्यर्थः उष्णं करोति उष्णकः शीघ्रकारी दक्ष इत्यर्थः अधिकं अधिकमिति
अधिको द्रोणः खार्याः अधिका खारी द्रोणेन कन्नेतिकमेणिनाव्याप्यादृषशब्दा
कन्प्रत्ययो निपात्यते कामिता इत्यस्मिन्नर्थे अभेः पदे दीर्घत्वं निपात्यते अनु
कामयेत अनुकः अभिकामयते अभिकः अभीकः पार्श्वेनान्विच्छति पार्श्वशब्दा
द्द्वितीयासमर्थादन्विच्छतीति पार्श्वकः कौशलिको जालिक उच्यते अयःशू
लदण्डाजिनाभ्यां ठक्ठञौ अन्विच्छतीत्येव अयःशूलदण्डाजिनशब्दाभ्यां तृतीया
समर्थाभ्यामन्विच्छतीत्यस्मिन्नर्थे यथासंख्यं ठक्ठञौ प्रत्ययौ भवतः तीक्ष्ण उपा
योऽयःशूलम् तेनान्विच्छत्यायःशूलिकः दाम्भिक इत्यर्थः दण्डाजिनेन तेना
न्विच्छति दाण्डाजिनिकः दाम्भिक इत्यर्थः तावतिथं ग्रहणमिति लुग्वा तावतः
पूरणान्तात्तावतिथः ग्रहणेनेति ग्रहणम् प्रकृतिविशेषणं चैतत् पूरणप्रत्य

ॐ.
काश.
३३५

यान्यान्यानि पादिकादुद्धरणानि पाणिकान्तार्थे कन्प्रत्ययो भवति पूरणप्रत्ययस्य
च बालकाश्च भवति द्विकेन रूपेण ग्रन्थं गृह्णाति द्वितीयकेन गृह्णाति द्विकं द्वि
तीयं त्रिकं तृतीयकम् चतुर्थं चतुर्थकम् चतुष्कम् तावतिथेन गृह्णातीति
कन्लुक्च पूरणप्रत्ययस्य चानित्ये लुक् षष्ठेन रूपेण ग्रन्थं गृह्णाति षट्को।
देवदत्तः पंचकः चतुष्कः इति करणाविवक्षायां तेन ग्रन्थविषये ग्रहणं।
विज्ञायते ग्रन्थविषयम् मयूरयां ग्रामण्यः म इति प्रथमासमर्थादेषामिति षष्ठ्य
र्थे कन्प्रत्ययो भवति ग्रामणीः प्रधानो मुख्य इत्यर्थः देवदत्तो ग्रामणीरेषां देवद
त्तकाः यज्ञदत्तकाः ग्रामणीरिति किम् देवदत्तः शत्रुरेषाम् शृंखलमस्य बंधनं क
रभे शृंखलशब्दात्प्रथमासमर्थादस्येति षष्ठ्यर्थे कन्प्रत्ययो भवति यत्तत्प्रथमा
समर्थं बन्धनं चेत्तद्भवति यत्तदस्येति निर्दिष्टं करभश्चेत्स भवति शृंखलमस्य
बन्धनं करभस्य शृंखलकः करभः उष्ट्राणां बालकाः करभाः तेषां काष्ठमयं
पाशाकं पादे बध्यते तदुच्यते शृंखलमिति यद्यपि शृंखलादिकमपि तत्रापि

तथापिशृंखलमस्वतंत्रीकरणेभवति सायतमितिबन्धनंतनइष्यते उक्तइति
निपात्यते उन्मनाश्चेत्भवति उद्गतंमनोयस्यसउन्मनाः उत्कण्ठासाधनाक्रि
यावचनान्नइह निकन्प्रत्ययोनिपात्यते उत्कोदेवदत्तः उत्कःप्रवासीउत्सुकइत्य
र्थः कालप्रयोजनाद्रोगे प्रथमैकवचनासमर्थेविभक्तिः कालात्प्रयोजनात् चयथा
यायोगंसमर्थविभक्तियुक्तात्रोगाभिधेयेकन्प्रत्ययोभवति कालोदिवसादिः
प्रयोजनंकारणम् रोगस्यफलंवाद्वितीयेह्निभवोद्वितीयकोज्वरः तृतीयकः च
तुर्थकः प्रयोजनात् विषपुष्पैर्जनितोविषपुष्पकोज्वरः काशपुष्पकः उष्णका
र्योमस्यासउष्णकोज्वरः शीतकोज्वरः उत्तरसूत्रात्संज्ञाग्रहणमपकृष्यते तेनायंप्र
कारनियमः सर्वोपलभ्यते तदस्मिन्नन्नंप्रायेसंज्ञायाम् तदितिप्रथमासमर्था
दस्मिन्निति सप्तम्यर्थेकन्प्रत्ययोभवति यत्तत्प्रथमासमर्थमन्नंचेत्प्रायविषयं
भवति प्रायोबाहुल्यम् संज्ञाग्रहणान्तदन्तोपाधिः गुडापूपाःप्रायेणान्नमस्यांपौ
र्णमास्यांगुडापूपिकातिलापूपिकाकुल्माषिकात्रिपुटिका पौर्णमासीवटकेभ्यश्च।

ॐ काश २५

न्निः वक्तव्यः वटकिनी कल्माषाद्यम् कल्माषशब्दादस्मन्प्रत्ययो भवति तदस्मिन्नन्नं

प्राये संज्ञायामित्यस्मिन्विषये सकारो वृद्धिश्चार्थः कल्माषाः प्रायेणान्नमस्यां पौर्णमास्यां सा

पौर्णमासी कौल्माषी श्रोत्रियंश्छन्दोऽधीते श्रोत्रियन्निति निपात्यते छन्दोऽधीत इत्य

स्मिन्नर्थे नकारः षष्ठ्यर्थः श्रोत्रियो वा छान्दसः श्रोत्रियाश्छन्दोऽधीत इति वाक्यार्थे पदवचनम्

छन्दसो वा श्रोत्रभावः तदधीत इति घञ्प्रत्ययः छन्दोऽधीते ब्रोदमः वाग्रहणमनुवर्तते।

तावविनिर्देशग्रहणमिति लोपवति श्राद्धमनेन भुक्तमिनिठनौ श्राद्धमिति प्रकृतिः अने।

नेति प्रत्ययार्थः भुक्तमिति प्रकृतिविशेषणाम् श्राद्धशब्दात्कर्मोपाधिकादनेनेति

तृतीयार्थे इनिठनौ प्रत्ययौ भवतः श्राद्धशब्दः कर्मनामधेयम् अन्यायेन तद्विवर्तते

प्रत्ययमुत्पादयति श्राद्धं भुक्तमनेन श्राद्धी श्राद्धिकः इनिठनोः समानकालग्रहणा

म् अद्य भुक्ते श्राद्धेऽस्य श्राद्ध इति मा भूत् पूर्वादिभिः अनेनेति प्रत्ययार्थः कर्ता अनुवर्त

तेन च क्रियासंनिपातकर्ता संभवतीति यो कोऽपि क्रियासम्बन्धस्य प्रत्ययो विधेयः पू

र्वाह्णादनेनेत्यस्मिन्नर्थे इनिप्रत्ययो भवति पूर्वं गतमनेन भुक्तं पीतं वा पूर्वी पूर्वि

ते पूर्वादिनिः सपूर्वाच्च विद्यमानं पूर्वं यस्मिन्निति सपूर्वं प्रातिपदिकम् तस्मात्पूर्वशब्दा
न्तादेतद्विधिः सपूर्वात्प्रातिपदिकात्पूर्वशब्दान्तादनेनेत्यस्मिन्नर्थे इनिप्रत्ययो भवति ॥
कृतं पूर्वमनेन कृतपूर्वी कटम् भुक्तपूर्वी ओदनम् सप्तम्येनिसमासे कृतमानादिनः क्रिय
ते योगद्वयेन चानेन पूर्वादिनिः सपूर्वाच्चेति परिभाषाद्वयं ज्ञाप्यते व्यपदेशिवद्भावेप्रा
तिपदिकेन ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न भवतीति इष्टादिभ्यः श्चनेनेत्य
र्थे इष्टादिभ्यः प्रातिपदिकेभ्योऽनेनेत्यस्मिन्नर्थे इनिप्रत्ययो भवति इष्टमनेन इष्टी यज्ञेषु
ती आह इत्यस्य विषयस्य कर्मणीति सप्तम्युपसंख्यायते इष्ट पूर्त उपसादित निगदित प
रिवादितः निकथित निपठित संकलित परिकल्पित संरक्षित परिरक्षित अर्चित
गणित अवकीर्ण आयुक्त निरहीत आम्नात श्रुत श्मेवित अवधारित अवकल्पि
त निराकृत उपाकृत उपकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित छन्द
सि परिपन्थिपरिपरिणौ पर्यवस्थातरि परिपन्थिन् परिपरिन् इत्येतौ शब्दौ छन्दसि वि
षये निपात्येते पर्यवस्थातरि वाच्ये पर्यवस्थाता प्रतिपन्थिः सपत्न उच्यते मा त्वा परिप

श्री

ॐ. काशि. ३ ९१

थिनोविदन् मात्वापरिपरिणोविदन् अनुपद्यन्वेष्टा अनुपदीतिनिपात्यते अन्वेष्टा
चेद्भवति अनुपदीगवाम् अनुपदीउष्ट्राणाम् साक्षाद्द्रष्टरिसंज्ञायाम् साक्षाच्छब्दोव्य
यम् तस्मादिनिप्रत्ययोभवति द्रष्टरिवाच्येसंज्ञाग्रहणम् अभिधेयनियमार्थम्
साक्षाद्द्रष्टासाक्षीसाक्षिणौसाक्षिणः संज्ञाग्रहणादुपद्रष्टैवोच्यतेनदाताग्रहीतावा
क्षेत्रियच्परक्षेत्रेचिकित्स्यः क्षेत्रियजितिनिपात्यते परक्षेत्रेचिकित्स्यइत्यस्मिन्नर्थे
वाक्यार्थेपदवचनम् परक्षेत्राद्वाचिकित्स्यइतिपरलोपोघःप्रत्ययश्चनिपात्यते
परक्षेत्रेचिकित्स्यः क्षेत्रियोव्याधिः क्षेत्रियंकुष्ठम् परक्षेत्रंजन्मान्तरशरीरम् तत्रचिकि
त्स्यःक्षेत्रियःअसाध्योप्रत्याख्येयोव्याधिरुच्यते नाम्नतस्यनिवर्तनंइत्यर्थः अथवाक्षे
त्रियंविषम् परक्षेत्रम्परशरीरे सत्क्रमणीयंचिकित्स्यते अथवाक्षेत्रियाणितृणानि
यानिसस्यार्थेक्षेत्रेजातानिक्षेत्रान्तरेचिकित्स्यानिविनाशयितव्यानि अथवाक्षेत्रि
यःपारदारिकःपरदाराःपरक्षेत्रम् तत्रचिकित्स्योनिग्रहीतव्यःसर्वमेवैतत्प्रमाण
म् इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमितिवा इन्द्रियमित्ये

नोदाहृतं शास्त्रे सूत्रं निपात्यते इति शेषाः वचनादीनां करणानाम् तथा च सूत्रान्तरे वृत्ति
यमेदर्शयति इत्युक्तमाहात्म्यषष्ठीसमर्थाल्लिङ्गमित्यस्मिन्नर्थे चः प्रत्ययो भवति इति लि
ङ्गस्यालिङ्गमिलिङ्गयम् इत्युक्तमात्मा स्ववचनादिनाकरणेनानुमीयते नाकर्तृकं करण
मस्तीति । इत्युक्तं दृष्टम् तृतीया समर्थात्तत्त्वयेथः आत्मना दृष्टमित्यर्थः इत्युक्तं दृष्टमात्म
नामेविनम् नः स्वरेणाविज्ञातानां पादार्थ इत्युक्तं दत्तम् आत्मना विषयेभ्यो दत्तम् यथा
यथ्यं ग्रहणायेति करणैः प्रकारार्थः सन्ति मे भवेत्सुत्पादित्वय्यापि कर्तव्या इति
च विषमादिति वा शब्दः प्रत्येकमभिसम्बध्यमानो विकल्पानभ्यां ते मे दर्शयति ॥ त
दस्यास्त्यस्मिन्निति मतुप् तदिति समर्थाद्विभक्तिः अस्यास्मिन्निति प्रत्ययार्थो अस्ती
ति प्रकृतिविशेषणम् इति करणे विवक्षार्थः तदिति प्रथमा समर्थादस्येति षष्ठ्य
र्थे अस्मिन्निति सप्तम्यर्थे च मतुप् प्रत्ययो भवति यत्तु प्रथमा समर्थे चेत्तद्भवति
अस्त्यर्थोपाधिकं चेत्तद्भवतीत्यर्थः इति करणमतस्तद्विवक्षा गावोऽस्य सन्ति गोमा
न्देवदत्तः यवमान् वृक्षा अस्मिन्सन्तीति वृक्षवान् पर्वतः वृक्षवानिति करणे दर्शयति

ॐ.
काश्.
३५२

यमः भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने संसर्गेस्तिविवक्षायां भवन्ति मतुबा
दयः गुणवचनेभ्यो लुग्वक्तव्यः शुक्लो गुणोस्यास्ति शुक्लः पटः कृष्णः पटः पीतः ॥ र
सादिभ्यश्च रसादिभ्यः प्रातिपदिकेभ्यो मतुप्प्रत्ययो भवति तदस्यास्त्यस्मिन्निति विष
ये रसवान् रूपवान् किमर्थमिदमुच्यते न पूर्वेणैव मतुप्सिद्धः रसादिभ्यः पुनर्वच
नमन्यनिवृत्त्यर्थम् अन्ये मत्वर्थीया मा भूवन्निति कथं रूपिणी कन्या रूपिको दारकः
रसिको नट इति प्रायिकमेतद्वचनम् इतिकरणो विवक्षार्थोनुवर्त्तते अथवा गुणा
दित्यनुवर्त्तते तेन ये रसनेन्द्रियादिग्राह्या गुणास्तेषामयं पाठः इह मा भूत् रूपिणी रू
पक इति दर्शनीयता गम्यते रसिको नट इति भावयोगः रसं रूप वर्ण गन्ध स्पर्श शब्द
स्नेहभाव गुणात् एकाचः गुणग्रहणं रसादीनां विशेषणम् प्राणिस्थादातो लजन्य
तरस्याम् प्राणिस्थवाचिनः आकारान्ताल्लच्प्रत्ययो भवति अन्यतरस्यां मतुप् चूडा
लः चूडावान् कर्णिकालः कर्णिकावान् प्राणिस्थादिति किम् शिखावान् प्रदीपः आ
त इति किम् हस्तवान् पादवान् प्राण्यङ्गादिति वक्तव्यम् इह मा भूत् चिकीर्षास्या

sti śirīṣo syāsmin pratyayamate syaiva siddhaścakāraś cūḍālo sīti nirdiṣṭo vānudātto pada-
dāviti viva vitvāyanārthaḥ sidhmādibhyaś ca lajanyatarasyām ity anuvartate sidhmādibhyaḥ
prātipadikebhyo laḥ pratyayo bhavati matvarthe nyatarasyām sidhmalaḥ sidhmavān gaḍulaḥ
gaḍumān anyatarasyām grahaṇena matupsamuccīyate na tu pratyayo vikalpyate tasmād
kārāntebhyaḥ ṭhanitau pratyayau na bhavataḥ sidhma gaḍu maṇi nābhi bīja niṣpāva pāṃsu
hanu saktu māṃsa pārṣṇi dhamanyoḥ dīrghaś ca vāta danta bala lalāṭānām ūṅ ca mati |
jaṭā ghaṭā kalāḥ mahikālaḥ upanāyat vivarcikālaḥ vipādikālaḥ mūrchālaḥ ||
vatsāṃsābhyāṃ kāmabale vatsāṃsaśabdābhyāṃ laḥ pratyayo bhavati matvarthe yathāsaṃkhyaṃ kā-
me bhavati bale ca vatiṃ ca vācye vatsalaḥ premavān iti viṣaye vatsāṃsaśabdau svabhāvāt kāma-
balayor vartamānau iti pratyayam utpādayataḥ na tu vatsārthe premārthe vā vidhīyate vatsa-
laḥ snehavān iti gamyate vatsalaḥ svāmī vatsalaḥ pitā premavalaś ca iti cāpy ucita mo 'ṃsoba-
lavān ucyate na tv aṃsamayam aṃsam api bhavatīti niyamo laj eva bhavati phenād ilac ca phe

ॐ
काप्र
३९२

तथाह्यादिलः प्रत्ययो भवति मतर्थे चकाराल्लश्च प्रत्ययस्यामिति मत्वप्रमश्रा
पार्थेम सर्वत्रैवानुवर्त्तते फेनिलः फेनलः फेनवान् लोमादिपामादिपिच्छादिभ्य
शनेलचः लोमादिभ्यः पामादिभ्यः पिच्छादिभ्यश्च त्रिभ्यो गणेभ्यो यथासंख्यं शन
इलच इत्येते प्रत्यया भवन्ति मतर्थे मतप् च लोमादिभ्यः शो भवति लोमशः लो
मवान् पिच्छादिभ्य इलः प्रत्ययो भवति पिच्छिलः पिच्छवान् उरसिलः उरस्वान्
लोमन् रोमन् बभ्रु हरि कपि मुनि तरु लोमादिः पामन् वामन हेमन् श्लेष्म
न् कद्रु वभ्रु वलिः सामग्रंगकल्याणा शाकी पलाशी देहो हस्तबेच विघ्नगिमन
वपटलो पिञ्छाकृतमन्ये लक्ष्याश्वत्थ पामादिः पिच्छ उरस् ध्रुवका घुक्का जटा घा
टाकालाः सेप वर्णउदक प्रज्ञा पिच्छादिः प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः प्रज्ञाश्रद्धार्चा
वृत्ति इत्येतेभ्यो णप्रत्ययो भवति मतर्थे मतप् समस्च्चीयते प्राज्ञः प्रज्ञावान् श्राद्धः
श्रद्धावान् आर्चः अर्चावान् वार्त्तः वृत्तिवान् तपःसहस्राभ्यां विनीनौ तपःसहस्र
ाभ्यां यथासंख्यं विनीनौ प्रत्ययौ भवतः मतर्थे प्रत्ययार्थयोस्तथ यथासंख्यम्।

वैशेषिकं करणं नेष्यते तपोऽस्यास्तीति विगृह्यते तपस्वी सहस्री सूत्रमेतत्वाद्दन्तना
स्वसिहेप्रत्ययोपुनर्वचनमणण्वाध्यायामाभूत् इति सहस्रात्तकनपिवाध्यते अण्च
तदः सहस्राभ्यामणप्रत्ययो भवति मत्वर्थे तापसः साहस्रः अण्प्रकरणे ज्योत्स्ना
दिभ्य उपसंख्यानम् ज्योत्स्ना विद्यते ज्यौत्स्नः यत्नः तामिस्रः कौंडलः कौतपः वै
सर्पः वैपादिकः सिकताशर्कराभ्यां च सिकताशर्कराशब्दाभ्यामणप्रत्ययो भव
ति मत्वर्थे सैकतो घटः शार्करं मधु अदेशे इहोदाहरणम् देशे लुबिलचौ च
सिकताशर्कराशब्दाभ्यां देशेऽभिधेये लुबिलचौ भवतः चकारादण् च मत्वर्थक
स्य पुनर्लुकि मत्वादीनामत्ययनमस्य विशेषाभावात् सिकतास्तिविद्यन्ते
सिकता सैकतो देशः सिकतिलः सिकतावान् शर्करा देशः शार्करिलः शार्करः
शर्करावान् देश इति किम् सैकतो घटः शार्करं मधु दन्त उन्नत उरच् उन्नतशब्द
णाम प्रकृतिविशेषणम् दन्तशब्दादुन्नतोपाधिकादुरच् प्रत्ययो भवति मत्वर्थे
दन्ता उन्नता अस्य सन्ति दन्तुरः उन्नत इति किम् दन्तवान् ऊषसुषिमुष्कमधो रः

के·
काश्र·
३५४

ऊषसुषिमुष्कमधुशब्देभ्यो रप्रत्ययो भवति मत्वर्थे ऊषरम् सुषिरम् मु
ष्करम् मुष्करः पशुः मधुरो गुड इति करणाविवक्षार्थः सर्वत्रैवाभिधेयनियमं
करोति इह न भवति ऊषोस्मिन् घटे विद्यते मध्वस्मिन् विद्यते इति रप्रकरणात्ख
मुखनगकुञ्जेभ्य उपसंख्यानम् खमस्यास्तीति कण्ठविवरं महत् खरः मुखमस्यास्ति
सर्वस्मिन् वक्तव्ये मुखरः नाखरः कुञ्जावस्य स्तः कुञ्जरः हस्ती हस्तकुञ्जशब्दो नाम्ने न
गपांसुपाण्डुभ्यश्चेति वक्तव्यम् नगरम् पांसुरम् पाण्डुरः कच्छ्वा ह्रस्वत्वं च कच्छुरः
स्वार्थे वा पाण्डुरो वर्णो यथा मेध्या मलादय इति भाष्ये द्युद्रुभ्यां मः ॥ द्युद्रु इत्येताभ्यां
मप्रत्ययो भवति मत्वर्थे द्युमः द्रुमः रश्मिषु द्यादेनो द्रुक्षिषु च मत्र प्रविकल्प्यते ॥
केशाद्वोऽन्यतरस्याम् केशशब्दादन्यतरस्यां वप्रत्ययो भवति मत्वर्थे अनुवर्तनात्प्रकृ
तिमत्त्वन्यतरस्याग्रहणमस्येवमत्र पक्षे सर्वथार्थमतादिष्टक्रम पुनेन तत्र इनिठनौ
प्राप्येते तेन त्वार्थरूप्यं भवति केशवः केशी केशिकः केशवान् इति प्रकरणे
न्येभ्योऽपि दृश्यते इति वक्तव्यम् मणिवः हिरण्यवः बिम्बावः कुररावम् इष्टका

वम् राजीवम् अर्णसोलोपश्च अर्णवः छन्दसीवनिपौवक्तव्यौ वस्मन्त्रस्य रथीर
भून्मुद्गलानी सुमङ्गलीरियंवधूः वनिप् मघवानमीमहे वकारमत्रपोउदाहउद्
दीचमेधारथाभ्यामिरन्निरचौवक्तव्यौ मेधिरः रथिरः गाण्ड्यजगात्संज्ञायाम् गा
ण्ड्यजगशब्दाभ्यांवप्रत्ययोभवति मत्वर्थेसंज्ञायांविषये गाण्डीवंधनुः अजगवंध
नुः ह्रस्वादपिभवति गाण्डिवंधनुरिति तस्मादिमेद्विमाह्रस्वदीर्घयोरुभयथासूत्रे
प्रमाणम् काण्डाण्डादीरन्नीरचौ काण्डाण्डशब्दाभ्यांयथासंख्यमीरन्नीरचौप्रत्ययौभ
वतः काण्डीरः आण्डीरः रजःकृष्यासुतिपरिषदोवलच् रजःप्रभृतिभ्यःप्रातिपदिके
भ्योवलच्प्रत्ययोभवति रजस्वलास्त्री कृषीवलः आसुतीवलः शौण्डिकः प
रिषद्वलोराजा वलेरिति दीर्घत्वम् इतिकरणोविषयनियमार्थः सर्वत्रसंबध्यते ते
नेहनभवति रजोस्मिन्ग्रामेविद्यतेइति वलःप्रकरणेन्येभ्योपिदृश्यतेइतिवक्तव्य
म् भ्रातृवलः पुत्रलः उत्सङ्गवलः दन्तशिखात्संज्ञायाम् दन्तशिखाभ्यां संज्ञायाम्वल :
प्रत्ययोभवति मत्वर्थेसंज्ञायांविषये दन्तवलोहस्ती शिखावलंनगरम् ज्योत्स्ना

ओं. कात्र. ३५५

तमिस्राशृङ्गिणोर्जस्विनूर्जस्वलगोमिन्मलिनमलीमसाः ज्योत्स्नादयः शब्दा मत्वर्थे
निपात्यन्ते संज्ञायां विषये ज्योतिरस्त उपधालोपो नश्च प्रत्ययो निपात्यते ज्योत्स्ना चेद्दृ
भातमस उपधेत्वं र प्रत्ययः तमिस्रा रात्रिः स्त्रीत्वमतेजम् अन्यत्रापि दृश्यते तमिस्र
वभः शृङ्गादिनः प्रत्ययो निपात्यते शृङ्गिणा ऊर्जः अस्वगागमो निपात्यते गोमीम
लमाह्लादिनलीमसश्चौ प्रत्ययौ भवतु निपात्यते मलिनः मलीमसः अतइनिठनौ।
अकारान्तान्यानि पदिकादिनि ठनौ प्रत्ययौ भवतः मत्वर्थे दंडी दंडिकः छत्री छत्त्रि
त्रिकः अन्यत्र स्यामिन्यपि कारान्मत्वर्थेपि भवति दंडवान् छत्रवान् उपरकरणे
किम् खड्गावान् एकाक्षरात्र्जातेः सप्तम्यां च न तौ स्मृतौ एकाक्षरात् स्ववान् खं
वान् स्ववान् कृतः कारकवान् हारकवान् जातेः व्याघ्रवान् सिंहवान् सप्तम्यां द
ण्डा अस्यां सन्ति दंडवती शाला इत्यत्र इतिकरणो विषयनियमार्थः सर्वेत्र सर्वेष्वन्तरं स्वक्रमम्
तेन क्वचिद्भवत्यपि कीर्यो हार्यो तण्डुलीतण्डुलिकइति व्रीह्यादिभ्यश्च व्रीह्यादिभ्यः श
तिर्यादिके भ्याम मत्वर्थे इनिठनौ प्रत्ययौ भवतः मन्तुप्रत्ययो भवत्येव व्रीही व्रीहिकः

व्रीहिमान् मायी मायिकः मायावान् न सर्वेभ्यः व्रीह्यादिभ्यः प्रत्ययद्वयमिष्यते
किं तर्हि शिखादिभ्यः परिशिष्टेभ्य उभयम् शिखामालामेखलाबलाकावीणासंज्ञा
वडवाअष्टकाबलाकापताकाकर्मन् चर्मन् इत्येतेभ्य इनिरेवेष्यते यवायदानेक्
मारी इत्येतेभ्य ठक्नैव परिशिष्टेभ्यः द्वावपि प्रत्ययौ भवतः व्रीह्यादिग्रहणं किम् याव
तादेरादिषु व्रीह्याद्युः पठ्यते तत्र च इनिठनौ चकारेण विधीयेते एवं तर्हि तत्कोटि
षु व्रीह्यादिग्रहणमर्थं ग्रहणं विज्ञायते शालयोऽस्य सन्तीति शालिलः शाली शालिकः शा
लिमानिति व्रीहिमालामेखलासंज्ञावडवाकुमारीनौवीणाशिखायवापदा कर्मन्
चर्मन् वर्मन् वडवाअष्टकाबलाकापताकाशीर्षान्नञः तुन्दादिभ्य इलश्च तुन्दा
दिभ्यः प्रातिपदिकेभ्यो मत्वर्थे इलः प्रत्ययो भवति चकारादिनिठनौ मतुप् च तुन्दिल
तुन्दी तुन्दिलः तुन्दवान् उदरिलः उदरी उदरिकः उदरवान् तुन्द उदर पिचण्ड यव व्री
हि स्वाङ्गाद्विवृद्धौ एकगोपूर्वाट्ठञ्नित्यम् एकपूर्वाद्गोपूर्वाच्च प्रातिपदिकान्नि
त्यं ठञ् प्रत्ययो भवति मत्वर्थे एकशतमस्यास्तीति ऐकशतिकः ऐकसहस्रिकः गोपू

ॐ·
काप्र·
२४५

वींत गोशतिकः गोसहस्रिकः अतः कथं एकविंशतिरस्यास्तीति गोविंशतिरस्यास्ती
ति न भवति कथमेकगविकः समासान्तेऽकृते भविष्यति कथं गोशकटिकः शाकटीश
ब्देन समानार्थः शाकटशब्दस्ततो भविष्यति अवयवं तत्र समनुवर्तयितव्यम् ईदो
पनायगर्हितान्नाणीस्यादिनीति सिद्धमायथेम निनयुग्रहतोमत्तृपोवाधनार्थम् कथ
मेकद्रव्यवत्त्वादिति अमायुरयमेकेनवाद्व्यवत्त्वादिति समर्थयितव्यम् शतसह
स्रान्ताच्च निष्कात् शतान्ताच्च सहस्रान्ताच्च शति यदि कात्सर्वेऽयं ठञ्प्रत्ययो भवति ॥
नैवेष्कशतमसहस्रेण निष्कात्प्रत्ययो भवतः निष्कशतमस्यास्तीति नैष्कशतिकः नैष्कसहस्रि
कः सुवर्णनिष्कशतमस्यास्तीत्यनभिधानान्न भवति रूपादाहतप्रशंसयोर्यप्
आहतप्रशंसयोः प्रकृत्युपाधी आहतप्रशंसाविशिष्टेऽर्थे वर्तमानाद्रूपशब्दाद्यप्प्रत्य
यो भवति मत्वर्थे आहतं रूपमस्यास्तीति रूप्यः कार्षापणः रूप्यः केदारः प्रशस्तं रूपम
स्यास्तीति रूप्यो गौः रूप्यः पुरुषः निघातनताडनादीनारादिषु पुरुषादिरूपं यदुत्पद्यते
तदाहतमित्युच्यते अहतप्रशंसयोरिति किम् रूपवान् यप्प्रकरणेऽन्येभ्योऽपि दृश्य

इनिवक्तव्यम् हिम्याः पर्वताः गुण्या ब्राह्मणाः अस्मायामेधास्रजो विनिः असन्ता
त्प्रातिपदिकात् मायामेधास्रज् इत्येतेभ्यश्च मत्वर्थे विनिप्रत्ययो भवति मतुप्सर्व
समुच्चीयत एव अस्मेतानावान् पयस्वी यशस्वी मायावी मेधा मेधावी स्रज स्रग्
वी मामाशब्दात् व्रीह्यादिपाठादिनिठनावपि भवतः मायी मायिकः बहुलं
छन्दसि छन्दसि विषये बहुले मत्वर्थे विनिप्रत्ययो भवति अग्नेतेजस्विन् नचभव
ति सूर्यो वर्चस्वान् छन्दो विनिप्रकरणे अष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घ
वेति वक्तव्यम् अष्ट्रावी मेखलावी द्वयावी उभयावी रुजावी हृदयावी द्वयोभयहृद
यानि दीर्घं नप्रयोजयन्ति वर्मणश्चेति वक्तव्यम् वर्मवी सर्वत्रामयस्योपसंख्यान
म् छन्दसि भाषायां च आमयावी शृङ्गवृन्दाभ्यामारकन्प्रत्ययो वक्तव्यः शृङ्गारकः
वृन्दारकः फलबर्हाभ्यामिनच् फलिनाः बर्हिणाः हृदयाच्चालुरन्यतरस्याम् हृद
यालुः हृदयी हृदयिकः हृदयवान् शीतोष्णतृप्रेभ्यस्तन्न सहत इति चालुः वक्त
व्यः शीतं न सहते शीतालुः उष्णालुः तृप्रालुः हिमाच्चेलुः हिमं न सहते हिमेलुः

ॐ. काप्र.
३४७

वलाद्दूलः वलेन सहते वलूलः वातात्समूहे च वातं सहत इति च वातेन सहते वातू-
लः नेपर्वेमरुद्भ्यो चेति वक्तव्यम् पर्वतः मरुत्तः न देवं सर्वं वक्तुं लक्ष्यग्रहणात्तु संपाद्य-
ते ऊर्णाया युस् ॥ ऊर्णाया अण्युस्प्रत्ययो भवति मत्वर्थे सकारः पदसंज्ञार्थः ऊ-
र्णा विद्यतेऽस्य ऊर्णायुः केचित्त्वत्र ग्रहणमिहानुवर्त्तयन्ति वाचो ग्मिनिः वाक्श-
ब्दात् ग्मिनिः प्रत्ययो भवति मत्वर्थे वाग्ग्मी वाग्ग्मिनौ वाग्ग्मिनः आलजाटचौ
बहुभाषिणि वाक्शब्दादालजाटचौ प्रत्ययौ भवतः मत्वर्थे बहुभाषिण्यभिधेये ग्-
मिनेरपवादः वाचालः वाचाटः कुत्सित इति वक्तव्यम् यो हि सम्यग्बहु भाषते वा-
ग्ग्मीत्येव भवति स्वामिन्नैश्वर्ये स्वामिन्निति निपात्यते ऐश्वर्ये गम्यमाने स्वशब्दादैश्व-
र्यवाचिनो मत्वर्थे आमिन्प्रत्ययो निपात्यते स्वमैश्वर्यमस्यास्ति स्वामी स्वामिनौ स्वा-
मिनः ऐश्वर्य इति किम् स्ववान् अर्शआदिभ्योऽच् अर्शस् इत्येवमादिभ्यः प्रातिपदि-
केभ्योऽच्प्रत्ययो भवति मत्वर्थे अर्शांसि विद्यन्तेऽस्मिन्न् अर्शसः उरसः आकृतिगणश्चा-
यं यत्राभिन्नरूपेण शब्देन तद्वतोऽभिधानं तत्सर्वमिह द्रष्टव्यम् अर्श उरस तुन्द चत्र

रपलित जाटाघाटाश्वश्वंखलवर्गासंग्राम हीरान वर्गान इंहोपनायगर्हीन
प्राणिभ्यादिनिः इंहः समासः उपनायोगेगाः गर्हेति न्नयम नहिषयेभः धातुभ्यः प्रा
णिभ्याश्चेवाविभः इति प्रत्ययो भवति मनर्थे इंहान्नावन कवकवलीयनीघ्रांख
नुपुरिणी उपनायान ऊष्मी किलासी गर्हीन ककुदावर्ती काकतालिकी प्रा
णिभ्यादिति किम पुष्पफलवान्वृक्षः प्राणिपात्रेषाने पाणिपादवती सिद्धं प्रत्य
ये पुनर्वचनेवनादिव्यापनार्थम् वातातीसाराभ्यां कुक् वातातीसारपिशाचाभ्यां उ
नि प्रत्ययो भवति मनर्थे तन्नानिर्यायेन वचनयोः कुगागमः वातातीसारयोः कुपना
पनान्तर्वैणाप्रत्ययेसिद्धे कुगर्थमेवेदं वचनं वातकी अतिसारकी पिशाचाश्चेति
वक्तव्यम पिशाचकी वैश्रवणः वयसि पूरणात इति तनुवर्तते पूरणप्रत्ययान्ता
त्प्रातिपदिकादिनिप्रत्ययो नियम्यते वयसि पञ्चमोमासोस्तिमासः संवत्सरो
वायंपंचमी उष्ट्रः नवमद्शमोसिद्धमतिनियमार्थं वचनम् इतीव भवति सा
खादिभ्यः सुखदुःखादिभ्यः प्रातिपदिकेभ्यः इति प्रत्ययो भवति मनर्थे सुखी

ॐ
काप्र
३५८

ङः व्रीहिमालादेः इनिप्रत्ययो भवति व्रीह्यादिषु मालाशब्दोऽभिनदिहादेपमनर्थोपला
षेवचनम् मालेऽङ्गिनप्रकृत्यान्तरश्लीकमकरणात्कृपणासोफप्रतीपशील
फलमालादेये धर्मशीलवर्णान्तात् धर्मशब्दःप्रत्येकमभिसंबध्यते धर्मा
दिशब्दान्तान्निप्रातिपदिकादिनिप्रत्ययो नियम्यते मत्वर्थे ब्राह्मणानांधर्मःसोस्या
स्तिब्राह्मणधर्मी ब्राह्मणशीली ब्राह्मणवर्णी हस्ताज्जातौ हस्तशब्दादिनि
प्रत्ययो नियम्यते मत्वर्थे समुदायेनचेज्जातिरभिधीयते हस्तोऽस्यास्तीति हस्ती
हस्तिनौ हस्तिनः जातावितिकिम् हस्तवान्पुरुषः वर्णाद्ब्रह्मचारिणि वर्ण
शब्दादिनिप्रत्ययो नियम्यते मत्वर्थे समुदायेनचेद्ब्रह्मचारी भण्यते ब्रह्मचा
रीति त्रैवर्णिकोऽभिप्रेतः स हि विद्याग्रहणार्थमुपनीतो ब्रह्मचर्यं नियममा
सेवत इत्यर्थः वर्णी वर्णिनौ वर्णिनः ब्रह्मचारिणीतिकिम् वर्णवान् ब्राह्मण
द्रव्ययोर्वर्णवर्णिन इत्यन्ते पुष्करादिभ्यो देशे पुष्करादिभ्यःप्रातिपदिके
भ्य इनिप्रत्ययो नियम्यते समुदायेनचेद्देशोऽभिधीयते पुष्करिणी पद्मिनी देश

कम्पूर्वपदादुपसंख्यानम् बाहुबली ऊरुबली सर्वादेश्चेति वक्तव्यम् सर्वधनी
सर्वबीजी सर्वकेशी नटः अर्थाच्चासंनिहिते अर्थी असंनिहित इति किम् अर्थ-
वान् तदन्ताच्चेति वक्तव्यम् धान्यार्थी हिरण्यार्थी पुष्कर पद्म उत्पल तमाल कु-
मुद नड कपित्थ बिस मृणाल कर्दम शालूक विगर्ह करीष शिरीष यवाष द-
रण बलादिभ्यो मतुबन्यतरस्याम् बलादिभ्यः प्रातिपदिकेभ्यः मतुप्प्रत्ययो भ-
वति अन्यतरस्याम् अन्यतरस्यांग्रहणात् प्रकृत इनिः समुच्चीयते बलवान् बली
उत्साहवान् उत्साही बल उत्साह उद्भास उद्भासशिलानि चुल दल मकुल कुल
आयाम व्यायाम प्रयाम उपयाम प्रयाम आरोह अवरोह परिणाह संज्ञायाम्
मन्माभ्याम् मनन्तान्मान्ताच्च प्रातिपदिकात् संज्ञायामिनिप्रत्ययो भवति मत्वर्थे
समुदायेन चेत् संज्ञा गम्यते प्रथिमिनी दामिनी मशाज्ञानात् होमिनी सोमिनी सं-
ज्ञायामिति किम् सामवान् कंशंभ्यां बभयुस्तितुतयसः ॥ कंशमिति मकारान्तौ
उदकसुखवाचकौ ताभ्यां ब भ युस् ति तु त यस् इत्येते प्रत्यया भवन्ति म

ॐ.
काप्र.
१५५

तयोः कंवः शंवः कंभः शंभः कंयुः शंयुः कंतिः शंतिः कंतः शंतः कंतः शंतः कंयः
शंयः मकारः पदसंज्ञार्थः तेनानुस्वारपरसवर्णौ सिद्धौ भवतः भसंज्ञायां हि सत्यां क
म्यः शम्य इति स्यात् तोर्दिवलिविटैभ्यः तोर्दिवलिवटिशाटेभ्यः भप्रत्ययो भवति मत्व
र्थे तोरिति निर्देशान्नाभिव्यक्ते सामान्यान्नीतिते उभः वलिभः वटिभः वलिशाटू: पाप
दिशुपद्याते तेन वलिन इत्यपि भवति शब्देशुभमोयुस शब्दमिति शाह्वानस्मर्हंका
रे वर्तते शुभमित्यर्थे शुभशब्दपर्यायः ताभ्यां युस्प्रत्ययो भवति मत्वर्थे मकारः पद
संज्ञार्थः शब्देयुः शब्दकारवानित्यर्थः शुभंयुः कल्याणवानित्यर्थः ॥ इति जयन्तका
शिकायां वृत्तौ पंचमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥ ॐ समपातवायस्य हताव
शेषाश्लत्रल्पवर्णाजन रंजितेषु लावण्ययुक्तेषु पि विभ्रमेति दैत्याः सकोनानयर
नाम्यलेषु ॥ इति शुभमस्तु ॥ ॐ प्राग्दिशो विभक्तिः दिक्शब्देभ्यः सप्तमीपंचमीप्रथमा
भ्य इति वक्ष्यति प्रागेतस्मात् इति क्रिं शब्दनापादितव्यं समनुक्रमिष्यामः विभक्तिसंज्ञा
स्ते वेदितव्याः वक्ष्यति पंचम्यास्तसिल् यतः तेतः तसिलादीनामिति विभक्तेरदान

तेऽस्मिन्निह भवति अतः परं स्वार्थिकाः प्रत्ययास्तेषु समर्थाधिकारः प्रथमग्रहणं च प्रति
योग्यमपेक्षमाणो न प्रयुज्यत इति निवृत्तम् वावचनमनुवर्तते तेन विकल्पेन तसिला
दयो भवन्ति कुतः कस्मादिति किंसर्वनामबहुभ्योऽद्व्यादिभ्यः प्राग्दिश इत्येव किमः सर्व
नाम्नो बहुशब्दाच्च प्राग्दिशः प्रत्यया वेदितव्याः द्व्यादीन्वर्जयित्वा सर्वनामत्वात्प्राप्ते
ष्वद्व्यादीनां पर्युदासः क्रियते कुतः कुत्र यतः यत्र ततः तत्र बहुतः बहुत्र अद्व्या
दिभ्य इति किम् द्वाभ्यां द्वयोः प्रकृतिपरिसंख्यानं किम् वृत्तार्थौ त्वेते प्राग्दिश इत्ये
व वैयाकरणपाशः सर्वनामत्वादेव सिद्धे किमो ग्रहणं द्व्यादिपर्युदासात् बहुग्रहण
मसंख्याग्रहणमिह न भवति बहोः सूपात् बहोः सूप इति इदम इश् प्राग्दिश इत्येव
इदमः प्राग्दिशीयेषु प्रत्ययेषु परत इश इत्ययमादेशो भवति शकारः सर्वादेशार्थः इतः
इह एतेतौ रथोः रेफादौ थकारादौ च प्राग्दिशीये प्रत्यये परत इदमो यथासंख्यमेतद्
इत् इत्येतावादेशौ भवतः इशोऽपवादः रेफे च कार उच्चारणार्थः इदमो र्हिल् एतर्हि इ
दमस्थमुः इत्थम् थाहेतौ चच्छन्दसि इत्था एतदोऽश् प्राग्दिश इत्येव एतदः प्राग्दि

ॐ·
काप्र·
३५'

धीयेषु प्रत्ययेषु परतोऽश् इत्ययमादेशो भवति आकारः सर्वादेशार्थः अतः अत्र एतद
इति योगविभागः कर्तव्यः एतदोऽशब्दोऽनेनैवादेशो भवति एतर्हि इत्यत्र रेफादिव
नयतते र्हिल मन्त्र स्थानि नि विघनयत्वं प्रत्ययः पूर्वेण तद उपमोत्ययः सर्वस्मा
सोऽन्यतरस्यां दि सर्वस्य दा प्रत्यये इत्ययमादेशो भवति अन्यतरस्याम् प्राग्दिशीयो दा
कालेऽप्रत्यये परतः सर्वैकान्यकियत्तदः काले दा सर्वदा सदा प्राग्दिशा इत्येव
सर्वे देशा नि सर्वदा त्वत्र पञ्चम्यास्तसिल् पञ्चम्यन्तेभ्यः किंसर्वनामबहुभ्यः
परस्तसिल्प्रत्ययो भवति कुतः यतः बहुतः ततश्च प्रतियोगे पञ्चम्यास्तसिः अ
पादानवाचीय कदोऽनिवर्तते तस्मात् किंसर्वनामबहुभ्यः परस्तसिला
देशो भवति कुतः आगतः यतः आगतः ततस्तसिल्वचनेन स्वार्थे पर्यभिभ्यां
च परि अभि इत्येताभ्यां तसिल्प्रत्ययो भवति सर्वोभयार्थे वर्तमानाभ्यामिष्यते
परितः सर्वत इत्यर्थः अभितः उभयत इत्यर्थः सप्तम्यास्त्रल् किंसर्वनामबहुभ्यः
सप्तम्यन्तेभ्यस्त्रल्प्रत्ययो भवति कुत्र तत्र यत्र बहुत्र इदमो हः इदमः सप्तम्यन्ताद्हं

नयोभवति चलोपः इह किमोत किमः सप्तम्यंतादत्प्रत्ययोभवति चलोप
वादः क्वभोत्स्यसे क्वगमिष्यसि चलमपि केचिदिच्छंति अशेभनकथम उ
नरमूयाद्वावचनेपुरस्तादप्यकल्पते वाहवक्षन्ती किमः सप्तम्यंतात् हप्र
त्ययोवाभवति छंदसिविषयेयथाप्रामंचकहस्थः ऊवादिभ्यस्प्ह्रेकविद्धाप्त
एमस्पसूत्र इतराभ्योपिदृश्यन्ते पंचमीसप्तम्यपेक्षामितरत्रम् इतराभ्योपिवि
भक्तिभ्यस्तसिलादयः प्रत्ययादृश्यंते दृशिग्रहणात्प्रायिकविध्यर्थम् तेनभव
दादिभ्योयएवेतद्विधानम् केपुनर्भवदादयः भवान्दीर्घायुः देवानांप्रियः आयु
ष्मानितिसभवान् ततोभवान् तत्रभवान् तंभवंतम् ततोभवंत तत्रभवंतम्
तेनभवता ततोभवता तत्रभवता तस्मैभवते ततोभवते तत्रभवते तस्माद्भ
वतः तत्रभवतः तस्यभवतः ततोभवतः तत्रभवतः तस्मिन्भवति ततोभवति
तत्रभवति एवंदीर्घायुः प्रभृतिष्वप्युदाहार्यम् सर्वैकान्यकियत्तदः कालेदा
सप्तम्याइतिवर्तते नविततायभ्यइति सर्वादिभ्यः सप्तम्यंतेभ्यः कालेवर्तमा।

उँ· काश्र· ३५८

तेभ्यो दाप्रत्ययो भवति त्रलादेरपवादः सर्वस्मिन्काले सर्वदा एकदा अन्यदा
कदा यदा तदा काले इति किम् सर्वत्र देशे इदमो र्हिल् सप्तम्या इत्येव का।
ले इत्येव इदमः सप्तम्यन्तात्काले वर्तमानात् र्हिल्प्रत्ययो भवति त्रलोपवादः
लकारः स्वरार्थः अस्मिन्काले एतर्हि काले इत्येव इह देशे अधुना अधुनेति नि
पात्यते इदमो भावो धुनाच प्रत्ययः अस्मिन्काले अधुना दानीम् इदमः सप्त।
म्यन्तात्काले दानीं प्रत्ययो भवति अस्मिन्काले इदानीम् तदो दाच तदः सप्त।
म्यन्तात्काले दाप्रत्ययो भवति चकाराद्दानीं च तस्मिन्काले तदा तदानीम् तदो
दावचनमनर्थकं विहितत्वात् तयोर्दार्हिलौ च छन्दसि तयोरिति प्रातिपदि
कनिर्देशः तयोरिदमस्तदश्च यथासंख्यं दार्हिलौ प्रत्ययौ भवतः छन्दसि चका
राद्यथाप्राप्तं च इदावत्सरीयम् तर्हि क्षेदानीमकल्पयथाः तदानीम् अनद्य
तने र्हिलन्यतरस्याम् छन्दसीति निवर्त्तते सामान्येन विधानम् किंसर्वनामब
हुभ्यः सप्तम्यन्तेभ्यो अनद्यतने कालविशेषे र्हिल्प्रत्ययो भवति अन्यतरस्याम्

कर्हि कदा यर्हि यदा तर्हि तदा सद्यःपरुत्परार्य्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युर
न्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥ समसम्याः काल इति वानुव
र्त्तते सद्यः प्रभृतयः शब्दा निपात्यन्ते प्रकृतिः प्रत्ययः आदेशः कालविशेषश्चेति स
र्वमेतन्निपातनाल्लभ्यते समानस्य सभावो निपात्यते द्यश्च प्रत्ययः अहन्यभिधे
ये समानेऽहनीति सद्यः पूर्वपूर्वतरयोः परभावः उदारी च प्रत्ययो संवत्सरेऽभिधेये परु
त् अस्मिन्संवत्सरे परुत् पूर्वतरे संवत्सरे परारि इदमः समसण् अस्मिन्संवत्सरे ऐष
मः परस्मादेद्यव्यहनि परस्मिन्नहनि परेद्यवि इदमोऽश्भावः निपात्यते द्यश्चाहनि अ
स्मिन्नहनि अद्य पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्यः एद्युस् प्रत्ययो निपात्य
ते पूर्वस्मिन्नहनि पूर्वेद्युः अन्यस्मिन्नहन्यन्येद्युः अन्यतरस्मिन्नहन्यन्यतरेद्युः इतर
स्मिन्नहनीतरेद्युः अपरस्मिन्नहन्यपरेद्युः अधरस्मिन्नहन्यधरेद्युः उभयोरह्नोरुभ
येद्युः उत्तरस्मिन्नहन्युत्तरेद्युः द्युश्चोभयाद्वक्तव्यः उभयद्युः प्रकाशवचने थाल् किंब
हुसर्वनामभ्यः इति वर्त्तते समसम्याः काल इति चानिवृत्तम् सामान्यस्य भेदको विशे

ॐ
काप्र
३५२

षः प्रकारः प्रकृत्यर्थविशेषणं चैतत् प्रकारवृत्तिभ्यः किंसर्वनामबहुभ्यः स्वार्थे
थाल्प्रत्ययो भवति तेन प्रकारेण तथा यथा सर्वथा जातीयरपि ह्ययमेव लक्ष्
णम् स तु स्वभावात्प्रकारवति वर्तते थाल्तु प्रकारमात्रे इदमस्थमुः इदं
शब्दात्प्रकारवचने थमुः प्रत्ययो भवति थालोपवादः अनेन प्रकारेण इत्थम् ॥
किमश्च ॥ किंशब्दात्प्रकारवचने थमुः प्रत्ययो भवति थालोपवादः केन प्रकारे
ण कथम् योगविभाग उत्तरार्थः थाहेतौ च छन्दसि किंशब्दात् हेतौ वर्तमाना
त् थाप्रत्ययो भवति चकारात्प्रकारवचने च छन्दसि हेतौ तावत् कथा ग्रामं न पृ
च्छसि केन हेतुना न पृच्छसीत्यर्थः प्रकारवचने च कथा देवा आसन् पूर्वा विभक्ति
संज्ञायाः पूर्वावधिः दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः
दिशां शब्दाः दिक्शब्दाः तेभ्यो दिग्देशकालेषु वर्तमानेभ्यः सप्तमीपञ्चमीप्रथमा
न्तेभ्यः स्वार्थे अस्तातिप्रत्ययो भवति यथासंख्यमत्र नेष्यते पुरस्ताद्वसति पुर
स्तादागतः पुरस्ताद्रमणीयम् अधस्ताद्वसति अधस्तादागतः अधस्ताद्रम

णीयम् दिक्छब्देभ्य इति किम् ऐन्द्र्यां दिशि सप्तमीपंचमीप्रथमाभ्य इति किम् पू
र्वं ग्रामं गतः दिग्देशकालेष्विति किम् पूर्वस्मिन् गुरौ वसति ॥ दक्षिणोत्तराभ्यामत
सुच् ॥ दक्षिणोत्तरशब्दाभ्यां सप्तमीपंचमीप्रथमान्ताभ्यां दिग्देशकालेषु वर्तमाना
भ्यामतसुच् प्रत्ययो भवति अस्तातेरपवादः दक्षिणशब्दः कालेन न संभवति सदिग्
देशाभ्यामिति निर्दिश्यते दक्षिणतो वसति दक्षिणत आगतः दक्षिणतो रमणीयम् उत्त
रतो वसति उत्तरत आगतः उत्तरतो रमणीयम् अकारो विशेषणार्थः सष्ठान
मध्ये प्रत्ययेनेति ॥ विभाषा परावराभ्याम् ॥ परावरशब्दाभ्यां विभाषातसुच् प्रत्य
यो भवति अस्तातेरर्थे परतो वसति परत आगतः परतो रमणीयम् अवरता
द्वसति अवरत आगतः अवरतो रमणीयम् ॥ अंचेर्लुक् ॥ अंचप्रत्ययान्तेभ्यो दिक्छब्देभ्य
उत्तरस्यास्तातेः प्रत्ययस्य लुग्भवति प्राच्यां दिशि वसति लुकि तद्धितलुकीति स्त्री
प्रत्ययोऽपि निवर्तते प्राग्वसति प्रागागतः प्राग्रमणीयम् प्रत्यग्वसति प्रत्यगा
गतः प्रत्यग्रमणीयम् ॥ उपर्युपरिष्टात् ॥ उपरि उपरिष्टादित्येतौ शब्दौ निपात्येते

अस्तातेरर्थे ऊर्ध्वस्योपभावो रिलिष्टातिलौ च प्रत्ययौ निपात्येते ऊर्ध्वायां दिशि व
सति उपरि वसति उपर्यागतः उपरि रमणीयम् उपरिष्टाद्वसति उपरिष्टादा
गतः उपरिष्टाद्रमणीयम् पश्चात् पश्चादित्ययं शब्दो निपात्यते अस्तातेरर्थे अ
परस्य पश्चभावः आतिश्च प्रत्ययः अपरस्यां दिशि वसति पश्चाद्वसति पश्चादाग
तः पश्चाद्रमणीयम् दिक्पूर्वपदस्य च अपरस्य पश्चभावो वक्तव्यः आतिश्च प्रत्य
यः दक्षिणपश्चात् उत्तरपश्चात् अर्धोत्तरपदस्य दिक्पूर्वस्य पश्चभावो वक्तव्यः
दक्षिणपश्चार्धः पश्चपश्चा च छन्दसि पश्चपश्चा इत्येतौ छन्दसि विषये निपात्येते अ
स्तातेरर्थे चकारादातिरपि भवति अपरस्य पश्चभावः अकाराकारौ च प्रत्य
यौ निपात्येते पुरो व्याघ्रो जायते पश्च सिंहः पश्चा सिंहः पश्चात्सिंहः उत्तराधरद
क्षिणादातिः उत्तर अधर दक्षिण इत्येतेभ्य आतिः प्रत्ययो भवति अस्तातेरर्थे उत्तरा
स्यां दिशि वसति उत्तराद्वसति उत्तरादागतः उत्तराद्रमणीयम् अधराद्वसति अध
रादागतः अधराद्रमणीयम् दक्षिणाद्वसति दक्षिणादागतः दक्षिणाद्रम

णीयम् एनबन्यतरस्यामदूरेऽपंचम्याः उत्तराधरदक्षिणाशब्देभ्यः एनप्प्रत्य-
यो भवति अन्यतरस्याम् अस्तातेर्विषये अदूरे चेदवधिमान्भवति विभक्तिश्चा-
येत्प्रकृते अपंचम्या इति पंचमी पर्युदस्यते तेनायं सप्तमीप्रथमान्तात्प्रत्ययो वि-
धीयते उत्तरेण वसति उत्तराद्वसति उत्तरतो वसति उत्तरेण रमणीयम् उत्त-
राद्रमणीयम् उत्तरतो रमणीयम् अधरेण वसति अधराद्वसति अधरेण र-
मणीयम् अधराद्रमणीयम् अधस्ताद्रमणीयम् दक्षिणेन वसति दक्षिणा-
द्वसति दक्षिणतो वसति दक्षिणेन रमणीयम् दक्षिणाद्रमणीयम् दक्षिणा-
तो रमणीयम् अदूर इति किम् उत्तराद्वसति अपंचम्या इति किम् उत्तरादाग-
तः अपंचम्या इति प्रतिषेधः प्रागमेः श्रीमत्पन्नयस्तपंचम्यन्तादपि भवति केचि-
दिहोत्तरपदादिग्रहणं नानुवर्तयन्ति दिक्छब्दमात्रात्प्रत्ययमभ्येते दक्षिणादाच् अदू-
र इति निवर्तते अपंचम्या इत्यनुवर्तते दक्षिणशब्दादाच्प्रत्ययो भवति अस्ताते-
रर्थे दक्षिणा वसति दक्षिणा रमणीयम् अपंचम्या इत्येव दक्षिणत आगतः

ॐ·
का प्र·
३५५

चकारोविशेषणार्थः अनन्तरमपदानाद्दियुक्त इति आहिचदूरे दक्षिणशब्दा
दाहिप्रत्ययोभवति अस्तातेरर्थे दूरेचेदवधेरवधिमान्भवति दक्षिणाहि वस
ति दक्षिणाहि रमणीयम् दूरइत्येव दक्षिणेनप्रपा अपंचम्या इत्येव दक्षिणात
आगतः उत्तराच्च उत्तरशब्दादाः प्रत्ययोभवति ततः आहिप्रत्ययश्च भवति अ
स्तातेरर्थे दूरेचेदवधेरवधिमान्भवति उत्तरावसति उत्तराहिवसति उत्तरा
रमणीयम् उत्तराहिरमणीयम् दूरइत्येव उत्तरेणप्रपा अपंचम्या इत्येव॥
उत्तरतआगतः पूर्वाधरावराणामसिपुरधवश्चैषाम् अपंचम्या इति निवृत्त
म् तिसृणामपिविभक्तीनामिहग्रहणम् पूर्वअधरअवरइत्येतेषामसिप्र
त्ययोभवति अस्तातेरर्थे तत्सन्नियोगेनचैषामेवयथासंख्यंपुरअधअव
इत्येतेआदेशाभवन्ति पुरोवसति पुरोरमणीयम् अधोवसति अधआग
तः अधोरमणीयम् अवोवसति अवआगतः अवोरमणीयम् पुराग्निवक्र
व्यम् पुरोवसतीत्यादि अस्तातिच अस्तातिचप्रत्ययेपरतः पूर्वादीनांपुराद

पश्चादेशो भवति इदमेव वा देवा विधाने नायके आस्ताति भ्यो भवति इदमे
अस्मिन् प्रत्ययेन वाच्यन इति पुरस्ताद्रमति पुरस्तादागतः पुरस्ताद्रमणीयम्
अधस्ताद्रमति अधस्तादागतः अधस्ताद्रमणीयम् अवस्ताद्रमति अवस्ताद
गतः अवस्ताद्रमणीयम् विभाषावरस्य पूर्वाधरावराणामसिः आस्ताद्देशो विकल्प्य
ते अवरशब्दस्य अस्तात्यपरतः विभाषा अव् इत्ययमादेशो भवति अवस्ताद्र
मति अवरस्ताद्रमति अवस्तादागतो अवरस्तादागतः अवस्ताद्रमणीयम्
अवरस्ताद्रमणीयम् संख्याया विधार्थे धा संख्यावाचिभ्यः प्रातिपदिकेभ्यो
विधार्थे वर्तमानेभ्यः स्वार्थे धाप्रत्ययो भवति विधाप्रकारः स च क्रियाविषय
इह गृह्यते क्रियाप्रकारे वर्तमानायाः संख्यायाः प्रत्ययः एकधा भुंक्ते द्विधा ग
च्छति विधावत्यर्थेपि चेष्यते अधिकरणविचाले च संख्याया इत्येव अधिकर
णं द्रव्यं तस्य विचालः संख्यांतरापादनम् एकस्याने कीकरणम् अनेकस्य
कीकरणम् अधिकरणविचाले गम्यमाने संख्याया धाप्रत्ययो भवति एकं

ॐ. काशि. ३५५

गार्गीयं वात्सीयम् समया ग्लुच्या अनेकमेकधा ऊरु एकादेश्यमुखं वनमनुष्यो
एकशालायामस्य याज्ञेयस्य लुग् आदेशो भवति अनन्तरस्याम् एकयागार्गो
ऊरु एकयां ऊरु एकयातेयेयेकयां भंक्ते प्रकरणादेकल्लेष्वनयो ग्रहणं
विद्यार्थेपि विहितस्य युवप्रत्ययस्य अनन्तरस्यैव हि युवा भवति द्वियोस्तु युवप्रत्ययः याद
स्तु वर्तते द्वियोः संबंधिनो यो युवप्रत्ययस्य विद्यार्थेपि करणे द्वियोर्लिङ्गविहित
स्य युवप्रत्ययस्य लुग् आदेशो भवत्यनन्तरस्याम् एकयोर्विकल्पान्तु कषीणामर्थः द्विपादे
यम् त्रिपादेयम् पञ्चसेनान्तार्थेनु दर्शनम् मानिहयानि मेशायेन्द्रयानि ॥
पयाश्च द्वियोः संबंधिनो दासप्रत्ययस्य लुग् आदेशो भवति अनन्तरस्याम्
एकयोर्विकल्पान्तु कषीणामर्थः द्वैपादिया द्वैपम् त्रैपादिया त्रैपम् यौधेयाची
याणः ऊर्मिनुज्याते यौधेयैर्वर्तमानानान्यानि पादिकान्तार्थेपाशः प्रत्ययो भ
वति यौधेयो वैयाकरणः ऊर्मिनो वैयाकरणपाशः यान्तिकपाशः श्रोत्रियपा
शः वैयाकरणः शाहेषु वीणादः शीलः नवकम्मात्र भवति यस्य गुणास्ति।

भावाद्द्वैधशाद्भिनिवेशात्तत्कर्मर्यांप्रत्ययः पूरणाद्भागेतीयादन् पूरणप्रत्ययो
यस्तीयस्तदन्तात्प्रातिपदिकाद्भागेवर्तमानात्स्वार्थेऽन्प्रत्ययोभवति स्वार्थे
वचनं द्वितीयोभागोद्वितीयः तृतीयोभागस्तृतीयः भागइतिकिम् द्विती
यम् तृतीयम् पूरणग्रहणमुत्तरार्थम् नचपूरणादन्यस्तीयोस्ति स्वावनीयादि।
नथिकः प्रागेकादशभ्योऽच्छन्दसि पूरणाद्भागइत्येव प्रागेकादशभ्यः संज्ञा।
शब्देभ्यः पूरणप्रत्ययान्तेभ्योभागेवर्तमानेभ्यः अच्छन्दसिविषयेऽन्प्रत्ययो।
भवति स्वार्थेवचनम् पंचमः सप्तमः दशमः प्रागेकादशभ्यइतिकिम् ए
कादशः अच्छन्दसीतिकिम् पंचमंमिन्द्रियस्यापाक्रामत् षष्ठाष्टमाभ्यांञच
भागइत्येव अच्छन्दसीतिच षष्ठाष्टमशब्दाभ्यांभागेभिधेयेअच्छन्दसिविषये
ञप्रत्ययोभवति चकारादन् षष्ठोभागः षाष्ठः षाष्ठः अष्टमः आष्टमः मानपा
श्वंगयोः कन्लुकौच भागइत्येव षष्ठाष्टमशब्दाभ्यांयथासंख्यंकन्लुकौभवतः
मानपश्वंगयोः भागयोरभिधेययोः षष्ठकोभागः मानंचेद्भवति अष्टमकोभा

ॐ·
काप्र·
३५९

यः पञ्चम्यां वेङ्कवति । विमलकृष्णेनो वा वेकारादयथायामं वषष्टः । आष्टः आष्टमः
आष्टमः मान पञ्चम्यां योरिति किम् । षाष्टः षष्टमः । एकादाकिनिश्चासहाये एक
शब्दादसहायवाचिनः स्वार्थे आकिनिः प्रत्ययो भवति । चकारात्कन्लुकौ च । आ
किनिचकनोवालुग्यनिवृत्त्यायते । सर्वसामकवान्तो भवति । एकाकी एककः ए
कः । असहायग्रहणं संख्याशब्दनिरासार्थं तदुपादाने हि वद्धावस्यात् । एकाकि
नौ एकाकिन इति । भूतपूर्वे चरट् । भूतः पूर्वमिति विग्रहे सुप्सुपेति समासः
भूतपूर्वशब्दो निर्द्दिष्टकालवचनः प्रकृतिविशेषणं चैतत् । भूतपूर्वविशिष्टार्थे
वर्त्तमानान्नाम्नो निषादिकान्ताथे चरट् प्रत्ययो भवति । आढ्यो भूतपूर्व आढ्यचरः
सुकुमारचरः दर्शनीयचरः । टकारः ङीबर्थः । आढ्यचरी । षष्ठ्या रूप्य प्रत्ययो भव
ति । चकारात् चरट् च । षष्ठ्यन्तान्नाम्नो यथाविधानं संभवति भूतपूर्वे देवदत्तरूप्यो गौः देव
दत्तचरः । यज्ञदत्तरूप्यो यज्ञदत्तचरः । आतिशायने तमविष्ठनौ । अतिशायेति शा
यने प्रकर्षः निपातनाद्दीर्घत्वम् । प्रकृतिविशेषणं चैतत् । अतिशायनाविशिष्टेव

तेमानात् स्याद्युप्रातिपदिकात् स्वार्थे तमप् इष्ठन् इत्येतौ प्रत्ययौ भवतः प्रक
र्षविशिष्टेषु च स्वार्थिकानामाधिक्यं भवति सर्वे इमे आढ्याः अयमेषामतिशा
येनाढ्यतमः दर्शनीयतमः सुकुमारतमः सर्वे इमे पटवः अयमेषां पटिष्ठः ल
घिष्ठः गरिष्ठः यदा च प्रकर्षवतां पुनः स्पर्धा विवक्ष्यते तदातिशायिकान्तादपि
प्रत्ययो भवत्येव देवाः सविता प्राप्यन्तु श्रेष्ठतमाय कर्मणे युधिष्ठिरः श्रेष्ठतमः
कुरूणामिति तिङश्च तिङन्तादतिशायने घे तेन तमप् प्रत्ययो भवति स्याद्युप्रा
तिपदिकाधिकात्तिङन्तादामोनीतिवचनम् सर्वे इमे पचन्ति अयमेषां पचतित
माम् इष्ठन्नोदाहृयते गुणवचनेन नियतत्वात् द्विवचनविभज्योपपदे तरबीयसुनौ
द्वयोरर्थयोर्वचनम् द्विवचनम् विभक्तव्यो विभज्यः निपातनाद्यत् द्वयोर्विभज्ये
चोपपदे स्याद्युप्रातिपदिकात्तिङश्चातिशायने तरबीयसुनौ प्रत्ययौ भवतः त
मविष्ठनयोरपवादोयं यथासंख्यमञ्जेनेष्यते द्वाविमावाढ्यौ अयमनयोराढ्यतरः
दर्शनीयतरः सुकुमारतरः जल्पतितराम् पचतितराम् ईयसुन् अयमनयोः॥

ॐ. काश. ३४३

पटीयान् लघीयान् विमत्योपपदेऽवल्लभि माथुराः पाटलिपुत्रकेभ्य आढ्यत-
राः सुकुमारतराः पटीयांसो लघीयांसः इष्ठन्नादौ गुणवचनादेव इष्ठन्नीयसू नाव-
नादीनामाख्येन विहितौ तयोरयं नियमः क्रियते गुणवचनादेव भवतः नान्यस्मा-
दिति पटीयान् पटिष्ठः लघिष्ठः लघीयान् इष्ठन् भवतः पाचकतमः एवकार इष्ट-
तोवधारणार्थः प्रत्ययनियमोयं न प्रकृतिनियमः इति पटुतरः पटुतमः तरप्तमपौ
तरीतिवृत्तः सामान्यग्रहणे तेनानयोरपि विषये इष्ठन्नादी प्रत्ययौ भवतः एवं
गुणवचनादेवेति नियमः कृतस्तरप्तमपोः प्रकृत्यान्तरमप्यनुज्ञायते तेनाढ्यादौ
भवत इति आन्तिकनेष्ठः देदीयमीयसुः प्रशस्यस्य श्रः प्रशस्यशब्दस्य श्र इत्य-
यमादेशो भवति इष्ठेयसोः प्रत्यययोः परतः इष्ठन्नादौ इति प्रकृतस्य सप्तमी विभ-
क्तिः परिणम्यते ननु च प्रशस्यशब्दस्य गुणवचनत्वादस्मादेतौ सम्भवत एव एवं
तर्हि आदेशविधानादेव तद्विषये नियमो न प्रवर्तते इष्ठन्नादौ गुणवचनादेवेति
एवमुत्तरेष्वपि योगेषु विनियमः सर्वे इमे प्रशस्याः अयमेषामतिशयेन प्रशस्यः श्रे-

ष्ठः उभाविमौ प्रशस्यौ अयमनयोरतिशयेन प्रशस्यः श्रेयान् अयमस्माच्छ्रेयान्
प्रकृत्यैकाजिति प्रशस्यस्य टिलोपयस्येतिलोपौ न भवतः एव प्रशस्यशब्दस्य
ज्य इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः सर्वइमे प्रशस्याः अयमेषां ज्ये-
ष्ठः उभाविमौ प्रशस्यौ अयमनयोर्ज्यायान् अयमस्माज्ज्यायान् ज्यादादीयसः इत्या-
कारः वृद्धस्य च वृद्धशब्दस्य ज्य इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः त-
योश्च सर्वे नियमाभावेन पूर्ववत्तायेत सर्वइमे वृद्धाः अयमेषां ज्येष्ठः उभाविमौ वृद्धौ
अयमनयोर्ज्यायान् अयमस्माज्ज्यायान् प्रियस्थिरस्फिरउरुबहुलेति वृद्धस्य वर्षि-
शब्दश्चादेशो वक्तव्ये वचनात्सेमोपि भवति वर्षिष्ठः वर्षीयानिति अन्तिकबाढ-
योः नेदसाधौ अन्तिकबाढयोर्यथासंख्येन नेदसाध इत्येतावादेशौ भवतः अजाद्योः
प्रत्यययोः परतः निमित्तयोर्यथासंख्येनेष्ठाने सर्वाणीमान्यन्तिकानि इदमेषां नेदि-
ष्ठम् उभे इमे अन्तिके इदमनयोः नेदीयः इदमस्मान्नेदीयः सर्वइमे बाढमधीयते अय-
मेषां साधिष्ठमधीते अयमनयोः साधीयोधीते अयमस्मात्साधीयोधीते युवाल्पयोः

ॐ
का.प्र.
३५८

कनन्यतरस्याम् युवाल्पयोः कनित्ययमादेशो भवति अन्यतरस्याम् अजाद्योः
प्रत्यययोः परतः तयोश्च सन्नियोगपूर्ववद्विहितेये सर्वे इमे युवानः अयमेषां कनिष्ठः
उभाविमौ युवानौ अयमनयोः कनीयान् अयमस्मात्कनीयान् यविष्ठः यवी-
यानिति वा सर्वे इमेऽल्पाः अयमस्मात्कनीयान् अल्पिष्ठः अल्पीयानिति वा वि-
न्मतोर्लुक् विनोर्मतुपश्च लुग्भवति अजाद्योः प्रत्यययोः परतः इदमेव लुग्व-
चनं ज्ञापकम् अजादिभावस्य सर्वे इमे स्रग्विणः अयमेषां स्रजिष्ठः उभाविमौ
स्रग्विणौ अयमनयोः स्रजीयान् अयमस्मात्स्रजीयान् इमे सर्वे त्वग्वन्तः अयमे-
षां त्वचिष्ठः उभाविमौ त्वग्वन्तौ अयमनयोस्त्वचीयान् अयमस्मात्त्वचीयान् प्रशंसा-
यां रूपप् प्रशंसा स्तुतिः प्रकृत्यर्थविशेषणं चैतत् प्रशंसाविशिष्टेऽर्थे वर्तमा-
नात्प्रातिपदिकात्स्वार्थे रूपप् प्रत्ययो भवति स्वार्थिकाश्च प्रकृत्यर्थविशेषणस्य
द्योतका भवन्ति प्रशस्तो वैयाकरणो वैयाकरणरूपः प्रकृत्यर्थस्य चेह साद्गुण्यं प्रशं-
सा भवति वृषलरूपोऽयम् यः पलाण्डुं सुरां पिबति चोररूपः दस्युरूपः निरुः चेत

भवतीति पचतिरूपम् पचतोरूपम् पचंतिरूपम् क्रियाप्रधानमाख्यातमिति
कावा क्रियेति निरूपणप्रत्ययांनाद्विवचनबहुवचनेन भवतः नपुंसकलिंगेन भव
ति लोकाश्रयत्वाल्लिंगस्य ईषदसमाप्तौ कल्पब्देश्यदेशीयरः संपूर्णता पदार्था
नां समाप्तिः लोकेनासंपूर्णता ईषदसमाप्तिः प्रकृत्यर्थविशेषणंचैतत् ईषद
समाप्तिविशिष्टेर्थे वर्त्तमानात्स्याद्यंतात्तिङन्ताच्च कल्पप् देश्यदेशीयर् इत्येते
प्रत्यया भवंति ईषदसमाप्तः पटुः पटुकल्पः मृदुकल्पः पटुदेश्यः मृदुदेश्यः पटु
देशीयः मृदुदेशीयः तिङन्तेभ्य पचतिकल्पंजल्पतिकल्पम् विभाषासुपोबहुच्
पुरस्तात्तु ईषदसमाप्तिविशिष्टेर्थे वर्त्तमानात्सुबन्ताद्विभाषा बहुच् प्रत्ययो भव
ति सच पुरस्तादेव न परः विकल्पग्रहणमेतोदाहरणार्थम् ईषदसमाप्तः पटुः बहुपटुः बहु
मृदुः बहुगुडोद्राक्षा विभाषावचनात्कल्पबादयो भवंति सुग्रहणम् तिङन्तान्मा
भूदिति प्रकारवचने जातीयर् सामान्यस्य भेदको विशेषः प्रकारः तस्य वचने
वर्त्तमानाज्जातीयर्प्रत्ययो भवति स्वार्थे प्रकारवतिचायंप्रत्ययो न प्रकारमात्रे याल

ॐ॰ काप्र॰ ३ ५५

प्रत्यययोः पुनः प्रकारमात्रएवभवति पटुप्रकारः पटुजातीयः मृदुजातीयः
शोभनजातीयः शाणिवाल्कः इवेप्रकृतौनानिनिवर्त्स्यति प्रयोगतस्मादिवसेष्या
श्वनाधातिनकृर्थेमनुक्रमिष्यामः कप्रत्ययस्तेपिकृतोवेदितव्याः वत्स्यति अज्ञा
तोश्वः श्वश्वकः गर्दभकः निरुक्तादयंप्रत्ययोनेष्यते अकनिष्यते निरु-चेत्यनुवर्त्त
म् उत्तरत्रैवमेवइहनीयते अव्ययसर्वनाम्नामकः प्राक्टेः निरुक्तेति अव्ययसर्व
नाम्नामकः प्राक्टेः अव्ययानांसर्वनाम्नांचप्रागिवादर्थेकः प्रत्ययोवेदितव्यः
सचप्राक्टेः नयदः कस्मादपवादः उच्चकैः नीचकैः सर्वकेविश्वके उभयके प्रातिप
दिकात्सुपइतिच द्वयमपीहानुवर्त्तते तत्राभिधानतोऽव्ययस्याक्वचित्प्रातिपदि
कस्यप्राक्टेरकः प्रत्ययः भवति क्वचित्सर्यन्तस्य युष्मकाभिः अस्माकाभिः युष्म
काम अस्मकाम युवकयोः आवकयोरित्यत्र प्रातिपदिकाद्यन्तयकामयका त्वय
कि मयकि इत्यत्र सर्यन्तस्य अकः प्रकरणेत्तूष्णीम्: कांप्रत्ययोवक्तव्यः तूष्णीका
मास्ते तूष्णींकांतिष्ठति शीलेकोमलोपश्चवक्तव्यः तूष्णींशीलः तूष्णीकः निरु॰

श्रुतिप्रकृतमव्ययसंबध्यते पचतकि जल्पतकि कस्यचित्‌ ककारोन्तस्यप्रातिप
दिकस्यकः प्रत्ययः तन्मध्येयोगेनचकस्यदकारस्यादेशोभवति चकारः सन्नि
योगार्थः मामकाश्चेहाव्ययग्रहणमनुवर्तते नसर्वनामग्रहणम् ककारोन्तस्य
सर्वनाम्नोसंभवात् यिकृ यकिन् हिरुक् हिरुकन् पृथक् पृथकन् अज्ञातो
अज्ञातविशेषः अज्ञातः अज्ञाततोपाधिकेर्थेवर्तमानात्प्रातिपदिकात्तिङन्तस्य
यथाविहितेप्रत्ययोभवति स्वेनरूपेणाज्ञातेनपदार्थोविशेषरूपेणाज्ञातेप्रत्ययवि
धानमेतत् कस्यायमश्वइतिमम्यामिसंबंधेनाज्ञातेश्वप्रत्ययः अश्वकः गर्दभ
कः उष्ट्रकः एवमन्यत्रापियथायोगमज्ञाततापिविज्ञेया उच्चकैः नीचकैः विश्व
के पचतकि जल्पतकि कुत्सिते कुत्सितेनिंदितेगर्हितम् प्रकृतिविशेषणमे
वैतत् कुत्सितत्वोपाधिकेर्थेवर्तमानात्सोर्थेयथाविहितेप्रत्ययोभवति कुत्
सितोश्वोश्वकः उष्ट्रकः उच्चकैः नीचकैः सर्वके विश्वके पचतकि जल्पतकि
मेनायोकन् कुत्सितस्मेव कुत्सितत्वोपाधिकेर्थेवर्तमानात्प्रातिपदिकात्

ॐ॰
कात॰
३५९

कप्रत्ययो भवति कस्यापवादः नदैनेनवेलेन्त्यागम्यते शूद्रकः याचकः प्रोक ॥
अनुकम्पायाम् काकाप्यलाभ्युपपत्तिः परस्यानुकंपातस्यागम्यमानायांस
धैनामिसंज्ञायां यथाविहितं प्रत्ययो भवति पुत्रकः वत्सकः दुर्बलकः बुभु
क्षितकः स्वपितकि सुसितकि नीतौ च तद्युक्तात् सामदानादिरुपायो नी
तिः नीतौ च गम्यमानायां तद्युक्तादनुकम्पायुक्ताद्यथाविहितं प्रत्ययो भवा
ति हन्त ते धानकाः हन्त ते गुडकाः हन्त ते तिलकाः एहकि अहकि अनुकम्प्य
मानो दानेनाराधयति सर्वेषामप्यन्वासमन्तादनुकंपायामेवं वाऽनुकंप्यमानादेवा
प्रत्ययो विहितः संज्ञालिङ्गाद्विहितादपि यथायुक्तादिति वचनम् बह्वचो मनुष्य
नाम्नष्ठज्वा अनुकंपायां नीतौ च तद्युक्तादिति चानुवर्तते बह्वचः प्रातिपदि
कान्मनुष्यनामधेयाट्ठोठः प्रत्ययो भवति अनुकंपायां गम्यमानायाम् नी
तौ च देविकः देवदत्तकः यज्ञिकः यज्ञदत्तकः बह्वच इति किम् दत्तकः गुप्त
कः मनुष्यनाम्न इति किम् भद्रबाहुकः भद्रबाहुकः वनिल्लौच अवक

पायांनीतौचनघुक्कात बह्वचोमनुष्यनाम्नष्ठजितिसर्वमनुवर्त्ततेपूर्वेणाठचिविक
कल्पेप्राप्तेवचनम् बह्वचोमनुष्यनाम्नः घन इलच् इत्येतौप्रत्ययौभवतः चका
राद्यथाप्राप्तंच देवियः देविलः देविकः देवदत्तकः यज्ञियः यज्ञिलः यज्ञिकः य
ज्ञदत्तकः प्राचामुपादेरडज्वुचौच पूर्ववत्सर्वमनुवर्त्तते उपशब्दआदिःयस्य
तस्मादुपादेःप्रातिपदिकाद्बह्वचोमनुष्यनाम्नोडच् वुच् इत्येतौप्रत्ययौ चकाराद्घ
निलचौचटश्चउपडः उपकः उपियः उपिलः उपिकः उपेन्द्रदत्तकः प्राग्ग्रह
णंपूजार्थम् वेत्येवानुवर्त्तते जातिनाम्नः कन् बह्वचइतिनानुवर्त्तते सामान्येन
विधानम् जातिशब्देभ्योमनुष्यनामधेयाव्याघ्रः सिंहइत्येवमादिभ्यस्तस्मादनुकम्पा
यामन्यस्मात्रायांनीतौचकन्प्रत्ययोभवति व्याघ्रकः सिंहकः करभकः वाव
वनानुवृत्तेर्यथादर्शनमन्येपिप्रत्ययाभवन्ति व्याघ्रिकः सिंहिकः नामग्रहणंस्व
रूपनिवृत्त्यर्थम् अजिनान्तस्योत्तरपदलोपश्च कनित्यनुवर्त्तते मनुष्यनाम्नश्चे
तिच अजिनशब्दान्तात्प्रातिपदिकान्मनुष्यनाम्नोनुकंपायांकन्प्रत्ययोभवति

ग्रं· का वृ· ३९

नस्योत्तरपदलोपः वाचाजिननाम्नः कश्चिद्दिशः सोनुकेपि लोवाघ्रकः सिंहकः ।
कूर्मकः यानाद्याः पूर्वे द्वितीयादचः लोपः इत्यनुवर्त्तते अभिन्यकरोणोपेठ अजा
दिस्वरप्रत्ययः नामि वा नः द्वितीयादचः ऊर्ध्वं यत्कृत् पूर्वं तस्य लोपो भवति ऊर्ध्वग्रह
णं सर्वलोपार्थम् अनुकंपितो देवदत्तो देविकः देवियः देविलः यत्तिकः यत्तियः
यत्तिलः उपड़ः उपकः उपियः उपिलः उपिकः वयहणमुत्तरद्वितीयपत्रेकत्रियाना
र्थम् अजादित्वनाणादिमांपितिकवदप्रसंगः वायुदत्तो वायुकः पितृदत्तः पितृक
वत्सयोरचऊर्ध्वलोपो वक्तव्यः बृहस्पतिदत्तः बृहस्पतिकः बृहस्पतिलः अनत्तादेवि
भाषालोपो वक्तव्यः देवदत्तकः देवकः यत्तदत्तकः यत्तकः लोपः पूर्वपदस्य वा
नादौ वन्तादौ वक्तव्यः दत्तिकः दत्तियः दत्तिलः दत्तकः विनापि प्रत्ययेन पूर्वोत्त
रपदयोर्विभाषालोपो वक्तव्यः देवदत्तो दत्तः देव इति वा उवर्णान्तात् इलस्य च भा
नुदत्तो भानुलः वसुलः चतुर्थ्यादनन्तरोचलोपः पूर्वपदस्य च अप्रत्यये तथैवेष्यते उव
र्णात् इलस्य च द्वितीयादचो लोपे सन्ध्यक्षरद्वितीयत्वे तदादेर्लोपवचनम् कहोडः कं

फिलः लहोडङ्गुलिदत्तः एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः वागाशीर्दत्तो
वाचिकः त्वचिकः स्रुचिकः कणे षडङ्गुलिः षडिकः षष्ठाजादिवचनात्सिद्धम् शे
वलसुपरिविशालवरुणार्यमादीनां तृतीयात् शेवलसुपरिविशाल अर्यम
न् इत्येवमादीनां मनुष्यनाम्नां ठाजादौ प्रत्यये परतस्तृतीयादचः ऊर्ध्वं लोपो भवति
पूर्वस्यापवादः अनुकम्पितः शेवलदत्तः शेवलिकः शेवलिकः विशालयः विशा
लिलः वरुणिकः वरुणियः वरुणिलः अर्यमिकः अर्यमियः अर्यमिलः शेवलादी
नां तृतीयात्प्रागकृतसन्धीनामिति वक्तव्यं शेवलयिकः सुपरिकः इति मा भूत् अल्पे
परिमाणापचये अल्पशब्दः प्रकृतिविशेषणं चैतत् अल्पविशिष्टेऽर्थे वर्तमानात् य
थाविहितं प्रत्ययो भवति अल्पं तैलम् तैलकम् घृतकम् सर्पिष्कम् विषकम्
उच्चकैः नीचकैः पचतकि ह्रस्वे दीर्घत्वप्रतियोगी ह्रस्वः ह्रस्वविशिष्टेऽर्थे वर्तमा
नात् यथाविहितं प्रत्ययो भवति वृक्षकः प्लक्षकः स्तम्भकः संज्ञायां कन् ह्रस्व
इत्येव ह्रस्वत्वे संज्ञायां तस्यां गम्यमानायां कन्प्रत्ययो भवति पूर्वस्यापवादः

ॐ
काः
३६२

वेणुकः वेत्रकः नडकः नडीशमीशुण्डाभ्यो रः इत्यत्रैव देशे ग्रहणं नानुवर्त्त-
ते सामान्येन विधानम् नडीशमीशुण्डाशब्देभ्यो रप्रत्ययो भवति इत्यनेनैव घोमकस्या-
पवादः इत्याह नडीरः नडीरः शमीरः शुण्डारः स्त्रीत्वेऽपि पुंलिङ्गता लोकाश्रय-
त्वाल्लिङ्गस्य ऊर्णाद्युपच इत्यत्रैव ऊर्णाशब्दात् इत्यनेन घोमको युः प्रत्ययो भवति
कस्यापवादः इत्याह ऊर्णायुः ऊर्णा पशूनां चर्ममये स्नेहभाजनस्यार्थेन ऊर्णायुरिम्यावा-
पनस्याख्या कामगोलीभ्यः श्रुव इत्यत्रैव कामगोलीशब्देभ्यो भ्रूः प्रत्ययो भ-
वति इत्यनेन घोमकस्यापवादः गकारो ऽघोषः इत्याह कामभ्रूः कामसन्धीमाणीनवी
कामभ्रूर्भिमाक्रियायुपविशेष उच्यते वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे इत्यत्रैव निर्दि-
ष्टेषु वत्सउक्षअश्वऋषभशब्देभ्यः तनुत्वेऽपापि केषां वर्तमानेभ्यः स्वार्थे तरः प्रत्य-
यो भवति यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशस्तस्य तनुत्वे प्रत्ययः वत्सतरः उक्ष-
तरः अश्वतरः ऋषभतरः प्रथमवयाः वत्सः तस्य तनुत्वे द्वितीयवयःप्राप्तिः गर्दभे-
नाश्वायामुत्पन्नो ऽश्वः तस्य तनुत्वम् अपित्वकता श्रन्तस्य मः तस्य तनुत्वे भारवह

वेमंदष्टर्भक्तिना किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् किंयत् तत् इत्येतेभ्यः प्रा
तिपदिकेभ्यो द्वयोरेकस्य निर्धारणे गम्यमाने डतरः प्रत्ययो भवति निर्धार्यमाण
वाचिभ्यः स्वार्थे प्रत्ययः जातिगुणक्रियया संज्ञाया वा समुदायादेकदेशस्या
पृथक्करणं निर्धारणम् कतरो भवतोः कठः कतरो भवतोः कलापः कतरो भ
वतोः पटुः कतरो भवतोः पाचकः कतरो भवतोः देवदत्तः यतरो भवतोर्देवदत्तः
ततरश्चागच्छतु महाविभाषया प्रत्ययो विकल्प्यते को भवतोर्देवदत्तः यो भवतो
देवदत्तः स आगच्छतु निर्धारणे इति विषयनिर्देशः द्वयोरिति समुदायान्निर्धार
णविभक्तिः एकस्येति निर्धार्यमाणनिर्देशः वा बहूनां जातिपरिप्रश्ने डतमच्
किंयत्तदः इति वर्त्तते निर्धारणे एकस्येति च बहूनामिति निर्धारणषष्ठी बहूना
मध्यादेकस्य निर्धारणे गम्यमाने जातिपरिप्रश्नविषयेभ्यः किमादिभ्यो वा डत
मः प्रत्ययो भवति कतमो भवतां कठः यतमो भवतां कठः ततम आगच्छतु
वावचनमकजर्थम् यको भवतां कठः सक आगच्छतु यतो महाविभाषा वा प्र

ॐ.
कात्र
३६३

न्यविकल्पार्थोनुवर्त्तते यतकोभवतांकठः योभवतांकठः मग्रागस्त्रतञ्जाति
परिप्रश्नइतिकिम् कोभवतांदेवदत्तः परिप्रश्नग्रहणंकिमय्यवविशेषणंनयथा
तदेभसंभवात् जातिग्रहणंनमैवं संवक्ष्यते किमोस्मिन्विषयेडतरचमपीष्य
ति कतरोभवतांकठः कतमोभवतांकलापइति तत्रकतरकतमौजातिपरिप्र
श्नइतिवचनात्सिद्धम् एकाच्चप्राचाम् एकशब्दात्डतरच् डतमच् इमौप्र
त्ययौभवतः तस्मिन्विषयेप्राचामाचार्याणांमतेन चकारोडतरचोनुकर्षणा
र्थः द्वयोर्निर्धारणेडतरच् बहूनांनिर्धारणेडतमच् जातिपरिप्रश्नइतिनानुव
र्त्तते सामान्येनविधानम् एकतरोभवतोर्देवदत्तः एकतमोभवतांदेवदत्तः
प्राग्ग्रहणंपूजार्थम् विकल्पोनुवर्त्ततएव प्रवर्त्तयोगकन् प्रवदिष्यतेयत
तद्वलेपाणाम् तस्मिन्वर्त्तमानात्प्रातिपदिकात्स्वार्थयोभवति स्वार्थोपाक
णाकेननामधेयंगाविनः पालिकाकेननामधेयंगाविनः पराक्रान्तार्थेयड्पादीय
तेनदिहोदाहृणाम् पत्रनःस्वयमेवकल्पितंतत्रकल्पितंअन्येनेनकप्रत्ययोभ

वति देवदत्तकोयज्ञदत्तकइतिशाणिगीयस्यप्रयोगोवाधिः इवेप्रतिकृतौ कन्नि
मित्तवर्तिने इवे इवार्थेयत्प्रातिपदिकंवर्ततेतस्मात्कन्प्रत्ययोभवति इवार्थः।
सादृश्यम् तस्यविशेषणंप्रकृतिग्रहणम् प्रतिकृतिः प्रतिरूपकः प्रतिछन्द
कम् अश्वइवायमश्वप्रतिकृतिः अश्वकः उष्ट्रकः गर्दभकः प्रतिकृताविति कि
म् गौरिवगवयः संज्ञायाम् इवेप्रत्ययवर्तते कन्निति इवार्थेगम्यमाने
कन्प्रत्ययोभवति समुदायेनचेत्संज्ञागम्यते अप्रतिकृत्यर्थआरंभः अश्वस
दृशस्यसंज्ञा अश्वकः उष्ट्रकः गर्दभकः लुम्मनुष्ये संज्ञायामित्येवसंज्ञायांवि
हितस्यकनोमनुष्येभिधेयेलुब्भवति चंचेवमनुष्यश्चंचा वध्रिका दासी खरकु
टीमनुष्यइतिकिम् अश्वकः उष्ट्रकः गर्दभकः देवपथादिगणपाठात्सर्व
थुपेवः जीविकार्थेचापण्ये जीविकार्थेयदपण्यंतस्मिन्नभिधेयेकनोलुब्भ
ति विक्रीयतेयत्तदपण्यम् वासुदेवः शिवः स्कन्दः विष्णुः आदित्यः देवलकानांजी
विकार्थादेवप्रतिकृतयउच्यन्ते अपण्यइतिकिम् हस्तिकान्विक्रीणीतेअश्वकान्

गें
काशि
३९५

यथाकान् वासुदेवकान् विक्रीणीते देवपथादिभ्यश्च ॥ देवपथादिभ्य
श्च इवे प्रतिकृतौ संज्ञायां विहितस्य कनो देवपथादिभ्य उत्तरस्य लुब् भवति अर्चि
षा ह्यः प्रकारोऽयम् आकृतिगणोऽयम् देवपथः वारिपथः ॥ अर्चासु पूजनार्थासु चित्रक
र्मध्वजेषु च इवे प्रतिकृतौ लोपः कनो देवपथादिषु ॥ अर्चासु तावत् शिवः विष्णुः
चित्रकर्मणि अर्जुनः दुर्योधनः ध्वजेषु कपिः गरुडः सिंहः देवपथ वारिपथ
जलपथ हंसपथ राजपथ शतपथ शङ्कुपथ सिंहगति उष्ट्रग्रीवा चामरज्जु हस्त
इन्द्र दण्ड पुष्प मत्स्य ॥ वस्तेर्ढञ् ॥ इवेऽनुवर्तते इतः प्रभृति प्रत्ययः सामा
न्येन भवति प्रतिकृतौ वा अप्रतिकृतौ च वस्तिशब्दाद् इवार्थे ढञ् प्रत्ययो भ
वति वस्तिरिव वास्तेयम् वास्तेयी ॥ शिलाया ढः ॥ शिलाशब्दाद् इवार्थे ढः प्रत्य
यो भवति शिलेव शिलेयं कायम् शिलेयं दधि ॥ केचिद् ढञम् अपीच्छन्ति तेषां
दर्शने योगविभागः कर्तव्यः शिलाया ढञ् प्रत्ययो भवति शैलेयम् ततो ढः शि
लेयम् ॥ शाखादिभ्यो यत् ॥ शाखा इत्येवमादिभ्यः प्रातिपदिकेभ्य इवार्थे यत्

यो भवति शाखेव शाख्यः मुख्यः जघन्यः शाखामुखजघनशृंगमेघ चरणस
कंद उरस शिरस अग्र शरण इत्येषां भवेत् इत्याशाखादिर्निपात्यते इत्युभिप्रेये
इ शाखादिवार्थे यप्रत्ययो भवति भवः आत्मवान् अभिप्रेतानामर्थानां या
वकृत उच्यते इत्यामयेमाणवकः इत्यामयेरानपुत्रः कुशाग्रात् छः कुशाग्र
शब्दादिवार्थे कप्रत्ययो भवति कुशाग्रमिव सूक्ष्मत्वात् कुशाग्रीया बुद्धिः कु
शाग्रीयं वस्त्रम् समासाच्च तद्विषयात् तदिवेन प्रकृतस्त्वार्थो निर्दिश्यते
इवार्थविषयात् समासात् परस्मिन्निवार्थे छप्रत्ययो भवति काकतालीय
म् अजाकृपाणीयम् अंधकवर्तीयम् अतर्कितोपनतं चित्रीकरणमुच्यते
तत्कथं काकस्यागमनमिव यादृच्छिकं तालस्य पतनम् तेन तालेन पतता का
कस्य वधः एवमेव देवदत्तस्यागमनं दस्यूनां चोपनिपातः तैश्च तस्य वधः तत्र
यो देवदत्तस्य दस्यूनां च समागमः स काकतालसमागमसदृशः इत्येक उपमा
र्थः यश्च देवदत्तवधः स काकवधसदृशः इति द्वितीय उपमार्थः तत्र प्रथमः स

ॐ
काशि.
३९५

मासार्थः द्वितीयः प्रत्ययार्थः समासश्चायमस्मादेवज्ञापकात् बहुव्रीह्यापरेला
तालमस्ति सुप्सुपेति वा समासः सचैवंविषय एव शार्करादिभ्योऽण् शार्करइत्ये
वमादिभ्यः प्रातिपदिकेभ्यः इवार्थे अण्प्रत्ययो भवति शार्कर इव शार्करम् कापा
लिकम् शार्करकापालिकाकपिष्ठकपुंडरीकशतपत्रगोलोमनगोपुच्छनरा
चीनकुलसिकता अंगुल्यादिभ्यष्ठक् अंगुलि इत्येवमादिभ्यः प्रातिपदिकेभ्य इ
वार्थे ठक्प्रत्ययो भवति अंगुलिरिवांगुलिकः भारुजिकः अंगुलि भरुज बभ्रु व
लमंडलमंडरशष्कुलहरिकपिमुनितरुक्रोशखलउदश्वित् गोणी उरस् कुलि
श एकशालाया ठजन्यतरस्याम् एकशालाशब्दादिवार्थे ठच्प्रत्ययो भवति अ
न्यतरस्याम् ग्रहणेनानेन ठक् प्राप्यते एकशालेव एकशालिकः ऐकशालि
कः कर्कलोहितादीकक् कर्कलोहितशब्दाभ्यामिवार्थे ईकक्प्रत्ययो भवति।
कर्कः शुक्लोऽश्वः तेन सदृशः कार्कीकः लौहितीकः स्फटिकः स्वयमलोहितः उ
पाश्रयवशात्तथावभासते प्रत्नपूर्वविश्वेमात्थाल्छन्दसि प्रत्नपूर्वविश्वइम

इत्येतेभ्यः प्रातिपदिकेभ्यः स्वार्थे थाल्प्रत्ययो भवति छन्दसि विषये प्रत्नथा
पूर्वथा विश्वथा इमथा पूगाञ्ञ्योग्रामणीपूर्वात् स्वार्थ इति निवृत्तम् नाना-
जातीया अनियतवृत्तयः अर्थकामप्रधानाः संघाः पूगाः पूगवाचिनः प्रातिपदिका-
दग्रामणीपूर्वात् स्वार्थे ञ्यप्रत्ययो भवति लोहध्वज्यः लोहध्वज्यौ लोहध्वजाः शैब्यः शै-
ब्यौ शिबयः चातक्यः चातक्यौ चातकाः अग्रामणीपूर्वादिति किम् देवदत्तो ग्राम-
णीरेषां देवदत्तकाः यज्ञदत्तकाः व्रातच्फञोरस्त्रियाम् नानाजातीया अनिय-
तवृत्तय उत्सेधजीविनः संघा व्राताः व्रातवाचिभ्यः प्रातिपदिकेभ्यः च्फञन्तेभ्य-
श्च स्वार्थे ञ्यप्रत्ययो भवति अस्त्रियां कापोतपाक्यः कापोतपाक्यौ कापोतपाकाः
व्रैहिमत्यः व्रैहिमत्यौ व्रैहिमताः च्फञः खल्वपि कौञ्जायन्यः कौञ्जायन्यौ कौञ्जाय-
नाः ब्राध्नायन्यः ब्राध्नायन्यौ ब्राध्नायनाः अस्त्रियामिति किम् कपोतपाकी व्रीहि-
मती कौञ्जायनी आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् ॥ आयुध-
जीविनां संघ आयुधजीविसंघः सवाहीके विशेषणं वाहीकेषु य आयुधजीविसं-

ॐ

काश.

२९६

वः तद्वाचिनः प्रातिपदिकादब्राह्मणराजन्यवाचिनात्स्वार्थे ञ्यट् प्रत्ययो भवति ब्राह्मणे
तद्विशेषग्रहणम् राजन्येन सरूपग्रहणमेव टकारो ङीबर्थः तेनास्त्रियामितिना
नुवर्त्तते कौण्डीबृस्यः कौण्डीबृस्यौ कौण्डीबृसाः क्षौद्रक्यः क्षौद्रक्यौ क्षुद्रकाः मालव्यः मा
लव्यौ मालवाः आयुधजीविग्रहणं किम् मल्लाः शयण्डाः संघग्रहणं किम् गोपालवः
ब्राह्मणाः शालङ्कायनाः राजन्याः वृकाट्टेण्यण् आयुधजीविसंघादिति वर्त्तते
वृकशब्दादायुधजीविसंघवाचिनः स्वार्थे टेण्यण् प्रत्ययो भवति टकारो ङीबर्थः
णकारो वृद्ध्यर्थः वार्केण्यः वार्केण्यौ वृकाः आयुधजीविनं संघविशेषणं किम् काम
कोपौ मनुष्याणां वादितारौ वृकाविव दामन्यादित्रिगर्तषष्ठाच्छः आयुधजीवि
संघादित्येव दामन्यादिभ्यः प्रातिपदिकेभ्यः आयुधजीविसंघवाचिभ्यः त्रिगर्तषष्ठे
भ्यः स्वार्थे छः प्रत्ययो भवति आयुधजीविनो षड्वर्गाः तत्र त्रिगर्तवर्गः षष्ठो ये
षां ते त्रिगर्तषष्ठाः इत्युच्यन्ते तेषु वेयमुक्तिः आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्ड
कीक्रोष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जानकिरिति दामन्यादिभ्यस्तावत् दाम

नीयः दामनीयौ दामनयः औलपीयः औलपीयौ औलपीयः त्रिगर्त्तषष्ठेभ्यः खल्व
पि कौण्डोपरथीयः कौण्डोपरथीयौ कौण्डोपरथाः एवं दाण्डकीयः दाण्डकीयौ दाण्डका
यः क्रौष्टुकीयः जालमानीयः ब्रह्मगुप्तीयः जानकीयः दामनिरौलपिर्बैजवापि
औदकि अच्युतन्ति काकदन्ति काकान्दकि शात्रुन्तपि सार्वसेनि बिन्दु तुलभ मौ
ञ्जायन सावित्रीपुत्र पार्श्वादियौधेयादिभ्यामणञौ आयुधजीविसंघादित्येव पार्श्वा
दिभ्यो यौधेयादिभ्यश्च प्रातिपदिकेभ्य आयुधजीविसंघादिभ्यो यथासंख्यमणञौ
प्रत्ययौ भवतः पार्श्वः पार्श्वौ पर्शवः आसुरः आसुरौ आसुराः यौधेयादिभ्यः खा
ल्वपि यौधेयः शौक्रेयः पर्शु असुर रक्षस् वाह्लीक वयस् वसु मरुत् सत्वत् द
शार्ह पिशाच अशनि कार्षापण पार्श्वादिः यौधेय शौक्रेय शौभ्रेय ज्यावानेय मौन्तेय धा
र्तेय ज्यावलेय त्रिगर्त्त भरत उशीनर यौधेयादिः अभिजिद्विदभृच्छालाव
च्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् आयुधजीविसंघादिति विहितम् अभिजि
दादिभ्योऽणन्तेभ्यः प्रातिपदिकेभ्यः स्वार्थे यञ् प्रत्ययो भवति अभिजितोऽपत्यमित्य

ओं. काशि. ३९५

ण. तदेताभ्यो ञ्य. आभिजित्यः आभिजित्यौ आभिजिताः वैदभृत्यः वैदभृत्यौ वैदभृताः

शालावत्यः शालावत्यौ शालावताः शैखावत्यः शैखावत्यौ शैखावताः शामीवत्यः ॥

शामीवत्यौ शामीवताः और्णावत्यः और्णावत्यौ और्णावताः श्रौमत्यः श्रौमत्यौ श्रौमताः

गोत्रप्रत्ययस्याणो ग्रहणमिष्यते आभिजितो मुहूर्त्तः आभिजितः स्थालीपाक इत्य-

त्र न भवति ञ्यादयस्तद्राजाः पूगाञ्ञ्योऽग्रामणीपूर्वादित्यत आरभ्य ये प्रत्यया वि-

हिताः ते तद्राजसंज्ञका भवन्ति तथा चैवोदाहृतम् तद्राजप्रदेशास्तद्राजस्य बहु-

षु तेनैवास्त्रियामित्येवमादयः ॥ इति जयादित्यकृतौ काशिकायां वृत्तौ पञ्चमस्याध्यायस्य तृ-

तीयः पादः श्रीसरस्वतीरूपाय गुरवे नमः ओं दिग्व्याप्तमशीतकिरणाभरणाः श्रियं वो

यस्यान्नमोगमस्तिमिस्फुरदूर्मिपद्मा देवीवशोविरचशाशोककुलाम्पणालविडाशिनी

त्यमसिवन्नभसः पयान ओं पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च पादशब्दान्तस्य

शतशब्दान्तस्य च संख्यादेः प्रातिपदिकस्य वीप्सायां गम्यमानायां वुन् प्रत्ययो भवति

तत्सन्नियोगेन चास्य लोपो भवति यस्येति लोपेनैव सिद्धे पुनर्लोपवचनमनैमित्तिका

पेम यस्येति इलोपः परनिमित्तकः तमस्थानिवद्भावात्पादः पदितियद्भावो न स्या
त् अस्य न नैमित्तिकत्वात्स्थानिवद्भावः द्वौपादौ ददाति द्विपदिकां ददाति त्रिप
दिकां ददाति द्वे द्वे शते ददाति द्विशतिकां ददाति त्रिशतिकां ददाति तद्धितार्थ इ
ति समासः ततः प्रत्ययः स्वभावाश्च प्रत्ययेन वीप्सोक्तेति पादशतस्येति किम् द्वौ
द्वौ माषौ ददाति संख्यादेरिति किम् पादं पादं ददाति वीप्सायामिति किम् द्वौ पा
दौ ददाति द्वे शते ददाति पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात् द्विमोदकि
कां ददाति त्रिमोदकिकां ददाति दण्डव्यवसर्गयोश्च दमने दण्डः दाने व्यवसर्गः दण्ड
व्यवसर्गयोः गम्यमानयोः पादशतान्तस्य संख्यादेः वुन् प्रत्ययो भवति लोपश्च अवी
प्सार्थश्चारंभः द्वौ पादौ दण्डितः द्विपदिकां दण्डितः त्रिपदिकां दण्डितः द्वौ पादौ व्यवसृज
ति द्विपदिकां व्यवसृजति त्रिशतिकां व्यवसृजति स्थूलादिभ्यः प्रकारवचने कन्
स्थूलादिभ्यः प्रातिपदिकेभ्यः प्रकारवचने द्योत्ये कन् प्रत्ययो भवति जातीयरोपवादः प्रका
रो विशेषः स्थूलप्रकारः स्थूलकः अणुकः माषकः इषुकः कन्यकः गोचिंचबृहत्तोकप

ओं
काशि.
३९८

संख्यानम् द्वैवत्यकारः द्वैवत्कः हृदत्यकारः हृदत्कः द्वैवहृदन्तो इति केचित् पठन्ति
तेषां चैव कडन्नुदाहरणम् मूलानाम् माषेषु कुलत्थेषु यवव्रीहिषु इत्तिलवा-
यकालश्चवदानसमायाम् गोमूत्रआच्छादने सुराअहौ जीर्णशालिषु पुत्रमूलेन
मलत्वाख्ये कुमारीपुत्र कुमारीश्वशुरमणि अन्तत्येन गतोक्रान्त अन्यतगतिरिशो
षसेवेयः तदभावो नत्येन गतिः अनत्येन गतो गम्यमानायां क्तो भवत्यानिपदिका
कल्पमयो भवति भिन्नकम् छिन्नकम् अनत्येन गताविति किम् भिन्नम् छिन्न
म् नसामिवचने सामिवचन उपपदे क्तो नान कन्यमयो भवति सामिकृतम् सा
मिभुक्तम् सामिपीतम् वचनग्रहणं पर्यायार्थम् अर्धकृतम् नेमकृतम् सामि
वचने प्रतिषेधानर्थको प्रकृत्यभिहितत्वात् एवं तर्हि ज्ञापयत्यन्यत्र गतो विहि-
तस्य कनः प्रतिषेधः किं तर्हि स्वार्थिकस्य केन पुनः स्वार्थिकन विहितः एवं तर्हि
देववचने ज्ञापकं भविष्यत्स्वार्थिकन प्रत्यय इति तत उपरेत तदुच्यते एवं सूत्रमभिन्न
तरके भवति एतेर्हि विजतरके वाप्यत इत्येवमादि तदुपपन्नं भवति हृदत्याद्या

ञ्छादने कननुवर्त्तितेन प्रतिषेधः बृहतीशब्दाच्छादने वर्त्तमानात् स्वार्थे कन्प्रत्य
योभवति बृहतिका आच्छादनइतिकिम् बृहतीछन्दः अषडक्षाशितंग्वलंकर्म्मा
लम्पुरुषाध्युत्तरपदात्खः अषडक्षः आशितंगु अलंकर्म्मन अलम्पुरुष इत्येतेभ्यः
प्रातिपदिकेभ्यः अध्युत्तरपदाच्च स्वार्थे खप्रत्ययोभवति अविद्यमानानिषडक्षीण्य
स्मिन्निति बहुव्रीहिः ततः खप्रत्ययः अषडक्षीणोमन्त्रः योद्वाभ्यामेवक्रियते न
बहुभिः आशितागावोस्मिन्नरण्ये आशितंगवीनमरण्यम् निपातनात्पूर्वपदा
स्यमुमागमः अलंकर्म्मालम्पुरुषेतिपर्याप्त्योगाल्लानार्थेवनञ्थीतिसमासः अलं
कर्म्मणे अलंकर्म्मीणः अलम्पुरुषायालम्पुरुषीणः अध्युत्तरपदस्तत्पुरुषः आधिशा
ब्दः शौण्डादिषुपठ्यते राजाधीनः ब्राह्मणाधीनः नित्यश्चायंप्रत्ययउत्तरसूत्रे विभाषा
ग्रहणात् अन्येपि स्वार्थिकेषु नित्याः यत्प्रयाइतिसमर्थ्यते उमादयः आककरः स्था
दयः आगतुवः आमादयः आकुमयटः बृहतीजात्मूलाः समासोनास्तीति विभाषाञ्चे
रदिक्स्त्रियाम् अंचेर्न्नात्प्रातिपदिकाददिक्स्त्रियांवर्त्तमानात्स्वार्थेविभाषाखप्र

त्ययो भवति प्राक् प्राचीनम् प्रत्यक् प्रतीचीनम् अवाक् अवाचीनम् अदिक्स्त्रि
यामिति किम् प्राचीदिक् प्रतीची उदीची दिगग्रहणं किम् प्राचीना ब्राह्मणी अवा
चीना शिखा स्त्रीग्रहणं किम् प्राचीनं दिग्गमणीयम् उदीचीनं दिग्गमणीयम् जा
तेनाम्नश्चेद्बहुत्वे जातिशब्दान्नाम्नः प्रातिपदिकाद्बहुत्वे वर्तमानान्नश्च प्रत्ययो भवति ।
बहुत्वेस्मिन्जातिरिति बहुशब्देन द्रव्यमुच्यते येन ब्राह्मणादिजातिरुच्यते त
द्बहुद्रव्यम् ब्राह्मणजातीयः क्षत्रियजातीयः ब्राह्मणादिरेवोच्यते बहुत्वमिति कि
म् ब्राह्मणजातिः शोभते स्थानान्ताद्विभाषा सस्थानेनेति चेत् स्थानशब्दान्तात्
प्रातिपदिकाद्विभाषा छप्रत्ययो भवति सस्थानेनेति चेत् सस्थानेन तुल्यश्चेद्भव
ति सस्थान इति तुल्य उच्यते समानेस्थानमस्येति कृत्वा पितृतुल्यः पितृस्थानी
यः पितृस्थानः मातृस्थानीयः मातृस्थानीयः राजस्थानीयः राजस्थानः सस्थाने
नेति किम् गोस्थानम् अश्वस्थानम् इति कृतोपाविकल्पार्थः तेन बहुव्रीहिः सस्था
शब्दार्थमुपस्थापयति ततस्तत्पुरुषः वेषाहः संबन्धार्थः स्यादि विभाषयोर्मध्ये नित्या

विग्रुपइतिपूर्वसूत्रेतिमाः प्रत्ययः किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे किमए
कारांतात्तिङः अव्ययाच्चयोघविहितोघः सकिमेत्तिङव्ययघः तदंतात्प्रातिपदिका
द्द्रव्यप्रकर्षे आमुप्रत्ययोभवति यद्यपिद्रव्यस्यस्वतः प्रकर्षोनास्ति तथापिक्रि
यागुणाभ्यां प्रकर्षः यदाद्रव्यउपचर्यते तदायंप्रतिषेधः क्रियागुणयोरेवप्रक
र्षप्रत्ययः किंतरां किंतमाम् पचतितराम् पूर्वाह्णेतराम् पूर्वाह्णेतमाम् तिङः पच
तितराम् पचतितमाम् अव्यय उच्चैस्तराम् उच्चैस्तमाम् अद्रव्यप्रकर्षइतिकि
म उच्चैस्तरः उच्चैस्तमः अमुचछंदसि किमेत्तिङव्ययघादद्रव्यप्रकर्षेअमुप्रत्य
योभवति छंदसिविषये चकारादामश्च प्रतरन्नयामः प्रतरान्नयामः स्वादि
ष्वम् आमितिपठ्यते तस्मान्नदंतस्याव्ययत्वम् अनुगादिनष्ठक् अनुगादिशब्दा
त्स्वार्थेठक्प्रत्ययोभवति आनुगादिकः णचः स्त्रियामञ् कर्मव्यतिहारे
णः स्त्रियामितिणः प्रत्ययोविहितस्तदंतात्स्वार्थेञ्प्रत्ययोभवति स्त्रियांविषये।
व्याक्रोशीव्यावलेखीव्यावहासी वर्तते स्त्रीग्रहणंकिम् यावताणः स्त्रियामेवविहि

ॐ॰
का॰
३२१

ततस्ततः स्वार्थिकस्तेभ्यो भविष्यन्ति एवं तर्हि तज्ज्ञापयति स्वार्थिकाः प्रत्ययाः प्रकृति
तो लिंगवचनान्यनुवर्तन्ते पीतिकेन गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना देवपदे
वतेत्येवमाद्युपपन्नं भवति श्रुणिलुगः श्रोभिवियोभावइत्नुणिविहितस्तदन्तात्
स्वार्थेऽण्प्रत्ययो भवति सांकूटिनं वर्तते सांराविणम् सांमार्जिनम् विसारिणो
मत्स्ये विसरतीति विसारी विसारिशब्दात् स्वार्थेऽण्प्रत्ययो भवति मत्स्येऽभिधेये
वैसारिणो मत्स्यः मत्स्य इति किम् विसारी देवदत्तः संख्यायाः क्रियाभ्यावृत्तिगणा
ने कृत्वसुच् संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः कृत्वसुः प्रत्ययो भव
ति पौनःपुन्यमभ्यावृत्तिः एककर्तृकाणां तुल्यजातीयानां क्रियाणां जन्मसं
ख्याने क्रियाभ्यावृत्तिगणनम् तत्र प्रत्ययः पंचकृत्वो भुंक्ते षट्कृत्वः सप्तकृत्वः
संख्याया इति किम् भूरिवारान् भुंक्ते प्रभूतान्वारान् भुंक्ते क्रियाग्रहणं किम्
यावताभ्यावृत्तिः क्रियाया एव संभवति तद्द्रव्यगुणयोः उन्नवार्थं क्रियाग्रह
णम् एकस्यां मत्कुणेन भवति पैषेवं गन्यातेनाभ्यावृत्तिरसंभवात् पंचपाकाः दृषा

पाकृः गणनग्रहणं किम् यावता संख्या गणनानान्निमिकेव क्रियमाणे गणना-
ग्रहणे क्रियाभ्यावृत्तेर्भवति मानेभ्यः संख्येयवचनेभ्यपि प्रत्ययः स्यात् पञ्चवारान्
भुंक्ते पञ्चकृत्वो भुंक्ते इति इह न स्यात् पञ्चवारा गणो भुंक्ते पञ्चकृत्वो भुंक्ते इति ना-
हत्याभ्यावृत्तेर्गणनशब्दः संख्यानमात्रवृत्तित्वात् गणनग्रहणात् सर्वत्र सिद्धं भव-
ति द्वित्रिचतुर्भ्यः सुच् द्वित्रिचतुर् इत्येतेभ्यः संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने
सुः प्रत्ययो भवति कृत्वसुचोपवादः द्विर्भुंक्ते त्रिर्भुंक्ते चतुर्भुंक्ते चकारः स्वरार्थः
एकस्य सकृच्च एकशब्दस्य सकृदित्ययमादेशो भवति सुच्च प्रत्ययः क्रियाग-
णने अभ्यावृत्तिरिह न संभवति सकृद्भुंक्ते सकृदधीते एकपाक इत्यत्राना-
भिधानान्न भवति विभाषा बहोर्धा विप्रकृष्टकाले बहुशब्दात् क्रियाभ्यावृत्ति-
गणने विभाषा धा प्रत्ययो भवति कृत्वसुचोपवादः पक्षे सोपि भवति अविप्रकृ-
ष्टकालग्रहणं क्रियाभ्यावृत्तिविशेषणम् क्रियाणाम् अभ्यावृत्तिश्चेदासन्नकाला
भवति नविप्रकृष्टकालः बहुधा दिवसस्य भुंक्ते बहुकृत्वो दिवसस्य भुंक्ते नव्य

ॐ॰ काशि॰ ३७२

कृतवचने मयट् तदिति प्रथमासमर्थविभक्तिः प्राचुर्येण प्रस्तुतं प्रकृतम् प्र
थमासमर्थात्प्रकृतोपाधिकेर्थे वर्तमानात्स्वार्थे मयट्प्रत्ययो भवति टकारो
ङीबर्थः अन्नप्रकृतमन्नमयम् अपूपमयम् यवागूमयी अपरे पुनरेवं सूत्रा
र्थमाहुः प्रकृतमुच्यतेस्मिन्निति प्रकृतवचनः तदिति प्रथमासमर्थात्प्रकृतव
चनेभिधेये मयट्प्रत्ययो भवति अन्नं प्रकृतमुच्यतेस्मिन्नन्नमयो यज्ञः अपूपम
यं पर्वं वटकमयी यात्रा उभयथा सूत्रप्रणयनादुभयमपि प्रमाणम् समूहवच्च
बहुषु तत्प्रकृतवचन इत्येव बहुषु प्रकृतेषूच्यमानेषु समूहवत्प्रत्यया भवंति
चकारान्मयट् च मोदकाः प्रकृताः प्राचुर्येण प्रस्तुताः मोदकिकम् मोदकमय
म् शाष्कुलिकम् शष्कुलीमयम् अतिवर्तन्तेपि स्वार्थिकाः प्रकृतितो लिंगवचा
नानि द्वितीये सूत्रार्थे मोदकाः प्रकृता अस्मिन्मोदकिको यज्ञः मोदकमयः शाष्कु
लिकः शष्कुलीमयः अनन्तावसथेतिहभेषजाञ्ञ्यः अनन्तादिभ्यः शब्देभ्यः स्वार्थे
ञ्यप्रत्ययो भवति अनन्तमेवानन्त्यम् आवसथ्यम् ऐतिह्यम् निपातनसमुदायो॥

मपदेशापारंपर्येवर्तते भेषजमेव भेषज्यम् महाविभाषयोविकल्पितप्रत्यय ः
देवतेनाज्ञादर्थेयत् देवताशब्दोनात्मानिपादिकाश्चतेथी समर्थाज्ञादर्थेय
तप्रत्ययोभवति तदर्थेयवनादर्थ्यम् वातवेगणादिनातन्नम् स्वार्थेतद्धितप्र
त्ययोनिर्दिश्यते अग्निदेवतायैइदमग्निदेवत्यम् पादार्घाभ्यांच तादर्थ्ये इत्ये
व पादार्घशब्दाभ्यांचतेथी समर्थाभ्यांतादर्थ्येभिधेयेयत् प्रत्ययोभवति पादार्थ
मुदकम् अर्घ्यम् अतुक समस्त्र्याधिः वकारः यष्यादर्शनमन्यत्रापि प्रत्ययोभ-
वति यथैवसमदर्शात्तानाछेदस्योः वस्त्र अपम् ठोककविदितेमवृषम् निष्केवल
उत्क्रमनर्थेव नव स्वर मेतद्यविष्ठ इत्येतेभ्यः छेदरिस्वार्थेभवति अग्निरीषाव-
मवास्य अपमेपवमानः हिनीयावहूवृचनस्यलक् अपेवपवमानदत्यार्थः स्व
नोवाः कवोसि हेमममध्यवस्यनिवाजयुवेचस्यः निष्केवल्पशंसति नकवाषाम
तिजन्यत्वाभिः पूर्व्यादिपाः स्तोमैर्जेनयापिवाम् सूर्यः मंत्रः यविष्ठः आमघ्याय
ाामघ्यपुजिकेत्सुनतंसाव्यानम् समथाह्वादवतोषप्रत्ययोवक्तव्यः नूतनम् नूतने

ॐ॰
कात॰
३७२

नवीनम् नश्च पुराणे प्रात् पुराणे वर्तमानात् प्रशब्दात् नप्रत्ययो भवति वकारा
न्तप्तनखाश्च प्रत्नम् प्रणम् प्रतनम् प्रीणम् भागरूपनामभ्यो धेय प्रत्ययो वक्तव्यः
भागधेयम् रूपधेयम् नामधेयम् मित्राच्छन्दसि मित्रधेये यतश्च आग्नीध्रसाधार
णादञ् आग्नीध्रम् साधारणम् स्त्रियां ङीप् आग्नीध्री साधारणी वा प्रकरणाद्धि
कल्पन्ते यतानुपमेयानामाप्तितनयथाग्राममपि भवति आग्नीध्रशाला साधा
रणा भूमिः अवयसमर्थकज्ञाच्छन्दस्यञ्च वक्तव्यः अवयसं नेमाकं तेषावम् ॥
अतिथेर्ण्यः नाटकाद्धेयश्च अतिथिशब्दात् तदर्थे समर्थात् नाटकाद्धेयेभ्यो यस्मिंप्र
त्ययो भवति आतिथ्यं धेमानिष्याम् देवात्तल् नाटध्यं इति निरुक्ते देवशब्दात्
स्वार्थे तल्प्रत्ययो भवति देवयदेवता अवेः कः अविशब्दात् स्वार्थे कःप्रत्ययो
भवति अविरेवाविकः यावादिभ्यः कन् यावादिभ्यः प्रातिपदिकेभ्यः
स्वार्थे कन्प्रत्ययो भवति यावायवयावकः यावमणिश्रुमिलानसपीनमनडुद्
नावनभीने पशौलूनवियाते अणुनिपुणोपुत्रकृत्रिमे अणप्ल्यानवेदसमासे

शून्य रिक्ते दान कुत्सिते तनु सूत्रे ईयसश्च ज्ञात अज्ञात कुमारीक्रीडनकानि
च लोहितान्मणौ लोहितशब्दान्मणौ वर्त्तमानात् स्वार्थे कन् प्रत्ययो भवति
लोहितको मणिः मणाविति किम् लोहितः वर्णे चानित्ये अनित्ये वर्णे वर्त्तमा
नाल्लोहितशब्दात्कन् प्रत्ययो भवति लोहितकः कोपेन लोहितकः पीडनेन अ
नित्य इति किम् लोहितो गौः लोहितो रुधिरं लोहिताल्लिंगबाधनं वेति वक्तव्यम्
लोहिनिका लोहितिका कोपेन रक्ते लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन् प्र
त्ययो भवति लोहितकः पटः लोहितकः कंबलः लिंगबाधनं वेष्यत एव लोहितिका
शाटी लोहिनिका शाटी कालाच्च वर्णे चानित्ये रक्त इति च द्वयमप्यनुवर्त्तते का
लशब्दादनित्ये वर्णे वर्त्तमानाद्रक्ते च कन् प्रत्ययो भवति कालकं मुखं वैलक्ष्येण
न कालकः पटः कालिका शाटी विनयादिभ्यष्ठक् विनय इत्येवमादिभ्यः प्राति
पदिकेभ्यः स्वार्थे ठक् प्रत्ययो भवति वैनयिकः सामयिकः औपयिकः
विभाषा प्रकरणादिह कल्प्यते प्रत्ययः विनय समय उपाय ह्रस्वत्वं च संगति का

ओं
काता
३२३

घोषित अकस्मात उपचार समाचार व्यवहार संप्रदान समुत्कर्ष समूह वि
शेष प्रत्यय वाचो व्याहृतार्थायाः व्याहृतो ऽर्थो यस्या वाचस्तस्या वर्तमानाद्वा।
कष्टात्स्वार्थे ठक् प्रत्ययो भवति पूर्वमन्येनोक्तत्वात् संदेशवाक् व्याहृतार्थे
त्युच्यते यदा परेण प्रकाशितार्था वाचमन्यैस्समर्थयति कथयति संदेशाद्रूपे
णानद्वा प्रत्ययः वाचिकं कथयति वाचिकं श्रद्धेते व्याहृतार्थायामिति किम् मधु
रा वाचं वदत्यस्य न्यूयुक्तानकर्मणोः व्याहृतार्थायां वाचायतनकर्मयुक्तेनत्वभि
धायिनः कर्मणष्ठात्स्वार्थे ण प्रत्ययो भवति कर्मैवकार्मणम् वाचिकं कृत्वा नयै
वयत्नकर्म क्रियते तत्कार्मणमित्युच्यते अणप्रकरणे कुलालवरुडनिषाद
चण्डालमित्रामित्रेभ्यश्छन्दस्युपसंख्यानम् कुलालस्यायं कौलालः वारुडः नैषा
दः चाण्डालः मैत्रम् आमित्रः सान्नाय्यानुजावरानुषूकचातुष्प्राश्यराक्षोघ्नवैया
त वैकृत वारिवःकृताग्रायणाग्रहायणसांतपनानीतानि भाषायां च निपात्यन्ते॥
ओषधेरजातौ ओषधिशब्दाद्जातौ वर्तमानात्स्वार्थे ण प्रत्ययो भवति ओषधं पि

वति अज्ञाताविति किम अश्वकः हे इत्येते का भवंति अज्ञादिभ्यश्च प्रज्ञानातीति
प्रज्ञः प्रज्ञ इत्येवमादिभ्यः प्रातिपदिकेभ्यः स्वार्थे अण्प्रत्ययो भवति प्रज्ञ एव प्रा-
ज्ञः प्राज्ञी स्त्री यस्यास्तु प्रज्ञा विद्यते प्रज्ञा सा भवति प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः इति
विद भिन्न उपपद्यते विदेः शतृंतस्य ग्रहणम् विदेः शतुर्वसुरिति प्रज्ञ एव ज्ञाय
कानस्यापि क्रियावन्नादेशः अन्यतरस्यां ग्रहणाद्वानत्वानुवर्तते तयोस्तातनाशि
ष्यन्यतरस्यामिति अनुवर्तते अणिक् उशिज् उष्णिह् अञ्जल विदन् घोडन विद्यामा
नस् शौचशरीर मद्रतन्तक्षमयो विक्रीडिति चौर शाब्दयोपचलस्थ वस्त्र मक्तव
क्षेव मनयन दशार्हवसम अमरवन्नम् पिशाच अशनि कार्षापणदेवताबृं
ध मृदस्तिकन मस्वस्वान स्वार्थे तिकन प्रत्ययो भवति विकल्पः सर्वत्रानुवर्त
ते मृदेव मृत्तिका मत्ता प्रशंसायाम प्रशंसायामपि केवर्तमानान्न स्वस्वान
मस्न इत्येतौ प्रत्ययौ भवतः रूपयोपवादः प्रशस्ता मृत्स्ना मृद् मस्न स्वानि नयस्थ
ये प्रत्ययः उत्तरसूत्रे अन्यतरस्यां ग्रहणार्थम वृकज्येष्ठाभ्यां तिल् तातिलौ च छन्दसि ॥

ग्रो·
काशि·
३२८

प्रशंसायामित्येव वृकज्येष्ठाभ्यां प्रशंसायां पाणिकेष्वेव वर्तमानाभ्यां यथासं
ख्यं तिल् तातिल् इत्येतौ प्रत्ययौ भवतः छंदसि रूपपोरपवादः वृकतिः ज्येष्ठ
तातिः बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् बह्वर्थादल्पार्थाच्च कारका
भिधायिनः शब्दाच्छस् प्रत्ययो भवति अन्यतरस्याम् विशेषाभिधानाच्च सर्वे
कर्मादिकारके गृह्यन्ते बहूनि ददाति बहुशो ददाति बहुभिर्ददाति बहुशो।
ददाति बहुभ्यो ददाति बहुशो ददाति अल्पं ददाति अल्पशो ददाति इत्येवा
मादि बह्वल्पार्थादिति किम् गां ददाति अश्वं ददाति कारकादिति किम् बहू।
नां स्वामी अर्थग्रहणात् पर्यायेभ्योपि भवति भूरिशो ददाति स्तोकशो ददाति ब
ह्वल्पार्थान्मंगलवचनम् यत्र मंगलं गम्यते तत्रायं प्रत्ययः इष्यते बहुशो द
दाति आभ्युदयिकेषु कर्मसु अल्पशो ददाति अरिष्टेषु संख्यैकवचनाच्च वी
प्सायाम् संख्यावाचिभ्यः प्रातिपदिकेभ्यः एकवचनाच्च वीप्सायां द्योत्यायां
शस् प्रत्ययो भवति अन्यतरस्याम् द्वौ द्वौ ददाति द्विशो ददाति त्रिशो ददाति

यकवचनान्तत्वेऽपि कार्षापणं कार्षापणं ददाति कार्षापणशो ददाति मा
षशः पादशः प्रस्थशः कुडवशो ददाति एकार्थे उच्यते येन तदेकवचनम् कार्षा
पणादयश्चापि माषपादप्रस्थाश्चैकवचनान्ता एव भवन्ति संख्यैकवचनादिति कि
म् द्वौ द्वौ ददाति वीप्सायामिति किम् द्वौ ददाति कारकादित्येव द्वयोः
द्वयोः स्वामी कार्षापणस्य कार्षापणस्य स्वामी प्रतियोगे पंचम्यास्तसिः प्रति
ना कर्मप्रवचनीयेन योगे या पंचमी विहिता तदन्ताल्लिंगात्तसिप्रत्ययो भवति प्रद्युम्नो
वासुदेवतः प्रति अभिमन्युरर्जुनतः प्रति वाग्रहणादनुवृत्तेर्विकल्पो भवति॥
वासुदेवादर्जुनादित्यपि भवति तसिप्रकरणे आद्यादिभ्य उपसंख्यानम् आ
दावादितः मध्यतः अन्ततः पृष्ठतः पार्श्वतः आकृतिगणोऽयम् अपादाने वा
हीयरुहोः अपादाने या पंचमी तदन्तात्तसिप्रत्ययो भवति तश्चेदपादाने
हीयरुहोः संबंधि न भवति ग्रामादागच्छति ग्रामतः आगच्छति चौरेभ्यो बि
भेति चौरतो बिभेति अध्या अध्ययनात्पराजयते अध्ययनतः पराजयते अ।

गे
का.
३२५

हीयकद्देशोतिकिम् माषाद्धीनः पर्वतादवरोहति हीयत इति निर्देशो जहाति
प्रतिपत्त्यर्थः जिहीते मा भूत् भूमेरुज्जिहीते भूमितलं जिहीते कथं मेरोर्हीन :
स्वरतो वर्णतो वेति नैषा पञ्चमी किं तर्हि तृतीया स्वरेण वर्णेन वा हीन इति ॥
प्रतिग्रहाख्यानदेयपुरुषकर्तरि तृतीयायाः प्रतिकम्प्यग्रहोतिग्रहेः बलनमख्य
घ्रतम् किंदास्तेयः प्रतिग्रहादिविषये या तृतीयाः तदन्ताद्धातोर्द्विप्रत्ययो भव
ति सा चेत्कर्मनि भवति वृत्तेनातिगच्छते वृत्तेनातिगच्छते चारित्रेणातिग
च्छते सवृत्तवानव्यानतिक्रमणे वृत्तेन गच्छत इत्यर्थः ग्रवाधते वृत्तेन नवाधते
वृत्तेनानवाधते चारित्रेणानवाधते वृत्तेन न चलतीत्यर्थः क्षेपे वृत्तेन क्षिपः वृ
त्तेनः क्षिपः वृत्तेन निन्दित इत्यर्थः अकर्मेति किम् देवदत्तेन क्षिपः हीयमान
पापयोगाच्च अकर्मेति तृतीयायास्येव हीयमानेन पापेन च योगो यस्य तद्धा
विनः शाह्मान्यगात्तृतीयायाविभक्तिः कर्मिरि तदन्ताद्धातोर्द्विप्रत्ययो भवति वृ
त्तेन हीयते वृत्तेनोद्दीयते चारित्रेणाहीयते चारित्रेणाहीयते पापयोगात् वृत्ते

तयापः कृतनःपापः चारित्रतःपात्रःदेयमग्नवाविवदायांनञ्चाख्यानः इदमुदा
हरणम् तेषेदिद्भूर्वैतोवसिद्धेस्यात अकर्तरीत्येवदेवदत्तेनदीयते षष्ठ्याख्या
श्रये नानापत्नेभ्ययोऽप्याश्रयः अप्याश्रयेगम्यमानेषष्ठ्यन्ताद्धातोर्भिप्रत्ययो
भवति देवाश्रुन्तेनतोभवन् आदित्यैःकर्णोनोभवन् षष्ठीत्याहपत्नोपेदेवश्र
तेनस्पपत्नेकर्णास्पपत्नेइत्यर्थः अप्याश्रयइतिकिम् वृक्षस्यशाखाः रोगाख्या
पनयने रोगोव्याधिः तद्वाचिनःशब्दान्नयायाषष्ठीविभक्तिस्तदंताद्धातोर्भिप्र
त्ययोभवति अपनयनेगम्यमाने अपनयनेप्रतीकारः विचिकित्सार्थः प्रवाहि
कातःकुरु प्रच्छर्दिकातःकुरु प्रच्छर्दिकातःकुरु प्रतीकारमस्याः इत्यर्थः
अपनयनमितिकिम् प्रवाहिकायाःप्रकोपंकरोति अभूततद्भावेकृभ्वस्ति
योगेसंपद्यकर्तरिच्विः कारणस्यविकाररूपेणाभूतस्यतदात्मनाभावः अभू
ततद्भावः संपद्यतेः कर्तासंपद्यकर्ता अभूततद्भावेगम्यमानेसंपद्यकर्तरिव
र्तमानान्नाम्नःप्रातिपदिकात्कृभ्वस्तिभिर्योगेभिर्योगेच्विप्रत्ययोभवति अशुक्लः

गो.
कात्र.
३७९

शुक्लः सम्पद्यते तं करोति शुक्लीकरोति मलिनम् शुक्लीभवति शुक्लीस्यात् घ
टीकरोति घटम् घटीभवति घटीस्यात् अभूततद्भाव इति किम् शुक्लं करोति
नात्र प्रकृतिविवक्षिता कृभ्वस्तियोग इति किम् यावता अभूततद्भावे समका
देवमहस्यापेयुविशेषसंबंधेनाभूततद्भावः सम्पद्यकर्त्तृत्वमस्य न करोतीति अ
रुन्मनश्चक्षुश्चेतोरहोरजसां लोपश्च अरुः अरुन्षीनां सन्त्यस्य लोपो भवति
च्विश्च प्रत्ययः सर्वविशेषणानां संबंधात् पूर्वोत्तरप्रत्ययः सिद्धः लोपामात्रार्थे व.
वनम् अरुनकः अरुः करोति अरूकरोति अरूभवति अरूस्यात् मनस् उन्मनीकरो
ति उन्मनीभवति उन्मनीस्यात् चक्षुस् उच्चक्षूकरोति उच्चक्षूभवति उच्चक्षूस्यात् चे
तस् विचेतीकरोति विचेतीभवति विचेतीस्यात् रहस् विरहीकरोति वि
रहीभवति विरहीस्यात् रजस् विरजीकरोति विरजीभवति विरजीस्यात् ॥
विभाषा साति कार्त्स्न्ये अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि सर्वस्मात्सुब.
न्तात् अस्मिन् विषये विभाषा साति प्रत्ययो भवति कार्त्स्न्येन गम्यमाने [illegible]

तिः कृत्स्नाविकारात्मतामापद्यत इत्यर्थः अग्निसाद्भवति शस्त्रम् अग्नीभवति उ
दकसाद्भवति लवणम् उदकीभवति कार्त्स्न्य इति किम् एकदेशेन पटः शुक्ली
भवति विभाषाग्रहणाच्च प्रापकम् प्रत्ययविकल्पस्तस्मदा विभाषयैव सिद्धः
अभिविधौ सम्पदा च अभिविधिरभिव्याप्तिः अभिविधौ गम्यमानेऽपि विभाषाग्रह
णानुवृत्तेः च्विरप्युत्पद्यते सङ्कृभ्वस्तिभिर्विषये साति प्रत्ययो भवति सम्पदा योगे
चकारात्कृभ्वस्तिभिरेव योगे भवति न सम्पदा अग्निसात्सम्पद्यते शस्त्रम् अग्निसाद्भव
ति उदकसात्सम्पद्यते लवणम् उदकसाद्भवति अग्नीभवति उदकीभवति वा
अभ्याभिविधेः कार्त्स्न्यस्य च को विशेषः यदैकदेशेनापि सर्वा प्रकृतिर्विकारा
पद्यते सोऽभिविधिः यथास्यां सेनायामुत्पद्यते न सर्वेऽस्त्रम् अग्निसात्सम्पद्य
ते वर्षासु सर्वं लवणमुदकसात्सम्पद्यते इति कार्त्स्न्ये तु सर्वात्मना द्रव्यस्य विका
रूपापत्तिर्भवति तदधीनवचने अभूततद्भाव इति निवृत्तम् अधीनतया पादा
नात् कृभ्वस्तियोगे संपदा च विवर्तते तदधीने तदायत्ते तत्स्वामिकमित्यर्थः

ॐ
कात्.
377

स्वामिसामान्यमीप्सितत्वात् सामान्ये च न तदधीनशब्देन निर्दिश्यते स्वामिविशे-
षवाचिनः प्रातिपदिकादीप्सितत्वाभिधेये सातिप्रत्ययो भवति कृभ्वस्तिभिः
संपदा योगे राजाधीनं करोति राजसात्करोति राजसाद्भवति राजसात्स्यात्
राजसात्संपद्यते ब्राह्मणसात्संपद्यते देये त्रा च तदधीन इत्यनुवर्तते तस्याविशे-
षणाद्देयग्रहणम् दातव्यं देयम् तदधीने देये त्राप्रत्ययो भवति चकारात्साति-
श्च कृभ्वस्तिभिः संपदा च योगे ब्राह्मणेभ्यो देयमिति यदि दत्तं तत्तद्दानेषामर्षणो
न तदधीनं क्रियते तदा प्रत्ययः ब्राह्मणाधीनं देयं करोति ब्राह्मणत्राकरोति ब्रा-
ह्मणसात्स्यात् ब्राह्मणत्राभवति ब्राह्मणसात्स्यात् ब्राह्मणत्रास्यात् ब्राह्मण-
सात्स्यात् ब्राह्मणत्रासंपद्यते ब्राह्मणसात्संपद्यते देय इति किम् राजसाद्भव-
ति राष्ट्रम् देवमनुष्यपुरुषमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् सातिः निवृत्तः त्राप्र-
त्ययोऽनुवर्तते देवादिभ्यः प्रातिपदिकेभ्यो द्वितीयार्थे सप्तम्यर्थे च बहुलं त्राप्रत्य-
यो भवति देवत्रा गच्छति देवेषु वसति देवत्रा वसति मनुष्यान् गच्छति मनुष्या-

त्रागच्छति मनुष्येषुवसति देवत्रावसति मनुष्यत्रावसति पुरुषान्गच्छति
पुरुषत्रागच्छति पुरुषेषुवसति पुरुषत्रावसति पुरून्गच्छति पुरुत्रागच्छ
ति पुरुषुवसति पुरुत्रावसति मर्त्यान्गच्छति मर्त्यत्रागच्छति मर्त्येषुवस
ति मर्त्यत्रावसति बहुलवचनादन्यत्रापिभवति बहुत्राजीवतोमनः इति अव्य
क्तानुकरणाद्द्व्यजवरार्द्धादनितौडाच् ॥ यत्रध्वनावकारादयोवर्णाविशेषरूपे
णनव्यज्यन्तेसोव्यक्तस्तस्यानुकरणमव्यक्तानुकरणम् द्वाच अवरमर्द्धयस्यतद्द्व्य
जवरार्द्धम अवरशब्दोपकर्षीयस्यापकर्षेक्रियमाणोमन्मूलतमर्द्धंद्व्यच्कमस्य
घेन तस्मादव्यक्तानुकरणादनितिपरात् डाः प्रत्ययोभवति कृभ्वस्तियोगेऽव्य
नानुवर्तते यस्यचद्विर्वचनेकृतेद्व्यजवरार्द्धतातनः प्रत्ययः डाचिवहुलंद्वेभवत
इतिविषयसप्तमीडाचिविवक्षिते द्विर्वचनमेवपूर्वंक्रियतेपश्चात्प्रत्ययः पटपटा
करोति पटपटाभवति पटपटास्यात् दमदमाकरोति दमदमाभवति दमद
मास्यात् अव्यक्तानुकरणादितिकिम् दृषत्करोति द्व्यजवरार्द्धादितिकिम् श्र

ग्रं.
कात्.
३२८

नकरोति अवग्रहणं किम् खरटखरटाकरोति अपट अपटाकरोति इति
ताविति किम् पटिति करोति चकारः समितवापनार्थः समितो वानुदात्ते पदा
दाविति षत्वमत्रेन भवति डाजवर्णावादितियकारोपवंतिनमस्याथिकोतेयः कृञो
द्वितीयतृतीयशम्बबीजात्कृषौ ॥ द्वितीयतृतीयशम्बबीजेभ्यः कृषावभि
धेयायां डाः प्रत्ययो भवति कृञो योगे अमति कृञ्ग्रहणं समासान्तेषु निवृत्त्यर्थम् द्वि
तीयाकरोति द्वितीयं कर्षणं विलेखनं करोति इत्यर्थः तृतीयाकरोति शम्बा
करोति अनुलोमकृष्टं पुनः प्रतिलोमं कृषतीत्यर्थः बीजाकरोति पटम् सं
ख्यायाश्च गुणान्तायाः कृञनुवर्त्तते कृषाविति च संख्यावाचिनः शब्दस्य
गुणशब्दान्तसमीपे यत्र भवति सांख्याया गुणान्ते स्थिते तादृशात्संख्यानिर्दि
कात् कृषावभिधेयायां डाः प्रत्ययो भवति कृञो योगे द्विगुणं विलेखनं करो
ति क्षेत्रस्य द्विगुणाकरोति क्षेत्रम् कृषाविति किम् द्विगुणां करोति रज्जुम् स
मयाच्च यापनायाम् कृञ्सम्बध्येव कृषाविति निवृत्तम् कर्तव्यस्यावसरात्

ति: समयः तस्यातिक्रमणं यापना समयशब्दाद्यापनायां गम्यमानायां डा
प्रत्ययो भवति कृञो योगे समयाकरोति यापयति कालक्षेपं करोतीत्य
र्थः यापनायामिति किम् समयं करोति सपत्रनिष्पत्रादतिव्यथने कृञ इ
त्येव सपत्रनिष्पत्रशब्दाभ्याममतिव्यथने गम्यमाने डाः प्रत्ययो भवति कृञो
योगे भृशं व्यथनमतिपीडनम् सपत्राकरोति मृगं व्याधः सपत्रं शरमस्य
शरीरे प्रवेशयतीत्यर्थः निष्पत्राकरोति शरीरात्सपत्रं शरं पार्श्वान्तरेण निष्क्रमय
तीत्यर्थः अतिव्यथन इति किम् सपत्रं वृक्षं करोति जलसेकेन निष्पत्रं भूत
लं करोति भूमिशोधकः निष्कुलान्निष्कोषणे कृञ इत्येव निष्कुलशब्दान्निष्को
षणेर्थे डाः प्रत्ययो भवति कृञो योगे निष्कोषणमन्तरवयवानां बहिर्निष्का
सनम् निष्कुलाकरोति पशुम् निष्कुलातीत्यर्थः निष्कोषण इति किम् निष्कुलं
करोति शत्रुम् सुखप्रियादानुलोम्ये कृञ इत्येव सुखप्रियशब्दाभ्यामानुलो
म्येर्थे डाः प्रत्ययो भवति कृञो योगे आनुलोम्यमनुकूलता आराध्यचित्तानुव

उं
कावृ.
३२५

नेनम् सुखाकरोति प्रियाकरोति स्वामिनश्चित्तमाराधयतीत्यर्थः सुखप्रिय
मङ्गवेत्रपि आनुलोम्ये वर्त्तमानयोर्वक्ष्यते आनुलोम्य इति किम् सुखंकरोति
प्रियंकरोति तिक्तौषधपानम् दुःखात्प्रातिलोम्ये कृञ इत्येव दुःखशब्दात्
प्रातिलोम्ये डाच् प्रत्ययो भवति कृञो योगे प्रातिलोम्यं प्रातिकूलम् स्वामिनश्चि
त्तपीडनम् दुःखाकरोति भृत्यः प्रातिलोम्य इति किम् दुःखंकरोत्यपथ्यानम्
शूलात्पाके कृञ इत्येव पाकविषये शूलशब्दात् डाच् प्रत्ययो भवति कृञो
योगे शूले पचति शूलाकरोति पशुम् पाक इति किम् शूलंकरोति कदन्नम्
सत्यादशपथे कृञ इत्येव सत्यशब्दादशपथेऽर्थे डाच् प्रत्ययो भवति कृञो यो
गे सत्यशब्दोऽत्र प्रतिपन्नवचनः क्वचिच्छपथे वर्त्तते सत्येन शपथे हि प्रति
तिज्ञायां प्रतिषेधः सत्याकरोति वणिक् भाण्डम् मयैतत्क्रीतव्यमिति त
थ्यंकरोति अशपथ इति किम् सत्यंकरोति ब्राह्मणः मद्रात्परिवापणे कृ
ञ इत्येव मद्रशब्दात्परिवापणेऽर्थे डाच् प्रत्ययो भवति कृञो योगे परिवाप-

७

णेमंडनम् महच्छब्दोमंगलार्थः मंगलमेवेदं करोति महाकरोति महाश्चेतिवक्त
व्यम् महाकरोतीत्यपि नः कुमारम् परिपाणमाइतिकम् महत्करोति समासांत ॥
समासेतत्रस्यापिकारः आपादपरिसमाप्तेर्ये प्रत्यया स्ते समासान्ता न पदवाचक
देषाभवंति तत्पुरुषेणनपरान्ते इति वेदितव्यम् प्रयोजनमव्ययीभावद्विगुद्वंद्वत
त्पुरुषबहुव्रीहिसंज्ञाः प्रियराजम् उपराजम् नाव्ययीभावादतोमित्युक्तविधिर्भ
वति द्विपुरी त्रिपुरी द्विगोरिति ङीर्भवति कोषातिष्ठति वी भवति दृष्ट्वा पुत्राप
गणीतश्राणिस्थादिति भवति विध्नराघ्रपुरानत्पुरुषेत्त्साधनंवानीयतेस्वरोभ
वति उरश्चतुरः नौश्चेतुरः बहुव्रीहौ प्रकृत्यापूर्वपदमित्येतद्भवति तत्पुरुषात् योक्
ह्नात्रुपादाय समासान्ता विधीयन्ते राजाहः सखिभ्यष्टजित्येवमादीन् यदि तत्पुरुषा
त्पुरुषवचनात्परेभवंति ततः समासान्तानभवति सुराजा अतिराजा सुगौः अ
तिगौः सुनायोस्तीति ग्रहणं कर्तव्यम् इह प्रतिषेधो माभूत परमराजः परमगवः
प्रागबहुव्रीहिग्रहणंच कर्तव्यम् बहुव्रीहौ मद्रस्या निषेधमादेः प्रतिषेधो नभ

ऊँ॰
काद्व॰
३८

वति समसक्तः प्रतिसक्तः सदः प्राप्तदः किमः देपे देपेयः किंप्राहुः ततः परस्य
समासो नोन भवति ऊर्त्मिनो राजा किंराज्ञायो न रक्षति केसखायोऽतुहति सखि
सखा सखा पुनशास्त्रियोपि ये हिताऽन्नयः सेष्टाणाऊनेम किंप्रभुः किंगोयो न वहति
पश्यति किम कस्य राजा किंराजा किंसखः किंगवः ननस्तत्पुरुषात् ननः परे
ये वस्त्रमासाण्यवगादयः तदेतान्तत्पुरुषान्समासान्तो न भवति अराजा असखा
अगौः नञ्तत्पुरुषादिति किम अन्त्यगोमाषः अधुरं शकटम् पथ्यो विभाषा न
नञ्तत्पुरुषादिति वर्तते ननः परो यः पथिशब्दः तदन्तात्तत्पुरुषाद्विभाषा समा
सान्तो न भवति पूर्वेणा नित्ये प्राप्ते विभाषा विकल्प्यते अपथं अपन्थाः बहुव्री
हौ संख्येये डजबहुगणात् संख्येयो यो बहुव्रीहिर्वर्तते तस्माद्बहुगणान्तात् डप्र
त्ययो भवति संख्यायाव्ययासन्नेति यो बहुव्रीहिस्तस्येदं ग्रहणम् उपदशाः उप
विंशाः उपत्रिंशाः आसन्नदशाः अदूरदशाः अधिकदशाः द्विशाः पंचषाः संख्येय इ
ति किम चित्रगुः शबलगुः अबहुगणादिति किम उपबहवः उपगणाः प्रत्यय

गोविशेषः ॥ अच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानम् निस्त्रिंशाद्यर्थम् ॥ नि
र्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि देवदत्तस्य निश्चत्वारिंशानि निर्गतो ऽङ्गु
लिभ्यो निरङ्गुलः ॥ ऋक्पूरब्धूःपथामानक्षे ॥ बहुव्रीहाविति निवृत्ते समा
समात्रेण विधानम् ॥ ऋच् पुर् अप् धुर् पथिन् इत्येवमन्तानां समासानामकारः प्र
त्ययो भवति ॥ अनक्षे इति सामर्थ्याद्धूर्विषयप्रतिषेधो न ऋगादीनाम् ॥ अक्षसम्बन्धिनी
या धूः न तदन्तस्य भवति प्रत्ययः ॥ ऋच् अर्धर्चः बह्वृचः ॥ पुर् ललाटपुरम् नान्दीपु
रम् ॥ अप् द्वीपम् समीपम् अन्तरीपम् ॥ धुर् राजधुरा महाधुरा ॥ पथिन् स्थलपथः
जलपथः ॥ अनक्षे इति किम् अक्षस्य धूरक्षधूः दृढधूरक्षः ॥ अनृचमाणवे बह्वृ
चः चरणाख्यायाम् ॥ अनृचो माणवः बह्वृचश्चरणाख्यायाम् इह न भवति ॥ अनृक्कं सा
म बह्वृक्कं सूक्तम् ॥ अच्प्रत्यन्ववपूर्वात्सामलोम्नः ॥ प्रति अनु अव इत्येवंपूर्वान्
सामान्ताल्लोमान्ताच्च समासादच्प्रत्ययो भवति ॥ प्रतिसामम् अनुसामम् अवसा
मम् प्रतिलोमम् अनुलोमम् अवलोमम् ॥ कृष्णोदक्पाण्डुपूर्वायाः भूमेरच्प्रत्ययो

ॐ
काशि
३८८

स्तृतः। गोदावर्याश्च नद्याश्च संख्याया उज्ञेयदि कृष्णभूमः उदग्भूमः पाण्डुभूम
सप्तगोदावरम् पंचनदम् भूमेरपि संख्यापूर्वायाः प्रत्यय इष्यते द्विभूमः प्रासा
दः त्रिभूमः दशभूमकं सूत्रम् अन्यत्रापि च दृश्यते पद्मनाभः ऊर्णनाभः दीर्घ
रात्रः वर्षारात्रः तदेतदिह सर्वमिह योगविभागे कृत्वा साधयेति अक्ष्णोऽदर्शना
त्। अचित्यनुवर्त्तते दर्शनादन्यत्र योक्षिशब्दस्तदन्तात्समासादच्प्रत्ययो भव
ति लवणाक्षम् पुष्कराक्षम् अदर्शनादिति किम् ब्राह्मणाक्षि कंबलेगवा
क्षमिति अक्षान्तोभावच्छादनेन वृक्षिश्च केकेवगाले इति केनापि दृष्यते गवाक्ष
एव नैष दोषः चक्षुःपर्यायो दर्शनशब्दः प्राण्यंगवचन इह गृह्यते अचतुरविच
तुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीव
नक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजा
तोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः अच्प्रत्ययान्ता एते शब्दा निपात्यन्ते समासस्या
श्चवस्थापि निपातनादेव प्रतिपत्तव्या आद्यास्त्रयो बहुव्रीहयः अचतुरस्याविद्यमाना

निवाचनार्थस्यावतरः विगतानि वचनार्थस्य विवतरः शोभनानि वचनार्थस्य सुवा
चतरः ततः परे एकादश द्वंद्वाः स्त्री च पुमांश्च स्त्रीपुंसौ द्वन्द्व भवति स्त्रियाः पुमान्
स्त्रीपुमानिति धेनुश्चानड्वांश्च धेन्वनडुहौ ऋक् च साम च ऋक्सामे वाक् च मनश्च वा
ङ्मनसे अक्षिणी च भ्रुवौ चाक्षिभ्रुवम् दाराश्च गावश्च दारगवम् ऊरू च अष्ठीव
न्तौ च ऊर्वष्ठीवम् टिलोपो निपात्यते पादौ च अष्ठीवन्तौ च पदष्ठीवम् पादशब्दस्य
पद्भावो टेर्लोपो निपात्यते नक्तं च दिवा च नक्तंदिवम् समस्यमानयोरव्यययोः स
मासान्तो निपातनादेव रात्रौ च दिवा च रात्रिंदिवम् पूर्वपदस्य मान्तत्वं निपात्यते अह
नि दिवा चाहर्दिवम् ननु वपर्यायावेतौ कथमनयोर्द्वन्द्वः वीप्सार्थो द्वन्द्वो निपात्य
ते अहन्यहनीत्यर्थः एको व्ययीभावः साकल्ये सतृणमभ्यवहरति व्ययीभावेन
भवति सदृशं समासमर्जः एकपुरुषद्वन्द्वं न भवति पुरुषश्चायुश्च पुरुषायुषी त
तो द्वौ द्विगू त्र्यायुषी समासेन त्र्यायुषम् द्व्यायुषम् इत्यन भवत द्वयोरायुः द्व्यायु
स्त्र्यायुरिति तत्पुरुषः ऋक् च यजुश्च ऋग्यजुषम् इत्यन भवति ऋग्यजुः समाहेत्य

ॐ
काशि
६८२

ऋग्यजुषम् इति जातादिपूर्वपदादुक्षशब्दात् समासान्तः कर्मधारये। जातोक्ष
महोक्षः वृद्धोक्षः बहुव्रीहौ न भवति जातोक्षा महोक्षा वृद्धोक्षेति ततोऽव्ययीभावः
शुनः समीपम् उपशुनम् टिलोपाभावः संप्रसारणं निपातनादेव ततः सप्तमीस-
मासः गोष्ठे श्वा गोष्ठश्वाः चतुरो प्रकरणानुपयोग्याभ्यामुपसंख्यानम् विचतुराः उपच-
तुराः ब्रह्महस्तिभ्यां वर्चसः शब्दः तदन्तात् समासान्तः प्रत्ययो भवति ब्र-
ह्मवर्चसम् हस्तिवर्चसम् पल्यराजभ्यां चेति वक्तव्यम् पल्यवर्चसम् राजवर्चस-
म् अवसमन्धेभ्यस्तमसः अवसम् अन्ध इत्येतेभ्यः परो यः तमः शब्दस्तदन्तात् स-
मासान्तः प्रत्ययो भवति अवतमसम् सन्तमसम् अन्धतमसम् श्वसो वसीयः श्रेय-
सः श्वसः परो यो वसीयः श्रेयः शब्दस्तदन्तात् समासान्तः प्रत्ययो भवति श्वोवसीयस-
म् श्वःश्रेयसम् मयूरव्यंसकादित्वात् समासः स्वभावाच्छ्रेयः शब्द उत्तरपदार्थप्रधा-
नमाशीर्विषयतामाचष्टे श्वःश्रेयसं ते भूयात् शोभनं श्रेयो भूयादित्यर्थः श्वोवसीय-
समित्यपि पर्यायः अन्ववतप्ताद्रहसः अनु अव तप्त इत्येतेभ्यः परो यो रहः शब्दस्त-

दन्तात्समासान्तः प्रत्ययो भवति अनुरहसम् अवरहसम् तप्तरहसम् प्रतेरु
रसः सप्तमीस्थात् प्रतेः परः य उरःशब्दस्तदन्तात्समासान्तः प्रत्ययो भवति स चे
दुरःशब्दः सप्तमीस्थो भवति सप्तम्यर्थे वृत्तेः उरस्यर्थः उरसि वर्त्तते प्रत्युरसं विभ
क्त्यर्थे ऽव्ययीभाव इति समासः सप्तमीस्थादिति किम् प्रतिगतमुरः प्रत्युरः अनु
गवमायामे॥ अनुगवमित्यच्प्रत्ययान्तं निपात्यते आयामे ऽभिधेये अनुगवं
यानम् यस्य चायाम इति समासः आयाम इति किम् गवां पश्चादनुगु॥ द्विस्तावा
त्रिस्तावा वेदिः द्विस्तावा त्रिस्तावा इति निपात्यते वेदिश्चेदभिधेया भवति अच्प्र
त्ययः टिलोपः समासश्च निपात्यते यावती प्रकृतौ वेदिस्ततो द्विगुणा वा त्रिगु
णा वा कर्मविकृतौ न चैतन्निपातनम् द्विस्तावा वेदिः त्रिस्तावा वेदिः वेदि
रिति किम् द्विस्तावती त्रिस्तावती रज्जुः उपसर्गादध्वनः उपसर्गात्परो योध्वश
ब्दस्तदन्तात्समासान्तः प्रत्ययो भवति प्रगतो ऽध्वानं प्राध्वो रथः प्राध्वं शकटम् नि
रध्वम् प्रत्यध्वम् उपसर्गादिति किम् परमाध्वा उत्तमाध्वा तत्पुरुषस्याङ्गुलेः

ॐ·
कात्र·
३८३

संख्याव्ययादेः अंगुलिशब्दान्तस्य तत्पुरुषस्य संख्यादेरव्ययादेश्च अः प्रत्ययो
भवति द्वे अंगुली प्रमाणमस्य द्व्यंगुलम् त्र्यंगुलम् चतुरंगुलम् तद्धितार्थे इ
ति समासः प्रमाणे लोपो द्विगोर्नित्यमिति मात्रचो लोपः अव्ययादेः निर्गतमं
गुलिभ्यो निरंगुलम् अत्यंगुलम् तत्पुरुषस्येति किम् पंचांगुलिर्हस्तः अं
गुलिः पुरुषः तत्पुरुषाधिकारश्चाद्वंद्वाश्चद्वंद्वाश्च रुषधातो नान्यसमासादत्र इति
यावत् अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः॥ अहरादिभ्यः परो यो रात्रिश
ब्दस्तदन्तस्य तत्पुरुषस्य अः प्रत्ययो भवति चकारात् संख्याव्ययादेश्च अहन्ग्र
हणं द्वंद्वार्थम् अहश्च रात्रिश्चाहोरात्रः सर्वा सर्वा रात्रिः सर्वरात्रः एकदेशः पूर्वं
रात्रेः पूर्वरात्रः अपररात्रः पूर्वापराधरोत्तरमेकदेशेनेति समासः एवं
पुण्या रात्रिः पुण्यरात्रः एकदेशः पूर्वं रात्रेः पूर्वरात्रः अपररात्रः संख्याव्ययाद
लपि द्वे रात्री समाहृते द्विरात्रः त्रिरात्रः अतिक्रान्तो रात्रिमतिरात्रः नीरात्रः
अह्नोह्न एतेभ्यः राजाहः सखिभ्यष्टजिति प्रत्यये वर्त्तते नोमिल्यारभ्यते अह

१५
१२४

त्रिपथस्याह्नादेशो भवति यत्नेनाउत्तरपदस्य संख्यादयः प्रक्तोत्ताः सर्वनाम्नाश्चत
वमव्ययेने सामकाश्चाहः शाहः पूर्वेनेननाशीयते परिशिष्टानां ग्रहणम् न
ल्पाहः शाहाम्पोहः प्राह्नः संभवति संख्यायाम्लावत् द्वयोरह्नोर्भवो द्व्यहः त्र्यहश्च
वयान् अहर्गतिकोनोत्पन्नः निरहः सर्वाह्नः पूर्वाह्नः अपराह्नः संख्यातान्हः पुण्य
शाहान्नाम निषेधं वक्ष्यति न संख्यादेः समाहारे संख्यादेः तत्पुरुषस्य समाहारेवर्त
मानस्याह्नादेशो न भवति पूर्वोक्तप्रायः प्रतिषिध्यते द्वयोरह्नोः समाहारे द्व्यहः त्र्य
हः समाहार इति किम् द्वयोरह्नोर्भवो द्व्यहः त्र्यहः नहि तत्रार्थ इति समासे कृते प्राण
त्रयागतस्याह्ने गोरितिलक् उत्तमेकाभ्योव् उत्तमादेकशाब्दात्परस्याह्नो ह्न आ
देशो न भवति पुण्यहम् एकाहः उत्तमशब्देन अन्त्यवचनः पुण्यशब्दमाह द्वे पुण्यग्र
हणमेव न कृते वैचित्र्यार्थम् केचित् न उत्तमस्यापि प्रतिषेधमेवविच्छन्ति तेन
संख्यातादपि परस्य न भवति संख्यातान्हः इति राजाहः सखिभ्यष्टच् राजन् अह
न् सखि इत्येतेभ्यस्तत्पुरुषात् टच् प्रत्ययो भवति महाराजः मद्रराजः परमाहः उ

गो·
का·
६८५

न्नमाहः राजसखः आत्मनाम्नावः इत्यस्मान्न भवति महाराजो राजी मद्रराजी लिं
गविशिष्टपरिभाषया राजो लिलघूल्लप्यपूर्वेनिपाते राजे राजन्यशाच्चस्य सवर्णदी
र्घोर्घे अथ्यंमप्रयोगे ऊर्द्ध्वेन्नतत्पुरुषात् यस्याकारसवर्णदीर्घत्वं भवति तस्यादेश
हणमिति गोरतद्धितलुकि गोशब्दान्तात्तत्पुरुषात् तद्धितलुग्विषयेन भवति प
रमगवः उत्तमगवः पंचगवम् दशगवम् अतद्धितलुकीतिकिम् पंचभिर्गोभि
भिः क्रीतः पंचगुः दशगुः तेनक्रीतमित्यादौ यस्ठक् आगतस्य अध्यर्द्धपूर्वद्वि
गोरितिलुक् तद्धितग्रहणंकिम् तद्धितएवमाभूत् पंचभ्यो गोभ्य आगतं पंच
गवरूप्यंपंचगवमयम् अग्राख्यायामुरसः ॥ उरःशब्दान्तात् तत्पुरुषात् टच्प्रत्य
यो भवति सचेदुरःशब्दो अग्राख्यो भवति अग्रं प्रधानमुच्यते यथा शरीरावयवा
नामुरः प्रधानम् अश्वमेवमन्योपि प्रधानभूतः उरःशब्देनोच्यते अश्वानामुरो
श्वोरसम् हस्त्युरसम् रथोरसम् अग्राख्यायामितिकिम् देवदत्तस्योदेवदत्तोरः
अनोश्मायःसरसां जातिसंज्ञयोः अनस् अश्मन् अयस् सरस् इत्येवमेतान्तस

७५

कषाट्टच् प्रत्ययो भवति जातौ संज्ञायां च विषये उपाकसमिति जातिः मद्रा
नसमिति संज्ञा अश्मन्तः मद्रनिजातिः पिंडाश्मइति संज्ञा कालायसं जाति
लोहितायसं संज्ञा मंडूकसरसं जातिः जालसरसमिति संज्ञा जातिसंज्ञयोरिति
किम् सदनः समस्मा ग्रामकोटाभ्यो च तक्ष्णः जातिसंज्ञयोरिति नानुवर्तते॥
ग्रामकोटशब्दाभ्यां परो यस्तक्षन्शब्दस्तदंतात् तत्पुरुषात् टच् प्रत्ययो भवति
ग्रामस्य तक्षा ग्रामतक्षः बहूनां साधारण इत्यर्थः कुत्सो भवः कौटः कौटश्चासौ
तक्षा कौटतक्षः स्वतंत्रः कर्मजीवी न कस्यचित् प्रतिबद्ध इत्यर्थः अतिश्वः सेवकः
सेवकस्वामिक इत्यर्थः अतिशीभिवा श्वानमतीत इत्यर्थः उपमानादप्राणिषु उपा
मानवाचीयः श्वशब्दोऽप्राणिषु वर्तते तदंतात्तत्पुरुषात् टच् प्रत्ययो भवति आकर्ष
श्वा इव आकर्षश्वः फलकश्वः उपमितं व्याघ्रादिभिरिति समासः उपमानादिति कि
म् न श्वा श्वालोमः अप्राणिष्विति किम् वानरः श्वा इव वानरश्वः उत्तरमृगपूर्वा
च्च सक्थ्नः उत्तरमृगपूर्वं इत्येतेभ्यः परो यः सक्थिशब्दः स्वकारादुपमानाच्च तदंताट्

ॐ.
कात्.
२८५

ष प्रत्ययो भवति उत्तरसक्थम् मृगसक्थं पूर्वसक्थम् उपमानादपि फलक
मिव सक्थि फलकसक्थम् नावो द्विगोः नौशब्दान्ताद् द्विगोः टच् प्रत्ययो भवति द्वेना
वौ समाहृते द्विनावम् त्रिनावम् द्विनावधनः पंचनावप्रियः द्वाभ्यां नौभ्यामाग
तो द्विनावरूप्यः द्विनावमयः अन्तद्धितलुकीत्येव पंचभिः नौभिः क्रीतः पंचनौः
दशनौः द्विगोरिति किम् एकानौः एकनौः राजनौः अर्धाच्च अर्धाच्च परो यो नौश
ब्दः तदन्तात् तत्पुरुषात् टः प्रत्ययो भवति अर्धं नावो ऽर्धनावम् अर्धं नपुंसकमिति नि
यमः परवल्लिंगेन भवति लोकाश्रयत्वाल्लिंगस्य खार्याः प्राचाम् द्विगोः खार्या इति
द्वयमप्यनुवर्तते खारीशब्दान्ताद् द्विगोः खार्याः परो यः खारीशब्दः तदन्तात् तत्पुरुषा
त् टः प्रत्ययो भवति प्राचामाचार्याणां मतेन द्वे खार्यौ समाहृते द्विखारम् द्विखारि
त्रिखारम् त्रिखारि अर्धखार्याः अर्धखारम् अर्धखारि द्वित्रिभ्यामंजलेः द्वित्रिभ्यां परो
यो ऽंजलिशब्दः तदन्तात् तत्पुरुषात् टः प्रत्ययो भवति द्वावंजली समाहृतौ द्व्यंजलम् ॥
त्र्यंजलम् द्विगोरित्येव द्वयोरंजलिः त्र्यंजलिः अन्तद्धितलुकीत्येव द्वाभ्यामंजलिभ्यां

कीनो हस्ताञ्जलिः ग्रावाणमिव हस्ताञ्जलिं प्रियः अनसन्तान्नपुंसकाच्छन्दसि अन्नन्ताद
सन्तान्नपुंसकलिङ्गात्तत्पुरुषाट्टच्प्रत्ययो भवति छन्दसि विषये अन्नन्ताव
त् हस्तिचर्मेण जुहोति ऋषभचर्मेऽभिषिच्यते असन्तात् देवच्छन्दसानि मनुष्य
च्छन्दसानि च अनसन्तादिति किम् बिल्वदारुणि जुहोति नपुंसकादिति किम्
सुत्रामाणं पृथिवीं द्यामनेहसम् अनसन्तान्नपुंसकाच्छन्दसि वावचनम् ब्रह्मसा
साम देवच्छन्दः ब्रह्मणो जानपदाख्यायाम् ब्रह्मशब्दान्तात्तत्पुरुषाट्टच्प्र
त्ययो भवति समासेन चेद्ब्रह्मणो जानपदत्वमाख्यायते जनपदे भवः जानपदः यस्य
तत्पुरुषस्य जानपदशब्दः पूर्वपदे तस्मादेतत्प्रत्ययविधानम् सुराष्ट्रेषु ब्रह्मा सु
राष्ट्रब्रह्मः अवन्तिब्रह्मः काशिब्रह्मः योगविभागात्समासान्तः जानपदाख्या
यामिति किम् देवब्रह्मा नारदः कुमहद्भ्यामन्यतरस्याम् कुमहद्भ्यां परो यो ब्रह्म
शब्दस्तदन्तात्तत्पुरुषादन्यतरस्यां टच्प्रत्ययो भवति कुब्रह्मः कुब्रह्मा महाब्रह्मः म
हाब्रह्मा ब्राह्मणपर्यायो ब्रह्मशब्दः द्वन्द्वाच्चुदषहान्तात्समाहारे तत्पुरुषाधि

जै. काशि. ३८६

कारो निर्द्दिष्टः द्वंद्वाच्चुवर्गान्ताद्दकारषकारान्ताच्च टप्रत्ययो भवति स चेद्द्वंद्वः
समाहारे वर्त्तते नेतरेतरयोगे वाक्च त्वक्च वाक्त्वचम् स्रक्त्वचम् श्रीस्रजम् इडूर्ज
म् समिद्दृषदम् संपद्विपदम् वाक्विषम् वागविप्रुषम् छत्त्रोपानहम् धेनुगो
दुहम् द्वंद्वादितिकिम् तत्पुरुषान्माभूत् पंचवाचः समाहृताः पंचवाक् चुद
षहान्तादितिकिम् वाक्समितम् समाहार इतिकिम् प्रावृट्शरदौ अव्ययी
भावे शरत्प्रभृतिभ्यः शरदित्येवमादिभ्यः टप्रत्ययो भवति अव्ययीभावे स
मासे शरदः समीपम् उपशरदम् प्रतिशरदम् उपविपाशम् प्रतिविपाशम्
अव्ययीभाव इतिकिम् परमशरत् ये त्रयर्यन्ताः पठ्यन्ते तेषामनेन ग्रहणम् स्व
र्थेनेदमव्ययीभावग्रहणे प्राग्बहुव्रीहेः शरद् विपाश् अनस् मनस् उपान
ह् दिव् हिमवत् अनडुह् दिश् चेतस् उत् यद् जरायाजरसेच तस् प्रतिपरःस
मनुभ्योऽक्ष्णः पथिन् अनश्च अन्नन्तादव्ययीभावाट्टप्रत्ययो भवति उपराजम्
प्रतिराजम् अध्यात्मम् प्रत्यात्मम् नपुंसकादन्यतरस्याम् अनइत्येव नपुंसक

ग्रहणमुत्तरपदविशेषणम् अन्नन्तेयन्नपुंसकंतदंतादव्ययीभावादनन्तर।
संआट्प्रत्ययो भवति पूर्वेणानित्यः प्राप्तो विकल्प्यते उपचर्मम् उपचर्म प्रतिच
र्मं प्रतिचर्म उपकर्मम् उपकर्म प्रतिकर्मम्प्रतिकर्म नदीपौर्णमास्याग्रहा
यणीभ्यः नदीपौर्णमासीआग्रहायणी इत्येवमन्तादव्ययीभावादनन्तरसंआट्
प्रत्ययो भवति नद्याः समीपमुपनदम् उपनदि उपपौर्णमासमुपपौर्ण।
मासि उपाग्रहायणमुपाग्रहायणि झयः झय इति प्रत्याहारग्रहणम् झयं
तादव्ययीभावादनन्तरसंआट्प्रत्ययो भवति उपसमिधम् उपसमित् उपदृ।
षदम् उपदृषत् गिरेश्च सेनकस्य गिरिशब्दान्तादव्ययीभावाट्टच्प्रत्ययो भ
वति सेनकस्याचार्यस्य मतेन अन्तर्गिरम् अन्तर्गिरि उपगिरम् उपगिरि से
नकग्रहणं पूजार्थम् विकल्पोऽनुवर्त्तत एव बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्
स्वाङ्गवाचिनौ यौ सक्थ्यक्षिशब्दौ तदन्ताद्बहुव्रीहेः षच्प्रत्ययो भवति सुप
र्यो भिप्रेतः सूत्रे तत्पदानि ङः स्त्रियेति विभक्तौ निर्दिष्टे च सक्थ्या स्या दीर्घसक्थः यो।

ॐ
कातं
३८

समङ्गः कल्याणात्मः विशालात्मः बहुव्रीहाविति किम् परममङ्गिः सङ्ग्रामो
रितिकिम् दीर्घजानुः सबाहुः सोंगादितिकिम् दीर्घसक्थिपाकटम् स्थूला
क्षिणः दधिसक्थ्ने हस्तसक्थिनाषां गौरसक्थ्नी सक्थ्नोऽत्वान्नादि
तिविभाषयोत्रपदस्यानोंतादान्तवेविधीयते तत्रयुक्तिनपदेनास्यदात्रवेता
रुडीपिसम्पदान्न निवृत्तिस्वरस्याभावास्त्वदान्तः स्पेनद्रीषित्सतिसर्वत्रोदा
त्तः स्थितो भवति बहुव्रीहिग्रहणमसामास्य परिसमाभेरनुवर्तने अङ्गुलेदारुणः
णि अङ्गुलिर्भवन्तीति बहुव्रीहेः षप्रत्ययो भवति दारुणि समासाथ्यङ्गुलेदा
रु अङ्गुलेदारु पंचाङ्गुलम् अङ्गुलिसदृशावयवं धान्यानां निक्षेपणकाष्ठम
च्यते यस्य तत्त्वे अङ्गुलीप्रमाणं दारुणस्त्वबनाहि नार्थ इति समासेकृतेनत्वकम
अङ्गुलेरित्यव्यभवितव्यम् दारुणीति किम् पंचाङ्गुलिर्हस्तः द्वित्रिभ्यां षमूर्ध्नो ॥
द्वित्रिभ्यां परो यो मूर्धशब्दः तदन्ताद्बहुव्रीहेः षप्रत्ययो भवति द्विमूर्धः त्रिमूर्धः॥
अपपूरणीप्रमाण्योः पूरणप्रत्ययान्ताः स्त्रीलिङ्गाः शब्दाः पूरणीग्रहणेनह

१८
१३८

त्यंते प्रमाणानि स्वरूपग्रहणम प्रमाणं नान्यमाणानि शाहोनाष्टवङ्क्षीदेरष्ट
न्यथोभवति कल्याणीपंचमीश्रामोरात्रौगणेकल्याणीपंचमूत्रारात्रयः कल्याणी
दशमाभार्याः मीप्रमाणानीयथोमीप्रमाणाः क्रुद्धविनः भार्याप्रमाणाः ग्रविप्रा
धानप्रमाणानिग्रहणम यत्रान्यपदार्थप्रमाणगुणविशति नकेवलेवतिपदार्थ
एव नप्रमाणाः प्रधानम् पुंवद्भावप्रतिषेधेपिप्रधानप्रमाणेषुवेदस्थाने उद
नभवति कल्याणीपंचमीग्रामनपेलकल्याणपंचमीकः पक्षइति नेतनेलउ
पसंख्यानम नगोनैत्राश्रामाराज्ञीणामद्भुतनेत्राः नद्यऋतिकिम देवदत्तनेत्रकः
छेदाभवनेतरूपसंख्यानम प्रहस्यानितेत्रादेवाः सोमनेत्राः मासादस्थानिप्रत्यया
पूर्वपदाद्धानिति पंचकोमासोप्रपंचमासिकः कर्मकरः दशमासिकः मासोग्रा
वत्सभत्नयदृक्तिसंख्यायाश्चनिषादेनायाः कन् श्वेतवेदिरुमर्याचलोमनः श्वेताइ गरि
म इत्येनाभ्यांपरोयोलोमशब्दस्तदन्तादृड्क्षीदेरष्टमन्यथोभवति श्वेतगंनामानिलो
मान्यस्थानलोमश्चापारःवहिर्लोमःपटः षड्नाभिकायाः संतायोनसंवासूलान

ॐ.
कात्.
३८८

सिकोनादङ्गीदीप्प्रत्ययो भवति नासिकायाश्च नस समापद्यते अस्थूलात् इ
ति नासिकाविशेषणम् न चेत्स्थूलशब्दात्परा नासिका भवतीति संज्ञायामिति स
मुदायोपाधिः तुङ्गनासिका तुङ्गणसः वार्द्धीणसः गोनसः संज्ञायामिति किम्
तुङ्गनासिकः अस्थूलादिति किम् स्थूलनासिकः खुरखराभ्यां नस्वक्तव्यः खुर
णसः खरणसः पक्षे अप्प्रत्ययोपि विधीयते खुरणसः खरणसः शितिनाः अहिनाः अर्च
ना इति निगमे दृश्यते उपसर्गाच्च उपसर्गात्परो यो नासिकाशब्दस्तदन्तादङ्गी
दीप्प्रत्ययो भवति नासिकायाश्च नस समापद्यते असंज्ञार्थं वचनम् उन्नासि
कास्योन्नसः प्रणसः उपसर्गाद्बहुलमिति णत्वम् वेर्ग्रो वक्तव्यः विगता नासिका
स्य विग्रः समानस्य सभादिवर्षादिकृत्वचनेष्वपीपदानपदप्रोष्ठपदाः सप्र
नादयो बहुव्रीहिसमासाः अप्प्रत्ययो निपात्यन्ते अन्यदपीह टिलोपादिकं निपा
तनादेव सिद्धम् शोभने प्रातरस्य सुप्रातः शोभने श्वोस्य सुश्वः शोभने दिवास्य सुदि
वः शारेरिव कुक्षिरस्य शारिकुक्षः चत्वारोऽश्रयो यस्य चतुरश्रः एणीपाद इव पादाव।

७८

ऐणीपदः अजस्येव पादावस्याजपदः प्रोष्ठोगौस्तस्येव पादावस्य प्रोष्ठपदः नञ्दुः
सुभ्योहलिसक्थ्योरन्यतरस्याम् नञ् दुस् सु इत्येतेभ्यः परौ यौ हलिसक्थिश
ब्दौ तदन्तात् बहुव्रीहेः षच्प्रत्ययो भवति अन्यतरस्याम् अविद्यमानो हलिरस्य अहलः
अहलिः दुर्हलः दुर्हलिः सुहलः सुहलिः अविद्यमाने सक्थिनी अस्य असक्थः असक्
थिः दुःसक्थः दुःसक्थिः सुसक्थः सुसक्थिः नित्यमसिच्प्रजामेधयोः न
ञ्दुःसु इत्येवं नञ्दुःसुभ्यः परौ यौ प्रजामेधाशब्दौ तदन्तात् बहुव्रीहेर्नित्यमसिच्प्र
त्ययो भवति अविद्यमाना प्रजास्य अप्रजाः दुष्प्रजाः सुप्रजाः अविद्यमाना मेधास्य अमे
धाः दुर्मेधाः सुमेधाः नित्यग्रहणं किमर्थं यावता पूर्वसूत्रादन्यतरस्यामिति नैव सम्ब
ध्यते एवं तर्हि नित्यग्रहणादन्यत्रापि भवतीति सूच्यते श्रोत्रियस्यैव ते राजन् मन्दक
स्याल्पमेधसः बहुप्रजाश्छन्दसि बहुप्रजा इति छन्दसि विषये निपात्यते बहुप्रजा नि
र्ऋतिमाविवेश छन्दसीति किमर्थम् बहुप्रजो ब्राह्मणः धर्मादनिच्केवलात् के
वलो यो धर्मशब्दः असमस्त तदन्तात् बहुव्रीहेः अनिच्प्रत्ययो भवति कल्याणधर्मा ॥

प्रियधर्मा केवलादिति माभूत् परमः स्वधर्मोस्य परमस्वधर्मः यद्येवं त्रिपदेब
हुव्रीहौ प्राप्नोति परमः स्वोधर्मोस्येति एवं तर्हि केवलादिति पूर्वपदं निर्दिश्यते
केवलात्पूर्वपदात्परो यो धर्मशब्दो न पदसमुदायात् तदंताद्बहुव्रीहेः प्रत्यय
इति जंभासुहरिततृणसोमेभ्यः बहुव्रीहौ समासे स्वादिभ्यः परो जंभेति कृत।
समासांतमुत्तरपदं निपात्यते जंभशब्दोभ्यवहार्यवाची दंतविशेषवाची च
शोभनो जंभोस्य सुजंभा देवदत्तः शोभनाहारः शोभनदंतो वा एवं हरितजंभा।
तृणजंभा सोमजंभा दंतवचने तृणमिव जंभोस्य सोम इव जंभोस्येति विग्रही
तव्यम् सुहरिततृणसोमेभ्य इति किम् पतितजंभः दक्षिणेर्मा लुब्धयोगे द
क्षिणेर्मेति बहुव्रीहौ कृतसमासांतो निपात्यते लुब्धयोगे लुब्धो व्याधः दक्षि
णमेर्मं व्रणितमस्य व्याधेनेत्यर्थः लुब्धयोग इति किम् दक्षिणेर्मं शाकटम्
इच्कर्मव्यतिहारे कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच्प्रत्ययो भवति तत्रते।
नेदमिति सरूपे इत्येवं बहुव्रीहिर्विधीयते केशेषु च केशेषु च गृहीत्वेदं युद्धं वृत्ते

केशाकेशि कचाकचि मुसलैर्मुसलैश्च प्रहृत्येदं युद्धं मुसलामुसलि दे
ण्डादंडि युद्धं वर्तते तिष्ठद्गुप्रभृतिषु यत्र इच्प्रत्ययः पठ्यते द्विदंड्यादिभ्यश्च द्विदं
ड्यादयः शब्दा इच्प्रत्ययान्ताः साधवो भवन्ति द्विदंड्यादिभ्य इति तादर्थ्ये षष्ठी चतुर्थी
वा पंचमी द्विदंड्यादिभ्य इच्प्रत्ययो भवति तथा भवति यथा द्विदंड्यादयः सिध्य
न्तीत्यर्थः समुदायनिपातनात्स्वार्थविशेषावबोधो द्विदंडि प्रहरति द्विमुसलि
प्रहरति इत्वं भवति द्विदंडा द्विदंडा शालेति बहुव्रीह्यादिकार्येऽन्यत्र स्य कषात्
क्रुध्विडिपाति निकुच्यकर्णौ निकुच्यकर्णी धावति प्रोह्यपादौ प्रोह्यपादं हस्ति
नं वाहयति मयूरव्यंसकादित्वात्समासः द्विदंडि द्विमुसलि उभाञ्जलि उभया
ञ्जलि उभादन्ति उभयादन्ति उभाकर्णि उभयाकर्णि उभाहस्ति उभयाहस्ति
उभापाणि उभयापाणि उभाबाहु उभयाबाहु इति निपातनादिच्प्रत्ययलो
पः प्रत्ययलोपलक्षणेनाव्ययीभावसंज्ञा प्रसंभ्यां जानुनोर्ज्ञुः प्रसम इत्येता
भ्यां परस्याजानुशब्दस्य ज्ञु इत्ययमादेशो भवति प्रज्ञौ जानुनी यस्य प्रज्ञुः संज्ञुः ऊर्ध्व

ॐ॰
काव्॰
३८॰

मातुः ऊधसोनङ्॥ ऊधःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति समासान्तः कुण्ड
मिवऊधोस्याः कुण्डोध्नी घटोध्नी ऊधसोनङि स्त्रीग्रहणं कर्तव्यम् इह मा भूत् म
होधाः पर्जन्यः कुण्डोधो धैनुकम् धनुषश्च धनुःशब्दान्तस्य बहुव्रीहेरनङादेशो
भवति समासान्तः शार्ङ्गं धनुरस्य शार्ङ्गधन्वा गाण्डीवधन्वा वासंज्ञायाम् धनुःश
ब्दान्तस्य बहुव्रीहेर्वा अनङादेशो भवति समासान्तः संज्ञायां विषये पूर्वेण नित्यः
प्राप्तो विकल्प्यते शतधन्वः शतधन्वा दृढधनुः दृढधन्वा जायाया निङ्॥ जा
याशब्दान्तस्य बहुव्रीहेर्निङादेशो भवति समासान्तः युवतिर्जायास्य युवजानि
वधूजानिः प्रियाजानिः गन्धस्येदुत्पूतिसुसुरभिभ्यः उत् पूतिसुसुरभिभ्यः इत्ये
तेभ्यश्च परस्य गन्धशब्दस्य इकारादेशो भवति समासान्तः बहुव्रीहौ समासे उ
कार उच्चारणार्थः उद्गतो गन्धो ऽस्य उद्गन्धिः पूतिगन्धिः सुगन्धिः सुरभिगन्धिः उत्
पूतिसुसुरभिभ्य इति किम् तीव्रगन्धो भक्तः गन्धस्येत्वे तदेकान्तग्रहणं कर्तव्या
म इह मा भूत् शोभना गन्धा अस्य सुगन्धः आपणिकः सुरभिगन्धः अल्पाख्या

१८१

याम् अल्पाख्यायां योगे गंधशब्दस्य इकारादेशो भवति समासान्तः बहुव्रीहौ स
मासे सूपः अल्पोस्मिन् सूपगंधि भोजनम् घृतगंधि दधिगंधि अल्पपर्याययोगे
यथाहुः उपमानाच्च उपमानात्परो यो गंधशब्दस्तस्य इकारश्चादेशो भवति
समासान्तः बहुव्रीहौ समासे पद्मस्येव गंधोस्य पद्मगंधिः उत्पलगंधिः करीषगं
धिः पादस्य लोपोऽहस्त्यादिभ्यः उपमानादित्येव उपमानाद्धस्त्यादिवर्जितात्पर
स्य पादशब्दस्य लोपो भवति समासान्तः बहुव्रीहौ समासे स्थानिद्वारेण लोपस्य
समासान्तता व्याघ्रस्येव पादावस्य व्याघ्रपात् सिंहपात् अहस्त्यादिभ्य इति कि
म् हस्तिपादः कटोलकपादः हस्तिन् कटोलक गंडुल गंडोल कंडोल गडो।
ल गंडोलक महेला दासी गणिका कुसूल कुंभपदीषु च कुंभपदीप्रभृतयः
शब्दाः कृतपादलोपाः समुदायावयवपठ्यन्ते तत्रैव सत्रेनेयम् पादस्य लोपो भा
वति कुंभपद्यादिविषये यथा कुंभोपद्यादयालिषङ्क्तेतीति समुदायपाठस्य
च प्रयोजनम् विषयनियमः स्त्रियामेव तत्र च ङीष्प्रत्ययस्य पदनान्यत्रेति कुम्भ

ॐ. पदी एकपदी जालपदी शतपदी मुनिपदी शितिपदी सूत्रपदी गोधापदी कल
कावृ. शीपदी विपदी दासीपदी स्वपदी निष्पदी आर्द्रपदी तृणीपदी कुम्भपदी द्रोणपदी
३५२ सूकरपदी शकृत्पदी अष्टापदी सूदीपदी संख्यासुपूर्वस्य संख्यापूर्वस्य सुपूर्व
स्य बहुव्रीहेः पादशब्दान्तस्य लोपो भवति समासान्तः द्वौ पादावस्य द्विपात् त्रिपा
त् शोभनौ पादावस्य सुपात् वयसि दन्तस्य दतृ संख्यासुपूर्वस्यैव संख्या
पूर्वस्य सुपूर्वस्य च बहुव्रीहेर्यो दन्तशब्दस्तस्य दतृ इत्ययमादेशो भवति समासा
न्तः वयसि गम्यमाने द्वौ दन्तावस्य बालकस्य द्विदन् त्रिदन् चतुर्दन् शोभना दन्ता
अस्य समस्ता जाताः सुदन् कुमारकः वयसीति किम् द्विदन्तः कुञ्जरः सुदन्तो दाक्षि
णात्यः छन्दसि च छन्दसि विषये दन्तशब्दस्य दतृ इत्ययमादेशो भवति बहुव्रीहौ
पन्नदन्तमालभेत उभयतोदन्तः प्रतिगृह्णाति स्त्रियां संज्ञायाम् स्त्रियामन्यप
दार्थे संज्ञायां विषये दन्तशब्दस्य दतृ इत्ययमादेशो भवति समासान्तः बहुव्रीहौ
समासे पयावदन् पयावदन्तः श्योकदन् श्योकदन्तः संज्ञायामित्येव पयावद

नः अरोकदंतः अरोको निर्दीप्तिः अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च संज्ञायामि
ति निवृत्तम् अग्रान्ताच्छब्दात् शुद्धशुभ्रवृषवराह इत्येतेभ्यश्चोत्तरस्य दंतशब्द
स्य विभाषा दतृ इत्ययमादेशो भवति समासान्तः बहुव्रीहौ समासे कुड्मलाग्रद
न् कुड्मलाग्रदंतः शिखराग्रदन् शिखराग्रदंतः शुद्धदन् शुद्धदंतः शुभ्रदन्
शुभ्रदंतः वृषदन् वृषदंतः वराहदन् वराहदंतः अनुक्तसमुच्चयार्थश्चका
रः अहिदन् अहिदंतः मूषिकदन् मूषिकदंतः ककुदस्यावस्थायां लोपः क
कुदशब्दान्तस्य बहुव्रीहेर्लोपो भवति समासान्तः अवस्थायां गम्यमानायां का
लादिकृतावस्थावयःप्रभृतयोवस्थोच्यते असंजातंककुदमस्यासंजात
ककुत् बाल इत्यर्थः पूर्णककुत् मध्यम इत्यर्थः पन्नककुत् वृद्ध इत्यर्थः स्थूलका
कुत् बलवानित्यर्थः यष्टिककुत् नातिस्थूलो नातिकृश इत्यर्थः अवस्थायामि
ति किम् श्वेतककुदः त्रिककुत्पर्वते त्रिककुदिति बहुव्रीहौ ककुदशब्दस्य लो
पः समासान्तो निपात्यते पर्वतेभिधेये त्रीणि ककुदानि यस्य त्रिककुत्पर्वतः क

ॐ· काशि· ३५२

कुदाकारंपर्वतस्यशृंगम् ककुदमुच्यते नचसर्वेत्रिशिखरःपर्वतस्त्रिककुत्
किंतर्हिसंज्ञैषापर्वतविशेषस्यपर्वतइतिकिम् त्रिककुदोऽन्यः उद्विभ्यांककुद
स्य ततविद्भ्यांपरस्यककुदशब्दस्यलोपोभवति समासान्तःबहुव्रीहौस
मासेउद्गतकाकुदमस्यउत्काकुत् विकाकुत् तालुकाकुदमुच्यते पूर्णाद्विभा
षा पूर्णात्परस्यकाकुदशब्दस्यविभाषालोपोभवति समासान्तः बहुव्रीहौसमा
से पूर्णकाकुदमस्यपूर्णकाकुत् पूर्णकाकुदः सुहृद्दुर्हृदौमित्रामित्रयोः सु
हृत् दुर्हृत् इतिनिपात्यते यथासंख्यंमित्रामित्रयोरभिधेययोः सुदुर्भ्यांपरस्य
हृदयशब्दस्यहृद्भावोनिपात्यते बहुव्रीहौसमासेतथाऽडःशद्वात् शोभनंहृदय
मस्यसुहृत् दुर्हृदयमस्यदुर्हृत् अमित्रः मित्रामित्रयोरितिकिम् सुहृदयःका
रुणिकः दुर्हृदयःचोरः उरःप्रभृतिभ्यःकप् उरःप्रभृत्यन्ताद्बहुव्रीहेःकप् प्रत्य
योभवति समासान्तः व्यूढमुरोस्यव्यूढोरस्कः प्रियसर्पिष्कः अवमुक्तोपानत्कः
पुमाननड्वान्पयोनौर्लक्ष्मीरितिविभक्त्यन्ताः पठ्यन्ते नप्रातिपदिकानितेनेहद्वयो

गतम् एकवचनांतानामेव ग्रहणमिति यथा विज्ञायते द्विवचनबहुवचनांता
नामभूदिति तत्रोदिशेषाद्विभाषेति विकल्प एव भवति द्विपुमान् द्विपुंस्को ब
हुपुमान् बहुपुंस्क इति उरस् सर्पिस् उपानह् पुमान् अनड्वान् पयः नौः ल
क्ष्मीः दधि मधु शालि अर्थान्नञः इत्यस्त्रियाम् इत्येताद्बहुव्रीहेः कप्प्रत्ययो
भवति स्त्रियामभिधेयायाम् बहवो दंडिनो यस्यां बहुदंडिका शाला बहुच्छात्रि
का बहुस्वामिका नगरी बहवो वाग्मिका यस्यां भार्यायामिति किम् बहुदंडी ग्रा
मो बहुदंडिकः शेषाद्विभाषेत्येतद्भवति नद्यृतश्च इत्येताद्बहुव्रीहेः कप्कारांता
च्च कप्प्रत्ययो भवति समासांतः बह्व्यः कुमार्यो यस्मिन् बहुकुमारीको देशः बा
हुब्रह्मबंधूकः अनः स्वल्पापि बहुकर्तृकः उकारो मुखसुखार्थः शेषाद्विभा
षा यस्माद्बहुव्रीहेः समासांतो न विहितः तस्माच्छेषाद्विभाषा कप्प्रत्ययो भव
ति बह्व्यः खट्वा यस्मिन् बहुखट्वकः बहुखट्वाकः बहुखट्वः बहुमालकः बहुमा
लाकः बहुमालः बहुवीणकः बहुवीणाकः बहुवीणः कथमनड्वत्कं साम ॥

ॐ:
काव्र:
३५३

वह्वाकुकं सूक्ष्मामिति यावता विदितयवसामान्येनात्र समासान्तः अकृत्प्राव
त्तिनैनतदस्तिविशेषे सद्ध्याते अनृचमाणावेतेयो बह्वृचश्चरणाख्यायामि-
तिसिष्यादितिकिम् प्रियपथः प्रियधुरः नसंज्ञायाम् संज्ञायांविषयेबहुव्रीहे
कप्प्रत्ययोभवति सर्वेणासामः प्रतिषिध्यते विश्वेदेवाश्चस्यविश्वदेवः विश्वय
शाः ईयसश्च॥ ईयसन्ताद्बहुव्रीहेः कप्प्रत्ययोभवति सर्वाविभक्तिः प्रतिषिध्य
ते बहवः श्रेयांसोस्यबहुश्रेयान् शेषाद्विभाषेत्यस्यप्रतिषेधा बहुश्रेयसो
स्यबहुश्रेयसीः नद्युतश्चेत्यस्यप्रतिषेधः ह्रस्वत्वमपिनभवति ईयसोबहुव्रीहे
पुंवदितिवचनात् वेदितेश्चातः वेदितैषीयोभ्रातृष्याह्वोवनेनेतदन्ताद्बहुव्रीहे
कप्प्रत्ययोनभवति वेदिकः स्तनः सूनित उद्याने शोभनोभ्रातास्य सुभ्रा
ता वेदितइतिकिम् सूर्येभ्रातृकः स्तनश्छन्दसि स्वकारान्ताद्बहुव्रीहेः छंदसि
विषयेकप्प्रत्ययोनभवति हतामातास्यहतमाता हतस्वसाः सदोना नाडी
तंत्र्योः स्वाङ्ग योनाडीतंत्र्याह्वोवनेनेतदन्ताद्बहुव्रीहेः कप्प्रत्ययोनभवति ब

१८४

वह्वोनाड्यस्यवहूनाडिःकायः वहूतंत्रीग्रीवा धमनीवचनस्तंत्रीशब्दः स्वांगाइति
किम् वहूनाडीकःस्तंभः वहूतंत्रीकवीणा निष्प्रवाणिश्च निष्प्रवाणिरिति।
नदीलक्षणस्यकपः प्रतिषेधोनिपात्यते प्रोयतेस्यामिति प्रवाणी तंत्रवायशा
लाकाभापने निर्गताप्रवाणीअस्य निष्प्रवाणिः पटः निष्प्रवाणिः केवलः अ
पनीतशलाकःसमाप्तवानः प्रत्यग्रोतोननकउच्यते उष्मप्रसंख्यानवती शुद्धग
णाविद्धनन्दकस्वरार्थावधूतन्वनूयसिद्धिः होमिपयेकाशिकानाम इतिजयादि
त्यविरचितायांकाशिकायांचतुर्थःपादः॥ समाप्तश्चायंपंचमोध्यायः॥ ॐएका
चोद्वेप्रथमस्य एकाचइतिद्वेइतिचप्रथमस्येतिचेतदधिकृतंवेदितव्यम् इत
उत्तरंयदनुक्रमिष्यामःप्राक्संप्रसारणविधानात्तत्रएकाचःप्रथमस्यद्वेभवतः इत्येवंत
द्वेदितव्यम् वक्ष्यतिलिटिधातोरनभ्यासस्येतितत्रधातोरवयवस्यानभ्यासस्यप्रथ
मस्यैकाचोद्वेभवतः जजागार पपाच पपाठ इयाय आर एकाचइतिवहुव्रीहिनिर्दे
शः तत्रएकोच यस्मिन्सोयमित्येकाच् अवयवेनविग्रहःसमुदायःसमासार्थःअ

ॐ· काशि· ३५४

अथवैतस्य समुदायेवयवो भवतीति तस्मादेकस्यैवाद्विर्वचनं भवति एवञ्च यत्रत्रयेनैवावा
समुदायएकाच् तेनैव न तदवयवोप्यस्तुवः पशात्स्य न त्वेष्यनवयवैकाचो न द्विरु
च्यते किंतर्हि समुदायैकाजेव तथा हि एकस्मान्नव्रत्रास्या सावयवः समुदायोनुगर्
ह्यते यथा चेतत्र प्रथमन्तं व्यपदेशवद्भावात् इयाय आरेभ्यो कामपि व्यपदेशव
द्भावात् एवं हि प्रयोगस्य द्विर्वचनमिदमाद्वौनिसंख्यादिद्वेइति विधीयते तेन स
एव शब्दो द्विरुच्यते न तु शब्दान्तरं तत्स्थाने विधीयते अजादेर्द्वितीयस्य प्रथम
द्विर्वचनापवादोयम् अजादेर्द्वितीयस्यैकाचो द्विर्वचनमभिधीयते अटू आदि
भ्यो यातोर्वलवयवस्य एकाचो द्वे भवतः अटिटिषति अशिशिषति अरिरिष
ति अटतेः सिषधूद्धं ससमनीति इद्दितेगुणे रपरत्वे च द्विर्वचने तोतिसयानिवद्भाव
प्राप्नोति न तु प्रतिविधानम् द्विर्वचननिमित्ते चीत्सच्यते न वा द्विर्वचनस्य निमि
त्तमिह किंतर्हि कार्यी न च कार्यीनिमित्तमित्याश्रीयते तथादिष्टि निमित्तयोः गु
णवृद्ध्योः प्रतिषेधो विधीयमानः श्यितेनवचनमभवति न दीकार्यिणः श्रीडूगुणो

प्रतिनिमित्तभावइतितन्नकेचिदजादेरितिकर्मधारयमाश्रित्यैवमीमिक्षतेति अच
आदिः अजादिः अजादेरुत्तरस्यएकाचोद्वेभवतइतितेषांद्वितीयस्येतिविश्व
ष्टार्थंदुर्ल्लभम् नंद्राःसंयोगादयः द्वितीयस्येतिवर्त्तते द्वितीयैकाजवयवानां
द्राणोनदेतर्भीवानश्रामप्रतिषिध्यन्ते नकारदकाररेफाः द्वितीयस्यैकाचोवा
यवभूताः संयोगादयोनद्विरुच्यन्ते उंदिदिषति अड्डिडिषति अर्चिचिषतिन्न
द्राइतिकिम् ईचिक्षिषते संयोगादयइतिकिम् प्राणिणिषति अरिरिषति
प्रतितेरुथैसाभ्यामस्येतिगणनम् द्वितीयस्यैव दिद्रासति केचिदजादेरित्य
पिपंचम्यन्तंकर्मधारयमनुवर्त्तयन्ति तस्यप्रयोजनम् इंदिद्रीयिषति अजादे
रनेनवचनाहकारोद्विरुच्यतेयथैवेति इंद्रमिच्छतीतिक्यच् तदेनात् इंद्रीयितमि
च्छतीतिसन् वकारस्याप्ययंप्रतिषेधोवक्तव्यः उज्झिजिषतीतियदाकारोपधा
उज्झिः उपदिश्यते तदायंप्रतिषेधः दकारोपधोपदेशेतुनवक्तव्यः यदेतुतदा
दकारस्यविधानव्यम् यकारस्यापरस्यप्रतिषेधोनभवतीतिवक्तव्यम् अगावतेर्थेन

ॐ. काव्य
३५५

यस्याख्यातौ नीनामुपसंख्यानमिति यङ् तत्र यङि चेति गुणः द्विर्वचनम् ईर्ष्यतेस्तृतीयस्यैकस्य भवतीति वक्तव्यम् कस्य तृतीयस्य केचिदाहुः व्यञ्जनस्येति ईर्ष्यियिषति अपरे पुनरेकाच इति व्याचक्षते ईर्ष्यिषिषति कण्ड्वादीनां च तृतीयस्यैकाचो द्वे भवतः कण्डूयियिषति असूयियिषति वा नामधातूनां तृतीयस्यैकाचो द्वे भवतः अशीयियिषति अशिशीयिषति अपर आहुः यथेष्टं नामधातुष्विति पुपुत्रीयिषति पुत्रीयियिषति पुत्रीयियिषति पुत्रीयिषिषति पूर्वोऽभ्यासः द्वे इति प्रथमान्तमनुवर्त्तते तेन दर्शितोदितः षष्ठ्यन्तं जायते तत्राभ्यासत्वे यामिल्यकुरुते ये द्वे विहिते तयोः पूर्वोऽवयवोऽभ्याससंज्ञो भवति पपाच पिपक्षति पापच्यते ऽस्येति अपीपचत् अभ्यासप्रदेशाः अत्र लोपोऽभ्यासस्येत्येवमादयः उभे अभ्यस्तम् द्वे इति वर्त्तमाने उभेग्रहणं समुदायसंज्ञाप्रतिपत्त्यर्थम् ये द्वे प्रकृते उभे अपि समुदिते अभ्यस्तसंज्ञे भवतः ददति ददत् दधति दधत् उभेग्रहणं किम् नेनिजतीत्यत्राभ्यस्तानामादिरिति स्वरः समुदाये यथा स्यात् प्रत्येकं पर्यायेण मा।

६६

वामाभूदिति अभ्यस्तप्रदेशाश्च दभ्यस्तादित्येवमादयः जक्षित्यादयष्षट् अभ्य

स्तमित्यनुवर्त्तते जक्ष इत्ययं धातुः इत्यादयश्च षड्धातवोऽभ्यस्तसंज्ञा भवन्ति सेयं

समानो धातुः तो अभ्यस्तसंज्ञा जक्ष भक्षहसनयोरित्यतः प्रभृति वेवीङ् वेतनाकान्त्य

इति यावत् जक्षति जाग्रति दरिद्रति चकासति शासति दीध्यते वेव्यत इति अभ्या

भ्यस्तानामादिरिति स्वरः प्रयोजनम् दीध्यदिति शानन्त्येयेन संपादितेनाभ्यस्ता

दिति च नुम्प्रतिषेधः नन्नादीनां दीर्घोऽभ्यासस्य नन्नादीनामिति प्रकारे ङ्यादिशा

हुः कस्य प्रकारार्थः ननेर्दीर्घत्वमभ्यासस्य न विहितं दर्शनेय एवं ये यथाभूताः ते तन्

नादीनां दयः तेषामभ्यासस्य दीर्घः साधुर्भवति तत्तनानः मामहानः स्वधाम् द

धारमीमाय अनड्वादीधारसम्भृतावदीर्घेभ्योऽपि छन्दसि प्रत्ययविशेषे वचनदर्शनेत

ततोऽप्युच्यतनमभवति ततोजशावलानदीनीति लिटि यातोऽरतनभ्यासस्य धातोस्तय

वस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः पपाच पपाठ प्रोर्णुनाव वा

चनूर्णोत्युवज्ञावरनिवचनाद् ऊर्णोतेरिजादेरित्याम् भवति लिटीति किम् कर्त्ता ह

ॐ· काव्· ३५९

णौ धातोरितिकिम् कुसीनोनावबुष्मोयदीदम् नोनूयतेत्रो नावसमान्या म कृत
सस्मिमित्वः द्विर्वचनप्रकारेष्वंदासिवेनिवक्तव्याम् येजागारतमत्वः कामयंते ध्वति
प्रियाणिधातिप्रयोणीति सन्यङोः धातोरनभ्यासस्येतिवर्तते सन्यङोरितिषष्ठ्
नेमेतत् सर्वंतस्य यङ्तस्य चानभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य
यथायोगं द्वे भवतः पिपक्षति अटिटिषति उंदिदिषति यङ्न्तस्यापिपापठ्यते प्र
टट्यते अरार्यते प्रोर्णोनूयते अनभ्यासस्येत्येव जुगुप्सिषते लोलूयिषते ॥
श्लौ श्लौ च परतो नभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायो
गं द्वे भवतः जुहोति बिभेति जिह्रेति चङि चङि परतो भ्यासस्य धातोरवयवस्य
प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः अपीपचत् अपीपठत् आटिटत्
औंदिदत् पचादीनां णिचि नामधातोः चङि विहिते णिलोपः उपधाह्रस्वत्वं द्विवचनं मित्येषां
कार्याणां प्रवृत्तिक्रमः तथाहि लघुनि धातौ परे इति सन्वद्भावे विधीयमानो ह्रस्वस्या
स्यातिवद्भावात् प्रतिबध्यते नानादिष्वादयः सर्वोभ्यासो भवतीति आटिटदिति

८७

वैचनेचीनिश्यानिवक्ष्ना वाद्वितीयस्यैकाचो द्विर्वचनं भवति दाश्वान्साह्वान्मीढ्वांश्च
दाश्वान् साह्वान् मीढ्वान् इत्येते शब्दाश्छन्दसि भाषायां च विशेषेण निपात्यन्ते दाश्
दान इत्येतस्य क्वसौ द्विर्वचनाभावोऽनिट्त्वं च निपात्यते दाश्वान् दाश्वांसौ दाश्वांसः क्वसेता
मिश्रेति श्छांदसप्रयोगम् साह्वानिति षह मर्षणे इत्येतस्य परस्मैपदम् उपधादीर्घत्व
मढिम्भनिट्त्वं च उपधायादीर्घत्वं ढत्वं च निपात्यते मीढ्वांस्तोकाय तनयाय
कृष्णादीनां केह भवतः इत्विक्तम् वक्त्रम् विक्लिदम् कृतः क्लिदेश्च वनेष्वेका।
विधानमिति कप्रत्ययः चरिचलिपतिवदीनामच्याक्चाभ्यासस्य चरादीनां धातूना
मचि प्रत्यये परतः द्वे भवतः अभ्यासस्य चाक् आगमो भवति आगमविधानसाम
र्थ्याच्च हलादिशेषो न भवति हलादिशेषं हि सत्यागमस्यादेशस्य वा विशेषो नास्ति च
राचरः चलाचलः पतापतः वदावदः वेति वचनात् तेन चरः पुरुषः चलेयानम् अव
दो मन्तव्यस्तत्रापि सिद्धं भवति हन्तेर्यङ्लुकि च हन्तेरच्प्रत्यये परतो द्वे भवतः घत्वं च भवति
अभ्यासस्य चाक् आगमः दीर्घश्चाभ्यासस्य घनाघनः संप्रसारणं पूर्वत्वम् तस्य प्रत्य

ॐ काशि. ३९७

ति इत्येन तयोरुत्तरपदयोस्तत्पुरुषे समासे ष्यङः संप्रसारणं भवति यणः स्थाने इग्भ
वतीत्यर्थः कारीषगंधीपतिः कौमुदगंधीपुत्रः कौमुदगंधीपतिः करीषस्येव गंधोऽ
स्य कुमुदस्येव गंधोऽस्येति बहुव्रीहिः उपमानाच्चेति गंधस्य इदंतादेशो भवति करीष
गंधेरपत्यमित्यण् तदंतस्य स्त्रियामणिञोरनार्षयोर्गुरूपोत्तमयोरिति ष्यङ् ततश्चा
पि विहिते षष्ठीसमासः वा संप्रसारणं स्यादिति दीर्घः ष्यङ् इति किम् इभ्यापुत्रः क्षत्रिया
पुत्रः पुत्रपत्योरिति किम् कारीषगंध्याकुलम् तत्पुरुष इति किम् कारीषगंध्यापतिः अ
स्य ग्रामस्य कारीषगंध्यापतिरयं ग्रामः ष्यङ् इति स्त्रीप्रत्ययग्रहणमिदम् स्त्रीप्रत्यये
चानुपसर्जने प्रत्ययग्रहणोपस्थानाद्विहितस्तदादेरिति तदादिनियमो नास्ति ते
न परमकारीषगंध्यायाः पुत्रः परमकारीषगंधीपुत्रः परमकारीषगंधीपतिरित्य
पि भवति उपसर्जने तु नेह न भवति अतिक्रांतः कारीषगंध्यामतिकारीषगंध्यः
तस्य पुत्रोऽतिकारीषगंध्यपुत्रः अतिकारीषगंध्यपतिः पुत्रपत्योः केवलयोरिदं सं
प्रसारणं तदादौ उदंते वा न भवति कारीषगंध्यापुत्राकुलम् कारीषगंध्यापरम

ऽद्धेतस्य च यथ्यणो यणः सन्ति तथापि ष्यङ एव संप्रसारणम् निर्दिश्य
मानस्यादेशा भवन्तीति संप्रसारणमिति चैतदपि क्रियते विभाषा परेरिति या
वत् बंधुनि बहुव्रीहौ ष्यङः संप्रसारणमित्यनुवर्त्तते बंधुशब्दे उत्तरपदे ब
हुव्रीहौ समासे ष्यङः संप्रसारणं भवति कारीषगंध्या बंधुरस्येति कारीषगंधी
बंधुः कौमुदगंधीबंधुः बहुव्रीहाविति किम् कारीषगंध्याया बंधुः कारीषगंध्या
बंधुः अत्रापि पूर्ववत्परत्वे कारीषगंधीबंधुरित्यत्र भवति अतिकारीषगंध्याबं
धुरित्यत्र न भवति तथा कारीषगंध्याबंधुर्न कारीषगंध्यापरमबंधुरिति बंधु
नीति नपुंसकनिर्देशः शब्दरूपापेक्षया पुल्लिंगाभिधेयत्वे बंधुशब्दः मातच्
मातृमातृकेषु ष्यङः प्रसार्यो विभाषया बहुव्रीहावेव कारीषगंध्यामातस्ये।
ति कारीषगंध्यामातः एवं बहुव्रीहौ कृते यत्तस्मादवोपसंख्यानान्त्वदे मातृशब्द।
स्य मातजादेशः तत्र विकल्पनाः सामर्थ्याद्बहुव्रीहिस्वरमन्तोदात्तत्वं बाधते मातृक
मातृशब्दयोस्तु भेदेनोपादानान्न घनश्चेति कबपि विकल्प्यते कारीषगंध्यामातः

ॐ.
कावृ.
३५८

कारीषगंधीमातः कारीषगंध्यामातृकः कारीषगंधीमातृकः कारीषगंध्यामा।
ताकारीषगंधीमाता वचिस्वपियजादीनां किपि संप्रसारणमित्यनुवर्त्तते घुट३.
इति निवृत्तम् वचभाषणे ब्रुवो वचिरिति वचिर्वा स्वप् ञिष्वप् शये यजादयो
यजदेवपूजायामित्यतः प्रभृत्यागणान्तात् तेषां वचिस्वपियजादीनां दानुबन्धो किति प्रत्य
ये परतः संप्रसारणं भवति वचि उक्तः उक्तवान् स्वपि सुप्तः सुप्तवान् यजि इष्टः
इष्टवान् वप् उप्तः उप्तवान् वह ऊढः ऊढवान् वस उषितः उषितवान् वेञ् उ
तः उतवान् व्येञ् संवीतः संवीत् संवीतवान् ह्वेञ् हूतः हूतवान् वद् उदितः
उदितवान् टुओश्वि शूनः शूनवान् यजो स्वरूपग्रहणात् तत्र प्रत्यये कार्यं विज्ञाय
ते तेन वाचिकिनवा विकमित्यत्र न भवति ग्रहिज्यावयिव्यधिवष्टिविचतिवृ
श्चतिपृच्छतिभृज्जतीनां ङिति च ग्रह उपादाने ज्या वयोहानौ वेञो वयिः व्यधताड
ने वश कान्तौ व्यच संभवे ओव्रश्चू छेदने प्रच्छ ज्ञीप्सायाम् भ्रस्ज पाके इत्येतेषां
यानुबन्धो ङिति प्रत्यये परतः वकारादिकिति च संप्रसारणं भवति ग्रह गृहीतः गृही

८५

नवान् इति निमद्धाति जरीमद्याते न्याद्वीनः जीनवान् ल्वादिभ्य इति निष्ठानत्वम्
इति नेनीयते जिनाति इल इति संप्रसारणदीर्घे कृते वादीनो ह्रस्व इति ह्रस्वः व
यिलिटि वेञो वयि आदेशः तस्य इद्भावात् किदेवो दाइयते ऊयतः ऊयुः यथैव व
यिग्रहणमनर्थकम् यजादिषु हिवोपाधाने नैवं प्राप्तम् तस्य लिटि वेञ इति प्रसा
रणप्रतिषेधं वक्ष्यति ववाविन्यादिषु नत्र यथैव स्थानिवद्भावाद् ह्वयो विधिः एवं प्र
तिषेधोपि प्राप्नोति नैव दोषः लिटि वयो य इति यकारस्य प्रतिषेधाद् ह्वयो विधो ग्रह
णो प्रतिषेधे वा ग्रहणमनुमास्यते मत्यमेतत यथयवार्थः मात्रानिर्देशानवयः स
ह्वीक्रियते व्यधि विद्धः विद्धवान् इति विध्यति वेविध्यते वृश्च उषितः उषितवा
न् इति उश्यः उशोति व्यचि विचितः विचितवान् इति विचिति वेविच्यते व्रश्चः
ऊज्जादित्वमनत्व प्रतियादिनम् तेन सर्वत्र ग्रहणानि प्रत्यये संप्रसारणम् उद्विग्न
उद्विग्नम् उद्विग्नवान् वृश्च वृक्णः वृक्णवान् प्रथकथं ऊनमञ्च प्रश्नम्
जेनिदिषनेनभविनवाम नैव दोषः निष्ठादेशः घनमरप्रत्ययविधीद्विपिष्ठमिदो

ॐ· कात· ३५४

वक्तव्यः तत्रषत्वेनतस्यासिद्धत्वात्कत्वादिनिषेधानभवति ऊठेनकर्तव्योयदसिद्धमे
वेतिप्रवर्त्तते ऊतम् ङिति वृश्चति वरीवृश्च्यते प्रच्छ पृष्टः पृष्टवान् ङिति पृच्छति
परीपृच्छ्यते नङितप्रश्नेचासत्रकाल इतिनिपातनादसंप्रसारणम् भ्रस्ज भृष्टः
भृष्टवान् ङिति भृज्जति बरीभृज्ज्यते सकारस्यचुत्वाज्जश्त्वमितिजः तेनजकारः
सोच्चुत्वाज्झुरितिश्चुत्वेनजकारः लिट्यभ्यासस्योभयेषाम् उभयेषांवच्यादीनांग्र
हादीनांच लिटिपरतोभ्यासस्यसंप्रसारणंभवति वच् उवाच उवचिथ स्वप्
सुष्वाप सुष्वपिथ यज इयाज इयजिथ वप् उवाप उवपिथ ग्रहेरविशेषः ज्या
जिज्यौ जिज्यिथ वेञ् उवाय उवयिथ व्यध विव्याध विव्यधिथ वश उवाश उवशि
थ वच विव्याच विव्यचिथ वृश्चतेः ससत्वसति योगेनास्ति ॥
विशेषः योगारंभेनसति यदिसंप्रसारणमकृत्वा फलादिशेषेणरेफोनिवर्त्यते
वकारस्यसंप्रसारणंप्राप्नोति अथरेफस्यकृतंसंप्रसारणमन्तरंक्रियते तदानी
मुवनस्यस्यानिवृत्तावात्संप्रसारणेसंप्रसारणमितिप्रतिषेधोभवति इत्याशिवि

शेषः ववश्च वव्रश्चिथ पप्रच्छ वभ्रज्ज प्रच्छतिभ्रज्ज्योर्विशेषः ग्रहिकदर्शं चैदमभ्य
सस्य संप्रसारणं विधीयते किंनिदिपरत्वाद्धलादेः संप्रसारणे कृते पुनः प्रसंगाविज्ञा
नाद् द्विर्वचनम् ऊवतुः ऊवुः इति प्रयिकाद्देवो उभयेषां ग्रहणं सिद्धे पुनरुभयेषा
मिष्यते हलादिशेषमपि बाधित्वा संप्रसारणमेव यथा स्यादिति विव्याय विव्या
व स्वापेश्चङि स्वापेरिति ण्यन्तस्य ग्रहणम् तस्य चङि परतः संप्रसारणं भव
ति असूषुपत् असूषुपताम् असूषुपन् द्विर्वचनात्पूर्वमेव संप्रसारणम् तत्र कृ
ते लघूपधगुणः तस्यापि वस्तुपधायाः ऊतिङ्ग्रवे ततो द्विर्वचनम् दीर्घो लघोरिति
दीर्घत्वम् चङीति किम् स्वाप्यते स्वापितः किमीति निवृत्तम् ङितीति केवलमि
हानुवर्तते इत्येन तु वितानम् स्वपिस्यमिव्येञां यङि सिषपयायते स्वप्नस्वप्नम
वधुनयाहेः वेञ् संवरणे इत्येतेषां धातूनां यङि परतः संप्रसारणं भवति सोषुप्य
ते सेसिम्यते वेवीयते यङीति किम् स्वप्नक् न वशः यङीतिवर्तते वशः स्यानोः
यङि परतः संप्रसारणं न भवति वावश्यते वावश्यते वावश्यते वायंकी यङीति

ॐ॰ वर्त्तते चायृ पूजानिशामनयोरित्यस्य धातोर्यङि परतः कीशब्द आदेशो भवति चे
कात्र॰ कीयते चेकीयेते चेकीयंते स्फायः स्फी निष्ठायाम् स्फायी ओप्यायी वृद्धावित्यस्य
८॥ धातोर्निष्ठायां परतः स्फी इत्ययमादेशो भवति स्फीतः स्फीतवान् निष्ठायामिति कि
म् स्फातिः स्फातीभवतीत्येतदपि क्तिन्नंतस्यैव रूपं न निष्ठांतस्य निष्ठायामित्येतदपि
क्रियते लिङ्ङेङ्गेत्यनिष्ठायोगस्तस्मात् स्त्यः प्रपूर्वस्य निष्ठायामित्यनुवर्तते सम्प्र
सारणादृवमिति च स्त्यै इत्येतन्ननस्यैते ष्ट्यै ष्टै शब्दसंघातयोरिति द्वयोरप्येत
योर्धात्वोः स्त्यारूपमापन्नयोः सामान्येन ग्रहणम् स्त्या इत्येतस्य प्रपूर्वस्य निष्ठायां
परतः संप्रसारणं भवति प्रस्तीतः प्रस्तीतवान् संप्रसारणे कृते यावन्नाविहिते
ति निष्ठानत्वं भवति प्रस्त्योऽन्यतरस्यामिति नत्वपक्षे मकारः क्रियते प्रस्तीमः प्रस्तीम
वान् प्रपूर्वस्येति किम् प्रवेग्रहणमिदाप्ययथा स्यात् प्रसंस्तीतः प्रसंस्तीतवान् न
कृते प्रसर्वे स्येति निषद्धेष्यैव द्वीदिः प्रः पूर्वो यस्य धातोः प्र एवं समुदायस्य मा भूर्वे
नेदं यवमस्यपस्यति नाधिकरणो च बहुव्रीहिः प्रसंस्त्यानः प्रसंस्तीनवानित्यत्रापि प्र

पूर्वे समुदायावयवः स्पर्शो भवति द्रवमूर्त्तिस्पर्शयोः श्यः द्रवमूर्त्तौ द्रवकाठि
न्ये स्पर्शे च वर्त्तमानस्य श्यः श्यैङ्गतस्य विसर्जनीयान्तो निष्ठायां परतः संप्रसारणं भ
वति शीनं घृतम् शीना वसा शीतो मेदः द्रवावस्थानं काठिन्यं गतमित्यर्थः स्प
र्शे इति च शुक्लादिवदस्य शीतस्पर्शस्य निर्द्देष्टव्या द्रवमूर्त्तिस्पर्शयोरिति किम् सं
श्यानो वृश्चिकः प्रतेश्च श्य इति वर्त्तते अभिश्च अव इत्येवं पूर्वस्य श्य इत्येतस्य निष्ठा
यां संप्रसारणं भवति प्रतिशीनः प्रतिशीनवान् द्रवमूर्त्तिस्पर्शाभ्यामन्यत्रापि ।
यथा स्यादिति योगारंभः विभाषाभ्यवपूर्वस्य श्य इति वर्त्तते अभिश्च अव इत्येवं पूर्व
स्य श्य इत्येतस्य निष्ठायां संप्रसारणं भवति विभाषा अभिशीनम् अभिश्यानम्
अवशीनम् अवश्यानम् द्रवमूर्त्तिविवक्षायामपि विकल्पो भवति अभिशीन
म् घृतम् अभिश्यानम् घृतम् अवशीनम् घृतम् अवश्यानम् घृतम् सेयमुभ
यत्रविभाषा द्रष्टव्या पूर्वग्रहणस्य प्रयोजनम् समभिश्याने समवश्याने इत्यत्र मा
भूदिति केचिदाचक्षते न किलायमभ्यवपूर्वः समुदाय इति योगोभ्यवपूर्वस्येत्यलं ।

ॐ. काव्· ५.२

प्रयोविकल्पःकस्मान्नभवति तस्मादत्राप्रकरणेनभवितव्यमेव यदितन्नेष्यते
तोयत्नांतरमास्थेयम् पूर्वेग्रहणमप्यवान्तरप्रयोजनंवक्तव्यम् शृतंपाके विभा
षेत्यनुवर्त्तते श्रापाकइत्यस्यण्यन्तस्याण्यन्तस्यपाकेभिधेयेक्तप्रत्ययेविभा
षाशृभावोनिपात्यते शृतंक्षीरं शृतंहविः व्यवस्थितविभाषाचेयंतेनक्षीरहविषो
र्नित्यंशृभावोभवति अन्यत्रनभवति श्राणायवागूः श्रपितायवागूरिति यदा
पितावत्प्रयोजकेद्वितीयोणिजुत्पद्यते तदापिनेष्यते श्रपितंक्षीरंदेवदत्तेनय
ज्ञदत्तेन श्रातिरयमकर्मकः कर्मकर्तृविषयस्यापचेरर्थेवर्त्तते तत्रापितःप्रकृ
त्यर्थमाह तदुभयोरपिशृतमितीष्यते शृतंक्षीरंदेवदत्तेनेति प्यायःपी॥
विभाषेत्येव ओप्यायीवृद्धावित्यस्यधातोर्निष्ठायांपीइत्ययमादेशोभवति पीनं
मुखं पीनौबाहू पीनमुरइति इयमपिव्यवस्थितविभाषैव तेनानुपसर्गस्यनि
वपालः अनियुक्तार्थ आरम्भः गोतन्तियवमिति किम् वत्सपालः पाल इति किम्
गोरक्षः णिनि णिन्यन्त उत्तरपदे पूर्वपदमाद्युदात्तं भवति पुष्पहारी फलहा
री पर्णहारी उपमानं शब्दार्थप्रकृतावेव उपमानवाचि पूर्वपदमाद्युदात्तं भव
ति शब्दार्थप्रकृतावेव णिन्यन्त उत्तरपदे परे उष्ट्रक्रोशी ध्वांक्षविरावी खरनादी उपमा
नग्रहणं विषयविभागार्थम् अप्राप्ते एव च शब्दार्थप्रकृतावेवेति किम् वृकवंचीवृ
कप्रेक्षी प्रकृतिग्रहणं किम् प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्थे स्यात्तत्र यथा
स्यात् इह माभूत् गर्दभोच्चारी कोकिलाभिव्याहारी एवकारकरणमुपमानाव
धारणार्थम् शब्दार्थप्रकृतावनुपमानमनुपमानं चाद्युदात्तं भवति सिंहविनर्दी पु
करजल्पी युक्तारोह्यादयश्च युक्तारोह्यादयः समासा आद्युदात्ता भवन्ति युक्तारो
ही आगतयोधी आगतवंची आगतप्रहारी एते णिन्यन्ताः णिनीत्यस्मिन्नेवोदाहर
णार्थाः पठ्यन्ते पूर्वपदोत्तरपदनियमार्था इति केचित् इह माभूत् वृत्ताद्होयु

ॐ
काप्र
५९

ऽध्यायी आगतमत्स्याः क्षीरहोता भगिनीभर्त्ता याजकादिभिश्चेति समासो यस्ते ए-
कशितिपात् एकः शितिः पादोऽस्येति त्रिपदो बहुव्रीहिः तस्मिन्निमित्ते स्वरबलीयस्त्वा-
दन्तोदात्तत्वं प्राप्तमित्याद्युदात्तत्वं विधीयते एकमपि नार्थ्यते नेदं गृह्यते द्विगाविति निमि-
त्तत्वात् एवं तर्हि ज्ञापकार्थमेवैतज्ज्ञापयति शितेर्लक्षणोत्तरपदे द्विगुस्वरो न भवति
तेन द्विशितिपादित्यत्र निशास्त्रोदात्तो भवति निमित्तस्वरबलीयस्त्वस्यापि एकशिति-
पात्स्वरवचनं ज्ञापकं वर्णयन्ति पात्रेसमितादयश्च पूर्वोक्तादयस्तेनस्त्याद्यु-
दात्ता भवन्ति दीर्घकाशतुषभ्राष्ट्रवटं जे दीर्घान्तं पूर्वपदं काशतुषभ्राष्ट्रवटं इत्येता-
नि जे उत्तरपदे आद्युदात्तानि भवन्ति कुटीजः शमीजः काशजः तुषजः भ्राष्ट्रजः
वटजः अन्त्यात्पूर्वं बह्वचः जे उत्तरपदे बह्वचः पूर्वपदस्यान्त्यात्पूर्वमुदात्तं भवति उ-
पसरजः मन्दुरजः आमलकीजः बदरीजः बह्वच इति किं दग्धजानि तृणानि ग्रा-
मेऽनिवसन्तः ग्रामशब्द उत्तरपदे पूर्वपदमाद्युदात्तं भवति उग्रे निवसद्वाचि न भ-
वति पूर्वग्रामः वणिग्रामः ग्रामशब्दोऽत्र समूहवाची देवग्रामः देवस्वामिकइत्य

येः अनिवसन्तिइतिकिम् दाक्षिग्रामः माहकिग्रामः दाक्षयोनिवसन्तियस्मिन्ग्रा
मेसएवंविगृह्यते घोषादिषुच घोषादिषुचोत्तरपदेषुपूर्वपदमाद्युदात्तो
दात्तमेवात्रभवति आद्युदात्तप्रकरणेदिवोदासादीनाञ्छन्दस्यादिरुदात्तोभवति
तीवक्तव्यम् दिवोदासायगायतवध्र्यश्वायदाशुषे अन्तः अन्तइत्येतदधिकृत्योत्तरे
यद्वक्ष्यामः पूर्वपदमन्तउदात्तोभवतीत्येवंतद्वेदितव्यं वक्ष्यति सर्वंगुणकार्त्स्न्ये स-
र्वशब्दः सर्वक्रमशः प्रागुत्तरपदादिरित्येतस्मादयमधिकारोवेदितव्यः सर्वंगुण
कार्त्स्न्ये सर्वशब्दः पूर्वपदंगुणकार्त्स्न्येवर्तमानमन्तोदात्तंभवति सर्वक्रमशः सर्व
महान् सर्वमिन्तिकिम् परमश्वेतः आश्रयव्याप्त्यापरमत्वंश्वेतस्येतिगुणकार्त्स्न्ये
वर्तीते गुणग्रहणंकिम् सार्वसौवर्णिः सर्वराजतः कार्त्स्न्येइतिकिम् सर्वेषांश्वे-
ततरः सर्वश्वेतः गुणान्तरेणसमासस्तरलोपश्चवक्तव्यइत्येवमत्रसमासस्तरलो
पश्च संज्ञायांगिरिनिकाययोः संज्ञायांविषयेगिरिनिकाययइत्येतयोरुदात्तोत्तर
पदयोः पूर्वपदमन्तोदात्तंभवति अञ्जनागिरिः निकायेशापिण्डिनिकायः चैः वि।

ॐ काशि
५९८

लिनिकायः पैरिनिकायः संज्ञायामिति किम् परमगिरिः ब्राह्मणनिकायः कुमार्यां
वयसि कुमार्यामुत्तरपदे वयसि गम्यमाने पूर्वपदमन्तोदात्तं भवति वृद्धकुमारी कुमा
रीशब्दः पुंसासहानभिसंयोगमात्रमुपादाय प्रवृत्तो वृद्धादिभिर्वयोविशेषवचनैः स
मानाधिकरणो भवति तस्य वय उदाहरद्यते न कुमारत्वमेव वयसीति किम् परम
कुमारी उदकेऽकेवले अकेवलं मिश्रम् तद्वाचिनि समासे उदके उदकशब्दे उत्त
रपदे पूर्वपदमन्तोदात्तं भवति गुडमिश्रमुदकम् गुडोदकं तिलोदकम् तंडुलोद
कम् स्वरे कृते एकादेशः स्वरितो वानुदात्ते पदादाविति पदे स्वरित उदात्तो वा भव
ति अकेवल इति किम् शीतोदकम् उष्णोदकम् द्विगौ क्रतौ द्विगावुत्तरपदे
क्रतुवाचिनि समासे पूर्वपदमन्तोदात्तम्भवति गर्गत्रिरात्रः जनकत्रिरात्रः कुसु
रुबिन्दसप्तरात्रः गर्गाणां त्रिरात्रः गर्गत्रिरात्रः द्विगाविति किम् अतित्रिरात्रः अत्र चित्वाद
न्तोदात्तः क्रतावितिकिम् बिल्वसप्तरात्रः बिल्वाशनस्य बिल्वहोमस्य वा सप्तरात्रो
बिल्वसप्तरात्रः सभायां नपुंसके सभाशब्दे उत्तरपदे नपुंसकलिंगे समासे पूर्वपद

मंतोदात्तं भवति गोपालसभम् पशुपालसभम् दासीसभम् स्त्रीसभम् सभा
यामिति किम् ब्राह्मसेनम् नपुंसक इति किम् राजसभा ब्राह्मणसभा सभा
याः प्रतिपदोक्तम् नपुंसकलिंगं गृह्यते इति रमणीयसभम् ब्राह्मणकुले
न भवति प्रेष्याचाम् पुरशाह्वउत्तरपदे प्राचां देशे पूर्वपदमन्तोदात्तं भवति लला
टपुरम् शापादत्तपुरम् कांतीपुरं नान्दीपुरम् प्राचामिति किम् शिवपुरम् ॥
अरिष्टगौडपूर्वे च अरिष्टगौड इत्येवं पूर्वे पुरशाह्वउत्तरपदे पूर्वपदमन्तोदात्तं भ
वति अरिष्टपुरम् गौडपुरम् पूर्वग्रहणम् किम् इहापि यथा स्यात् अरिष्टश्रित
पुरम् गौडभृत्यपुरम् न हास्तिनहलकमार्देयाः हास्तिन हलक मार्देय इत्येते शा
ह्वाः पूर्वपदानि पुरशाह्वउत्तरपदे नान्तोदात्तानि भवंति हास्तिनपुरम् हलकपु
रम् मार्देयपुरम् मृदोरपत्यं इति शुभ्रादिना ढक् मार्देयाः कुसूलकूपकुंभशाले
बिले कुसूलकूपकुंभशाला इत्येतानि पूर्वपदानि बिलशाह्वउत्तरपदेऽन्तोदात्ता
नि भवंति कुसूलबिलं कूपबिलम् कुंभबिलम् शालाबिलम् कुसूलादिग्रह

णोकिम् सर्पबिलम् बिल इति किम् कुसूलस्वामी दिक्शब्दा ग्रामजनपदाख्यान
चानराटेषु दिक्शब्दाः पूर्वपदान्यन्तोदात्तानि भवन्ति ग्रामजनपदाख्यानवाचिषूत्तर
पदेषु चानराटशब्दे च पूर्वेषुकामशमी अपरेषुकामशमी पूर्वकृष्णमृत्तिका ॥
अपरकृष्णमृत्तिका जनपदे पूर्वपञ्चालाः अपरपञ्चालाः आख्याने पूर्वाविमानक
म् अपराविमानकम् पूर्वयायातम् अपरयायातम् अविमानकमपि कृत्यकृ
तोऽग्र्योविमानकः तथा यायातः चानराटे पूर्वचानराटम् अपरचानराटम् श
ब्दग्रहणं कालवाचिनोऽपि दिक्शब्दस्य परिग्रहार्थम् आचार्योपसर्जनश्चान्तेवासिनि
आचार्योपसर्जनान्तेवासिवाचिन्युत्तरपदे दिक्शब्दा अन्तोदात्ता भवन्ति पूर्वपा
णिनीयाः अपरपाणिनीयाः पूर्वकाशकृत्स्नाः अपरकाशकृत्स्नाः आचार्योप
सर्जन इति किम् पूर्वापूकाः अन्तेवासिवाचिनीति किम् पूर्वपाणिनीयं शास्त्र
म् उत्तरपदवृद्धौ सर्वं च उत्तरपदे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ता भवन्ति सर्व
पाञ्चालकः पूर्वपाञ्चालकः उत्तरपाञ्चालकः सम्वर्ति दिक्शब्देभ्यो जनपदस्येति

ततेनविधिनाजनपदलक्षणोवुञ्प्रत्ययः समर्थाद्वाजनपदस्य दिशोमहाणामिति।
चोत्तरपदवृद्धिः अधिकारलक्षणादिह न भवति सर्वभासः सर्वकारकः बहुव्रीहे
विश्वसंज्ञायाम् बहुव्रीहौ समासे विश्वशब्दः पूर्वपदसंज्ञायां विषयेन्तोदात्तो भव
ति विश्वेदेवाः विश्वयशाः विश्वमहान् पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम् बहुव्री
हाविति किम् विश्वे च ते देवाः विश्वदेवाः संज्ञायामिति किम् विश्वेदेवा अस्य विश्वदेव
विश्वामित्रः विश्वाजिनः इति तु संज्ञायां मित्राजिनयोरित्यनेन भवति परत्वात् बहुव्रीहा
वित्यनेन द्वयोरिति क्रियते ग्रामकाव्ययीभावसमासार्थत्वात् उदराश्वेषुषु उदराश्वेषु इत्येते
षूत्तरपदेषु बहुव्रीहौ समासे संज्ञायां विषये पूर्वपदमन्तोदात्तं भवति वृकोदरः दा
मोदरः हर्यश्वः यौवनाश्वः सुवर्णपुंखेषुः महेषुः क्षेपे क्षेपे च गम्यमाने उदराश्व
इषु इत्येतेषु उत्तरपदेषु पूर्वपदमन्तोदात्तं भवति कुण्डोदरः घटोदरः उदर अश्व कटु
काश्वः स्पन्दिताश्वः अश्व इषु अनिधातेषुः चलाचलेषुः अनुदरः सूदर इत्यत्र नञ्सुभ्या
मित्यनेन भवति प्रतिषेधेन नदी बन्धुनि बहुव्रीहौ समासे बन्धुशब्दे उत्तरपदे नद्यन्ते प

ॐ· काश·
५९२

बंधुपदमन्तोदात्तं भवति गार्गीबंधुः वात्सीबंधुः नदीति किम् ब्रह्मबंधुः ब्रह्मश
ब्दाद्युदात्तः बंधुनीति किम् गार्गीप्रियः निष्ठोपसर्गपूर्वमन्यतरस्याम् बहुव्री
हौ समासे निष्ठान्तमुपसर्गपूर्वं पदमन्तोदात्तं भवति अन्यतरस्याम् प्रक्षालितपा
दः प्रधौतमुखः इति यदि मा वा शांब्दः संज्ञावाचीनदापतेमवेसंगामित्येतद्भवति
नचेत्सर्वपदप्रकृतिस्वरेणेनगतिरनन्तरइति आद्युदात्तः निष्ठेति किम् प्रसेवा
मुखः उपसर्गपूर्वमिति किम् शुष्कमुखः उत्तरपदादिः उत्तरपदादिरित्येतदधि
कृतं यदित ऊर्ध्वमनुक्रमिष्याम उत्तरपदस्यादिरुदात्तो भवति इत्येवं तद्वेदितव्यं
वक्ष्यति कर्णो वर्णलक्षणात् शुक्लकर्णः कृष्णकर्णः दात्रकर्णः उत्तरपदस्यादे
नदापादप्रविसमासेः आदिरिति प्रकृत्या भगालमित्यावत् कर्णो वर्णलक्षणा
त् वर्णवाचिनो लक्षणवाचिनश्च कर्णशब्द उत्तरपदे बहुव्रीहौ समासे आद्युदात्तं
भवति शुक्लकर्णः कृष्णकर्णः लक्षणात् दात्रकर्णः शंकुकर्णः कर्णो लक्षणा
स्येति दीर्घत्वम् लक्षणमिति पश्वां विभागज्ञापनार्थं दात्रशंकुप्रतिरूपकं च

ह्वेकालादिषु यत्क्रियते तन्नादिहस्तात्वे कर्णादिति किम् श्वेतपादः कूटशृंगः वर्णा-
लक्षणादिति किम् शोभनकर्णः एतयोः पम्पयोश्च संज्ञायामौपम्ये च यो बहुव्रीहि-
स्तस्मिन् कर्णशब्दे उत्तरपदे माद्युदात्तं भवति कुशिकर्णः मणिकर्णः औपम्ये गोकर्णः
खरकर्णः कंठपृष्ठग्रीवाजंघं च कंठपृष्ठग्रीवाजंघा इत्येतान्युत्तरपदानि बहुव्री-
हौ समासे संज्ञौपम्ययोराद्युदात्तानि भवंति शितिकंठः नीलकंठः संज्ञायाम् ख-
रकंठः उष्ट्रकंठः औपम्ये पृष्ठ काण्डपृष्ठः नागपृष्ठः संज्ञायाम् गोपृष्ठः अजपृष्ठः ग्री-
वा महग्रीवः नीलग्रीवः दशग्रीवः संज्ञायाम् अश्वग्रीवः गोग्रीवः औपम्ये जंघा नाडी-
जंघः तालजंघः संज्ञायाम् गोजंघः अश्वजंघः एणीजंघः औपम्ये शृंगमवस्थायां च
शृंगशब्दे उत्तरपदे अवस्थायामौपम्ये च बहुव्रीहौ समासे आद्युदात्तं भवति उद्गतशृं-
गः द्व्यंगुलशृंगः त्र्यंगुलशृंगः अत्र शृंगोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था सं-
ज्ञायाम् ऋष्यशृंगः औपम्ये गोशृंगः मेषशृंगः अवस्थादिष्विति किम् स्थूलशृंगः
नञो जरमरमित्रमृताः नञः परे जरमरमित्रमृता इत्येते बहुव्रीहौ समासे आद्युदात्ताः

ॐ. काप्र. ५९५

भवन्ति अजरः अमरो मित्रः अमृतः परशाहोपप्रसज्यान्तइत्यते मरांममाइति नञ
इतिकिम् ब्राह्मणामित्रः जरादयइतिकिम् अशत्रुः नञ्सुभ्यामित्युत्तरपदान्तोदा
त्तत्वं भवति सोर्मनसी अलोमोषसी सोः परं मनन्तमसन्तं चोत्तरपदं बहुव्रीहौ स
मासे आद्युदात्तं भवति लोमोषसी वर्जयित्वा सुकर्मा सुधर्मा सुषामा सुप्रथिमा
असन्ते सुयशाः सुस्रोताः सुध्वन सोरितिकिम् कृतकर्मा कृतयशाः मनसीतिकि
म् सुराजा सुतक्षा अलोमोषसीतिकिम् सुलोमा सूषाः अनिनस्मिन्ग्रहणान्यर्थव
ता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति अनर्थकयोरपि मनसोरिह ग्रहणम् नञ्सुभ्यामित्यस्यापवादः क
पिमृध्वेभित्येतद्भवति परत्वात् सुकर्मकः सुस्रोतस्कः क्रत्वादयश्च क्रत्वादयः
सोरुत्तरे बहुव्रीहौ समासे आद्युदात्ता भवन्ति सुक्रतुः सुदृशीकः कृतदृशीकः प्रती
कपूर्वकृतिकवाहस्तु भग आद्युदात्तं द्व्यच्छन्दसि आद्युदात्तं यत् द्व्यच्छन्दसि उत्तरपदं तद
तिबहुव्रीहौ समासे सुशब्दात्परमुत्तरपदमाद्युदात्तं छन्दसि विषये भवति स्व
श्वाः सुरथा सुजयो मन्निद्भिरेणा स्वपथशाह्वावाद्युदात्तौ आद्युदात्तमितिकिम्

यास्वाहः स्वाह्वशाह्वः प्रत्ययस्वरेणान्तोदात्ताः द्व्यजिति किम् सुहिरण्यः वीरवी-
र्यौ च वीरवीर्यइत्येतौ शब्दौ सोरुत्तरौ बहुव्रीहौ समासे छन्दसि विषये आद्युदात्तौ
भवतः सुवीरेणानेन वीर्यस्य पतयः स्याम वीर्यशब्दो यत्प्रत्ययान्तः तत्र यतोना-
व इत्याद्युदात्तत्वंन भवतीत्येतदेव वीर्यग्रहणं ज्ञापकं न तत्रादिमनिष्ठूर्दियोः सिद्धेस्या-
त् कूलतीरतूलमूलशालाक्षसममव्ययीभावे कूलतीरतूलमूलशालाक्ष-
सममइत्येतान्युत्तरपदान्यव्ययीभावे समासे आद्युदात्तानि भवन्ति उपकूलम्
परिकूलम् उपतीरं परितीरम् उपतूलम् परितूलम् उपमूलम् परिमूलम्
उपशालम् परिशालम् उपाक्षम् प्रत्यक्षम् सुषमम् विषमम् दुष्षमम् ति-
ष्ठद्गुप्रभृतिष्वेते पठ्यन्ते कूलादिग्रहणं किम् उपकुंभम् अव्ययीभाव इति कि-
म् परमकूलम् उत्तमकूलम् पर्यादिभ्यः कूलादीनामाद्युदात्तत्वं भवति विप्रतिषे-
धेन भवति परिकूलं उपकूलम् कंसमन्थशूर्पपाय्यकाण्डं द्विगौ कंसमन्थशूर्प-
पाय्यकाण्ड इत्येतान्युत्तरपदानि द्विगौ समासे आद्युदात्तानि भवन्ति द्विकंसः त्रिकं-

ॐ॰
काप्र॰
५९५

मः द्विमत्स्यः त्रिमत्स्यः द्विमूर्धः त्रिमूर्धः द्विपाद्यः त्रिपाद्यः द्विकाण्डम् त्रिकाण्डम् त्रि
काण्डम् द्विगावितिकिम् परमकंसः तत्पुरुषे शालायां नपुंसके शालाशब्दा
न्तेनपुंसकलिंगेतत्पुरुषसमासे उत्तरपदस्याद्युदात्तो भवति ब्राह्मणशालम् क्ष
त्रियशालम् विभाषासेनासुराच्छायेतिनपुंसकलिंगता तत्पुरुष इतिकिम्
दृढशालम् ब्राह्मणकुलम् शालायामितिकिम् ब्राह्मणसेनम् नपुंसक इति
किम् ब्राह्मणशाला कन्था च तत्पुरुषे समासे नपुंसके कन्थाशब्दान्तस्योत्तरपदस्य
आद्युदात्तो भवति सौशमिकन्थम् आह्वरकन्थम् चपकन्थम् संज्ञायां कन्थोशीने
ष्विति नपुंसकलिंगता षष्ठीसमासश्चैतेन पुंसक इत्येव दाक्षिकन्था आदिश्चिहण
णादीनाम् कन्थान्ते तत्पुरुषसमासे नपुंसके चिहणादीनामादिरुदात्तो भव
ति चिहणकन्थम् मडरकन्थम् मडुर इति केचित्पठन्ति मडुरकन्थम् चिह
ण मडर मडुर वैतुल महापटात्क वैडालकर्णि कुक्कुट चिक्कण इति॰
वर्तमाने पुनरादिग्रहणं पूर्वपदाद्युदात्तार्थम् चेलखेटकटुककाण्डं गर्हायाम्॥

चेलखेटकटुककांडइत्येतान्युत्तरपदानि गर्हायां गम्यमानायामाद्युदात्तानि ।
भवन्ति चैलपुत्रचेलम् भार्याचेलम् खेट उपानत्खेटम् नगरखेटम् कटु
उदश्वित्कटुकम् दधिकटुकम् कांड भूतकांडम् प्रजाकांडम् चेलादिसादृ
श्येन पुत्रादीनां गर्हा तत्पुरुषे चेलमिवेति विग्रहव्याघ्रादेराकृतिगणत्वादुपमि
तं व्याघ्रादिभिरिति समासः गर्हायामिति किम् परमचेलम् ॥ चीरमुपमानम्
चीरमुत्तरपदमुपमानवाचि तत्पुरुषे आद्युदात्तं भवति वस्त्रचीरमिव वस्त्रचीर
म् पटचीरम् कंबलचीरम् उपमान इति किम् परमचीरम् ॥ पललसूपशा
के मिश्रे पललसूपशाकइत्येतान्युत्तरपदानि मिश्रवाचिनि तत्पुरुषे समासे
आद्युदात्तानि भवंति गुडपललम् घृतपललम् घृतसूपः मूलकसूपः घृत
शाकम् मुद्गशाकम् गुडेन मिश्रं पललम् गुडपललम् भक्ष्येण मिश्रीकरणमिति
समासः मिश्र इति किम् परमपललम् ॥ कूलसूदस्थलकर्षाः संज्ञायाम् कूल
सूदस्थलकर्षइत्येतानि उत्तरपदानि तत्पुरुषे समासे संज्ञायां विषये आद्युदात्तानि ॥

ॐ
काशि·
४९८

निभवन्ति दाक्षिकूलम् माहकिकूलम् देवसूदम् भांडीसूदम् भांडायनस्थ-
ली माहकिस्थली दाक्षिकर्षः माहकिकर्षः ग्रामनामधेयान्येतानि स्थलग्रह-
णे लिंगविशिष्टस्यस्थलीशब्दोपि गृह्यते जानपदकुंडेत्यत्र ङीष् संज्ञायामिति
किम् परमकूलम् अकर्मधारये राज्यम् कर्मधारयवर्जिते तत्पुरुषे समासे रा-
ज्यम् अकर्मधारय इति किम् परमराज्यम् चेलराज्यादिस्वरादव्ययस्वरो भ-
वति ब्राह्मणराज्यम् क्षत्रियराज्यम् अकर्मधारय इति किम् परमराज्यम्
चेलराज्यादिस्वरादव्ययस्वरो भवति विप्रतिषेधेन कुचेलम् कुराज्यम् वर्ग्या-
दयश्च वर्ग्य इत्येवमादीन्युत्तरपदान्यकर्मधारये तत्पुरुषे समासे आद्युदात्ता-
नि भवन्ति वासुदेववर्ग्यः अर्जुनवर्ग्यः वासुदेववर्ग्यः (पक्ष्य) अर्जुनपक्ष्य इत्यर्थः अ-
कर्मधारय इत्येव परमवर्ग्यः वर्ग्यादयः शानिपदिके पुनयत्कान्ते दिगादिषु
तवर्ग्यः पक्ष्योऽत्येवमादयो ये पठितास्त एवेत त्रयत्यान्ता वर्ग्यादय इह गृह्यंते
पुत्रः पुंभ्यः पुत्रशब्दः पुंशब्देभ्य उत्तरपदे तत्पुरुषे समासे आद्युदात्तो भवति कौव

टिपुत्रः दामकपुत्रः माहिषकपुत्रः पुत्र इति किम् विष्णुमित्रपिता पुंभ्य इति किम्
गार्गीपुत्रः नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः आचार्यः उपाध्यायः राजा ईश्वरः
ऋत्विजो याजकः संयुक्ताः सम्बन्धिनः श्यालादयः ज्ञातयो मातृपितृसम्बन्धिनो बा-
न्धवाः तदाख्येभ्योऽनन्तरः पुत्रशब्दो नाद्युदात्तो भवति आख्याग्रहणात्स्वरूपस्य पर्या-
याणां विशेषाणां च ग्रहणम् आचार्यपुत्रः उपाध्यायपुत्रः शाकटायनपुत्रः राज-
पुत्रः ईश्वरपुत्रः नन्दपुत्रः ऋत्विक्पुत्रः होतृपुत्रः संयुक्तपुत्रः सम्बन्धिपुत्रः श्यालपुत्रः
ज्ञातिपुत्रः बान्धवपुत्रः भ्रातुःपुत्रः ऋतो विद्यायोनिसम्बन्धेभ्य इति षष्ठ्या अलुक् पु-
त्रस्वरे पुनरिति विशेषः ममाप्येतोदात्तत्वमेव भवति चूर्णादीन्यप्राणिषष्ठ्याः चूर्णादीन्युत्त-
रपदानि तत्पुरुषे समासे अप्राणिवाचिनः षष्ठ्यन्तात्पराण्याद्युदात्तानि भवन्ति मुद्ग-
चूर्णं मसूरचूर्णम् अप्राणिषष्ठ्या इति किम् मत्स्यचूर्णम् चूर्णाकरिपकरिवशा-
निकषाकटद्राक्षातूस्त कुन्दम दलप चमसी चिक्कण चौल चूर्णादीन्यप्राणि-
षष्ठ्या इति किमुदस्पाठानारम् नञोपग्रह इति षष्ठ्यन्तमेव पूर्वाचार्योपचारेणावरुद्ध्य

ते षट्च कांडादीनि षट्च पूर्वोक्तानि कांडादीन्युत्तरपदान्यप्राणिषष्ठ्याः पराण्या
द्युदात्तानि भवन्ति कांडं गर्हायामिति कृतमगर्हायामपि भवति दर्भकांडम् शरकां
डम् चीरमुपमानमिति कृतमनुपमानमपि भवति दर्भचीरम् कुशचीरम् पलल
सूपशाकम् मिश्रमिति कृतममिश्रेपि भवति तिलपललम् मुद्गसूपः मूलकशा
कम् कूलसूदस्थलकर्षाः संज्ञायामिति कृतमसंज्ञायामपि भवति नदीकूलम्।
समुद्रकूलम् षडिति किम् राजसूदः अप्राणिषष्ठ्या इति किम् देवदत्तस्य कांड
म् देवदत्तकांडम् कुंडं वनम् कुंडमित्येतदुत्तरपदं वनवाचिनस्तत्पुरुषसमासेआ
द्युदात्तं भवति दर्भकुंडम् शरकुंडम् वनमिति किम् मृत्कुंडम् प्रकृत्या भगालं
भगालवाच्युत्तरपदं तत्पुरुषे समासे प्रकृतिस्वरं भवति कुंभीभगालम् कुंभीक
पालम् कुंभीनदालम् भगालदयो मध्योदात्ताः प्रकृत्येत्येतदधिकृतमेतदितिया
वेदितव्यम् शितेर्नित्याबह्वज्बहुव्रीहावभसत् शितिशब्दात्परं नित्यं यदबह्व
मुत्तरपदं भसच्छब्दवर्जितं बहुव्रीहौ समासे तत्प्रकृतिस्वरं भवति शितिपादः शित्यंसः

शितिपादः पादशब्दो वृषादित्वादाद्युदात्तः अंसोष्ठशब्दौ प्रत्ययस्य नित्वात् शितेरि-
तिकिम् दर्शनीयपादः नित्यग्रहणं किम् शितिककुत् ककुदस्यावस्थायां लो-
पो विधीयते तत्रावस्थायामभवत्रो शितिककुदिति बह्वज्ग्रहणमुत्तरपदे भवति नि-
त्योबह्वच् अबह्वचः कटुनिकिम् शितिललाटः बहुव्रीहाविति किम् शितेपादः
शितिपादः अभसदिति किम् शितिभसत् शितिर्वर्णवचनः आद्युदात्तः पूर्वपदप्र-
कृतिस्वरापवादोयं योगः ॥ गतिकारकोपपदात्कृत ॥ गतेः कारकादुपपदा-
त्परं कृदन्तमुत्तरपदं तत्पुरुषे समासे प्रकृतिस्वरं भवति प्रकारकः प्रकरणं
कारकात् इध्मप्रव्रश्चनः पलाशशातनः श्मश्रुकल्पनः उपपदात् ईषत्करः सुक-
रः दुष्करः सर्वे चैते खलन्ताः गतिकारकोपपदादिति किम् देवदत्तस्य कारको दे-
वदत्तकारकः देवदत्तस्य निशेषलक्षणा षष्ठी कृद्ग्रहणं विस्पष्टार्थम् प्रपचति-
तराम् प्रपचतितमामित्यत्र तरबाद्यन्तेन समासे कृते पश्चादाम् तत्र मतिशिष्टत्वा-
दाम एव स्वरो भवतीत्येके प्रपचति देश्यादिग्रहणेन कृद्ग्रहणेऽपि उभे वनस्पत्या

ॐ
काप्र
५६८

दिषु युगपत् उभेपूर्वोपदोत्तरपदे वनस्पत्यादिषु युगपत्प्रकृत्यास्वरे भवतः युगप
द्ग्रहणंपर्यायनिवृत्यर्थम् वनस्पतिः बृहस्पतिः वनस्पतिबृहस्पतिशब्दावाद्युदात्तौ
पारस्करप्रभृतित्वात्सुट् बृहस्पतिः बृहतांपतिः तद्बृहतोः करपत्योः चोरदेव
तयोः सुट्तलोपश्चेतिसुट्तकारलोपश्च बृहदितिप्रतोदात्तन्तत्रकेचिदेवाद्युदात्तत्व
न्निपातयन्ति शचीपतिः शचीशब्दः कृदिकारादक्तिन इति ङीषन्तत्वादन्तोदात्तः
केचित्तु श्रीबादिषु पठन्ति तेषामाद्युदात्तः तनूनपात् तनोतेरौणादिकऊ
प्रत्ययान्तः तनूरन्तोदात्तः नपात् नपाति नपातयति वा नपात्क्विबन्तो नभ्राणन
पादिनाद्युदात्तोनिपातितः तन्वाः नपात् तनूनपात् नराशंसः नराश्चास्मिन्ना
सीनाः शंसन्ति नराः पत्नेशंसन्तीतिवानराशंसः न्नृनयतेरप्रत्ययान्तो नरशब्दआद्यु
दात्तः शंसशब्दोपिघञन्तः अन्येषामपिदृश्यते इति दीर्घत्वं शुनःशेपः शुनइव
शेपोस्येतिबहुव्रीहिः तत्रैव शेपपुच्छलाङ्गूलेषुशुनः संज्ञायामितिषष्ठ्याअलुक् उ
श्वन्नाद्युदात्तो शेपशब्दः कौशेपशब्दः मर्केशाद्यो वन्तनोदाद्युदात्तौ तयोर्द्वन्द्वेषामा।

पितृष्वपत इति दीर्घत्वम् तृस्वावरुणौ तृस्वशब्दोन्तोद्याद्युदात्तः वरुणीशब्दोग्रमिता
मृत्वान्निपातितोन्तोद्याद्युदात्तः नत्रद्वन्द्वे दीर्घत्वं पूर्ववत् वेदाविष्णवयसो वेदशब्दोन्तो
दात्तः विष्णवयः शब्दोपि वृद्धौ सेति विष्णुसंज्ञायामिति विष्णुशब्दोन्तोदात्तः नयोः द्वन्द्वे दीर्घ
त्वे पूर्ववत् मन्त्रसूमतिनिमित्तोविः प्रत्ययः म्त्रशब्दोन्तोदात्तः इन्द्रासोमदेवताद्वन्द्वे
नुदात्ताद्युत्तरपदस्य वनस्पत्यादिषु पाठः देवताद्वन्द्वे च देवतावाचिनो यो द्वन्द्वस्तत्र
युगपदुभे पूर्वपदोत्तरपदे प्रकृतिस्वरे भवतः इन्द्रासोमौ इन्द्रावरुणौ इन्द्राबृहस्पती
ऋज्रेन्द्राद्रेतीन्द्रशब्द आद्युदात्तो निपातितः सोम इति मन्प्रत्ययान्तः वरुण उनन्प्रत्ययान्त
त्वान्नित्वादाद्युदात्तो बृहस्पतिशब्दो वनस्पत्यादित्वाद्युदात्तो तेन इन्द्राबृहस्पतीत्यत्र
त्रय उदात्ता भवन्ति देवताग्रहणं किम् प्लक्षन्यग्रोधौ द्वन्द्व इति किम् अग्निष्टोमः नोत्त
रपदेनुदात्तादावपृथिवीरुद्रपूषमन्थिषु उत्तरपदेनुदात्तादौ पृथिवीरुद्रपूषमन्थिवर्जि
ते देवताद्वन्द्वे नोभे युगपत्प्रकृतिस्वरे भवतः इन्द्राग्नी इन्द्रावायू अग्निवायुशब्दावन्तोदात्ता
वादनुदात्तावादि उत्तरपदस्य इत्याम्रमनुदात्तादावपि उत्तरपदविशेषणं यथा स्यात् द्वन्द्वे।

ॐ.
काश.
५६५

शेषाणां मा भूदिति अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम् पृथि-
व्यादिष्विति किम् द्यावापृथिव्यौ दिवो द्यावा आद्युदात्तो निपात्यते पृथिवी ङीषन्ता-
न्तादन्तोदात्ता पृथिवी रुद्रसोमौ रुद्रो रोदेर्णिलुक्चेति रुद्रशब्दो रक्प्रत्ययान्तोन्तो-
दात्तः रुद्रपूषन् इन्द्रापूषणौ श्वन्नुक्षन्पूषन्निति पूषान्तोदात्तो निपात्यते शुक्रामन्थि-
नौ मन्थोस्यास्तीति मन्थी इन्नन्तत्वादन्तोदात्तः पृथिव्यादिषु युगपदुभयप्रकृतिस्वरे भवता-
यव अन्तः अन्त इत्ययमधिकारो यदित ऊर्ध्वमनुक्रमिष्यामः समासान्तस्योत्तर-
पदस्यान्त उदात्तो भवत्येवं तद्वेदितव्यम् वक्ष्यति थाथघञ्क्ताजबित्रकाणा-
मिति सुनीथः अवभृथः हनिकुषिनीरमिकाशिभ्यः क्थन् अवभृथश्च इति च क्थन्प्र-
त्ययान्तेन थकृदन्तेन पदप्रकृतिस्वरेणाद्युदात्तं पदं स्यात् अथ संवसथः उपवसथः
उपसर्गे वसेरिति अथप्रत्ययः घञ् प्रभेदः काष्ठभेदः रज्जुभेदः क्त दूरादागतः
विशुष्कः आतपशुष्कः अच् प्रलयः उपलयः प्रजयः लयो निवासे जयः करणाभि-
निवाद्युदात्तौ लयजयशब्दौ प्रयोजयतः अप् प्रलवः प्रसवः इत्र प्रलवित्रम् प्रस-

विंशकोनो वृषः खोरी वृषः गां वर्षति खोरी वर्षति नीतिमूलविभमादिमान्तप्रत्ययः प्रवृ
षः उद्वृषः इत्युपयादितिकः वृषादीनां चेति वृषशब्द आद्युदात्तः गतिकारकोपपदादि
त्येव सन्तत्नं भवति प्रतिष्ठत्नं भवति प्रलवः कर्मप्रवचनीयेन निवाद्ययस्वरएव
भवति सूपमानात्क्तः संदर्शेन सप्ताउपमानाश्च क्तोन्तमनुन्तरपदमन्तोदात्तं भवति॥
आदित्ता

भवति सक्तुतम् सभक्तम सपीतं वेपमानाव वृकावलम्बम शाशालुतम सिं
हविनेदितम सशाह्नाङ्क निर्ननं नरउनिशामे उपमानादपित्युतीयाकर्मणि नय
मपवादः गतिकारकोपपदादित्येव सन्ततं भवति संज्ञायामनाचितादीनाम्॥
संज्ञायां विषये गतिकारकोपपदात्क्तान्तमनुत्तरपदमन्तोदात्तं भवति आचितादी
न्वर्जयित्वा संभूतो रामायणः उपहूतः शाकल्यः परिजग्धः कौण्डिन्यः संभूत इति

ॐ. काप्र. ५२

प्राप्रथैनाड्द्धवतेः कर्म्मणि क्तः गतिरनन्तर इत्यत्र इह कर्म्मणीत्यनुवर्त्तते तेनेहापि नार्थ्यं
वेदम् धनुः खाता नदी कुद्दालखातं नगरम् हस्तिमर्दिता भूमिः तृतीया कर्म्मणि
निघातो मा भूदित्युच्यते अनाचितादीनामिति किम् आचितम् पर्याचितम् आस्थापि
तम् परिगृहीतम् निरुक्तम् प्रतिपन्नम् अपश्लिष्टम् उपहतम् उपस्थितम् संहि
ता सर्वा वि संहिताशब्दो यदा गोरन्यस्य संज्ञा तदा नान्तोदात्तो भवति यदा तु गोः संज्ञा
तदान्तोदात्त एव प्रवृद्धादीनां च क्तान्तमुत्तरपदमन्तोदात्तं भवति प्रवृद्धं यानम्
प्रवृद्धो वृषलः प्रयुक्ताः सक्तवः आकर्षे अवहितः अवहितो भोगेषु खट्वारूढः क
विशस्तः यानादीनामगणपाठः प्रायोहन्निदर्शनार्थो न विषयनियमार्थो या
नादिष्वन्यत्रापि तेषामन्तोदात्तत्वं भवत्येव विषयनियमार्थ एवेत्यन्ये असंज्ञार्थो
यमारम्भः आकृतिगणश्च प्रवृद्धादिर्द्रष्टव्यः तेन पुनरुत्स्यूतं वासः पुनर्निष्कृतो रथ इ
त्येवमादि सिद्धं भवति कारकाद्दत्तश्रुतयोरेवाशिषि संज्ञायामाशिषि विषये कारकाद्परयोर्वा
योक्तान्तयोः कारकादुत्तरपदयोर्दत्तश्रुतयोरेवान्तोदात्तो भवति देवा एनं देयास्

देवदत्तः यज्ञदत्तः विष्णुरेनं श्रूयादिति विष्णुश्रुतः ब्रह्मश्रुतः कारकादिति किम्‌ आकार
कादिनियमो मा भूत्‌ संभूतो रामायणः दत्तश्रुतयोरिति किम्‌ देवपालितः एतस्मा
न्नियमादत्र संज्ञायामनादिनाद्दीनामित्येतेनोदात्तत्वेन भवति तृतीया कर्मणीत्येत
देवात्र भवति एवकारः करणं किम्‌ कारकावधारणं यथा स्यात्‌ दत्तश्रुतावधारणं
मा भूदिति अकारकादपि हि दत्तश्रुतयोरन्तोदात्तो भवति संश्रुतः विश्रुतः आ
शिषीति किम्‌ अनाशिषि नियमो मा भूत्‌ देवैः खाता देवखाता कारकाद्दत्तश्रुतयो
राशिष्येवेत्ययमत्र नियमः इष्यते अनाहतो नदति देवदत्तः देवदत्त इति कस्यचि
त्संज्ञा विस्पष्टा तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वमेव भवति इत्थंभूतेन कृ
तमिति च इमं प्रकारमापन्न इत्थंभूतः इत्थंभूतेन कृतमित्यस्मिन्नर्थे यः समासो वर्त्त
ते तत्र क्तान्तमुत्तरपदमन्तोदात्तं भवति सुप्तप्रलपितं प्रमत्तगीतम्‌ विपन्नश्रुत
म्‌ कृतमिति क्रियासामान्ये करोतिर्वर्त्तते नात्र अभूतप्रादुर्भाववचनेन प्रलपिताद्य
पि कृतं भवति तृतीया कर्मणीत्यस्यापवादः भावे क्तः यदा प्रलपिताद्यस्तदा यथा

शे.
काप्र.
४२२

दिस्वरोयोऽयमिहमन्तोदात्तत्वे अनोभावकर्मवचनः अनश्चप्रत्ययोऽत्रमन्तरपदेभाववच
नेकर्मवचनेचकारकादेर्नोदात्तत्वंभवति ओदनभोजनंसुखंचंदनलेपनंसुखम् पयः
पानंसुखम् कर्मवचनःराजभोजनाःशालयः राजाच्छादनानिवासांसिकर्मणिचये
नसंस्पर्शात्कर्तुः शरीरसुखमित्यनेनयोगाउभयथापिवार्पिते कर्मण्युपपदेभावेल्युट्
भवति कर्मण्यभिधेयेचल्युड्भवतीतितत्रपूर्वस्मिन्नुदाहरणेभावकवचनोदाहरणा
नि उत्तरत्रकर्मवचनोदाहरणानि भावकर्मवचनइतिकिम् दंतधावनंकाष्ठम्
करणेल्युड् कारकादित्येवनिरदनम् अवलेखनम् सर्वेष्वप्युदाहरणेषुकृत्स्वरो
भवति मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः मन्नन्तम् क्तिन्नन्तम्
व्याख्यान शयनआसनस्थानइत्येतानियाजकादयः क्रीतशब्दश्चोत्तरपदमन्तोदा
त्तंभवति रथवर्त्म शकटवर्त्म क्तिन् पाणिनिकृतिः आपिशलिकृतिः व्याख्यानऋ
गयनव्याख्यानम् छन्दोव्याख्यानम् शयनराजशयनम् ब्राह्मणशयनम् आ
सनराजासनम् स्थानगोस्थानम् अश्वस्थानम् याजकादिब्राह्मणयाजकः क्षत्रि

ण्मूलकः याजकादयो ये याजकादिभिश्चेति षष्ठीसमासार्थाः पठ्यन्ते क्रीतः गो
क्रीतः अश्वक्रीतः कृत्स्वरापवादो योगः क्रीतशब्देन तृतीयाकर्मणीत्यस्यापवादः
व्याख्यानशयनासनस्थानानाम भावकर्मार्थग्रहणम् कारकादित्येव प्रकृतिप्रकृ
तिः सप्तम्याः पुण्यम् सप्तम्याः परं पुण्यमित्येतदन्तोदात्तं भवति अध्ययने पुण्य
म् अध्ययनपुण्यम् सप्तमीयोगविभागात्समासः तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृ
तिस्वरत्वे प्राप्तमित्येतदन्तोदात्तत्वं विधीयते उणादीनान्तु प्रत्यन्तिपदे कृत्स्वरेणाद्युदा
त्तः पुण्यशब्दः स्यादिति सप्तम्या इति किम् वेदेन पुण्यं वेदपुण्यम् दानेन पुण्यम्
दानपुण्यम् ऊनार्थकलहं तृतीयायाः ऊनार्थकलहश्चोत्तरपदं तृतीयान्तादन्तो
दात्तं भवति माषोनम् कार्षापणोनम् माषविकलम् कार्षापणविकलम् का
लह असिकलहः वाक्कलहः तृतीयापूर्वपदप्रकृतिस्वरापवादो योगः अत्र के
चिदर्थ इति स्वरूपग्रहणमिच्छन्ति धान्येनार्थो धान्यार्थः ऊनशब्देनैव तदर्थनिर्देशा
र्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वात्तृतीयासमासस्यैव ग्रहणमिह तृतीयाग्रह

गे·
काप्र·
५२२

ऽवेक्तिस्थार्थे मिश्रं चानुपसर्गम् असन्धौ मिश्रमित्येतदुत्तरपदमनुपसर्गमसन्धौ
तृतीयान्तमन्तोदात्तं भवति गुडमिश्राः तिलमिश्राः सर्पिर्मिश्रा अपूपाः पायसाः मिश्रमि
ति किम् गुडधानाः अनुपसर्गमिति किम् गुडसंमिश्राः इहानुपसर्गग्रहणं सोप
कम् अन्यत्र मिश्रग्रहणे सोपसर्गस्य ग्रहणं तेन मिश्रश्लक्ष्णेति सोपसर्गेणा
पि मिश्रशब्देन तृतीयासमासो भवति असन्धाविति किम् ब्राह्मणमिश्रो राजा ब्रा
ह्मणैः सह संहितः ऐकार्थ्यमापन्नः सन्धिरिति इह पणबन्धेनैकार्थ्यमुच्यते केचि
त्तु नाहुः रक्ष्यमाणविशेषाप्रत्यासत्तिः सन्धिरिति तत्र ब्राह्मणैः सह देशप्र
त्यासत्त्यावस्थितेन सन्निविभागरक्षणत इति ब्राह्मणमिश्रो राजेति प्रत्युदाह्रियते
उदाहरणे च विभागाभावादेव गुडमिश्रा इति नञो गुणप्रतिषेधे संपाद्यर्हहितालम्
र्थास्तद्धिताः संपाद्यर्हहितालमर्थाश्च तद्धितास्तदन्तमुत्तरपदं च नञो गुण
प्रतिषेधे वर्तमानादन्तोदात्तं भवति संपादिनि कार्णवेष्टकाभ्यां संपादितमन्नं का
र्णवेष्टकिकम् अर्हे छेदमर्हति छैदिकः न छैदिकः अछैदिकः हित वत्सेभ्यो

हितो वत्सीयः अवत्सीयः अलमर्थे संतापाय प्रभवति सांतापिकमसांतापिको।
सांतापिकः नञ इति किम् विगार्दभरथिकः गार्दभरथमर्हति गार्दभरथिकः गुणो
हितहितानाशोऽप्रहृज्ञिनिमिज्ञे संपादिना युच्यते तन्निषेधोयत्रोच्यते समासेन अये
विधिः कार्णवेष्टकाभ्यां तं संपादि मुखमिति न संपाद्यर्हहितालमर्थात् इति किम् पा-
णिनीयमधीते पाणिनीयः नपाणिनीयः अपाणिनीयः तद्धितार्थ इति किम् क-
र्मावोफुमर्हति कर्मावोफानवोफा अवोफा अर्हे कृत्यत्वश्चेतितद्व ययतोश्चात-
दर्थे ययत इत्येतौ यौ तद्धितौ अतदर्थे तदंतस्योत्तरपदस्य नञो गुणप्रतिषेधविष-
यादन्त उदात्तो भवति पाशानां समूहः पाशादिभ्यो यः पाश्या नपाश्या अपाश्या अत-
एयायत दंतेषु भवं दंत्यम् न दंत्यं अदंत्यम् अकाण्यम् अतदर्थ इति किम् पादार्थमुद-
कम् पाद्यम् नपाद्यम् अपाद्यम् तद्धित इत्येव अचेयम् अपेयम् गुणप्रतिषेध।
इत्येव दंत्यात् अन्यदंत्यम् निरनुबंधकैकानुबंधकयोर्ययतोर्ग्रहणमित्रह भवति
वामदेवाड्ड्यड्यौ न वामदेव्यमवामदेव्यमिति अच्कावशक्तौ अच् क इत्येवमनम।

ऊँ·
काश्र
473

शाक्रोशगम्यमानायां नञः परस्मैनोदात्तं भवति अपचोयम् यः पक्तुं न शक्नोति स एव
पठः अपचः अविक्षिपः अविलिखः अशक्ता वितिकिम् अपचो दीक्षितः अपचः पा-
चिकाद गणाश्चनिषिध्यदेतस्य अन्येषु पदादपच आक्रोशे च आक्रोशे गम्यमाने नञ
उत्तरपदस्याद्य उदात्तो भवति अपचोयम् जाल्मः अपठः पक्तुं पठितुं वा शक्नोपि स-
न्नेव माक्रुश्यते अविक्षिपः अविलिखः संज्ञायाम् आक्रोशे गम्यमाने नञ उत्तरपदं
संज्ञायां वर्तमानमन्तोदात्तं भवति अदेवदत्तः अदेवदत्तः अयज्ञदत्तः अविष्णुमित्रः
कृत्योकेष्णुश्चार्वादयश्च कृत्य उक इष्णुच इत्येवमन्ताश्चार्वादयश्च नञ उत्तरे अन्तोदा-
त्ता भवन्ति कृत्य अकृत्यमकरणीयम् उक अनागामुकम् अनपलाषुकम् इष्णुच
अनलंकरिष्णुः इष्णुग्रहणे कृतेविषुवः खिष्णुजित्यस्य ग्रहणं खिष्णुचश्च प्रत्ययस्य ग्रहणमि
कारादेर्विधानसामर्थ्याद्भवति अनाढ्यम्भविष्णुः असुभगंभविष्णुः चार्वादयः अचा-
रुः असाधुः चारुसाधुयौगिक अनेकमेजयपूर्व द्वितीयेनस्यमासेन्तोदात्त-
नमनेजगमेजयवदन्यः अकस्मात पूर्वाषाढितीयेनस्य मासेस्यान्तोदात्तं न अनेक-

स्यात वर्त्तमानत्वर्थमानत्वमात्मनीय मात्मसंज्ञायामेतेवर्त्तमानादयोद्रष्टव्या ॥
विकारसदृशोवासमस्तेअविकारः असदृशः अविकारसदृशः गरहृयतिः
गरहृयतिकः राजाह्वेस्वंदमिश्रराजः अनफः भाषायांनत्वमेवभवति विभा
षातित्तत्तीतामुविषु तदेत् अत्र तीतामुविद्ध्येतेषु नत्युक्तरेषु विभाषा
श्रेतउदाह्नोभवति तत्र अकर्त्ता ॰ अनेकम् २ अनीत्ताः अग्निविः २ एतेवाय
स्त्ययव बहुव्रीहाविदमेतनतउक्तः प्रथमपूरणयोः क्रियागणने बहुव्रीहौसमा
से इदम् एतद् तद् इत्येतेभ्य उत्तरस्य प्रथमशब्दस्य पूरणप्रत्ययान्तस्य च क्रि
यागणने वर्त्तमानस्यात उदाहृत्तोभवति इदंप्रथमंमासागमनंगमनंवायस्य इदं
प्रथमः इदंद्वितीयः इदंतृतीयः एतत्प्रथमः एतद्वितीयः एतत्तृतीयः तत्प्रथमः
तद्वितीयः तत्तृतीयः बहुव्रीहाविति किम् अनेन प्रथमः इदंप्रथमः तृतीयेति
योगविभागात्समासः इदमेतत्तद्भ्य इति किम् यत्प्रथमः यद्द्वितीयः प्रथमपू
रणयोरिति किम् तानि बहूनि अस्य इदक्कुः क्रियागणन इति किम् अयंप्रथम

ॐ
काप्र
५२५

यथांतरेमेइदंप्रथमाः इदंप्रथानाइत्यर्थः उत्तरपदस्यकार्येनाकालिकप्रमिति
पूर्वमेतोदात्तो भवति इदंप्रथमकः बहुव्रीहाविति बहुवचनेसमासइति प्रायेन
स्मादेपिकृतेवेदितव्यम् संज्ञायाक्तनः संज्ञायाःपरः क्तनशब्दो बहुव्रीहावं
तोदात्तो भवति छिन्नान्तिक्तनाचनः सना संज्ञायामितिकिम् दृष्टान्तिपक्ता
नामक्तनइतिकिम् द्विशिखः त्रिशिखः विभाषाक्ष्मन्तोम कर्मणिविषयेबहु
व्रीहौसमासेसंज्ञायाःपरः क्तनशब्दो विभाषांतोदात्तो भवति छिन्नकर्ण्या
हुमदेव्यः छिन्नकर्णोति यावाप्येव्यादौह्रनायचनः क्तनोकृणोति पश्च
तोदाहृनायचनः क्तनाम संज्ञायांमित्राजिनयोः संज्ञायांबहुव्रीहौ मित्रअजि
नशब्दयोरुत्तरपदयोरंतोदात्तो भवति देवमित्रः ब्रह्ममित्रः वृकाजिनः कृष्णा
जिनः कृष्णाजिनः संज्ञायामितिकिम् प्रियमित्रः महाजिनः व्यावापिनोनरस
व्यावायोव्यावृयानानरहावितिनः परमेतरेबहुव्रीहावंतोदात्तो भवति वक्तानरः व
सनोनरः पटानरः केवलानरः वत्समेतरेयावदयायकेयस्यसमवस्तानरः यवापि

नइतिकिम् आत्मोत्तरः आत्मा स्वभावोऽन्यो वा यस्यासावात्मोत्तरः सुखं स्वांगम्
मुखमुन्नतपदं स्वांगं वा विशेष्य बहुव्रीहावेतौ दान्ते भवति गौरमुखः भद्रमुखः स्वांग
मितिकिम् दीर्घमुखशाला स्वांगमुद्द्वादिलक्षणमित्युक्तत्वात् नाव्ययदिक्शब्द
गोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः अव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सश
ब्देभ्यः परं स्वांगं बहुव्रीहौ नान्तोदात्तं भवति उच्चैर्मुखः नीचैर्मुखः दिक्श
ब्द प्राङ्मुखः प्रत्यङ्मुखः गो गोमुखः महत् महामुखः स्थूल स्थूलमुखः मुष्टिमु
ष्टिकमुखः पृथु पृथुमुखः वत्स वत्समुखः पूर्वपदप्रकृतिस्वरे यथायोगमेतेषु
भवति गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पः प्रतिषेधेन बाध्यते
निष्ठोपमानादन्यतरस्याम् निष्ठान्तादुपमानवाचिनश्च सुखं स्वांगमुन्नतपदम
न्यतरस्यां बहुव्रीहावेतौ दान्ते भवति प्रक्षालितमुखः २ पदेन उन्नतपदान्तोदा
त्तेन भवति तदा निष्ठोपमयोः पूर्वो [illegible] मिति पदे पूर्वपदे तेनोदात्तेनैतद्भा
वपदेऽपि पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरो भवति तेन चोपसर्गादन्तानि ३५।

ॐ॰ काप्र॰ ८७५

माबात सिंहभवः २ व्याघ्रभवः २ जातिकालसुखादिभ्योनाच्छादनात्क्तोकृत
मितप्रतिपन्नाः जातिवाचिन आच्छादनवर्जिता कालवाचिनः सुखादिभ्यश्च परे
क्तोन्तेकृतमितप्रतिपन्नान्वर्जयित्वा बहुव्रीहावेनोदात्तो भवति शार्ङ्गरजग्धः प
लाण्डुभक्षितः सुरापीतः कालः मासयातः संवत्सरयातः अहर्यातः सुखादिभ्यः सु
खयातः दुःखयातः जात्यादिभ्य इति किम् पुत्रयातः आहिताग्न्यादिनात्वनिपा
तः अनाच्छादनादिति किम् वस्त्रच्छन्नः वसनच्छन्नः अकृतमितप्रतिपन्ना इति
किम् कुण्डकृतः कुण्डमितः कुण्डप्रतिपन्नः एतेषु बहुव्रीहिषु निष्ठान्तस्य पूर्वनिपा
तो न भवत्येतस्मादेव ज्ञापकात्षष्ठे प्रसदादृचोपूर्वपदप्रकृतिस्वरो योजयित
व्यः सुखादयस्तृतीयेऽध्याये पठ्यन्ते वा जाते जातपाण्डुरपदे न ते दात्तो भव
ति जातिकालसुखादिभ्यः दन्तजातः स्तनजातः २ कालात् मासजातः संवत्सर
जातः सुखादिभ्यः सुखजातः दुःखजातः २ नञ्सुभ्याम् नेमसर्वेषां स्तोपूर्वबहु
व्रीहावुत्तरपदमन्तोदात्तं भवति अयवदेशाः अव्रीहिः अमाषः अयवः अव्रीहिः।।

समाषः समासस्येत्युदंतोदात्तत्वमिष्यते समासांतोदात्तोत्तरपदार्थावयवाभवे
नीति अन्तस्थोवह्वन्यत्कृतेन समासांतोदात्तत्वं भवति कपिपूर्वम नञसु
भ्यांपरस्य कपिपरतः पूर्वमुदात्तत्वं भवति अकुमारीको देशः अवृषलीकः अ
ब्रह्मबंधुकः सुकुमारीकः सुवृषलीकः सुब्रह्मबंधुकः ह्रस्वान्तेन्त्यात्पूर्वं पद
म् यत्कपि ह्रस्वांतमुत्तरपदं समासे वा नत्यात्पूर्वमुदात्तं भवति नञसुभ्या
म् अयवको देशः अव्रीहिकः अमाषकः सुयवकः सुव्रीहिकः सुमाषकः
पूर्वमिति वर्तमाने पुनः पूर्वग्रहणं प्रकृतिभेदनियमप्रतिषेधार्थम् ह्रस्वान्ते
न्त्यात्पूर्वमुदात्तं भवति न कपि पूर्वमिति तेनात्र कः सुयत्तकः इत्यत्र कवेत
स्यैवांतोदात्तत्वं भवति बहोर्नञ्वदुत्तरपदभूम्नि उत्तरपदार्थबहुत्वे यो बहुश
ब्दो वर्तते तस्मान्नञ इव स्वरो भवति नञसुभ्यामित्युक्तं बहोरपि तथा भवति बहु
कुमारीकः बहुवृषलीकः बहुब्रह्मबंधुकः ह्रस्वान्तेन्त्यात्पूर्वमित्युक्तं बहोरपि त
था भवति बहुयवको देशः बहुव्रीहिकः बहुमाषकः नञो जरमरमित्रमृता

ॐ. काशि. ५२९

स्यान्तोदात्तत्वं स्वरोऽपि नञ्वत् भवति बहुदासः बहुमत्रः बहुमित्रः बहुमत्तः उत्तरपदभू
म्नीति किम् बहुषु मनोऽस्य बहुमनाः अयम् न गुणादयोऽवयवाः गुणादयोऽवय
वाचिनो बहुव्रीहौ नञ्वन्नोदात्ता भवन्ति बहुगुणा रज्जुः बहुपदेवत्पर्थः बहुतरपदा
म बहुस्कन्दः बहुसक्तः बहध्यायः गुणादिराकृतिगणो द्रष्टव्याः अवयवा इति
किम् बहुगुणो ब्राह्मणः अध्ययनश्रुतसदाचारादयो गुणाः उपसर्गात्
स्वाङ्गं ध्रुवमपर्शु उपसर्गादुत्तरं स्वाङ्गं ध्रुवं पर्शुवर्जितं मन्तोदात्तं भवति प्रपृ
ष्ठः प्रोदरः विषमम् प्रललाटः ध्रुवमित्येकरूपमुच्यते ध्रुवमस्य शीलमिति
यथा सततमेव यस्य प्रगतं पृष्ठं भवति स प्रपृष्ठः उपसर्गादिति किम् दर्शनी
यललाटः स्वाङ्गमिति किम् प्रशाखो वृक्षः ध्रुवमिति किम् उद्बाहुः क्रोशति
यस्य विनाशेन जीवति तद् ध्रुवम् अपर्श्विति किम् उत्पर्शुः विपर्शुः वनं समासे
समासमात्रे वनमित्येतदुत्तरपदमुपसर्गादन्तोदात्तं भवति प्रवणे यष्टव्यम्
निर्वणे प्रणिधीयते प्रनिर्वन्तर्निपातनम् समासग्रहणं समासमात्रपरिग्रहार्थम्

बहुव्रीहावेवेष्यते ॥ अंतः ॥ अंतःशब्दाच्चोत्तरपदमुपसर्गादंतोदात्तं भवति प्रांतः
पर्यंतः बहुव्रीहिरयं प्रादिसमासो वा ॥ न निविभ्याम् ॥ निविभ्यामुत्तरोंतश
ब्दोंतोदात्तो न भवति न्यंतः व्यंतः पूर्वपदप्रकृतिस्वरत्वे कृते यणादेशः उदा
त्तस्वरितयोर्यणः स्वरितोनुदात्तस्येति स्वरितो भवति ॥ परेरभितोभावि मंडलम् ॥
परेरुत्तरपदमभितोभावि वचनं मंडलं चांतोदात्तं भवति परिकूलम् परितीर
म् परिमंडलम् बहुव्रीहिरयं प्रादिसमासोव्ययीभावो वा अव्ययीभावपक्षेपि
हि परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेष्विति पूर्वपदप्रकृतिस्वरत्वं प्राप्तम् अनेन बा
ध्यते अभित इत्युभयतः अभितोभावो यस्यास्ति तदभितोभावि यच्चैवं स्वभावं कू
लादि तदभितोभाविग्रहणेन गृह्यते ॥ प्रादस्वांगं संज्ञायाम् ॥ प्रादुत्तरपदमस्वां
गवाचि संज्ञायामंतोदात्तं भवति प्रकोष्ठम् प्रघाणम् प्रद्वारम् अस्वांगमिति कि
म् प्रपदम् प्रहस्तम् संज्ञायामिति किम् प्रशाखो वृक्षः ॥ निरुदकादीनि च ॥
निरुदकादीनि च शब्दरूपाण्यंतोदात्तानि भवंति निरुदकम् निरुलपम् निम

ॐ· काश· ५७७

पलमितिकेचित्पठंति निर्म्मक्षिकम् निर्म्मशकम् यथाप्रादिसमासो बहुव्री
हिर्वा अव्ययीभावेतु समासांतोदात्तत्वेनैव सिद्धम् निष्कालकः निष्क्रान्तः काल
कादिनिकन्यमयोनेन कालशब्देन प्रादिसमासः निष्कालिका इति केचित्पठं
ति निष्कुषः उत्तरपिः अविद्यमानेत्रिभाइ इति निर्वी तवीप्सानी निवृत्तीयः कृति·
तस्त्रीयाद्युत्तरीयः निर्वीय इति केचित्पठंति अप्येति स्त्रीक इति नेतरीया
ह्यानेवहुव्रीहौ कप्रत्ययेति विराजितं उपाजिनम् परेः हस्तपादकर्षकेशाः
परिहस्तः परिपादः परिकर्षः परिकेशाः निकटकादिमात्रनियामाः अप्येतेव
म अप्येकृतांत्पुर्वपदमंतोदात्तं भवति अभिमुखः वोहुव्रीहिः प्रादिसमासो वा अव्य
यीभावेतु समासांतोदात्तत्वेनैव सिद्धम् उपसर्गात्स्वांगमिति किंदेवचनमिदम
वहुव्रीह्यर्थम अध्रुवार्थम स्वांगमिति यैव अभिमुखशाला अपाश्व अपाश्रो·
त्रपदंमस्वमंतोदात्तं भवति अपमुखः अपमुखम् अव्ययीभावोपात्रयेन·
यंति नत्रापि विपरिषत्सुपाण्यवर्ज्ज्यमानाहो राजाद्ययैर्वषिक्तम योगविभा·

गउत्तरार्थः स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च स्फिगपूतवीणाञ्जन
म् अध्वकुक्षिरित्येतान्युत्तरपदानि सीरनामानि नाम चाहेषु अपा देरुदात्ता
नि भवन्ति अपस्फिगम् अपपूतम् अपवीणम् अपाञ्जः अपाध्वा उपसर्गादध्व
न इति यदा समासान्तो नास्ति तदान्तोदात्तत्वं भवति तस्मिन् हि सत्यच्प्रत्ययस्य
चित्वादेव सिद्धम् अनित्यत्वं समासान्तस्येत्येतद्वज्ञापकम् कृति अपकुक्षिः सीर
नाम अपसीरम् अपहलम् नाम अपनाम सर्वत्र प्रादिसमासो बहुव्रीहिरव्य
यीभावो वा स्फिगपूतकुक्षिग्रहणमव्ययीभावार्थमसमासान्तार्थं च अधेरुपरिस्थ
म् अधेरुत्तरपदमुपरिस्थवाचि अन्तोदात्तं भवति अधिदन्तः अधिकर्णः अधिकेशः अ
ध्यारूढो दन्तः अध्यारूढो दन्तोऽधिदन्त इति प्रादिसमासः दन्तस्योपरि यो जातो दन्तो जा
यते सोऽधिदन्त इति उपरिस्थमिति किम् अधिकरणं कृत्स्नस्य पदं भवति अनोरप्र
धानकनीयसी अनोरुत्तरपदमप्रधानवाचि कनीयश्चान्तोदात्तं भवति अनुगतो
ज्येष्ठमनुज्येष्ठः अनुकनिष्ठः अनुमध्यमः एवं पदार्थप्रधानः प्रादिसमासोऽयम् क

गें·
काप्र·
४२८

नीयसम् अनुगतः कनीयान् अनुकनीयान् उत्तरपदार्थप्रधानोऽयं प्रधानार्थेवा
कनीयोग्रहणं अप्रधानकनीयसीति किम् अनुगतो ज्येष्ठः अनुज्येष्ठः पुरुषस्यान्वा
दिष्टः पुरुषस्यान्वादिष्टवाचीअनोरुत्तरेणोतोदान्तो भवति अन्वादिष्टः पुरुषः अनुपु
रुषः अन्वादिष्टो नावितः कथितानुकथितो वा अन्वादिष्ट इति किम् अनुगतः पुरु
षोऽनुपुरुषः अतेरक्रान्तदे अतेरुत्तरपदस्य क्रान्तलोपदर्शनाद्यातोदान्ते भवति अ
त्येक्रान्तो मालाः अतिक्रान्तोऽश्वः पदशाद्दः खल्वपि अतिपदा शक्वरी अतिपदा गाय
त्री अक्रान्ताद्य इति किम् अतिकारकः अपेर्थानलोपइति वक्तव्याम् इह मा भूत् ॥
शोभनो गार्ग्यो अतिगार्ग्यः इह च यथा स्यात् अतिक्रान्तः कारकम् अतिकारकः नेर्नि
पाने ॥ अतिपानेऽर्थे निष्पाक्रान्तस्य उत्तरपदस्य अन्तोदान्ते भवति निधानम् प्रकाशना
ततो न्यदनिधानम् प्रकाशनात्मित्यर्थः निमूलम् न्यप्तम् निल्वणम् बहुव्रीहिवि
षयेऽपि समासो वा अव्ययीभावेन समासोऽतोदान्ते नैनेच्छामिहम् अतिपान इति किम्
निवात्वप्लः निदेऽरः निदिनवान् निदिनदेऽरस्यर्थः निपाऽत्र निधानार्थे प्रवीति।

प्रादयोस्मिन्निविषये समास्यन्तेक्रियामाहुः प्रतेरंश्वादयस्तत्पुरुषे प्रतिशब्दा
त्परेंश्वादयस्तत्पुरुषेसमासेन्तोदात्ता भवन्ति प्रतिगतोंशुः प्रत्यंशुः प्रतिजनः प्रति
राजा राजशब्दः समासान्तस्यानित्यत्वाट्टज्नास्ति तदाप्रत्ययोनयति तस्मिन्हि
सति विहितादेशोन्तोदात्तत्वंसिद्धम् अंशुजनराजन् उष्ट्रखेटालक लेटक अजिरा
क आर्द्रा श्रवणा कृत्तिका अर्धपुर तत्पुरुषइतिकिम् प्रतिगता अंशवोस्य प्रत्यं
शुः रथः उपाद्व्यजजिनमगौरादयः उपादुत्तरं द्व्यच्कमजिनंचान्तोदात्तं भवति त
त्पुरुषेसमासे गौरादीन्वर्जयित्वा उपदेवः उपसोमः उपहोडः अजिन उपाजिनः
अगौरादय इतिकिम् उपगौरः उपतैषः गौर तैष तैल लेट लिट लोट जिह्वा कृष्णा क
न्या गुड कल्माष पाद तत्पुरुषइत्येव उपगतः सोमोयस्यासावुपसोमः सोरवक्षेपणे
सोरुत्तरपदमवक्षेपणेतत्पुरुषेसमासेन्तोदात्तं भवति इह खल्विकानीमाधेस्य
ढिलेन सफिगाभ्याम् सुशाहोऽप्रजायामेववाकार्था अवक्षेपणमसूय यातयाः
भिधानात् सोरितिकिम् कुब्राह्मणः अवक्षेपणादितिकिम् शोभनेषुतृणेषु सुतृणे

षु विभाषोत्तरे तत्पुरुषे शाहृतत्पुरुषे विभाषान्तोदात्तत्वं भवति उत्क्रान्तः पुरुषात् उत्पु
रुषः पुरुषमुत्पुरुषः २ यदा तु पुरुषमुदस्यते उत्पुरुष्यते तत्पुरुष्यते एवं तत्पुरुषः इति भ
वति तदा यथा यादिस्वरेणान्तोदात्तत्वं तेनान्तोदात्तत्वे प्राप्ते विकल्पोयं मेयपुरुषयत्र विभाषा
भवति तत्पुरुष इत्येव उदस्तपुरुषमस्यास्तु उत्पुरुषः द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ॥
द्वित्रिइत्येताभ्यामुत्तरेषु पात् दत् मूर्धन् इत्येतेषु यो बहुव्रीहि स्तत्र विभाषान्तो
दात्तो भवति द्विपात् २ त्रिपात् २ द्विदन् २ त्रिदन् २ द्विमूर्धा २ त्रिमूर्धा २ पादितिकृ
ताकारलोपः पादस्यान्तोपदत्वात् दत्ता इति कृतदत्तादेशस्य ग्रहणं मूर्ध्नि इति कृत
समासान्तस्य मूर्धशब्दः तेनेतयो जतनस्यापि समासान्ते तोदात्तत्वं यथा स्यादि
ति यतदेव ताप कमनित्यः समासान्तो भवतीति यदापि समासान्तः क्रियते तदा
पि बहुव्रीहेः कापि तास्तेकदेशिनां समासान्तोदात्तत्वं पक्षे भवत्येव द्विमूर्धः २
त्रिमूर्धः द्वित्रिभ्यामिति किम् कल्याणमूर्धा बहुव्रीहाविति किम् द्वयोर्मूर्धा द्विमू
र्धा सक्तुं वाकान्तात सक्थिमिति कृत समासान्तः सक्थिशब्दोन्तोदात्ते स बहुव्रीहौ अस

मासे सक्थं चाक्रान्तात्परो विभाषान्तोदात्तो भवति गौरसक्थः २ श्लक्ष्णसक्थः २ अक्रान्तादि-
ति किम् चक्रसक्थः वक्रसक्थः षचः चित्त्वान्नित्यमेवान्तोदात्तत्वं भवति परादिश्छन्दसि
बहुलम् छन्दसि विषये बहुलं परस्यादिरुदात्तो भवति परस्याह्नेन वाजसक्थमाह
एवं पूयते अञ्जिसक्थमालभेत नाभिलोमसक्थं ऋजुबाहुः वाक्पतिः चित्प-
तिः परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः
परादिरुदात्तः परान्तः अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम् ॥
त्रिचक्रेण त्रिबन्धुरेण त्रिवृता रथेन सृवीतः पूर्वपदान्तोदात्तप्रकरणे मरुद्वृधादी-
नां छन्दस्युपसंख्याने मरुद्वृधः सर्वादिः पूर्वपदाद्युदात्तप्रकरणे दिवोदासादीनां
छन्दस्युपसंख्यानम् दिवोदासाय गायत एवमादि सर्वमाद्युदात्तं भवति इति ज-
येन काशिकायां वृत्तौ षष्ठस्याध्यायस्य द्वितीयः पादः समाप्तः ॥ ॐ अलुगुत्तरपदे
अलुगिति च उत्तरपदे इति च एतदधिकृतं वेदितव्यम् यदित ऊर्ध्वमनुक्रमिष्या-
मो अलुगुत्तरपदे इत्येवं तद्वेदितव्यम् वक्ष्यति पञ्चम्याः स्तोकादिभ्यः स्तोकान्मुक्तः अ-

स्यात्मनः उत्तरपद इति किम् निष्क्रान्तः लोकात् निर्लोकः अस्माच्छेमिदमुत्तरपदग्र-
हणमिहाप्यलुको निवृत्तिं करोतीत्येवमर्थं लक्षणप्रतिपदोक्तपरिभाषा नाश्र-
यितव्या अलुगधिकारः प्रागानङः उत्तरपदाधिकारः प्रागङ्गाधिकारात् पंच-
म्याः स्तोकादिभ्यः स्तोकान्तिकदूरार्थकृच्छ्राणि स्तोकादीनि तेभ्यः पञ्चम्याः पंच-
म्या उत्तरपदे अलुग्भवति स्तोकान्मुक्तः अल्पान्मुक्तः अन्तिकादागतः अभ्याशादा-
गतः विप्रकृष्टादागतः दूरादागतः कृच्छ्रान्मुक्तः समासे कृते प्रातिपदिकत्वा-
न्मयोल्लुकि प्राप्ते प्रतिषेधः क्रियते द्विवचनबहुवचनान्तानां तु स्तोकादीनामनभि-
धानात्समासो न भवति तेन स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इति नात्र कदाचि-
दप्येकपद्यमैकस्वर्यं भवति ब्राह्मणाच्छंसिन उपसंख्यानं ब्राह्मणाच्छंसीति निर्ग्रो-
ह्मणाच्छंसीत्यृत्विग्विशेषस्यैकस्य विरूढिरियम् तस्यामुत्तरत्र समासः समासो वा
वचनार्थेन क्रियते ओजः सहोम्भस्तमसस्तृतीयायाः ओजस् सहस् अम्भस् तमस्
इत्येतेभ्य उत्तरस्यास्तृतीयाया अलुग्भवति ओजसाकृतम् सहसाकृतम् अम्भ-

sākṛtam tapasākṛtam ojasa upasaṃkhyānam ojasākṛtam puṃsānujo januṣāndha
ścopasaṃkhyānam puṃsānujaḥ januṣāndhaḥ manasaḥ saṃjñāyām manasa uttarasyās tṛtī-
yāyāḥ saṃjñāyām uttarapade 'lug bhavati manasāguptā manasāsaṅgatā saṃjñāyām iti ki-
m manodattā kanyā manoguptā kanyā ājñāyini ca ājñāyiny uttarapade manasa
uttarasyās tṛtīyāyā alug bhavati manasājñātuṃ śīlam asya manasājñāyī ātmanaś ca
pūraṇe ātmana uttarasyās tṛtīyāyāḥ pūraṇapratyayānta uttarapade 'lug bhavati ātma-
nāpañcamaḥ ātmanāṣaṣṭhaḥ tṛtīyāvidhāne prakṛtyādibhya upasaṃkhyānam iti tṛtīyā
tṛtīyeti yogavibhāgāt samāsaḥ ātmanā vā kṛtaḥ pañcamaḥ ātmanāpañcamaḥ katha-
m janārdanas tv ātmacaturtha eveti bahuvrīhir ayam ātmā caturtho yasya sa vā ātmacaturthaḥ
vaiyākaraṇākhyāyāṃ caturthyāḥ vaiyākaraṇānām ākhyā ākhyā saṃjñā tasyāṃ vaiyā-
karaṇākhyāyāṃ vartamāne 'ti tasyām ātmana uttarasyāś caturthyā uttarapade 'lug bhavati ātmane-
padam ātmanebhāṣaḥ tādarthye caturthī tādarthyād eṣeti yogavibhāgāt samāsaḥ parasya ca

ॐ · काशि · ५८

परशब्दाच्चतुर्थ्या वैयाकरणाख्यायामलुग्भवति उत्तरपदे परस्मैपदम्
परस्मैभाषः हलदन्तात्सप्तम्याः संज्ञायाम् हलदन्तादकारान्ताच्चोत्तरस्याः सप्त-
म्याः संज्ञायामुत्तरपदेऽलुग्भवति युधिष्ठिरः त्वचिसारः गविष्ठिरइत्यत्र गवि-
युधिभ्यां स्थिरइत्येतस्मादेव वचनादलुक् अदन्तात् अरण्येतिलकाः वनेकिं-
शुकाः वनेहरिद्रकाः वनेबल्वजकाः पूर्वाह्णेस्फोटकाः कूपेपिशाचकाः हल-
दन्तादिति किम् नद्यां कुक्कुटिका नदीकुक्कुटिका भूम्यां पाशः भूमिपाशः संज्ञाया-
मिति किम् अक्षशौण्डः हृद्युभ्यां ङेरलुग्वक्तव्यः हृद् दिव् इत्येताभ्यामुत्तरपदे
अलुग्भवति हृदिस्पृक् दिविस्पृक् कारनाम्नि च प्राचां हलादौ प्राचां देशे
यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तादुत्तरस्याः सप्तम्या अलुग्भवति
स्तूपेशाणः मुकुटेकार्षापणः दृषदिमाषकः हलेद्विपदिका हलेत्रिपदिका का-
रविशेषस्य संज्ञा एताः तत्पूर्वेणैव सिद्धे नियमार्थमिदम् एतेषु योगविभागो वि-
कल्पार्थेऽवश्येनकारनाम्न्येव प्राचामेव हलादावेवेति तत्र कारनाम्नीति किम् अ

अर्हितेपशुः अनर्हितपशुः कारादन्यस्मात्तु ह्येयस्य नाम प्राचामिति किम्
यूथेपशुः यूथपशुः हलादाविति किम् अविकटोरणः अविकटोरणः हा
लदन्तादित्येव नद्याकुटीहोनदीदोहः मध्याद्गुरौ मध्याउत्तरस्याः सप्तम्याः गु
रावुत्तरपदे अलुग्भवति मध्येगुरुः अन्ताच्चेति वक्तव्यम् अन्तेगुरुः सप्तमी
तियोगविभागात्समासः अमूर्धमस्तकात्स्वाङ्गादकामे मूर्धमस्तकवर्जिता
त्स्वाङ्गादुत्तरस्याः सप्तम्याः अकामउत्तरपदे अलुग्भवति कण्ठेकालास्य कण्ठेका
लः उरसिलोमा उदरेमणिः अमूर्धमस्तकादिति किम् मूर्धशिखः मस्तकशि
खः स्वाङ्गादिति किम् अक्षशौण्डः अकाम इति किम् मुखेकामोस्य मुखकामः हलन्ता
दित्येव अङ्गुलित्राणः जङ्घावलिः बन्धे च विभाषा बन्धइत्येतस्मिन्नुत्तरपदे हलदन्ता
उत्तरपदे हलदन्तादुत्तरस्याः सप्तम्या विभाषालुग्भवति हस्तेबन्धः हस्तबन्धः चक्रे
बन्धः चक्रबन्धः उभयत्रविभाषेयं स्वाङ्गाद्धि हलदन्ताद्धि पूर्वेण नित्यमलुक् प्राप्नोति
तस्य केचित्स्वाङ्गात्स्वाङ्गाच्च नेच्छन्ति हलदन्तात्प्राप्नोति हलदन्तादि

स्येवणमिभ्यःकारिकाभ्यः तत्पुरुषेकृतिबहुलम तत्पुरुषेसमासेकृदंतउत्तर
पदेसप्तम्याबहुलमलुग्भवति स्तंबेरमः कर्णेजपः नचभवति कुरुचरः मद्रच
रः प्रावृट्शरत्कालदिवांजे प्रावृष शरत कालदिव इत्येतेषांजेउत्तरपदे सप्त
म्याअलुग्भवति प्रावृषिजः शरदिजः कालेजः दिविजः पूर्वैस्सिद्धप्रपंचार्थमिद
म विभाषावर्षक्षरशरवरात वर्षक्षरशरवर इत्येतेभ्यः उत्तरस्याः सप्तम्याः
जेउत्तरपदेविभाषालुग्भवति वर्षेजः वर्षजः क्षरेजः क्षरजः शरजः वरजः
घकालतनेषुकालनाम्नः घसंज्ञकेकालशब्देतनप्रत्ययेचपरतःकालनाम्न
उत्तरस्याःसप्तम्याविभाषालुग्भवति पूर्वाह्णेतरे पूर्वाह्णतरे पूर्वाह्णेतमे
पूर्वाह्णतमे घ कालाः पूर्वाह्णेकाले पूर्वाह्णकाले तन पूर्वाह्णेतनः पूर्वाह्ण
तनः कालनाम्न इति किम शुक्लतरे शुक्लतमे हलदंतादित्येव रात्रितमाया
म उत्तरपदाधिकारेप्रत्ययग्रहणेषुतदंतविधिर्नेष्यतेलोपग्रहणात तेनच
तनग्रहणेनतदंतग्रहणंनभवति कालइतिस्वरूपग्रहणम शयवासवासि

ष्वकालात् शयवासवासिइत्येतेषूत्तरपदेष्वकालवाचिनउत्तरस्याः सप्तम्याविभा
षालुग्भवति खेशयः खशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी अ
कालादितिकिम् पूर्वाह्णशयः अपराह्णशयः हलदन्तादित्येव भूमिशयः अपोयो
नियन्मतिषुसप्तम्या अलुग्वक्तव्यः अप्सुयोनिः अप्सुमतिः अप्सव्यः अप्सुभवइ
तिदिगादिनायत्प्रत्ययः पूर्वत्रसप्तमीतियोगविभागात्समासः नेन्सिद्धवध्नाति
षु इन्नन्तेउत्तरपदेसिद्धशब्देवध्नातौचपरतः सप्तम्या अलुङ्नभवति स्थंडिलवर्ती
स्थंडिलशायी सिद्धसांकाश्यसिद्धः कांपील्यसिद्धः वध्नातिचक्रवद्धः चारकवद्धः स
प्तमीयोगविभागात्समासः वेय इतिकिं विड्डदाटवेति तत्पयाघः अप्रत्ययान्तइह
वास वचनेनाद्विर्येयेचविभाषेत्युक्तम् स्थेचभाषायाम् स्थेउत्तरपदेभाषायांसप्त
म्याःनालुग्भवति समस्थः विषमस्थः कूटस्थः पर्वतस्थः भाषायामितिकिम् कृष्णो
स्याखरेष्ठः पूर्वपदादितिषत्वम् षष्ठ्या आक्रोशे आक्रोशेगम्यमानेउत्तरपदेषष्ठ्या
अलुग्भवति चौरस्यकुलम् दासस्यकुलम् वृषस्यकुलम् आक्रोशइतिकिम् ब्रा

ॐ.
काशि.
५८२

ह्मणकुलम् षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदंडहरेषु यथासंख्यमलुग्व
क्तव्यः आमुष्यायणमामुष्यायणः नडादिभ्यः फक् आमुष्यपुत्रस्य भाव आमुष्यपु
त्रिका मनोज्ञादिभ्यो वुञ् इत्यत्र तथा आमुष्यकुलिकेति देवानांप्रिय इति च षष्ठ्या
अलुग्वक्तव्यः शुनःशेपः शुनःपुच्छः शुनोलाङ्गूलः दिवश्च दासे षष्ठ्या अलुग्व
क्तव्यः दिवोदासाय गायत पुत्रेऽन्यतरस्याम् पुत्रशब्द उत्तरपदे आक्रोशे गम्यमाने
षष्ठ्या अलुग्भवति अन्यतरस्याम् दास्याःपुत्रः दासीपुत्रः आक्रोश इत्येव ब्राह्म
णीपुत्रः ऋतो विद्यायोनिसंबन्धेभ्यः ऋकारान्तेभ्यो विद्यासंबन्धवाचिभ्यो योनि
संबन्धवाचिभ्यश्चोत्तरस्याः षष्ठ्या अलुग्भवति होतुःपुत्रः होतुरन्तेवासी पितुःपु
त्रः पितुरन्तेवासी ऋत इति किम् आचार्यपुत्रः मातुलपुत्रः ऋतो विद्यायोनिसंब
न्धेभ्यस्तत्संबन्ध उत्तरपदग्रहणं कर्तव्यम् विद्यायोनिसंबन्धवाचिन्युत्तरप
दे यथा स्यात् इह मा भूत् होतृधनम् पितृधनम् होतृगृहम् पितृगृहम्
विभाषा स्वसृपत्योः स्वसृपति इत्येतयोरुत्तरपदयोः ऋकारान्तेभ्यो विद्यायोनि

संवं वा विभ्य उत्तरस्याः षष्ठ्या विभाषा लुग्भवति पितुःष्वसा पितुःस्वसा पि
तृष्वसा मातुःष्वसा मातुःस्वसा मातृष्वसा यदा लुक् तदा मातृपितृभ्यां स्वसेति
षत्वं नित्यम् यदा न लुक् तदा मातुःपितुर्भ्यामन्यतरस्यामिति विकल्पेन षत्व
दुहितुःपतिः दुहितृपतिः ननान्दुःपतिः ननान्दृपतिः आनङृतो द्वन्द्वे ऋका
राणां विद्यायोनिसंबन्धवाचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वस्यानङादेशो भवति
होतापोतारौ नेष्टोद्गातारौ प्रशास्ताप्रतिहर्तारौ मातापितरौ याताननान्दरौ
नकारो रेफादिरपरत्वान्नित्यत्वार्थम् ऋत इति किम् मातृभ्रातरौ पुत्रेऽन्यत्रा
नुवर्तनेऽयेन इति च तेन पुत्रशब्दे उत्तरपदे ऋकारान्तस्यानङादेशो भवति पिता
पुत्रौ मातापुत्रौ देवताद्वन्द्वे च देवतावाचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वस्यानङा
देशो भवति इन्द्रावरुणौ इन्द्रायमौ इन्द्रापूषणौ इन्द्राबृहस्पती द्वन्द्व इति वर्त्तमा
ने पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यग्रहणार्थम् अत्यन्तसहचरिते लोकविज्ञा
ते द्वन्द्वमिति निपात्यते ततो यो लोके प्रसिद्धसाहचर्यो वेदे च सहवा निर्दिश्यते

ॐ.
काश.
५८५

घामित्युदाहरणम् तेन ब्रह्मप्रजापती शिवावैश्रवणाविति एवमादौ न भवति उभ
यत्र वायोः प्रतिषेधो वक्तव्यः अग्निवायू वाय्वग्नी ॥ ईदग्नेः सोमवरुणयोः ॥ सो
मवरुणयोरुत्तरपदयोः देवताद्वन्द्वे अग्नेरीकारादेशो भवति अग्नी
षोमौ अग्नीवरुणौ अग्नेः स्तुत्स्तोमसोमाः इति षत्वम् ॥ इद्वृद्धौ ॥ कृतवृद्धावुत्त
रपदे देवताद्वन्द्वे अग्नेरीकारादेशो भवति आग्निवारुणीमानडुहीमाल
भेत आग्निमारुतं कर्म क्रियते अग्नीवरुणौ देवते अस्याः अग्निमरुतौ देवता
स्येति विगृह्य तद्धितः तत्र देवताद्वन्द्वे चेत्युभयपदवृद्धौ कृतायामानङ् ईत्त्वं चा
बाधितुमिकारः क्रियते वृद्धाविति किम् उग्रेन्द्रः नेन्द्रस्य परस्येति वृद्धिः प्रतिषि
ध्यते ॥ इद्वृद्धौ विष्णोः प्रतिषेधो वक्तव्यः आग्नावैष्णवं चरुं निर्वपेत् ॥ दिवो द्यावा ॥ दि
व इत्येतस्य द्यावेत्ययमादेशो भवति देवताद्वन्द्वे उत्तरपदे द्यौश्च क्षामा च द्यावा
क्षामे द्यावाभूमी ॥ दिवसश्च पृथिव्याम् ॥ पृथिव्यामुत्तरपदे देवताद्वन्द्वे दिवो दिवस इ
त्ययमादेशो भवति चकाराद् द्यावा च द्यावापृथिव्यौ दिवस्पृथिव्यौ ॥ अकामोद्या

र।णोमकारस्याविकाराभावाप्रतिपत्त्यर्थम् तेन कृतादीनि न भवन्ति कथं घा
वादिदैर्घ्ये पृथिवीनमेनेकर्त्तव्यो ऽयत्नः ओघौघमः ओघस्यादेशो भवतु घमोदे
वतादैहेउत्तरपदे उषामानक्रम मातरपितरावुदीचाम् मातरपितरावित्युदी
चामरत्वादेशो मातृशब्दस्य निपात्यते मातरपितरौ उदीचामिति किम् मातापित
रौ पितरामातरा च छन्दसि पितरामातराइति च छन्दसि निपात्यते आमारात्वा
पितरामातरा च पूर्वपदस्यारात्वादेशो निपात्यते उत्तरपदे तस्यापो स्वलोपि त्वा
कारादेशः न च अस्त्रोः सर्वनामस्थानयोरिति ज्ञापोस्य च च्छेदसीति किम् मा
तापितरौ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियाम पूरणीप्रि
यादिषु भाषितः पुमान्येन समानायामाकृतावेकस्मिन्प्रवृत्तिनिमित्ते सभाषि
तपुंस्कः शब्दः तदेतदेवं कथं भवति भाषितः पुमान्यस्मिन्नर्थे प्रवृत्तिनिमित्ता
सभाषितपुंस्कशब्देनोच्यते तस्य प्रतिपादको यः शब्दः सोपि भाषितपुंस्कः ऊ
ङोभावोनूङ् भाषितपुंस्कादनूङ् उत्तरमिन् स्त्रीशब्दे समभाषितपुंस्कादनूङ् ब्रह्मबी

ॐ
काव्र
४८५

ह्रियं अलस्त्रुनिपातनात्पोवम्याः तस्य भाषितपुंस्कादनूङ् स्त्रीशब्दस्य पुंशब्दस्ये
वद्रूपं भवति समानाधिकरणे ऽन्यपदे स्त्रीलिंगे पूरणीप्रियादिवर्जिते दर्शनीय
भार्यः अनूङ इति दीर्घजंघः स्त्रिया इति किम ग्रामणिब्राह्मणकुलं दृष्टिरस्य
ग्रामणिदृष्टिः भाषितपुंस्कादिति किम खट्वाभार्यः समानायामाकृताविति
किम द्रोणीभार्यः कथं गर्भिभार्यः प्रसूतभार्यः प्रजातभार्य इति कर्तव्यो ऽन्य
त्वः अनूङिति किम ब्रह्मबन्धूभार्यः समानाधिकरण इति किम कल्याण्या मा
ता कल्याणीमाता स्त्रियामिति किम कल्याणी प्रधानमेषां कल्याणीप्रधाना
इमे अपूरण्यामिति किम कल्याणी पंचमी यासां रात्रीणां ताः कल्याणीपंचमा रात्रयः
प्रधानपूरणीग्रहणं किमर्थम इदमाभूत कल्याणीपंचमीकः पक्ष इति अप
पूरणीप्रमाण्योरित्यत्रापि प्रधानपूरणीग्रहणमेव तत्प्रत्ययो न भवति अप्रिया
दिष्विति किम कल्याणीप्रियः प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा समा स
चिवा दुहिता कान्ता बाला क्षमा भक्तिर्वामना चपला समाना तनया दृढभक्तिरित्येव

मादिषु स्त्री एवं पदविवक्षितत्वात्सद्भमितिसमाधेयम् तस्मिन्नादिष्वाकृतगणत्व
पंचम्यास्तसिलित्यतः प्रभृतिसंख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति प्रा
गेतस्माधेप्रत्यया विहितास्तेषु स्त्रियाः भाषितपुंस्कादनूङः पुंवद्भवति तस्या
शालायाः तत्रः तस्याम् तत्र यस्याः यतः यस्याम् यत्र तसिलादिपरिगणनेका
तेषाम् त्वतलौ तरप्तमपौ चरट्जातीयरौ कल्पब्देशीयरः रूपप्पाशपौ थम्
कालोदाल्हिलौ तिल्तातिलौ शसि बह्वल्पार्थात् पुंवद्भावो वक्तव्यः बह्वीभ्यो
देहि बहुशो देहि अल्पाभ्यो देहि अल्पशो देहि त्वतलोर्गुणवचनस्य पुंवद्भावो व
क्तव्यः पट्व्याः भावः पटुत्वम् पटुता गुणवचनस्येति किम् कठ्या भावः कठी
त्वम् कठीता तस्मान्नेह हित पुंवद्भावो वक्तव्यः भवत्याश्छात्राः भावत्काः भव
दीयाः ठक्छसोश्च क्यङ्परतः मानिनि च स्त्रियांभाषितपुंस्कादनूङः पुंवा
द्भवति एनी एतायते श्येनी श्येनायते मानिनि च दर्शनीयमानी अयमस्याः
दर्शनीयमानिनी इयमस्याः मानिनो ग्रहणमसमानाधिकरणार्थं च दर्शी

नीयां नित्त्वं प्रकृतिभावमात्मानं मन्यते दर्शनीयमानिनी स्त्रियाः पुंवदित्येनैवा-
सिद्धम् नकोपधायाः ककारोपधायाः स्त्रीशब्दस्य पुंवद्भावो न भवति पूर्वेणाप्रा-
प्तः प्रतिषिध्यते पाचिकाभार्यास्य पाचिकाभार्यः मद्रिकाकल्पा भूमिकाक-
ल्पा मद्रिकायते भूमिकायते मद्रिकामानिनी भूमिकामानिनी विलेपिका-
यायधर्म्यम् वैलेपिकम् कोपधप्रतिषेधे तद्धितवुग्रहणं कर्तव्यम् इह माभूत्
पाकाभार्यास्य पाकाभार्य इति संज्ञापूरण्योश्च संज्ञायाः पूरण्याश्च स्त्रियाः पुंव-
द्भावो न भवति दत्ताभार्यास्य दत्ताभार्यः गुप्ताभार्यः दत्तापाशा गुप्तापाशा दत्ता-
यते गुप्तायते दत्तामानिनी गुप्तामानिनी पूरण्याः खल्वपि पंचमीभार्यः दश-
मीभार्यः पंचमीपाशा दशमीपाशा पंचमीयते दशमीयते पंचमीमानिनी द-
शमीमानिनी वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ॥ वृद्धिनिमित्तं यस्मिन्
वृद्धिनिमित्तस्य च तद्धितस्य यदि रक्तेर्थे विकारे च न विहितस्तदंतस्य स्त्रीशब्दस्य
स्त्रियां न पुंवद्भवति स्रौघ्नीभार्यः माथुरीभार्यः स्रौघ्नीपाशा माथुरीपाशा स्रौघ्नी

यते माथुरीयते स्रौघ्नीमानिनी माथुरीमानिनी वृद्धिनिमित्तस्येति किम् मध्यम
भार्यः तद्धितस्येति किम् काण्डलाभार्यः वृद्धौ हियो यस्य इति किम् तावद्भार्यः या
वद्भार्यः अरक्तविकार इति किम् काषायेन रक्ता काषायी काषायी बृहतिका अ
काषायबृहतिकः लोहस्य विकारो लौही ईषा अस्य रथस्य स लौहेषः खादिरेषः स्वा
ङ्गाच्चेतोमानिनि स्वाङ्गाद् इत्यतो य ईकारस्तदन्तायाः स्त्रियाः न पुंवद्भवति अमानिनि
परतः दीर्घकेशी भार्या यस्य श्लक्ष्णकेशीयते स्वाङ्गादिति किम् पटुभार्यः ईत इति कि
म् नास्याः केशाः सन्त्यकेशा भार्या यस्य अकेशभार्यः अमानिनीति किम् दीर्घकेशमा
निनी जातेश्च जातेश्च स्त्रियाः न पुंवद्भवति अमानिनि कठीभार्यः बह्वृचीभार्यः
कठीपाशा बह्वृचीपाशा कठीयते बह्वृचीयते अमानिनीत्येव कठमानिनी ब
ह्वृचमानिनी अयं प्रतिषेधोऽयमेवाख्यानिकस्य पुंवद्भावस्य नेष्यते हस्तिनीनां स
मूहो हास्तिकम् पुंवत्कर्मधारयजातीयदेशीयेषु कर्मधारये समासे जातीयदे
शीययोः प्रत्यययोर्भाषितपुंस्काद् अनूङः स्त्रियाः पुंवद्भवति प्रतिषेधार्थोऽयमारम्भः

नकोपधाया इत्युक्तेनत्रापिभवति पाचकवृंदारिका पाचकजातीया पाचकदे
शीया संज्ञापूरण्योश्चेत्युक्तेनत्रापिभवति दत्तवृंदारिका दत्तजातीया दत्तदेशीया
पंचमवृंदारिका पंचमजातीया पंचमदेशीया वृद्धिनिमित्तस्यचतद्धितस्यारक्त
विकारे इत्युक्तेनत्रापिभवति स्रुघ्नमाथुरवृंदारिका स्रुघ्नमाथुरजातीया स्रुघ्नमा
देशीया जातेश्चेत्युक्तेनत्रापिभवति कठवृंदारिका कठजातीया कठदेशीया
भाषितपुंस्कादित्येव खट्वावृंदारिका ऊङित्येव ब्रह्मबंधूवृंदारिका कुक्कुट्या
दीनामंडादिषु पूर्ववद्भावो वा वक्तव्यः कुक्कुट्या अंडं कुक्कुटांडम् मृग्याः पदं मृगपद
म् मृग्याः क्षीरं मृगक्षीरम् काक्याः शावः काकशावः नवा अस्त्री पूर्वपदस्य विव
क्षितत्वात् स्त्रीत्वेन विना पूर्वपदार्थोऽत्र जातिसामान्येन विवक्षितः पूर्ववद्भावो ड्रस्य
तेविज्ञादिकेषु भवति विप्रतिषेधेनापि च कालिमन्या हरिणिमन्या घादिषु
पट्वितरा पट्वितमा पट्विकल्पा पट्विका मृद्विका इफ इउविद शावन हष उशि
न इत्येतेन न पटथाह्वाः तीत्रियवचनाः नत्रनदाजप्रमयस्त्रियामानप्रतिल्ल कि

कृते इउविद् ह्रेदासिका इति विग्रहसमासः क्रियते तत्पूर्वस्मादेव नयेइउविडादय ॥

